4·3

॥ श्रीः ॥

काव्यप्रदीपः

(काव्यप्रकाशस्य प्रतिच्छायाव्याख्या)

पदवाक्यप्रमाणपारीणसहृदयाग्रेसर-

श्रीमद्गोविन्दठक्कुरप्रणीतः,

व[illegible]ीयसम्राट्प्रतिष्ठापितसंस्कृतपाठशालीयदर्शन-
शास्त्राध्यापक [illegible]शास्त्रिभागवताचार्येण
परिशोधितः ।

वाराणसीपुर्याम्

डाक्टर् ई० जे० लाजरस्महाशयेन

स्वीयमेडिकल्हालनाम्नि यन्त्रालये समुद्र्य प्रकाशितः ।

१९४६ वै० – १८८९ ई० ।

PRINTED, PUBLISHED AND SOLD BY E. J. LAZARUS & CO.,
AT THE MEDICAL HALL PRESS, BENARES.
SOLD ALSO BY
JYESTHARAM MUKUNDJI, BOMBAY,
GANESH DAS AND CO. BENARES.

All rights reserved.] [मूल्यम् ३॥)

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रति नाथ झा
[illegible] १-२००३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ सामान्यसूची ॥

उल्लासे ।	निरूपणम् ।	पृ०	कारिकाः
प्रथमे,	काव्यप्रयोजन,कारण,स्वरूप,भेदनिरूपणम् ...	१–१० ।	५
द्वितीये,	शब्दार्थविभागा,र्थव्यञ्जना,वाचकशब्द,मतभेदभिन्न-सङ्केतितार्थ,लक्षणा,तन्मूलव्यञ्जना,ऽभिधामूलव्यञ्जनानिरूपणम्	१०–२९ ।	१५
तृतीये,	अर्थव्यञ्जकतानिरूपणम्	२९–३३ ।	३
चतुर्थे,	रसभावादिकासंलक्ष्यव्यङ्ग्या,ऽभिधालक्षणाव्यञ्जना-मूलशब्दार्थतदुभयोद्भवसंलक्ष्यक्रमादिभेदभिन्नध्वनि-नामकोत्तमकाव्यनिरूपणम्	३३–७८ ।	२१
पञ्चमे,	गुणीभूतव्यङ्ग्याख्यमध्यमकाव्यनिरूपणम्, व्यञ्जना-वृत्तिसंप्रतिष्ठापनञ्च	७८–१०३ ।	३
षष्ठे,	चित्राख्याऽधमकाव्यनिरूपणम्	१०३–१०५ ।	१
सप्तमे,	पदतदेकदेशवाक्यार्थादिसम्बन्धित्वभेदभिन्नदोषत-दपवादनिरूपणम्	१०५–१८८ ।	१७
अष्टमे,	गुणालङ्कारभेदनियतगुणनिर्णयः	१८८–२०० ।	१२
नवमे,	वैदर्भ्यादिरीतियमकादिशब्दालङ्कारनिरूपणम्	२००–२१७ ।	९
दशमे,	उपमाद्यर्थालङ्कारपरोक्ततद्दोषविशेषसंग्रहनिरूपणम्	२१८–३०३ ।	५
		सर्वाः	१४२ ।

॥ इति ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(श्रीरस्तु)

आभाषः ।

इह खलु प्राचीनेष्वर्वाचीनेषु गुरुषु लघुषु च परश्शतेषु साहित्यशास्त्रनिबन्धेषु सत्स्वपि दृश्यश्रव्योभयविधकाव्यव्याकृतिकृतिनि साङ्गोपाङ्गसाहित्यपदार्थसार्थसमष्टिसमुद्भासनभासुरे जाग्रत्यपि च साहित्यदर्पणप्रबन्धे निष्प्रतिबन्धं काव्यप्रकाशो नाम प्रबन्धराजः श्रीराजानकमम्मटभट्टकृतिः कृतिभिर्मीमांसान्यायव्याकरणादिशास्त्रव्यायामविनीतमतिभिः सहृदयहृदयाग्रेसरैः कोविदप्रवरैरध्ययनाध्यापनव्याख्यानदूषणभूषणप्रभृतिभिर्विविधाभिर्विधाभिरभितः प्रचुरप्रचारतां नीयमानो मानोन्नतिमतितरान्नीयते यथा, नो नाम तथेतरः· अत्र हि लोकोत्तरोदात्तमुद्रया सारार्थौदारगभीरगहनसंक्षिप्ताक्षरतया साहित्यशास्त्रीयप्रधानपदार्थमहास्कन्धाः शब्दार्थाभिधालक्षणाव्यञ्जनाध्वनिगुणीभूतव्यङ्ग्यदोषगुणालङ्कारादयः प्रतिक्षेपसमाधानादिभिर्न्यरूपयिषत तथा, यथा खल्वखिलेषु साहित्यग्रन्थेषु कृतमतयो निरर्गलं स्वयमेवाध्ययनाध्यापनादिक्षमा उतापि वा शास्त्रान्तरावबोधक्षमाः सम्पद्यन्ते ।

निबन्धश्चायं साहित्यदर्पणसाहित्यरत्नाकरादिभ्यः पुरातनः· निबन्द्धा खल्वस्य श्रीमान्राजानकमम्मटभट्टः काश्मीरकः· सोऽयं कश्मीराधीश्वरस्य यशस्करदेवमहाराजस्य समये बभूवेति केचित्· तथा हि, श्रीमदभिनवगुप्तस्य भ्राता मनोरथगुप्तो नामासीदित्याह स्म स एव

"भ्राता ममैव शिवशासनरूढचित्तः
प्रेप्सुः परात्मनि मनोरथगुप्तनामा ॥"—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति परात्रिंशिकातत्त्वविवरणे. मनोरथगुप्तश्च श्रीमतो यशस्कर-देवस्य धर्माध्यक्षोऽभूत्. यथाह स्म तन्त्रालोकविवेके जयरथः—

"श्रीमान् यशस्करनृपः सचिवं समस्त-
धर्मस्थितिष्वकृत पूर्णमनोरथाख्यम् ॥" इति

श्रीमानभिनवगुप्तश्चेतः प्राङ् नवमशतकस्य पूर्वार्द्धादूत इति

"इति नवतितमेऽस्मिन्वत्सरेऽन्त्ये युगांशे
तिथिशशिजलधिस्थे मार्गशीर्षावसाने ॥"—*

इतीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यान्तदीयोक्तित एवावगम्यते. अन्त्ये युगांशे तिथिशशिजलधिस्थे, ४११५ मिते कलियुगाब्द इत्यर्थः. नवतितमेऽस्मिन्वत्सरे इति तु काश्मीरकव्यावहारिकतदानीन्तनवर्षाभिप्रायेणोक्तमिति बोध्यम्. प्रकाशकृच्च श्रीमदभिनवगुप्तस्य शिष्यः स्यात्. यथाऽसौ काव्यप्रकाशे रसनिरूपणप्रकरणे श्रीमद्भट्टलोल्लटश्रीशङ्कुकभट्टनायकमतानि रसास्वादोदयविषयाण्युपन्यस्य तान्यरोचयंश्चरमं स्वसिद्धान्तभूतं मतं प्रतिपाद्याऽभ्यधात्—"इति श्रीमदाचार्याभिनवगुप्तपादाः." पादपदेन च निबन्द्धारो गुरून्व्यदिशन्तीति शिष्टाचारः सुप्रसिद्ध एव. तदेवं प्रकाशकृद्यशस्करदेवसमयेऽभूदिति लभ्यते इति ।

कश्मीराधीश्वरस्याऽनन्तदेवमहाराजस्य राज्यसमयवर्त्ती भवेदिति तु मम युक्तं प्रतिभाति. प्रकाशे उदात्तालङ्कारोदाहरणे हि "भोजनृपतेस्तत्त्यागलीलायित" मिति पठ्यते. महाराजः श्रीमान्भोजराजश्चानन्तदेवसमसमय इति ।

* प्रतीकत्रयमिदं श्रीविन्ध्येश्वरीप्रसादपण्डितेन वैशेषिकदर्शनभूमिकायां गृहीतम्, उक्तं च प्रकाशकृद्यशस्करदेवकालिक इति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तु श्रोतावारोपितौ यद्वेत्येवोच्यते"ति· तदेतत्तावन्न विचारचारु,*प्रकाशीयरससन्दर्भव्याकोपापत्तेः· तथाहि, "कारणान्यऽथ कार्याणी"त्यादिकारिकायुगलेन ग्रन्थकृत्स्वयं रसं निरूप्य स्वोक्तार्थेऽप्रामाण्यशङ्कां पराकर्त्तुमाह "उक्तं हि भरतेन, विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति"रिति· भरतमुनेरेव कारिकाकारित्वे तु तद्वचसैव तद्वचसः प्रामाणिकत्वसम्पादनं वृत्तिकृत उन्मत्तप्रलपितप्रायं सचेतसां चेतसि न खल्ववकाशमासादयितुमीष्टे· नच पूर्वोक्तप्रमाणवाक्यं तु भरतप्रणीतनाट्यशास्त्रे इत्यर्थकम्· नाट्यशास्त्रे च तस्य प्रकृतग्रन्थकारित्वाभावात्तदुक्तं भरतेनेत्येवमुक्तं नतु ग्रन्थकृतेति साम्प्रतम्, यतः, खल्वेतावताऽपि भोः 'तदुक्तं ग्रन्थकृता नाट्यशास्त्रे, इतीत्थं वक्तव्यमभू,न्न पुनः परोक्षवाचा· नैतावताऽपि पुनः सचेतनचरितवैदेशिकस्य तेनैव तत्प्रमाणनस्य कथमप्युत्तरं दत्तं भवति· एवम् "माला तु पूर्ववदि"तिकारिकायां रूपकप्रकरणे मालोपमातुल्यतया मालारूपकस्यातिदेशमुद्रया व्युत्पादनं कारिकायां वृत्तिकृत्प्रणीतत्वमन्तरा नतरामुपपद्यते,

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता ।
मम्लौ साऽथ विषादेन पद्मिनीव हिमाम्भसा ॥

—इत्येवं माला तु न लक्षिता, एवं विधवैचित्र्यसहस्रसम्भवादुक्तभेदानतिक्रमाच्चेत्येवं मालोपमायाः कारिकानुक्ताया वृत्तावेव निरूपणात्· नच "चिलोपे च समासगे"ति सूत्रस्थचकारेण समुच्चितेति सूत्रे लक्षिताया एवोत्तरत्रातिदेशोपयोगित्वमिति वाच्यम्, "माला तु न

* यद्यपि प्रकृतग्रन्थस्य (प्रदीपस्य) नास्त्येवंजातीयकवस्तुकृतो विशेष,स्तथाप्येवंलक्षणस्य विषयस्य बहुलविद्वज्जनजिज्ञासाविप्रतिपत्त्यादियस्ततया तन्निर्णयो भवति युक्तरूपः· श्रीमद्धेशचन्द्रन्यायरत्नमहाशयेन चायमर्थः काव्यप्रकाशभूमिकायामुट्टङ्कितो ऽपि नाऽशेषविशेषतो निर्णीतो माहेश्वरयुक्तिसमष्टिनिराकरणेनेति ममायमायासः प्रसक्तः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्षिते"तिवृत्तिविरोधापत्तेः· नच न लक्षितेत्यस्य न विशेषतोलक्षितेत्यर्थ इति वाच्यम्, एवं हि स्वारसिकार्थमपहाय कुसृष्टावभिनिवेशे बीजस्य वक्तव्यत्वापत्तेः, प्रत्युत रसग्रन्थव्याकोपापत्तिबाधितत्वात्· तुष्यतु भवानिति तथार्थाभ्युपगमेऽपि पूर्वं हि सूत्रकृता माला विशिष्य स्वयमलक्षिता कथमुत्तरत्रातिदेष्टुं शक्यते, विशेषोपदेशमन्तरा श्रोतुर्बुद्धावनारोहे सुतरामतिदेशासम्भवात्· सामान्यतोऽप्युपदेशश्चेह न वक्तुं शक्यः, उक्तभेदानतिक्रमाच्चेतिद्वितीयहेतोस्तथा सत्यऽकिञ्चित्करत्वापत्तेः· नहि खलूपदिशन्नेव स्वातन्त्र्येण सहृदयोऽन्तर्भावमन्यत्र तस्य शास्ति । किञ्चैवं सति गुणचयस्यैतदितरैरालङ्कारिकैरनुररीकारस्य कारणं नैवोपदर्शयितुं पारयिष्यति भवान्· मम तु प्राचीनैरेवंविधेषु सुसूक्ष्मेष्वर्थेषु साक्षात्खण्डनमखण्डनादिमुद्रया संक्षिप्तस्वीयसूत्रादिष्व*नुपदिष्टेष्वऽर्वाचीनानां नानाविधा गुणदोषादिविभागप्रकल्पनाः प्रवृत्ता इति तदनन्तरं प्रकाशकृता तत्सर्वं परिमीमांस्य युक्तियुक्तोऽनुभवविभवसाक्षिकः सुसंक्षिप्तः साहित्यसिद्धान्तकल्पः प्रकाशित इति सर्वं समञ्जसम्· अत एव च "तददोषावित्यादिकाव्यलक्षणादेः खण्डनाद्यऽर्वाचीनानामुपपद्यते† । यत्तूक्तं तदीयसंहितायामासां कारिकाणां दर्शनमिति, तत्तु चक्षुषी निमील्य· यतः,

---

* अलंकारसूत्रत्वेन प्रसिद्धानि शौद्धोदनिकृतानि वामनकृतानि च सन्ति· तत्र वामनसूत्राणि गद्यरूपाणि, शौद्धोदनिसूत्राणि ग्रन्थान्तराणि च कारिकारूपाणि ।

† यथा दर्पणे "तत्र कश्चित्,तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति, तच्चे"त्यादि ।

रसगङ्गाधरे च "यत्तु येनास्यभ्युदितेन चन्द्र······इत्यत्र समासोक्तिरनुप्राणिकेति मम्मटभट्टैरुक्तम्· तत्र विचार्यत"इत्यादि "परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिरिति समासोक्तेर्लक्षणस्य तैरेवोक्तत्वा"दित्यन्तम् ।

एवम्, "ग्रन्थकृत्संस्तौती"ति काव्यप्रदीपस्य ग्रन्थकृन्मम्मटभट्ट इत्युद्द्योतः ।
"तच्च तददोषौ शब्दार्थौ······इति प्रकाशकारेणोक्त"मिमि रसप्रदीपः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुचिरात्सर्वसमक्षया ऽनुपलभ्यमानायां तदीयसंहितायामेवमुक्तेः साहसमाचविलसितत्वात्. उपलभ्यमानग्रन्थभागे चानुपलम्भादेव. नहि न्यायालङ्कारः खलूपलब्धवा,न्न पुनर्दर्पणरसगङ्गाधरकारादयः साहित्यकाव्यादिपारदृश्वान इत्युच्यमानमप्यमानं कश्चन श्रद्धास्यति. शृङ्गारहास्येति रतिर्हासश्चेति श्लोकयोर्भरतसूचभूतयोर्ग्रहणे ऽपि न खलु तावता सर्वस्य कारिकासंदर्भस्य भरतीयत्वं वक्तुं शक्यम्, अन्यथा कर्णावतंसेतिपद्यस्य वामनवृत्तिस्थत्वेन तदीयत्वस्यापि वक्तव्यत्वापत्तेः । यच्च वृत्तिकृतः कारिकाकारित्वे तु परामृशामीत्येवमेवोचितत्वादिति, तदपि नोचितम्. परोक्षप्रिया इव हि देवा इतिन्यायेन "केनाप्यच मृगाचि राक्षसपतेः कृत्ता च कण्ठाटवी"तिवत् ग्रन्थकाराः संवृतिमुद्रयाऽऽत्मानं व्यपदिशन्ति,बादरायणः जैमिनिरित्यादि शास्त्रकाराः. अर्वाञ्चोऽपि च "ग्रन्थकृत्स्मरतिस्म अनुभवहेतुः सकल" इति. एवमेव साहित्यदर्पणमुक्तावल्यादिषु. नह्येषु भिन्नकर्तृकत्वं स्वप्नेऽपि प्रामाणिकाः शङ्कन्ते. प्रत्युत वयं तु समानकर्तृकेषु व्याख्येयव्याख्यानेषूत्तमपुरुषप्रयोगमेव नोपलभामहे । यच्चोक्तमत एवाष्टौ नाट्ये रसाः स्मृता इति कारिकायामष्टरसकथनेऽपि निर्वेदस्य प्रथमोपादानस्वरसेन नवमः शान्तरसो वृत्तावङ्गीकरिष्यते. कारिकाणां वृत्तिकृत्प्रणीतत्वे तु कारिकायामेव नवरसा भाव्येरन्" इति. तत्तु न किञ्चित्. "निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रस" इति कारिकायामेव शान्तः प्रतिपादित इति 'कारिकायामेव नव भाव्येर'न्नित्यहो अनर्थापत्तिविभीषिका. नचेदमर्द्धं प्रक्षिप्तमन्यथा पूर्वचैव नव स्युरिति वाच्यम्, सन्त्येव हि पूर्वच नव, "नवरसरुचिरा"मित्यच व्यक्तमेवोक्तत्वात्, निर्वेदेत्यर्द्धस्य प्रक्षिप्तत्वशङ्कायां तु केनाचरेण पुनर्वृत्तौ शान्तः किलोक्त इति प्रतिवक्तव्यत्वापत्तेश्च "शान्तोऽपीति, तस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्षणं विभावादयश्चोक्ता दर्पणे—”इति प्रतीकपूर्वकभवदुक्तेरेवास्मदर्थे प्रमाणत्वात्· एकत्र यन् नोक्ता,स्तत्तु नाट्ये एते ऽष्टौ रसा भूम्नाऽभिनेया भवन्तीति तान् प्रागभिधाय भूयः शान्तोऽपीति शान्तमप्याह· शान्तस्य एकीयविवादास्पदत्वादपि स्वातन्त्र्येण वाचोयुक्तिरेव युक्तिमती· इतरथा कथं मुनिप्रणीतत्वनये ऽपीदं श्रीमता समाधेयं स्यात्। यदपि च “समस्तवस्तुविषयं श्रौता आरोपिता यदेति समस्तवस्तुविषयकरूपककारिकायां श्रौता आरोपिता इति बहुवचनमविवक्षितमिति वृत्तावेव व्याख्यातम्· स्वीयकारिकात्वे तु श्रौतावारोपितौ यदेत्येवोच्येते”ति, तदप्यकिञ्चित्करम्, “वर्णाः पदं प्रयोगार्हा इति दर्पणपदलक्षणे वर्णा इति बहुवचनमविवक्षितमिति वदन्नपि स्वयंमूलकृत् वर्णौ वर्ण इति वा नाह, तथाऽत्रापि· संख्याया अविवक्षितत्वं तु सर्वथा ऽपि कर्त्तव्यमेव चे,त्तर्हि प्रायो बहुत्वविशिष्टविषयकोदाहरणसद्भावात्तथोक्तमिति को विशेष इति भवानेव भावयत्विति प्रतिज्ञामात्रं कारिकाणां भरतीयतावचः॥

तदित्थं श्रीमान्मम्मटभट्टराजानको नियतिकृतीत्याद्याभिः १४२द्विचत्वारिंशदुत्तरशतमिताभिः कारिकाभिः साहित्यशास्त्रसारं सूचयित्वा स्वयमेव ताः पुरुषान्तरदुरवबोधा बुद्ध्वा व्याचकार अथ परिकरालङ्कारान्तं व्याख्याय गीर्वाणगुरुसभासभाजितेऽस्मिन्नपरः कश्चन शेषं पर्याययामासेति श्रीतातचरणेभ्योऽशृणवम् प्राप्नवञ्चानन्दकविकृतनिदर्शनाख्यटीकास्थं पद्यं प्रमाणमपि

“कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः।
प्रबन्धः पूरितः शेषो विधायाऽल्लटसूरिणा॥”

इति· प्रबन्धः, व्याख्यायमानः काव्यप्रकाशग्रन्थ इत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशकारेण च शब्दव्यापारविचारो नाम ग्रन्थान्तरमपि प्रणीतम् "इह हेयोपादेयानां हानोपादाने प्रमाणादेव· तच्च निश्चयात्मतया प्रामाण्यं भजते· निश्चयश्च शब्दसाहित्येनार्थं विषयीकरोती"त्येवं तस्यारम्भे, समाप्तौ च "इति निखिलविपश्चिच्चक्रवर्तिश्रीराजानकमम्मटाचार्यविरचितः शब्दव्यापारविचारः समाप्तः" —इति भवति· शब्दव्यापारविचारस्तु लघुरेव ग्रन्थः । प्रथमतः शब्दव्यापारविचारः प्रणीतः पश्चात्तु काव्यप्रकाशः ।

तदेतन्निबन्धरत्नं प्रतीकोट्टङ्कनशून्यप्रव्यक्तार्थप्रतिनिधिवाक्यात्मकप्रतिच्छायापरपर्यायपरिवृत्तिमुद्रया पदेपदे ऽपेक्षितैस्तैस्तैः शास्त्रीयैर्विशेषैर्युक्तिकलापैश्चाप्याययन् विचक्षणचूड़ामणिः पदवाक्यप्रमाणेषु कृती सहृदयाग्रेसरठक्कुरोपनामा महामहोपाध्यायः श्रीमान्गोविन्दो विवृणोति स्म· तदिदं विवरणं काव्यप्रदीपः प्रदीप इति च व्यवह्रियते । प्रदीपकृच्चायं मैथिलब्राह्मणो भड़ौराग्रामे श्रीकेशवठक्कुराच्छोचियाख्याग्रजन्मप्रवराज्जन्म लेभे· इतः प्राक् पञ्चमशतकोत्तरार्द्धवर्त्त्ययमिति मन्यामहे * ।

पिता खल्वस्य केशवठक्कुरः, माता सोनोदेवी, श्रीहर्षश्च कनीयान्भ्राता, रुचिकरश्च वैमात्रेयो भ्राता †, पुत्राश्च विद्यापति,-

* मैथिलाः किल–८४६ इत्येकम्, ८८६ इत्यपरं तस्य संवत्सरं कथयन्ति न पुनर्निर्धारयन्ति कतरोऽत्र कीदृश (जन्मसम्बन्धीवा परिसमाप्तिसम्बन्धीवा) इति· मैथिलेषु व्यावहारिको वत्सर इदानीं १२६७ मितो वर्त्तते इति वयं ६.७.वयाम प्रथमो जन्मवत्सरः स्याद्द्वितीयस्तु समाप्तिवत्सरः ।

† "सोनोदेव्याः प्रथमतनयः केशवस्यात्मजन्मा श्रीगोविन्दो रुचिकरकवेः प्रेमपात्रं कनीयान्" इति काव्यप्रदीपप्रथमश्लोकाच्च "ज्येष्ठे सर्वगुणैः कनीयसि वयोमात्रेण······श्रीहर्षे त्रिदिवं गते" इति ग्रन्थोपान्तश्लोकाच्च स्फुटमेव· तत्र सोनोदेव्याः प्रथमतनयइति प्रतिज्ञातत्वाद्रुचिकरकविर्वैमात्रेयो ज्यायानिति व्यवतिष्ठते· श्रीहर्षश्चायं खण्डनखण्डखाद्यनैषधचरितादीनां निबन्द्धः कान्यकुब्जाधीश्वरीयश्रीहर्षा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधुसूदनो, जनार्दनो, नरसिंहश्चेति चत्वारः· सर्वे चैते श्रोत्रियाः· एवं ह्यत्र भवति सर्वजनीना प्रथा, यथा—श्रीमान्गोविन्दठक्कुरः खलु निसर्गत एवासीद् भगवन्नारायणचरणसंस्मरणाह्लादसुधाप्यायितान्तरङ्गः प्रह्लाद इव· बाल्येऽपि खल्वस्य भगवद्गुणगणानुस्मरणसुधांशुसमुल्लासेन प्रेमाम्भोधिरभिवर्द्धमानोऽमानिवाङ्गेष्वमन्दानन्दाश्रुपूरमिषतो नेत्रपात्रयोः परीवाहतामुवाह· अकृतभगवच्चरणानुस्मरणो न नाम शैशवेऽप्यकृताऽशनम्· न्याये च मीमांसायां च व्याकरणे चाधीती ज्यायसो भ्रातू रुचिकरकवेरेवान्तिके काव्येषु च साहित्यशास्त्रे च पारदृश्वतामुपार्जिजत्· भगवच्चरणपरिचरणचणश्चायमभ्यर्चनावसरे, यावन्निखिललक्ष्मोपपन्नौ भगवच्चरणौ न ध्यानपथातिथी अभूतां, न तावद् ध्यानाद्विरमन्नासीत्· प्रतिभातयोस्तु तयोः पुनः पाद्यादिसपर्यापर्याप्त्या पर्युपासीन आसीद्यावज्जीवम्· कदाचिदेकदाऽसौ पुरुषोत्तमक्षेत्रमभिप्रतस्थे· अथ कथमपि मध्येमहावनं सार्थभ्रष्टोऽवतमससमये किलाऽयं स्फारस्फुरत्स्फटाटोपविकटभोगेन केनचित्काकोदरेण प्रतिरुद्धमार्गो ग्रस्तम्मन्यो ऽन्यं विनिर्मोकोपायमपश्यन्नघासुरोदरकन्दरविवर्त्तिनां गोगोपालवत्सानामुद्धर्त्तारं भगवन्तं गोपालबालं प्रार्थयाम्बभूव—

"नाथ प्रार्थनया कया नहि मया भूयो भवानर्थितः,
कस्यां वा भवता कृपां कलयता चालस्यमध्यासितम् । *
निर्लज्जोऽस्मि तथाऽप्यनन्यशरणः श्रीमन्तमभ्यर्थये,
कालव्यालमुखान्तरालपतितं गोपाल ! मां पालय ॥"

भिन्नः यथा चेदं तथा खण्डनखण्डखाद्यभूमिकायां निरूपितं मया· रुचिकरोऽप्ययं रुचिदत्तादिभ्योभिन्न एव·

* नालस्यमध्यासितमिति प्रायो मैथिला आहु,स्तत्रतु 'भवता अकृपामिति पूर्वत्रच्छेदो द्रष्टव्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथाऽकस्मान्मयूरोऽदृश्यत कोकूयमानो, यमुपश्रुत्यैनं प्रति गम्भीरसंरम्भोऽपि सहसाऽपससर्प च विलिल्ये च क्वचन बिले स बिलेशयः, अयं च यथेष्टमिष्टं देशमभ्यवर्त्तिष्ट।

किञ्च, कदाचित् किल कस्यचिद्राज्ञस्सुतोऽभूद्ग्रहग्रस्तः, यं चिकित्सकाश्च तान्त्रिकमान्त्रिकाश्च स्वस्वौषधविद्याबलेन निर्मोचयितुमशक्ता भूयो भूयो राज्ञा विज्ञाप्यमानाश्च संप्रार्थ्यमानाश्च गूढोपहासमाहुः स्म, राजन्! गोविन्दमन्तरा नान्यः कश्चनैनमस्मासु मोचयितुं प्रभवतीति· राजा तु विह्वलहृदयत्वात्तमुपहासमपरिचिन्वन् स्वामात्याना-दिदेश, गोविन्दोऽन्विष्यताञ्चाकार्यताञ्च झगित्येवेति· कुत्र गोविन्दः कुत्र गोविन्द इति गवेषयन्तश्च ते तामासादयामासुश्च बलादिवाऽऽनिन्युश्च· राजा प्रार्थयत ब्रह्मन् उज्जीव्यतां मे सुतः, सवथा त्वां शरणं प्रपद्यामाहे· अथ गोविन्द आह स्म सस्मयञ्च सविस्मयं च, राजन् नाहं मान्त्रिकस्तान्त्रिको वा स्मि अहन्तु शास्त्रपण्डितोऽस्मि नात्रार्थे किञ्चिदपि कर्तुं क्षमः· भवान्नाम्ना विभ्राम्यति· नहि भगवतः कृतिमन्यथयितुं कृती जगतीतले कश्चन जनः· अथ भवान्यथाशक्ति प्रतिविदधातु पुरस्ता,त्परस्ताद्धातुरीहितसंकीर्त्तनं तावदास्तामिति निर्बन्धबन्धुरव्यापारे राज्ञि चायं दयापूराऽऽपूरेणेव परिवाहितनयनो दुःखकीलोत्कीलित इव च कष्टकाङ्क्षितकायो भगवन्तमिति ह स्म प्राह—

"दयालोरसमर्थस्य दुःखायेव दयालुता, ।
दीनोद्धारधुरीणस्य सा तवैकस्य शोभते ॥"

~~आकूत्य~~ चैवं दयावशोऽवशः पुरश्चर्यां सात्त्वकीमनुतष्ठौ च निर्मुमुचे च स राजपुत्रो ग्रहावेशादेष च दयाक्लेशात्—इति।

Dr: Urmila Sharma Collection, Varanasi

सोऽयमसौ विद्वद्वृन्दारको द्वौ प्रदीपौ द्वे च दीपिके जयन्त
ग्रन्थान्· तत्र काव्यप्रदीपोऽयमास्ते· अपरस्तु पूजाप्रदीपो नामाऽस्ति
तस्मिँस्त्वऽशेषविशेषवती देवपूजेतिकर्त्तव्यता च तदङ्गोपाङ्गस्नानस
न्ध्योपासनादिश्च निरूपितौ स्तः· दीपिकयोस्त्वेका उदाहरणदीपिक
नाम, या काव्यप्रदीपे प्रतिच्छायारूपव्याख्याशैलीस्वीकारात्प्रकाशो
दाहरणानां व्याख्यातुमपारितानां व्याख्याभूताऽस्ति· अपरा तु का
सा (दीपिका) इति मैथिलेभ्यो जिज्ञासितेऽपि न वयमिदानीं याव
दुपलभामहे· अन्याप्यस्तीति तु स्वयमाहास्यैवान्ते—

"दीपिकाद्वितयं कन्ये प्रदीपद्वितयं सुतौ ।
स्वमतौ सम्यगुत्पाद्य गोविन्दः शर्म विन्दति" ॥ इति

प्रायः प्रकाशनिर्माणात्परस्तान्नाऽभूवन् न्यायमीमांसादिशास्त्र
धुरीणा, ये एनन्नापठन्नापीपठन्वा, तदित्थमस्य भूयिष्ठाः सन्ति टीका
बह्व्यश्चास्माभिः पठिताश्च दृष्टाः श्रुताश्च, तथाप्यस्य काठिन
पदेपदे शास्त्रीयेष्वर्थेषु नापैति प्रदीपादृते इति प्रकाशहार्दसर्वस्वम
वबुभुत्सूनां प्रकाशस्याध्येतॄणामध्यापयितॄणां च सौकर्यसंपिपादयिषुणा
परश्शतकार्यभारमन्थरमनोरथेन मया चिरराचाय स्थितम्· अथ श्री
मता ऽस्मदुपाध्यायराममिश्रशास्त्रिवर्येण बहुशः प्रोत्साह्यमान
साम्प्रतिकात्यत्रप्रधानसंस्कृतपाठशालाध्यक्षेण संस्कृतकृतविद्येन वि
द्योदयानुरागिणा विद्वज्जनसन्तोषसंभृतादरेण श्रीमता आर्थर् वीनि
एस्· ए· प्रभुणा चानुज्ञातोऽहमेतस्य संस्करणे प्रावृतम्· अस्मिंश
संस्करणे प्रदीपस्य त्रीणि पुस्तकानि ममान्तिके सन्ति, एकमत्रत्यपाठ
शालीयसाहित्यशास्त्राध्यापकश्रीयुतगङ्गाधरशास्त्रिणाम्, द्वितीयमत्र
त्यपुस्तकालयाधिकृतश्रीपण्डितविन्ध्येश्वरीप्रसादस्य तृतीयं गौडाचार

CC0. In Public Domain, Digitizagtion by eGangotri

लिखितमेतत्पाठशालीयपुस्तकालयस्यैव· चतुर्थं तु खण्डितमिव मदीयमेवाऽस्ति· प्राङ्निर्दिष्टानि चैतानि त्रीण्यपि पुस्तकानि प्रायः-शुद्धानि सन्ति, तुरीयन्तु नातिशुद्धम्·

प्रदीपस्य च टीका अपि मया गवेषिताः, प्राप्ते च महोपाध्यायनागेशभट्टस्योद्द्योत इत्येका, वैद्यनाथमहोपाध्यायस्य चापरा-तचोभयोरेकाऽपि विशुद्धा नाधिगता पुस्तकतो, नच सुपर्यप्राप्या दृष्टा ग्रन्थतो यदा, तदा, टीकामस्यान्यदाऽप्याप्याय्य मुद्रयिष्यामि प्रदीप-पुस्तकदौर्लभ्यप्रयुक्तप्रकाशार्थसार्थयथार्थावबोधप्रत्यूहव्यूहापोहस्तु तावदास्तामित्यालोच्य तत्तत्पुस्तकादिपाठापपाठविवेचनपूर्वकं प्रदीप-मात्रं संशोध्याऽङ्कनां लम्भयितुं प्रावर्त्ते ।

यः साधुपाठः स मूले स्थापितः पुस्तकान्तरोपलब्धानि पाठान्तराणि त्वधष्टिप्पण्यां दर्शितानि, तथा पुस्तकेष्वनुपलब्धा अपि उदाहरणादीनां मूलपुस्तकेषु येकेचिद्विलक्षणाः पाठा,स्तेऽपि दर्शिता इतीत्थं साम्प्रतं पाठमात्रमच पुस्तके मया प्रादर्शि· प्राकृतोदाहरणपद्यानां प्रतिच्छाया अन्ते उपन्यस्ताः· प्रतिपाद्यानां विषयाणां निरूपणानुसारिणी च वर्णक्रमानुसारिणी च सूची दत्ता· शुद्धिपत्रमपि विशेषाशुद्धीनां दत्तम्· तदेवं संशोधनादिसंस्कारे संपाद्यमाने ऽप्यत्र मुद्रकादिदोषेण वा ममैव दृष्टिदोषेण मतिदोषेण वा यदशुद्धं स्यात्तच्छोधयन्तो विद्वांसः हृदयालुदयालवोऽधुना खल्वेनेन प्रकाशार्थसार्थसंप्रकाशमश्नुवानाः प्रदीपकृतमभ्यर्चन्तु सबहुमानसाधुवादैरित्यर्थ्यते

रामशास्त्रिभागवताचार्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अनुक्रमणी ॥

अथ प्रथमोल्लासः १—१०

विषयः।	पृष्ठे	पङ्क्तौ
तत्र तावत्स्वप्रत्यभिज्ञानमङ्गलश्लोकः प्रदीपकृतः	१	८
मूलमङ्गलश्लोकः ..	१	१५
काव्यस्य प्रयोजनानि ..	३	६
,, कारणम् ..	४	८
,, स्वरूपम् ..	५	३
उत्तमकाव्यम् (ध्वनिः) ..	७	१२
मध्यमकाव्यम् (गुणीभूतव्यङ्ग्यम्)	८	१६
अधमकाव्यम् (चित्रम्) ..	९	४

अथ द्वितीयोल्लासः १०—२९

विषयः।	पृष्ठे	पङ्क्तौ
शब्दभेदाः	१०	११
अर्थभेदाः	,,	१४
तात्पर्यार्थः	,,	,,
अर्थव्यञ्जकता	११	२
वाचकशब्दः	,,	२२
वाच्यार्थनिर्णयः ..	१२	२२
अभिधाविचारः ..	,,	२३
लक्षणा	१५	२२
उपादानलक्षणा ..	१६	२३
लक्षण-लक्षणा ..	,,	,,
आक्षेपार्थापत्तिस्थले लक्षणावादनिरासः	१७	१५
लक्षणायां प्रयोजनप्रतीतिः	१८	१७
सारोपा लक्षणा ..	१९	८
साध्यवसाना	,,	१४
गौणी, शुद्धा	,,	२१
गौर्वाहीक इत्यत्र लक्ष्यार्थनिर्णयः ..	२०	४
लक्षणायाः षड्विधत्वम् ..	२१	६
लक्षणाया व्यङ्ग्यराहित्यसाहित्ये	२१	१६
गूढव्यङ्ग्याऽगूढव्यङ्ग्ये ..	२१	२३
लक्षणायास्त्रैविध्यम् ..	२२	२५
लाक्षणिकशब्दः ..	२३	२
लक्षणामूलव्यञ्जनाव्यवस्थापनम् ..	,,	१०
अभिधामूला व्यञ्जना ..	२६	५
संयोगादिनैकार्थनियमनम्	,,	१५
व्यञ्जकशब्दः	२९	९
शब्दस्य व्यञ्जकतायामर्थस्य सहकारिता	,,	१४

अथ तृतीयोल्लासः २९—३३

विषयः।	पृष्ठे	पङ्क्तौ
आर्थी व्यञ्जना ..	३०	३
वक्त्रादीनां वैशिष्ट्ये व्यञ्जनस्योदाहरणानि ..	,,	२०
अर्थस्य व्यञ्जकतायां शब्दस्य साहाय्यम्	३२	१५

अथ चतुर्थोल्लासः ३३—७८

विषयः।	पृष्ठे	पङ्क्तौ
अविवक्षितवाच्यध्वनिः अर्थान्तरसंक्रमितवाच्यध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिः	३४	१३
विवक्षितान्यपरवाच्यध्वनिः	३६	२
असंलक्ष्यक्रमव्यङ्ग्यध्वनिः ..	,,	५
विभावानुभावव्यभिचारिणः	,,	१९
रसस्वरूपम्	,,	२२
रसनिष्पत्तिप्रकारो भट्टलोल्लटादिसम्मतः	३७–	२७
श्रीशङ्कुकसम्मतः ..	३८	१३
भट्टनायकसम्मतः ..	३९	१७
अभिनवगुप्तसम्मतः ..	४०	१३
रसविभागः	४४	१५
रसानामुदाहरणानि ..	४५	१३
स्थायिभावाः	४८	२६
व्यभिचारिभावोद्देशः ..	४९	११

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयः ।	पृष्ठे	पङ्क्तौ
व्यभिचारिभावलक्षणानि	४६	२१
शान्तरसः	५३	६
भावः	५४	४
रसाभासभावाभासौ ..	५५	२
भावस्य शान्तिरुदयः सन्धिः शवलता च	५६	३
भावशान्त्यादीनां क्वचित् प्राधान्यम्	५७	११
संलक्ष्यक्रमव्यङ्ग्यध्वनिः ..	,,	१५
शब्दशक्त्युत्थध्वनिः ..	५८	२
शब्दशक्त्युत्थालङ्कारध्वनेरुदाहरणम् ..	५८	६
शब्दशक्त्युत्थवस्तुध्वनेरुदाहरणम्	५६	१२
अर्थशक्त्युत्थध्वनिविभागः	,,	२४
अर्थशक्त्युत्थध्वनिप्रभेदानाम् उदाहरणानि ..	६०—६३	
शब्दार्थोभयशक्त्युत्थध्वनिः	६४	२
शब्दशक्त्युत्थार्थशक्त्युत्थध्वनीनां पदगतत्वप्रतिपादनम्	,,	२५
पदगतव्यङ्ग्योदाहरणानि	६५—७०	
अर्थशक्त्युत्थध्वनीनां प्रबन्धगतत्वप्रतिपादनम्	६५	१४
रसादेः पदैकदेशरचनावर्णगतत्वप्रतिपादनम्	७१	५
रसादेः प्रबन्धगतत्वप्रतिपादनम्	,,	६
एतदुदाहरणानि ..	७१—७५	
ध्वनेः शुद्धभेदगणनम् ..	७५	२७
ध्वनेः संसृष्टिसङ्करौ ..	७६	७
ध्वनेः संसृष्टिसङ्कराधीना संख्या	,,	६
ध्वनेर्भेदसमष्टिः ..	७७	१३
अथ पञ्चमोल्लासः	**७८—१०३**	
गुणीभूतव्यङ्ग्यकाव्यप्रभेदोक्तिः	७८	१३
अगूढव्यङ्ग्यनिरूपणम् ..	७६	२
अपराङ्गव्यङ्ग्यनिरूपणम् ..	,,	२६
वाच्यसिद्ध्यङ्गव्यङ्ग्यनिरूपणम्	८२	८
अस्फुटव्यङ्ग्यनिरूपणम् ..	८३	२३
सन्दिग्धप्राधान्यव्यङ्ग्यनिरूपणम्	८४	३
तुल्यप्राधान्यव्यङ्ग्यनिरूपणम्	८४	१०
काक्वाक्षिप्तव्यङ्ग्यनिरूपणम्	८४	११
असुन्दरव्यङ्ग्यनिरूपणम् ..	,,	२०
गुणीभूतव्यङ्ग्यस्य ध्वनिवत् प्रभेदः	८४	२५
वस्तुव्यङ्ग्यालङ्कारस्य न गुणीभूतव्यङ्ग्यता ..	८५	३
ध्वनिगुणीभूतव्यङ्ग्ययोः सङ्करः	८६	६
प्रकारान्तरेण ध्वनेस्त्रैविध्यम्	,,	१२
व्यञ्जनावृत्तिसंस्थापनम् ..	,,	२५
अन्विताभिधानवादिमतेन संकेतग्रहणशब्दबुद्धिप्रकारनिरूपणम् ..	८७	६
शब्दश्रवणानन्तरप्रतीतसमस्तार्थविषयकाभिधावादिमतनिरासः ..	८८	१४
"यत्परः शब्दः सशब्दार्थ" इति तात्पर्यार्थाभिधेयतावादनिरासः ..	८६	
इषुवद्दीर्घदीर्घतराभिधाव्यापारवादनिरासः ..	६०	
प्रसङ्गतः "श्रुतिलिङ्गवाक्यप्रकरणे"ति पूर्वमीमांसासूत्रस्य सोदाहरणव्याख्यानम्	,,	
तत्र श्रुतिलिङ्गविरोधे लिङ्गदुर्बलत्वोदाहरणम् ..	६१	१३
लिङ्गवाक्यविरोधे लिङ्गदु०	६२	१८
वाक्यप्रकरणविरोधे प्रकरणदु०	६३	२
प्रकरणस्थानयोर्विरोधे स्थानदु०	६४	२
स्थानसमाख्ययोर्विरोधे समाख्यादु०	६५	१
व्यञ्जनास्वातन्त्र्यसाधकार्थाः	६६,१६-६६	
लक्षणातोऽपि व्यञ्जनिकार्थगतार्थत्वासंभवव्यवस्थापनम्	६६	
व्यञ्जनाया वेदान्तिमतव्यतोक्तिः	१०१	१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयः ।	पृष्ठे	पङ्क्तौ
नैयायिकनयोपदर्शनपुरस्सर-पराकरणम् ..	१०१	२१
अथ षष्ठोल्लासः	१०३–१०५	
शब्दचित्रार्थचित्रयोः .. स्वरूपप्रदर्शनम् ..	१०३	१७
शब्दार्थचित्रयोः क्रमेणोदाहरणे	१०४	१६
शब्दार्थचित्रयोर्बहुभेदताकीर्त्तनम	१०५	४
अथ सप्तमोल्लासः	१०५–१८८	
दोषसामान्यलक्षणम् ..	१०५	१६
पददोषविभागः ..	१०७	२०
तत्र श्रुतिकटुतानिरूपणम्	१०८	११
च्युतसंस्कार „ ..	१०९	७
अप्रयुक्तत्व „ ..	„	२३
असमर्थत्व „ ..	११०	११
निहतार्थत्व „ ..	„	१९
अनुचितार्थता „ ..	१११	२
निरर्थकता „ ..	„	१०
अवाचकता „ ..	„	२२
अश्लीलता „ ..	११३	८
सन्दिग्धता „ ..	११४	१४
अप्रतीतत्व „ ..	„	२३
ग्राम्यत्व „ ..	११५	६
नेयार्थत्व „ ..	„	२०
क्लिष्टत्व „ ..	११६	४
विधेयाविमर्श „ ..	„	२२
विरुद्धमतिकारिता „ ..	११९	७
पददोषाणां केषाञ्चित् वाक्यपदांशगतत्वप्रतिपादनम्	१२०	११
वाक्यगतपददोषाणामुदाहरणानि ..	१२१	६
प्रसङ्गतो यत्तच्छब्दयोः साकाङ्क्षतानिराकाङ्क्षताविचारः	१२५	३
पदांशगतदोषाणामुदाहरणानि	१२८	२२
अप्रयुक्तादीनामसामर्थ्यरूपत्वेऽपि पृथगुक्तिबीजप्रदर्शनम् ..	१३१	२१
वाक्यदोषविभागः ..	१३२	५

विषयः ।	पृष्ठे	पङ्क्तौ
तत्र प्रतिकूलवर्णतानिरूपणम्	१३२	१२
उपहतविसर्गतालुप्तविसर्गता च	१३३	५
विसन्धिता „ ..	„	१०
हतवृत्तता „ ..	१३५	
न्यूनपदत्व „ ..	१३७	८
अधिकपदत्व „ ..	„	२२
कथितपदत्व „ ..	१३८	१४
पतत्प्रकर्ष „ ..	„	२३
समाप्तपुनरात्तता „ ..	१३९	५
(इयमेव समाप्तपुनरुपादानमप्याख्यायते)		
अर्द्धान्तरैकवाचकता „ ..	„	१७
अभवन्मतयोग „ ..	१४०	२
अनभिहितवाच्यता „ ..	१४४	२
अस्थानस्थपदता „ ..	१४५	११
अस्थानस्थसमासता „ ..	१४६	७
सङ्कीर्णता „ ..	„	१८
गर्भितता „ ..	„	२५
प्रसिद्धिहतता „ ..	१४७	१७
भग्नप्रक्रमता „ ..	१४८	५
उद्देश्यप्रतिनिर्देश्यभावस्थले कथितपदस्य गुणतोक्तिः	१४८	१३
अक्रमतानिरूपणम् ..	१५१	१८
अमतपरार्थता ..	१५२	२३
अर्थदोषविभागः ..	१५३	११
तत्राऽपुष्टार्थतानिरूपणम् ..	„	१७
कष्टार्थता „ ..	१५५	१०
व्याहतार्थत्व „ ..	„	२३
पुनरुक्तत्व „ ..	१५६	६
दुष्क्रमत्व „ ..	१५७	१४
ग्राम्यार्थता „ ..	„	२५
सन्दिग्धार्थता „ ..	१५८	१०
निर्हेतुता „ ..	„	२४
प्रसिद्धिविरोध „ ..	१५९	१४
प्रसिद्धिविरोधस्य कविसमयसिद्धत्वे दोषत्वाभावोक्तिः	„	२०
विद्याविरोधोदाहरणम् ..	१६०	१३
अनवीकृततानिरूपणम् ..	१६१	१४
सनियमेऽनियमता „ ..	१६२	७

Dr. Urmila Sharma Collection, Varanasi

विषयः ।	पृष्ठे	पङ्क्तौ
अनियमे सनियमता „ ..	१६३	४
विशेषाविशेषता „ ..	„	१२
अविशेषे विशेषता „ ..	„	२१
साकाङ्क्षता „ ..	१६४	६
अपदयुक्तता „ ..	१६५	२
सहचरभिन्नता „ ..	„	१८
प्रकाशितविरुद्धता „ ..	१६६	२
विध्ययुक्तता „ ..	„	२०
अनुवादायुक्तता „ ..	१६७	४
त्यक्तपुनःस्वीकृतत्व „ ..	„	१२
अश्लीलार्थता „ ..	„	२१
कर्णावतंसादिपदे पौनरुक्त्यस्य दोषत्वाभावप्रतिपादनम्	१६८	६
अभियुक्तप्रयुक्तस्य ततोऽन्यत्र पौनरुक्त्यस्य दोषत्वोक्तिः	१६९	१६
विशेषणदानार्थं क्वचित् पौनरुक्त्यस्य दोषत्वाभावकीर्तनम्	„	१९
प्रसिद्धिसत्त्वे निर्हेतोरदुष्टतोक्तिः	१७०	१२
अनुकरणे सर्वेषामदोषतोक्तिः	„	२१
दोषाणाम् क्वचिददोषता गुणता चेति विवेचनम्	१७१	६
क्वचित् कष्टताया गुणता ..	„	९
क्वचित् कष्टता न दोषो न गुणः	१७२	१७
अप्रयुक्तनिहतार्थत्वयोः क्वचिददोषत्वप्रतिपादनम्	१७३	५
अश्लीलत्वस्य क्वचिद्गुणत्वप्रतिपादनम् ..	„	१५
सन्दिग्धत्वस्य क्वचिद्गुणताप्रतिपादनम् ..	१७४	४
अप्रतीततायाः क्वचिद्गुणत्वप्रतिपादनम् ..	„	१०
ग्राम्यत्वस्य „ ..	„	२४
न्यूनपदत्वं गुणः „ ..	१७५	५
न्यूनपदत्वस्य क्वचिदुदासीनत्वप्रतिपादनम् (न गुणत्वं न वा दोषत्वम्) ..	„	११
अधिकपदत्वस्य क्वचिद्गुणत्वप्रतिपादनम्	„	२१
कथितपदत्वस्य क्वचिद्गुणत्वप्रतिपादनम्	१७६	१२
पतत्प्रकर्षस्य क्वचिद्गुणत्वप्रतिपादनम्	„	२७
समाप्तपुनरात्तत्वस्य क्वचिदुदासीनत्वप्रतिपादनम्	१७७	३
अस्थानस्थसमासस्य क्वचिद्गुण०	„	६
गर्भितत्वस्य क्वचिद्गुण०	„	१०
अथ रसदोषाणामुद्देशः	„	१७
तत्र व्यभिचारिणः स्वशब्दवाच्यत्वनिरूपणम्	„	२४
रसस्य स्वशब्दवाच्यत्वनिरूपणम् ..	१७८	२५
स्थायिनः स्वशब्दवाच्यत्वनिरूपणम् ..	१७९	९
कष्टकल्पनयाऽनुभावव्यक्तेर्निरूपणम्	„	१४
कष्टकल्पनया विभावव्यक्तेर्निरूपणम्	„	२३
प्रतिकूलविभावादिग्रहनिरूपणम्	१८०	५
पुनःपुनर्दीप्ति „ ..	„	२०
अकाण्डप्रथन „ ..	„	२५
अकाण्डच्छेद „ ..	१८१	२
अङ्गस्यातिविस्तृति „ ..	„	५
अङ्गिनोऽननुसन्धान „ ..	„	९
प्रकृतिविपर्यय „ ..	„	११
अनङ्गस्याभिधान „ ..	१८२	१२
अथैषां क्वचिद्दोषत्वापवादः	„	
व्यभिचारिणः स्वपदवाच्यत्वस्याऽदोषत्वप्रतिपादनम्	„	२२
विरुद्धरससञ्चारिभावादीनां बाध्यतयोक्तेर्गुणत्वम्	१८३	२४
विरुद्धयोरपि रसयोरेकत्र निवेशप्रकारोपदेशः	१८५	१३
विरुद्धयोरपि रसयोर्विरोधः क्वचिदिति प्रतिपादनम्	१८६	१७

CC0. In Public Domain, Digitizagtion by eGangotri

विषयः ।	पृष्ठे	पङ्क्तौ
अथाऽष्टमोल्लासः	**१८८—२००**	
गुणलक्षणम्	१८८	२१
गुणानां रसधर्मत्वव्यवस्थापनम्	१८९	२२
प्रसङ्गतोऽलङ्कारलक्षणोपदर्शनम्	१९०	४
गुणालङ्कारयोर्विभेदविवेचनम्	,,	११
वामनाद्युक्तगुणालङ्कारलक्षणखण्डनम्	१९२	१४
गुणविभागः	१९३	१०
माधुर्य्यगुणलक्षणम् ..	,,	१२
ओजोगुणलक्षणम् ..	१९४	५
प्रसादगुणलक्षणम् ..	७७	१५
नामनाद्युक्तशब्दगुणादशकस्याऽस्वीकारः		
वामनाद्युक्तानां दशानां शब्दगुणानां लक्षणानि, कस्मिंश्च कस्यान्तर्भावः कस्य, चादोषस्वरूपतेत्यादिनिर्णयः	१९५	६
वामनाद्युक्तानां दशानामर्थगुणानां कस्मिंश्च कस्यान्तर्भावः कस्य च अदोषत्वमितिनिरूपणम्	१९६	४
माधुर्य्यगुणस्य व्यञ्जकाः ..	१९७	१३
ओजोगुणस्य व्यञ्जकाः ..	१९८	२
प्रसादगुणस्य व्यञ्जकाः ..	,,	१०
रचनायामार्द्रवैरस्यप्रयोजकविशेषदिग्दर्शनम्	,,	२२
अथ नवमोल्लासः	**२००—२१७**	
वक्रोक्तिः	२००	१२
अनुप्रासः	२०१	२३
छेकानुप्रासः	२०२	८
वृत्त्यनुप्रासः	,,	१४
उपनागरिका रीतिः ..	,,	१९
परुषा रीतिः	,,	२१
कोमला रीतिः ..	,,	२३
उपनागरिकाप्रभृतीनां यथाक्रमं वैदर्भीगौड़ीपाञ्चालीति नाम	,,	२७
लाटानुप्रासः ..	२०३	५
यमकम्	२०४	१४
श्लेषः शब्दगतः ..	२०७	१५
श्लेषस्य नवमो भेदः ..	२०९	१३
श्लेषविचारः ..	२०९	१८
दोषगुणालङ्काराणां शब्दार्थगतत्वे नियामकम्	२१०	१३
चित्रालङ्कारः	२१४	१०
खड्गबन्धः	,,	१९
मुरजबन्धः	२१५	११
पद्मबन्धः	,,	१७
सर्वतोभद्रम्	२१६	२
पुनरुक्तपदाभासः ..	,,	८
अथ दशमोल्लासः	**२१८—३०३**	
अर्थालंकारोद्देशः ..	२१८	४
उपमा ..	२१९	२
पूर्णोपमा लुप्तोपमा च ..	,,	१४
श्रौती उपमा	,,	१९
आर्थी उपमा	,,	,,
उपमाविचारः ..	२२०	५
धर्मलोपे उपमा ..		..
उपमानलोपे उपमा ..	२२२	२४
इवादिलोपे उपमा ..	२२४	६
धर्मवाद्युभयलोपे उपमा ..	२२५	१४
धर्मोपमानलोपे उपमा ..	,,	२५
उपमेयेवादिलोपे उपमा	२२६	५
धर्मोपमानेवादिलोपे उपमा	,,	१९
उपमायाः पञ्चविंशतिविधत्वम्	२२७	८
मालोपमा	,,	१२
रशनोपमा	,,	२०
अनन्वयः	२२८	८
उपमेयोपमा	,,	१९
उत्प्रेक्षा	,,	२६
ससन्देहालङ्कारः ..	२२९	१९
रूपकालङ्कारः ..	२३०	१९
समस्तवस्तुविषयरूपकम्	,,	२४
एकदेशविवर्त्तिरूपकम् ..	२३१	१५

Dr. Urmila Sharma Collection, Varanasi

विषयः ।	पृष्ठे	पङ्क्तौ
साङ्गरूपकम्	,,	२५
निरङ्गरूपकम्	२३२	२
मालारूपकम्	,,	१०
परम्परितरूपकम्	,,	१७
रशनारूपकम्	२३४	७
अपह्नुत्यलङ्कारः	,,	१३
अर्थगतश्लेषाल०	२३५	११
समासोक्त्यल०	,,	२१
निदर्शनाल०	२३६	१३
मालानिदर्शना०	२३७	५
निदर्शना अन्यरूपा	,,	१०
अप्रस्तुतप्रशंसा	,,	१६
अप्रस्तुतप्रशंसाभेदप्रदर्शनम्	२३८	२
अतिशयोक्त्यलङ्कारः	२४१	१०
प्रतिवस्तूपमाल०	२४२	१३
दृष्टान्ताल०	२४३	६
दीपकाल०	,,	१३
मालादीपकालङ्कारः	२४४	७
तुल्ययोगिताल०	,,	१७
व्यतिरेकालङ्कारः	२४५	७
उपमानस्याधिकत्वे ऽपि व्यतिरेकवृत्तिमतनिराकरणम्	,,	६
व्यतिरेकभेदप्रदर्शनम्	,,	१६
मालाव्यतिरेकः	२४७	३
आक्षेपालङ्कारः	,,	२०
विभावनाल०	२४८	११
विशेषोक्त्यल०	,,	१८
यथासङ्ख्याल०	२४६	१२
अर्थान्तरन्यासाल०	,,	१६
विरोधालङ्कारः	२५०	१३
विरोधविभागः	,,	१७
स्वभावोक्त्यलङ्कारः	२५३	८
व्याजस्तुत्यल०	,,	१७
सहोक्त्यल०	२५४	८
विनोक्त्यल०	,,	१८
परिवृत्त्यल०	२५५	५
भाविकाल०	,,	२३
काव्यलिङ्गाल०	२५६	८
पर्य्यायोक्ताल०	२५७	१०
उदात्ताल०	,,	२५
अन्यविधमुदात्तम्	२५८	८
समुच्चयाल०	,,	१७
अन्यविधः समुच्चयः	२५६	१८
पर्य्यायाल०	२६०	१४
अन्यविधः पर्य्यायः	२६१	१५
अनुमानाल०	२६२	५
परिकराल०	,,	१६
व्याजोक्त्यल०	२६३	७
परिसङ्ख्याल०	२६४	४
कारणमालाल०	२६५	७
अन्योन्याल०	,,	२३
उत्तरालङ्कारः	२६६	८
अलङ्कारान्तरेषूत्तरस्य संभवाभावव्यवस्थापनम्	,,	२४
सूक्ष्मालङ्कारः	२६७	६
सारालङ्कारः	२६८	३
असङ्गत्यलङ्कारः	,,	६
विरोधादसङ्गतेर्भेदप्रदर्शनम्	,,	१८
समाध्यलङ्कारः	२६६	४
समालङ्कारः:	,,	११
विषमालङ्कार	२७०	३
अधिकालङ्कारः	२७१	८
प्रत्यनीकालङ्कारः	,,	२१
मीलितालङ्कारः	३७२	१३
एकावल्यलङ्कारः	२७३	५
स्मरणालङ्कारः	,,	२२
भ्रान्तिमदलङ्कारः	२७४	११
प्रतीपालङ्कारः	२७५	५
सामान्यलङ्कारः	२७६	१२
विशेषालङ्कारः	२७७	५
तद्गुणालङ्कारः	२७८	१६
अतद्गुणालङ्कारः	२७६	३
व्याघातालङ्कारः	२७६	२७
संसृष्ट्यलङ्कारः	२८०	१६
अङ्गाङ्गिभावसङ्करः	२८१	१५

विषयः ।	पृष्ठे	पङ्क्तौ
सन्देहसङ्करः ..	२८३	१८
सन्देहसङ्करस्थलनिर्णयः ..	२८४	१८
एकाश्रयानुप्रवेशसङ्करालङ्कारनिरूपणम्	२८५	२२
अलङ्काराणां शब्दार्थगतत्वनियामकोक्तिः	२८६	१५
प्राचीनाङ्गीकृतालङ्कारदोषाणामुक्तदोषान्तर्भावोक्तिः	२८७	१०
अनुप्रासदोषाणामुक्तान्तर्भावनिरूपणम्	,,	११
यमकदोषस्योक्तान्त० ..	२८८	८
उपमादोषाणामुक्तान्त० ..	,,	,,
उपमायां क्वचिल्लिङ्गवचनादिभेदस्यादुष्टतोक्तिः	,,	१२
कालादिभेदे उपमाया अदुष्टताव्यवस्थापनम्	२९०	७
अन्ययोरप्युपमादोषयोरुक्तान्तर्भावोक्तिः	२९१	१०
उत्प्रेक्षादोषस्यउक्तान्तर्भावोक्तिः	,,	१८
अर्थान्तरन्यासदोषस्योक्तान्त०	,,	२४
समासोक्तिदोषस्य उक्तान्तर्भावोक्तिः	२९२	७
अप्रस्तुतप्रशंसादोषस्य उक्तान्तर्भावोक्तिः	,,	१९
निखिलग्रन्थनिगमनोक्तिः	२९३	
प्रदीपकृतो विद्वज्जनताभ्यर्थनादिश्लोकाः	,,	
ग्रन्थपरिसमाप्तिः ..	,,	१७

॥ इति ॥

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अथ वर्णसूचीपत्त्रम् ॥

अ

पृष्ठे	पङ्क्तौ	
१८१	२	अकाण्डच्छेदः दोषः
१८०	२५	अकाण्डप्रथनम् दो०
१५१	१८	अक्रमता दो०
८३	२३	अगूढव्यङ्ग्यं काव्यम्
२६१	१५	अङ्गाङ्गिभावसंकरः अलं०
१८१	५	अङ्गस्यातिविस्तृतिः दो०
,,	६	अङ्गिनोऽननुसंधानम् दो०
२७६	२	अतद्गुणः अलंकारः
२४१	१०	अतिशयोक्तिः अलं०
३४	१३	अत्यन्ततिरस्कृतवाच्यध्वनिः
६	४	अधमकाव्यम्
१७५	२१	अधिकपदत्वं गुणः क्वचित्
१३७	२२	अधिकपदत्वं दोषः
२७१	८	अधिकालङ्कारः
१८२	१२	अनङ्गस्याभिधानं दोषः
२२८	८	अनन्वयालङ्कारः
१४४	२	अनभिहितवाच्यता दोषः
१६१	१४	अनवीकृतता दोषः
१६६	४	अनियमेनियमः दो०
१७०	२१	अनुकरणेसर्वेषामदोषता
१११	२	अनुचितार्थता दोषः
२०१	२३	अनुप्रासः अलंकारः
२८७	११	अनुप्रासदोषाः
१७६	१४	अनुभावस्य क्लिष्टकल्पनया व्यक्तिः दोषः
२६२	५	अनुमानम् अलं०
१६७	४	अनुवादायुक्तता दो०
२६५	२३	अन्योन्यम् अलं०
१६५	२	अपदयुक्तता दो०
१४५	११	अपदस्थपदता दो०
१४५	६७	अपदस्थसमासता दो०
७६	२६	अपराङ्गव्यङ्ग्यं का०
२३४	१३	अपह्नुतिः अलं०

पृष्ठे	पङ्क्तौ	
१५३	१७	अपुष्टार्थता दो०
१७४	१०	अप्रतीतत्वं गु०
११४	२३	अप्रतीतत्वम् दो०
१०६	२३	अप्रयुक्तत्वं दो०
१७३	५	अप्रयुक्तत्वस्यादुष्टता
१३१	२१	अप्रयुक्तत्वादीनामसमर्थात्मकत्वेऽपि पृथगुक्तिर्बीजम्
२३७	१६	अप्रस्तुतप्रशंसा अलं०
,,	२१	अप्रस्तुतप्रशंसाभेदाः
२८२	१६	अप्रस्तुतप्रशंसादोषः
१४०	२	अभवन्मतयोगः दो०
२६	५	अभिधामूलव्यञ्जना वृ०
१२	२३	अभिधा वृत्तिः
१५२	२३	अमतपरार्थता दो०
१५३	११	अर्थदोषविभागः
१०	१४	अर्थविभागः
३०	३	अर्थव्यञ्जकता
३३	१५	अर्थस्य व्यञ्जकतायां शब्दस्य सहकारिता
६०	६३	अर्थशक्त्युत्थध्वनिभेदानामुदाहरणानि
६६	२४	अर्थशक्त्युत्थध्वनिविभागः
६५	१४	अर्थशक्त्युत्थध्वनीनां प्रबन्धगतत्वम्
२४६	१८	अर्थान्तरन्यासः अलं०
२६१	१८	अर्थान्तरन्यासदोषः
३४	१३	अर्थान्तरसंक्रमितवाच्यध्वनिः
१७	१५	अर्थापत्तिस्थलीयलक्षणावादखण्डनम्
२३५	११	अर्थश्लेषः अलं०
१३६	१७	अर्द्धान्तरैकवाचकत्वं दो०
३६	५	अलक्ष्यक्रमव्यङ्ग्यध्वनिः का०
२८७	१०	अलङ्कारदोषाणां पृथग्वचनानर्हता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृ०	पं०	
१६०	४	अलङ्कारलक्षणम्
२८६	१५	अलङ्काराणां शब्दार्थगतत्वनियामकम्
१११	१०	अवाचकत्वं दो०
३४	१३	अविवक्षितवाच्यध्वनिः का०
१६३	२१	अविशेषे विशेषः दो०
११३	८	अश्लीलता दो०
१७३	१५	अश्लीलता गुणः क्वचित्
१६७	२१	अश्लीनार्थता दो०
२६८	८	असङ्गतिः अलं०
११०	११	असमर्थत्वं दो०
८४	२०	असुन्दरव्यङ्ग्यं का०
८३	२३	अस्फुटव्यङ्ग्यं का०

आ

पृ०	पं०	
२४७	२०	आक्षेपः अलं०
१७	५	आक्षेपस्थले न लक्षणा
२१६	१८	आर्थी उपमा अलं०
३०	३	आर्थी व्यञ्जना

इ

पृ०	पं०	
२२४	६	इवादिलोपे उपमा

उ

पृ०	पं०	
७	१२	उत्तमकाव्यम्
२६६	८	उत्तरम् अलं०
,,	२४	उत्तरस्य स्वतन्त्रालङ्कारत्वम्
२२८	२६	उत्प्रेक्षा अलं०
२६१	१८	उत्प्रेक्षादोषः
२५७	२५	उदात्तम् अलं०
१४८	१३	उद्देशप्रतिनिर्देशस्थले कथितपदत्वं गुणः
२०२	१६	उपनागरिका रीतिः
२१६	२	उपमा अलं०
२८८	८	उपमादोषाः
२६१	१०	उपमादोषावन्यौ
२२२	२४	उपमानलोपे उपमा
२४५	६	उपमानस्याधिकत्वे न व्यतिरेकालङ्कारः
२८८	१२	उपमायां क्वचिदिल्लङ्गवचनादिभेदस्यादोषत्वम्
२२७	८	उपमायाः पञ्चविंशतिविधत्वम्
२२०	५	उपमाविचारः
२२६	५	उपमेयेवादिलोपे उपमा
२२८	१६	उपमेयोपमा
१३३	१७	उपहतविसर्गता दो०
१६	२३	उपादानलक्षणा

ए

पृ०	पं०	
२३१	१५	एकदेशविवर्त्तिरूपकम् अलं०
२७३	५	एकावली अलं०
२८५	२२	एकाश्रयानुप्रवेशसंकरः अलं०

ओ

पृ०	पं०	
१६४	५	ओजोगुणलक्षणम्
१६८	२	ओजोगुणव्यञ्जकाः

क

पृ०	पं०	
५३८	१४	कथितपदत्वम् दो०
१७६	१२	कथितपदत्वापवादः
१६८	६	कर्णवतंसादिपदेषु पौनरुक्त्यं न दोषः
१६६	१६	कर्णातंसादिपदेभ्यो ऽन्यत्र पौनरुक्त्यं दोषः
१५५	१०	कष्टार्थत्वम् दो०
१७१	८	कष्टार्थत्वं क्वचिद्गुणः
१७२	१७	कष्टार्थत्वं क्वचिन्न गुणो न दोषः
८४	१५	काक्वाक्षिप्तव्यङ्ग्यम् का०
२६५	७	कारणमाला
२६०	७	कालादिभेद उपमादोषः
४	८	काव्यकारणम्
३	६	काव्यप्रयोजनम्
२५६	८	काव्यलिङ्गम् अलं०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृ०	पं०	
५	३	काव्यस्वरूपम्
२०२	२३	कोमला रीतिः
११६	४	क्लिष्टत्वम् दो०

ख

पृ०	पं०	
२१४	१६	खड्गबन्धः

ग

पृ०	पं०	
१४६	२५	गर्भितत्वम् दो०
१७७	१०	गर्भितत्वापवादः
१८८	२१	गुणलक्षणम्
१६३	१०	गुणविभागः
१८६	२२	गुणानां रसधर्मता
१६०	११	गुणालङ्कारयोर्विशेषः
७८	१३	गुणीभूतव्यङ्ग्यकाव्यभेदाः
८४	२५	गुणीभूतव्यङ्ग्यकाव्ये ध्वनिवत्प्रभेदाः
२१	२३	गूढव्यङ्ग्यम्
२०३	२	गौड़ी रीतिः
१६	२१	गौणी लक्षणा
२०	४	गौर्वाहीक इत्यत्र लक्ष्यार्थनिर्णयः
११५	६	ग्राम्यता दो०
१७४	२४	ग्राम्यतापवादः
२०२	२४	ग्राम्या रीतिः
१५७	२५	ग्राम्यार्थता दो०

च

पृ०	पं०	
२१४	१०	चित्रम् अलं०
१०६	७	च्युतसंस्कृतित्वम् दो०

छ

पृ०	पं०	
२०२	८	छेकानुप्रासः अलं०

त

पृ०	पं०	
२७८	१६	तद्गुणः अलं०
११	२	तात्पर्यार्थः
८४	१०	तुल्यप्राधान्यव्यङ्ग्यम् का०
२४४	१७	तुल्ययोगिता अ०
१६७	१२	त्यक्तपुनःस्वीकृतत्वम् दो०

द

पृ०	पं०	
२४३	१३	दीपकम् अलं०
१५७	१४	दुष्क्रमत्वं दोषः
२४३	६	दृष्टान्तः अलं०
११०	१३	दोषगुणालंकाराणां शब्दार्थगतत्वनियामकम्
१०५	१६	दोषलक्षणम्
१७१	६	दोषाणां क्वचिददोषता

ध

पृ०	पं०	
		धर्मलुप्तोपमा अलं०
२२५	१४	धर्मवाचकलुप्तोपमा अलं०
८६	६	ध्वनिगुणीभूतव्यङ्ग्ययोः संकरः
७७	१३	ध्वनेर्भेदसमष्टिः
७५	२७	ध्वनेः शुद्धभेदसंकलनम्
७६	६	ध्वनेः संसृष्टिसंकराधीनासंख्या
,,	७	ध्वनेः संसृष्टिसंकरौ
८६	१३	ध्वनेस्त्रैविध्यम्

न

पृ०	पं०	
२३६	१३	निदर्शना अलं०
२३२	२	निरङ्गरूपकम्
१११	१०	निरर्थकत्वं दो०
१५८	२४	निर्हेतुता दो०
१७०	१२	निर्हेतुतापवादः
११०	१६	निहतार्थता दो०
१७३	५	निहतार्थतापवादः
११५	२०	नेयार्थता दो०
		नेयार्थतापवादः
		न्यूनपदत्वम् दो०
१७	५५	न्यूनपरत्वापवादः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प

पृ०	पं०	
१३८	२३	पतत्प्रकर्षः दो०
१७६	२७	पतत्प्रकर्षापवादः
१०७	२०	पददोषविभागः
१०८	११६	पददोषाणां लक्षणोदाहरणानि
१२०	११	पददोषाणां मध्ये केचिद्वाक्यपदांशगताः
१२८	२२	पदांशगतदोषाणामुदाहरणानि
२११	१७	पद्मबन्धः का०
२३२	,,	परम्परितरूपकम् अलं०
२६२	१६	परिकरः अलं०
२५५	५	परिवृत्तिः अलं०
२६४	४	परिसंख्या अलं०
२०२	२१	परुषा रीति
२६०	१४	पर्यायः अलं०
१५७	१०	पर्यायोक्तम् अलं०
२०३	२	पञ्चाली रीतिः
१८०	२०	पुनःपुनर्दीप्तिः दो०
१५६	६	पुनरुक्तता दो०
२१६	८	पुनरुक्तवदाभासः अलं०
२१९	१४	पूर्णोपमा
१६६	२	प्रकाशितविरुद्धता दो०
१८१	११	प्रकृतिविपर्ययः दो०
१२२	१२	प्रतिकूलवर्णता दो०
१८०	५	प्रतिकूलविभावादिग्रहः दो०
१४२	१३	प्रतिवस्तूपमा अलं०
२७५	५	प्रतीपम् अलं०
२७१	२१	प्रत्यनीकम् अलं०
७७	१५	प्रसादगुणस्य लक्षणोदाहरणे
१९८	१०	प्रसादगुणव्यञ्जकाः
१५८	१४	प्रसिद्धिविरोधः दो०
१५६	२०	प्रसिद्धिविरोधापवादः
१७०	१२	प्रसिद्धिसत्त्वे निर्हेतोरदुष्टता
१४७	१७	प्रसिद्धिहतता दो०

भ

पृ०	पं०	
१४८	५	भग्नप्रक्रमः दो०
५४	४	भावः
५६	३	भावस्य शान्तिरुदयः सन्धिः शबलता च
५७	११	भावशान्त्यादीनां क्वचित्प्राधान्यम्
५५	२	भावाभासः
२५५	१३	भाविकम् अलं०
२७४	११	भ्रान्तिमान् अलं०

म

पृ०	पं०	
१	८	मङ्गलाचरणम्
८	१६	मध्यमकाव्यम्
१९३	१२	माधुर्यगुणः
१९७	१३	माधुर्यगुणस्य व्यञ्जकाः
२४४	७	मालादीपकम् अलं०
२३७	५	मालानिदर्शना अलं०
२३२	१०	मालारूपकम् अलं०
२४७	३	मालाव्यतिरेकः अलं०
२२७	१२	मालोपमा अलं०
२७२	१३	मीलितम् अलं०
२११	११	मुरजबन्धः

य

पृ०	पं०	
१२५	३	यत्तत्पदयोः साकाङ्क्षनिराकाङ्क्षताविचारः
२४६	१२	यथासङ्ख्यम् अलं०
२०४	१४	यमकम् अलं०
२८८	८	यमकदोषः

र

पृ०	पं०	
१९८	२०	रचनायाः क्वचिद्वैपरीत्यम्
१७७	१६	रसदोषविभागः
२२७	२०	रशनोपमा अलं०
४४	१५	रसविभागः
१७८	२५	रसस्य स्वशब्दवाच्यता दो०
४५	१२	रसानामुदाहरणानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृ०	पं०	
७१	५	रसादेः पदैकदेशरचनावर्णगतत्वम्
७५	१३	रसादेः प्रबन्धगतत्वम्
५५	२	रसाभासः
२३०	१६	रूपकम् अलं०

ल

२८८	८	यमकदोषः
१६	२३	लक्षणलक्षणा
१५	२२	लक्षणा
२३	१०	लक्षणामूलव्यञ्जनाव्यवस्थापनम्
२१	६	लक्षणायाः षड्विधत्वम्
२२	२५	लक्षणायास्त्रैविध्यम्
१८	१७	लक्षणास्थले प्रयोजनप्रतीतिनियमः
२३	२	लाक्षणिकशब्दः
२०३	५	लाटानुप्रासः अलं०
२१६	१४	लुप्तोपमा अलं०

व

३०	२०	वक्त्रादीनां वैशिष्ट्ये व्यञ्जनस्योदाहरणानि
२००	१२	वक्रोक्तिः अलं०
८५	३	वस्तुव्यङ्ग्यालङ्कारस्य न गुणीभूतव्यङ्ग्यता
१२१	६	वाक्यगतपददोषाणामुदाहरणानि
१३२	५	वाक्यदोषाः
११	२२	वाचकशब्दः
८२	८	वाच्यसिद्ध्यङ्गव्यङ्ग्यं का०
१२	२२	वाच्यार्थनिर्णयः
१६२	१४	वामनाभ्युक्तगुणालंकारलक्षणखण्डनम्
१६५	६	वामनाभ्युक्तदशविधशब्दार्थगुणपार्थक्यप्रतिषेधः
१६०	१३	विद्याविरोधः दो०

पृ०	पं०	
११६	२२	विधेयाविमर्शः (अयमेवाऽविमृष्टविधेयांश इत्यप्याख्यायते)
१६६	२०	विध्ययुक्तता दो०
२५४	१८	विनोक्तिः अलं०
४५	४	विप्रलम्भविभागः
२४८	११	विभावना अलं०
१७६	२३	विभावस्य कष्टकल्पनया व्यक्तिः दो०
३६	१६	विभावानुभावव्यभिचारिभावाः
११६	७	विरुद्धमतिकारिता दो०
१८६	१	विरुद्धयोरपि रसयोरविरोधप्रकारः
१८५	१३	विरुद्धयोरपि रसयोरेकत्र संनिवेशप्रकारः
१८३	२४	विरुद्धरससंचारिभावादीनां बाध्यतयोक्तिर्गुणः
२५०	१३	विरोधः (अयमेव विरोधाभासोऽपि)
,,	१७	विरोधविभागः
२६८	१८	विरोधादसङ्गतेर्भेदः
३६	२	विवक्षितान्यपरवाच्यध्वनिः
२७७	५	विशेषः अलं०
१६६	१६	विशेषणदानार्थं क्वचित्पौनरुक्त्यं न दोषः
१६३	१२	विशेषे विशेषः
२४८	१८	विशेषोक्तिः अलं०
२७०	२	विषमः
१३४	,,	विसन्धित्वं दो०
२०२	५	वृत्तिः
२०२	१४	वृत्त्यनुप्रासः अलं०
२०६	२	वैदर्भी रीतिः
१६	६	व्यञ्जकशब्दः
८६	२५	व्यञ्जनावृत्तिसंप्रतिष्ठापनम्
२४५	७	व्यतिरेकः अलं०
,,	१६	व्यतिरेकभेदाः
४६	११	व्यभिचारिभावत्रिभागः
१७७	१७	व्यभिचारिणः स्वशब्दवाच्यत्वं दो०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृ०	पं०	
१८२	२२	व्यभिचारिणः स्वशब्दवाच्यत्वं क्वचिददोषः
२७६	२७	व्याघातः अलं०
२५३	१७	व्याजस्तुतिः अलं०
२६३	७	व्याजोक्तिः "
१५५	२३	व्याहतार्थत्वम् दो०
		श
१०	११	शब्दभेदाः [सहकारित्वम्
२६	१४	शब्दस्य व्यञ्जकतायामर्थस्य
५८	२	शब्दशक्त्युत्थध्वनिः
५६	१२	शब्दशक्त्युत्थवस्तुध्वनेरुदाहरणम्
६४	२५	शब्दशक्त्युत्थार्थशक्त्युत्थध्वनीनां पदगतत्वम्
५८	६	शब्दशक्त्युत्थालङ्कारध्वनेरुदाहरणम् [सहकारिता
२६	१४	शब्दस्य व्यञ्जकतायामर्थस्य
१०५	४	शब्दार्थचित्रभेदाः [हरणे
१०४	१६	शब्दार्थचित्रयोः क्रमेणोदा-
१०३	१७	शब्दार्थचित्रे
६४	२	शब्दार्थोभयशक्त्युत्थध्वनिः
५३	६	शान्तरसः
१६	२१	शुद्धा लक्षणा
२१८	४	शुद्धालङ्कारविभागः
१०८	११	श्रुतिकटुत्वं दो०
२१६	१६	श्रौत्युपमा अलं०
२०६	१८	श्लेषविचारः
२०७	१५	श्लेषस्य अष्टौ भेदाः
२०६	१३	श्लेषस्य नवमो भेदः
२०७	१५	श्लेषः शब्दगतः
		स
१४६	१८	संकीर्णता दो०
२८१	१५	संकरः अलं०
१६२	७	सनियमेऽनियमः दो०
११४	१४	सन्दिग्धता दो०
१७४	४	सन्दिग्धतापवादः
८४	३	सन्दिग्धप्राधान्यव्यङ्ग्यं का०
१५८	१०	सन्दिग्धार्थत्वं दो०
२८३	१८	सन्देहसंकरः
२८४	१८	सन्देहसंकरस्थलनिर्णयः
१३४	,,	सन्धावश्लीलता दो०
२६६	११	समम् अलं०
२३०	२४	समस्तवस्तुविषयं रूपकम्
२६६	४	समाधिः अलं०
१३६	५	समाप्तपुनरात्तता दो०(इदमेव समाप्तपुनरुपादानम्)
१७७	३	समाप्तपुनरात्तता न गुणो न दोषः क्वचित्
२३५	२१	समासोक्तिः अलं०
२६२	७	समासोक्तिदोषः
२५८	१७	समुच्चयः अलं०
४४	२४	सम्भोगः
२६	१५	संयोगादिनैकार्थनियमनम्
२१६	२	सर्वतोभद्रम् अलं०
५७	१५	संलक्ष्यक्रमव्यङ्ग्यध्वनिः का०
२२६	१६	ससन्देहः अलं०
२८०	१६	संसृष्टिः "
१६५	१८	सहचरभिन्नता दो०
२५४	८	सहोक्तिः अलं०
१६४	६	साकाङ्क्षता दो०
२३१	२५	साङ्गरूपकम् अलं०
१६	१४	साध्यवसाना लक्षणा
२७६	१२	सामान्यालङ्कारः
२६८	२	सारः अलं०
१६	८	सारोपा लक्षणा
२६७	६	सूक्ष्मम् अलं०
१७६	६	स्थायिनः स्वशब्दवाच्यत्वं दो०
४८	२६	स्थायिभावाः
२७३	२२	स्मरणम् अलं०
२५३	८	स्वभावोक्तिः "
		ह
१३५	१०	हतवृत्तता दो०

॥ इति ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीः ॥

साहित्यशास्त्रम्,

काव्यप्रकाशस्य

परिवृत्तिव्याख्यानम्,

काव्यप्रदीपः,

विद्वच्चक्रचूडामणिश्रीमद्गोविन्दमहामहोपाध्यायप्रणीतः ॥

॥ श्रीगणेशाय नमः ॥

सोनोद्देव्याः प्रथमतनयः केशवस्यात्मजन्मा
श्रीगोविन्दो रुचिकरकवेः प्रेमपात्रं कनीयान् ।
श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं
नत्वा सारस्वतमपि महः काव्यतत्त्वं व्यनक्ति ॥

वचनसंदर्भविशेषरूपस्य ग्रन्थस्य प्रारिप्सितत्वेन स्तोतुमुचितायाः सेव्यमानायाश्च वाग्देव्या आस्पदभूतां कविभारतीं तदभिन्नत्वेनाध्यवसितां प्रारिप्सितप्रतिबन्धकदुरितशान्तये ग्रन्थकृत्संस्तौति—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥ १ ॥

नियम्यन्ते सौरभादयो धर्मा अनेनेति नियतिरसाधारणः पद्मत्वादिरूपो धर्मो, ऽदृष्टं वा । ह्लादैकमयीमिति· ह्लादेनैकमयीमेकस्वभावाम्, ह्लादमात्रस्वभावामिति यावत् । अनन्यपरतन्त्रामिति· कवेस्तत्प्रतिभायाश्चान्यो य आत्मनः परस्तदाऽऽयत्तत्वरहिताम्· परतन्त्रशब्द एवायत्तवचन इति कश्चित् । नवरसरुचिरामिति कर्मधारयः, वृत्तौ "षड्रसा न च हृद्यैव तै"रिति व्यतिरेकद्वयदर्शनात्· नचैवं हृद्यैव तैरितिहेतूपदर्शनवैयर्थ्यम्, तैस्तिक्तादिसाधारणैः षड्रसैरुपलक्षिता यतो, ऽतो न च हृद्यैव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तैरिति तदर्थात्।[क] अस्तु वा तृतीयातत्पुरुष एव। नचैवं नवरसीतिरूपप्रसङ्गः, 'त्रिगुणसचिव' इत्यादिवदुपपत्तेः। न च वृत्तिविरोधः, नवरसरुचिरत्वरूपविशिष्टधर्मव्यतिरेकस्तत्त्यरसेषु नवत्वाभावेनायोगव्यवच्छेदिरूपत्वप्रयोजकत्वविरहेण चेति वृत्तिप्रतिपाद्यत्वात्। निर्मितिमादधतीति वृषोक्षपन्यायेन सामान्यविशेषभावेनाऽन्वयाच्च पुनरुक्तिः।[ख] अत्र निर्माणव्यतिरेकमुखेन चतुर्मुखात्कविभारत्या व्यतिरेकालङ्कारो व्यङ्ग्यः। तथाहि, नियतेः शक्त्या नियतरूपा सुखदुःखमोहात्मकसत्त्वरजस्तमोलक्षणगुणत्रयात्मकत्वाद्विश्वस्य सुखदुःखमोहस्वभावा परमाण्वादि यत्समवायिकारणं, तदीयश्च यस्स्पन्दस्तत्प्रभृतिसहकारिपरतन्त्रा मधुरादिषड्रसा च, नच मनोरमैव तैः, निर्मितित्वादिसादृश्यवती च ब्रह्मणो निर्मितिरिति सुप्रसिद्धमेव। एतद्विलक्षणनियतिकृतनियमरहितत्वादिधर्मवत्त्वेन तु कविभारतीनिर्मितिर्निर्दिष्टेति व्यक्तो व्यतिरेकः। यदेतादृश[ग]निर्मितिशालिनी, अत एव जयति, उत्कर्षेण वर्तेत इत्यर्थो न तु वर्ततामित्यर्थः, तथा सत्युत्कर्षस्यासिद्धत्वेन नमस्काराक्षेपकत्वानुपपत्तेः। नन्वेतादृशे गुरुकर्मणि प्रेक्षावतामिष्टदेवताप्रणतिरवश्यं दृश्यते युक्तिमती च। तदनेन स्तुतिमात्रमाचरता यच्च कृता, तदवलेपादज्ञानाद्वा। उभयथाप्यनवधेयवचनता प्रसक्ता। अथ कृतैव, तत्किं स्तुतिवचोपनिबद्धा, विशेषाभावात्सैव वा किंचोपनिबद्धेतिचेत्, उच्यते, न खलु नतिमात्रोपनिबन्धे स्तुतिर्निबद्धा भवति, स्तुतिनिबन्धे त्वर्थाच्चतिरपि निबद्धैव, यतो जयत्यर्थेन वक्तृविषयस्य वैशिष्ट्यान्नमस्कार आक्षिप्यते। तेन, तां प्रत्यस्मि प्रणत इति लभ्यते। यत्तु "स्वमकाव्यत्वसिद्धये व्यङ्ग्यं दर्शयति जयत्यर्थेन चेत्यादी"ति कृत्यवतारणम्, तदयुक्तम्,

(क) यद्यपि देवनागरपुस्तकयोर्गौडाक्षरपुस्तके चास्ति 'तदर्थत्वा'दित्येव पाठः, ऽथाऽप्युद्योतप्रतीकितं 'तदर्था'दित्येव न्याय्यत्वात्पाठमाद्रियामहे।

(ख) अत्र "निर्मितिमादधतीति वृषोक्षपन्यायेन सामान्यविशेषभावेनान्वयाच्च पुनरुक्ति"रित्येतावदंशकमेकत्रास्ति पुस्तके ऽन्यत्र नास्ति, तृतीये गौडाक्षरीये (V) त्रुटिचिह्नमात्रमत्र न्यस्तम्, न तु किञ्चित्त्रुटितं विलिखितम्। उपस्मरामि च मद्धाल्यपठितपुस्तके किलेदमासीदिति।

(ग) यदेतादृशधर्मशालिनीति तूद्योतः संमन्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रगामरूपत्वाङ्गस्यानतिशयित्वेन ध्वनित्वाप्रयोजकत्वात्, तदर्थं चातिशयिनो व्यतिरेकालङ्कारस्यैवोपन्यासौचित्यादिति ॥ १ ॥

इहाभिधेयं सप्रयोजनमित्युक्तम्, प्रयोजनमाह – इहाभिधेयं ग्रन्थरूपमङ्गिनः काव्यस्य फलेन सफलमिति प्रेक्षावत्प्रवृत्तये प्रतिपादयितुमाह–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥ २ ॥

अत्र कृत्,वित्,युज्शब्दा भावे क्विबन्ताः । काव्यं लोकोत्तरवर्णनानिपुणस्वरूपस्य कवेरसाधारणं तादृग्वर्णनात्मकं कर्म । तत् कवेस्तावत्कालिदासादीनामिव यशः, श्रीहर्षादेरपादानाद्धावकादीनामिव धनं, मयूरशर्मादीनामिवानर्थनिवारणं च करोति । सहृदयस्य तु काव्यश्रवणानन्तरमेव सकलप्रयोजनेभ्यूत्तमं स्थायिभावास्वादनसमुद्भूतं वेद्यान्तरसंपर्कशून्यं रसास्वादरूपमानन्दं राजादिगतपृथिवीपालनादिसमुचिताचारपरिज्ञानं रामादिवद्वर्तितव्यमिष्टसाधनं नतु रावणादिवदित्युपदेशं च निर्मिमीते· काव्यास्वादनकाले कवेरपि सहृदयान्तःपातितया रसास्वादः । ननूपदेशार्थं नीतिशास्त्राण्येव सन्ति, किं तत्र काव्येनेत्यत उक्तं कान्तासंमिततयेति· शब्दस्तावत् त्रिविधः–प्रभुसंमितः, सुहृत्संमितः, कान्तासंमितश्च· तत्राद्यः शब्दप्रधानो वेदादिः शासनप्राधान्येन विधिलक्षणः· स हि प्रभुरिव त्वमेवं कुर्विति समाज्ञापयति, ततश्च नियुक्तः सन्ध्यावन्दनादौ निष्फलेपि प्रवर्तते । द्वितीयस्त्वर्थतात्पर्यवान्सिद्धार्थरूपः पुराणेतिहासादिः· स हि सुहृदिव, एवं कृते इदमिष्टं भवत्येवं कृते इदमनिष्टमित्येतावन्मात्रं बोधयति नत्वाज्ञापयति । तृतीयस्तु ताभ्यां विलक्षणो रसप्रधानः काव्यलक्षणः· तत्र हि रसाङ्गभूतो यो व्यापारो विभावादिसंयोजनात्मा व्यञ्जनारूपो वा, तन्निष्पाद्यरसाभिव्यक्तिनिष्पादकतया शब्दार्थयोर्द्वयोरपि गुणत्वाद्रसस्यैव प्राधान्यम्, स च कान्तासंमितत्वेनोपदेशं करोति । तेनैतदुक्तं भवति–ये सुकुमारमतयोऽतिसुखिस्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्तयितुमशक्या,स्तान् काव्यं कान्तेव सरसतापादनेनाभिमुखीकृत्योपदेशं ग्राहयति, गुडजिह्विकया शिशूनिवौषधम्· यदाहुः–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते(क) ।
प्रथमालीढमधवः पिबन्ति कटुभेषजम्"(ख) ॥

यत एतावदिष्टविशिष्टं काव्य,मतः सर्वथा तद्धेतुरुपादेयः ॥ २ ॥

नन्वेवमप्यभिधेये किमायातम्· किञ्च, हेतुमज्ञात्वा तदुपादानं कथं स्यादित्यपेक्षायां काव्यज्ञशिक्षारूपतया काव्याङ्गत्वं ग्रन्थस्य प्रतिपादयन्नेव कारणान्तरमप्याह—

शक्ति,र्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्, ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ ३ ॥

शक्तिः कवित्वबीजभूतो देवताप्रसादादिजन्मा संस्कारविशेषः प्रतिभाव्यपदेश्यः· तस्याः कारणतायां किं मानमिति चेत्, निपुणतादिकारणान्तरसद्भावेप्यनुपहसनीयकाव्यप्रसरस्य कार्यस्य व्यतिरेकः· स च विशेष्यस्य काव्यप्रसरस्य, विशेषणस्यानुपहसनीयत्वस्य वा व्यतिरेकात्सर्वत्र विशिष्टः· नचैवं कारणान्तरं किञ्चिदायातु, न तु शक्तिरिति वाच्यम्, प्रसिद्धातिरेकिण्येव तद्धेतौ शक्तिव्यपदेशात् । लोकः, स्थावरजङ्गमात्मकलोकस्य वृत्तं, योगादुपचाराद्वा, धर्मिमात्रपरामर्शस्य व्युत्पत्त्यनाधायकत्वात्· शास्त्रं छन्दःशास्त्रादि· काव्यं महाकविप्रणीतं रघुवंशादि· आदिग्रहणादितिहासादि· तेषां विमर्शनाद्व्युत्पत्तिर्निपुणता । काव्यज्ञशिक्षा, काव्यं कर्तुं रसानुगुणतया प्रबन्धादौ घटयितुं च ये जानन्ति, तदुपदेशः· तथा करणे योजने च पौनःपुन्येन प्रवृत्तिरभ्यासः । इतिशब्दो मिलितोपस्थापनाय अन्यथा तद्वैयर्थ्यमेव स्यात् । तथा च काव्यस्योद्भव उत्कृष्टोत्पत्तिस्तया कार्येण मिलितानामुपधानं दण्डचक्रादीनामिव घटेन, नतु मिलितत्वेन कारणतेति क्षमः कार्यः ॥ ३ ॥

(क) उप भुञ्जते इतित्रिष्वेवोपलभ्यते· परं, तत्रैकत्र पु० युञ्जत इत्यस्य स्थाने भुञ्जत इत्युपकल्पितं शोधयित्रेति प्रतिभाति· चिरपरिचितत्वाच्छ्लक्ष्णत्वाच्च युञ्जत· इत्येवोपन्यस्यते· वाक्यार्थमुपभुञ्जत इत्यपि तत्र तत्र पाठः ।

(ख) कटुकौषधमित्यपि क्वचित्पठ्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं कारणमुक्त्वा काव्यस्य लक्षणमाह—

तद् ऽदोषौ शब्दार्थौ सगुणा,वनलङ्कृती पुनः क्वापि ।

निर्दोषत्वादिविशिष्टौ शब्दार्थौ तत् काव्यमिति व्यवहर्त्तव्यौ· गुणस्य रसनिष्ठत्वेऽपि तद्व्यञ्जकवर्णपरं गुणपदम्· नचानलङ्कारेतिव्याप्तिः, सालङ्कारत्वविशेषणानुपादानादिति वाच्यं, यतः, क्वापीत्यनेनैतदुक्तं यत्, सर्वत्र सालङ्कारौ शब्दार्थौ काव्यम्, क्वचित्स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः, नञोल्पार्थत्वा,दल्पत्वस्य चात्रास्फुटत्व एव विश्रामात् । नीरसेऽप्यस्फुटालङ्कारे काव्यत्वमिष्टमेवेति ऋजुः पन्थाः । वयं तु पश्यामः—नीरसे स्फुटालङ्कारविरहिणि न काव्यत्वम्· यतः, रसादिरलङ्कारश्च द्वयं चमत्कारहेतुः तथा च, यत्र रसादीनामवस्थानं, नच तत्र स्फुटालङ्कारापेक्षा· अत एव ध्वनिकारेणोक्तं (क)"रसानुगुणार्थविशेषनिबन्धनमलङ्कारविरहेऽपि छायातिशयं पुष्णाति, यथा—

मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः ।
येनैकचुलुके(ख) दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥

इत्यादौ· अत्र हि, अद्भुतरसानुगुणमेकचुलुके मत्स्यकच्छपदर्शनं छायातिशयं पुष्णाती"ति· नीरसे तु यदि न स्फुटालङ्कारः स्या,त्किंकृतश्चमत्कारः स्यात्· चमत्कारसारं च काव्यमित्यवश्यं स्फुटालङ्कारापेक्षा· 'अनलङ्कृती पुनः क्वापी'त्यनेनाप्यस्फुटालङ्कारस्य क्वचिदेव काव्यत्वम्, यत्र रसादिः स्फुटो, न तु सर्वत्रेत्येतदेव प्रतिपाद्यते· तस्मात्सालङ्कारत्वमात्रं न विशेषणं, किं तु स्फुटालङ्काररसान्यतरवत्त्वम्· नचैवमपि रसवत्यनलङ्कारे काव्यत्वप्रसङ्गो दोषाय· इष्टापत्तेः, यथोदाहृते मुनिर्जयतीत्यादौ· यदि तु अद्याज्ञाञ्जेन तत्रापि न काव्यत्वक्षमा, तदा सालङ्कारत्वे सतीत्यपि पूरणीयमिति । स्फुटालङ्कारविरहे काव्यत्वं यथा—

यः कौमारहरः स एव हि वर, स्ता एव चैत्रक्षपा,-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः, ।

(क) अत एवेत्यधिकं पु· द्वये ।
(ख) चुलके—इति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा चैवास्मि, तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥

अत्र रूपकादीनामसम्भव एव । अस्मीत्यस्य विभक्तिपरिणामादस्तु दीपकमिति चेन्न, अस्मीत्यस्याहमर्थकाऽव्ययत्वात्, "अत्रास्मि करोमी"तिवत्· क्रियापदत्वेऽपि न दीपकत्वम्, तदन्वयिनां सर्वेषामेव प्राकरणिकत्वात्· दीपकस्य तु प्राकरणिकाप्राकरणिकविषयत्वात् । सादृश्याप्रतीतेश्च न तुल्ययोगिता । समुच्चयोऽपि वक्ष्यमाणलक्षणो न सम्भवत्येव· अतादृशश्च न चारुत्वहेतुः । विशेषोक्तिविभावने विद्यमानेऽपि न स्फुटे· कथमितिचेदित्थम्—विशेषोक्तिः कारणसत्वे ऽपि कार्याभाववचनम्· अत्र चानुत्कण्ठाकारणं वरोपकारणयोरुपभुक्तता· तत्सत्त्वे यद्यप्यनुत्कण्ठाभाव उत्कण्ठारूपो निर्दिष्ट एव, तथापि नानुत्कण्ठाभावत्वेन, किंतूत्कण्ठात्वेनैव· तस्मादस्फुटत्वमस्याः· यदि चेतोनुत्कण्ठितं नेत्यभिधीयेत, तदा स्फुटत्वं भवेत् । एवं कारणाभावेऽपि कार्योत्पत्तिवचनं विभावना· अत्र चोत्कण्ठाकारणं वरोपकारणयोरक्तता· तदभावश्च यद्यप्युक्त एव, तथापि नातक्ताविरहत्वेन, किंतु तक्तारूपेणैव, अभावाभावस्य तत्त्वात्· अतोऽस्या अस्फुटत्वमेव· न च स एवेत्येवकारेणातक्ताभावप्रतीतेरक्तताभावत्वेन प्रतीतौ कथमस्फुटत्वमिति वाच्यं, विशेषणसङ्गतेनैवकारेण विशेष्ये विशेषणायोगस्य व्यवच्छेदो हि प्रत्याय्यते, न तु विशेषणाभावाभाव एवाऽऽहत्य, पर्यवसानं तु तत्रेत्यस्फुटत्वमेव· एवं विशेष्यसंङ्गतेनाप्येवकारेण विशेष्यभिन्ने विशेषणाभाव एव नाहत्य प्रत्याय्यते, किं तु विशेषणायोगाभाव इति द्रष्टव्यम्· अत एव 'शङ्खः पाण्डर एवे'त्यादौ नापाण्डर इति, 'पार्थ एव धनुर्धर' इत्यादौ च नान्यो धनुर्धर इत्यादिः कदा चित्स्फुटत्वार्थे प्रयुज्यते· दण्ड्यप्याह—

"त्वन्मुखं त्वन्मुखेनैव तुल्यं नान्येन केन चित्" ।

अन्यथा पुनरुक्तिस्तत्र स्यादिति· अनयोरस्फुटत्वे च सन्देहरूपसङ्करोप्यनयोरस्फुट इति विभावनीयम्· शृङ्गाररूपरसस्य स्फुटत्वाद्रसवदलङ्कारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फुट इति चेच्च रसस्यात्र प्रधान्यात्, अप्राधान्य एव तस्यालङ्कारत्वोपगमात् । अर्वाचीनास्तु–यथोक्तस्य काव्यलक्षणत्वे काव्यपदं निर्विषयं प्रविरलविषयं वा स्यात्, दोषाणां दुर्वारत्वात्· तस्मात् "वाक्यं रसात्मकं काव्य"मिति तल्लक्षणम्· तथा च दुष्टेपि रसान्वये काव्यत्वमस्त्येव, परं त्वपकर्षमात्रम्· तदुक्तम्–

"कीटा(क)नुविद्धरत्नादिसाधारण्येन काव्यता ।

दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः" ॥

इति· एवं चालङ्कारादिसत्वे उत्कर्षमात्रम्· नीरसे तु चित्रादौ काव्यव्यवहारो गौण इत्याहुः ॥

अथास्य भेदांस्तल्लक्षणानि चाह–

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्, ध्वनिर्बुधैः कथितः ॥ ४ ॥

इदम्, काव्यम्, वाच्यादतिशयिनि, अधिकचमत्कारकारिणि, व्यङ्ग्ये उत्तमम्· पदादिभिः पदैः स्फोटरूपं शब्दब्रह्म व्यज्यते· तस्मादभिव्यक्तादर्थप्रत्ययः· तादृशस्य स्फोटव्यञ्जकस्य पदादिशब्दस्य ध्वनिरिति संज्ञेति वैयाकरणानां सिद्धान्तसरणिः· अतः प्रधानीभूतव्यङ्ग्यव्यञ्जकत्वसाधर्म्याद्गुणीभूतवाच्यं यद्व्यङ्ग्यं, तद्व्यञ्जनक्षमस्य शब्दार्थयुगलरूपस्योत्तमकाव्यस्य बुधैर्ध्वनिपण्डितैर्ध्वनिरिति संज्ञा कृता । यथा–

निःशेषच्युतचन्दनं स्तनतटं, निर्मृष्टरागोऽधरो,

नेत्रे दूरमनञ्जने, पुलकिता तन्वी तवेयं तनुः, ।

मिथ्यावादिनि दूति बान्धवजनस्याऽज्ञातपीडागमे !

वापीं स्नातुमितो गतासि, न पुनस्तस्याधमस्यान्तिकम् ॥

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते· नन्वत्र मुख्यार्थबाधाद्विपरीतलक्षणया तदन्तिकमेव गतासीति लक्ष्यमेव युज्यते, नतु व्यङ्ग्यम्· अन्यथा साहेन्तीत्यादिवक्ष्यमाणलक्षणामूलव्यञ्जनोदाहरणेपि विपरीतलक्षणा न स्यात्, विशेषाभावादित्यत्र केचित्–सत्यमत्र

(क) कीटादिविद्धेति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विपरीतलक्षणा· वृत्तिरन्यस्तु तदन्तिकमेव गतासीत्यत्र लक्ष्यत इति शेष-कल्पनया योजनीयः· व्यज्यत इति रन्तुमित्यनेनैवान्वीयत इत्याहुः। पर-मार्थस्तु—न खलु मुख्यान्वयायोग्यत्वं स्वरूपसल्लक्षणाबीजं, किन्तु ज्ञातम्· तथाच, यत्र सख्यादेः प्रसाध्यकामुकादिसंभोगः प्रमाणान्तरेण श्रोतुः प्रती-तिमुपगत, स्तत्र मुख्यार्थबाधादस्तु लक्षणा· तदभिप्रायेणैव "साहेन्ती सहि सुहअं" "उपकृतं बहुनामे"त्युदाहृतम्· यत्र तु प्रमाणान्तरं न तज्ज्ञापकम-वतरति, तद्वाक्यजनितप्रत्ययमहिम्नैव तु तत्प्रत्यय,स्तत्र कथं लक्षणा, बाधा-भावात्· उत्पन्नेऽपि वाक्यार्थबोधे भवन्नपि बाधोऽकिञ्चित्कर एव· तदभि-प्रायेण वापीं स्नातुमित्युदाहृतम्· अत एवोक्तमधमपदेन व्यज्यत' इति· अत-एव च, यत्र सख्यादेस्तादृगत्वं न प्रमाणान्तरेणावगतं, तत्र न 'साहेन्ती'-त्यादौ विपरीतलक्षणा, व्यङ्ग्यार्थप्रतीतिर्वा· 'वापीं स्नातु'मित्यादौ तु बाधा-नवतारेऽप्यधमपदार्थपर्यालोचनया यथोक्तव्यङ्ग्यं प्रतीयत एवेत्येव प्राधान्य-मधमपदस्य· तस्मात्साहेन्तीत्यादौ यदि व्यञ्जना, तदा लक्षणामूलैव· वापीं स्नातुमित्यादौ तु न नियमः ॥ ४ ॥

अताद‍ृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।

अतादृशि = वाच्यादनतिशायिनि· अतिशयितचमत्कारानाधायके व्यङ्ग्ये मध्यमं काव्यम, तद्गुणीभूतव्यङ्ग्यं कथितमित्यनुषज्यते· अत्र, "व्यङ्ग्ये-स्फुटव्यङ्ग्य इत्यर्थः· तेन नाधमकाव्यातिव्याप्ति"रिति केषांचिन्मतमयुक्तम्, "अगूढमपरस्याङ्ग"मित्यादिना गुणीभूतव्यङ्ग्यप्रभेदत्वेन प्रतिपादयिष्य-माणस्यास्फुटव्यङ्ग्यस्यासंग्रहापत्तेः, किंत्वस्फुटतरातिरिक्तव्यङ्ग्यपरं व्यङ्ग्य-पदम्· गुणीभूतव्यङ्ग्ये चास्फुटमात्रं व्यङ्ग्यम्, मधमकाव्ये त्वस्फुटतरं, तद्वि-रह एव वेति न काचिदनुपपत्तिः।·उदाहरणम्—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥

अत्र वञ्जुललतागृहे दत्तसङ्केता तरुणी न गतेतिव्यङ्ग्यम्· तच्च गुणीभूतम्, तदपेक्षया वाच्यस्यैव चमत्कारकारित्वात्· यतः, पश्यन्त्या·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नितरां मुखच्छाया मलिना भवतीत्यनेन दर्शनकाल एव तत्कार्यं मालिन्यं तस्यातिशयः संतन्यमानता चेति वाच्यं प्रतीयत इति ॥

शब्दचित्रं, वाच्यचित्र,मव्यङ्ग्यं त्ववरं स्मृतम् ॥ ५ ॥

अत्र, चित्रमित्यध्याहार्य्यम्· तेनाव्यङ्ग्यं काव्यमवरमधमम्· तच्चित्रमिति कथितमित्यर्थः । अव्यङ्ग्यम् = अस्फुटतरातिरिक्तव्यङ्ग्यरहितम्· तादृशं चास्फुटतरव्यङ्ग्यसम्भवे, व्यङ्ग्यमात्राभावे च । चित्रम् = गुणालङ्कारयोगि । शब्दचित्रं यथा

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निका ऽह्नाय वः ।
भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥

वृत्त्यनुप्रासोऽत्र शब्दालङ्कारः· ननु कथमेतदव्यङ्ग्यमुच्यते, मन्दाकिनीविषयायाः प्रीतेरभिव्यक्तेः· किञ्च, नास्त्येव स काव्यार्थो, यस्य न व्यञ्जकत्वम्,ततो विभावत्वेनापीति चेत् सत्यम्, किन्तु, तद्व्यङ्ग्यमस्फुटतरम्· यद्वा, तत्र न कवेस्तात्पर्यम्, अनुप्रासमात्र एव तस्य संरम्भात्· तात्पर्यविषयीभूतव्यङ्ग्यविरहवत्त्वमेवात्राव्यङ्ग्यपदेन विवक्षितम्· यदुक्तं ध्वनिकृता–

"रसभावादिविषयविवक्षाविरहे सति ।
अलङ्कारनिबन्धो यः, स चित्रविषयो मतः" ॥

इति·

अत्र पक्षे मध्यमकाव्यलक्षणे व्यङ्ग्यपदं विवक्षितव्यङ्ग्यपरं द्रष्टव्यम् । अर्थचित्रं यथा

विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यम् ।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भिया ऽमरावती ॥

अत्रोत्प्रेक्षार्थालङ्कारः· परन्तु, रसादौ कथं तात्पर्यविरहोऽस्फुटतरत्वं वा, तच्च ज्ञायते, हयग्रीवस्य वर्णनीयतया तत्प्रभावस्य स्फुटं प्रतीतेः· मदीयं तु पद्यमुदाहरणीयं यथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मध्येव्योम स्फुरति सुमनोधन्वनः शाणचक्रं,
मन्दाकिन्या विपुलपुलिनाभ्यागतो राजहंसः, ।
अह्नश्छेदे त्वरितचरणान्यासमाकाशलक्ष्म्याः
संसर्पन्त्याः श्रवणपतितं पुण्डरीकं मृगाङ्कः ॥

अत्र रूपकमर्थालङ्कारः, तन्मात्रे तात्पर्यं, न तु रसादौ ॥ ५ ॥

इति श्रीमहामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपे काव्यलक्षणनिर्णयः प्रथम उल्लासः ॥ * ॥

अथ द्वितीय उल्लासः ॥

अथ काव्यलक्षणपदार्थेषु स्वरूपलक्षणादिभिर्विवेक्तव्येषु शब्दार्थयोः प्राधान्यात् प्रथमं तयोः स्वरूपं निरूपयिष्यन्विभागमाह—

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।

शास्त्रे व्यञ्जकशब्दो न प्रसिद्ध इत्यत उक्तमत्रेति· अत्रेति काव्ये॥ स्वरूपमप्रतिपाद्यैव लाघवादर्थं विभजते—

वाच्यादयस्तदर्थाः स्युस्तात्पर्यार्थोऽपि केषु चित् ॥ ६ ॥

वाच्यादयो वाच्यलक्ष्यव्यङ्ग्याः क्रमेण तेषां वाचकादीनामर्थाः स्युः· केषु चिन्न्यायादिनयेषु, न तु मीमांसकादिमतेष्वपि, लाघवात्पदानां पदार्थमात्रे शक्तिर्नत्वन्वयांशेऽपि, गौरवादन्यलभ्यत्वाच्च तादृशो हि तात्पर्यार्थो वाच्यार्थविलक्षणशरीर आकाङ्क्षायोग्यतासत्तिवशादपदार्थोऽपि प्रतीयते· नचापदार्थप्रतीतावतिप्रसङ्गः, स्वरूपसतः शक्यान्वयत्वस्य नियामकत्वादित्यभिहितान्वयवादिनां मतम् । अन्वयरूपे वाक्यार्थेऽपि पदानां शक्तिः, व्यवहारेणान्वितस्यैवोपस्थापनात्तत्रैव शक्तिग्रहात्· किञ्च, अन्वयभागस्याशक्यत्वे ऽनुभवविषयत्वं न स्यात्, तद्विषयत्वे शक्यत्वस्य प्रयोजकत्वात्, अशक्यस्याप्यन्वयप्रवेशे ऽतिप्रसङ्गादित्यन्विताभिधानवादिनां मतम् ॥

व्यञ्जकत्वं न केवलं शब्दस्य, किन्तु तदर्थस्यापि· तत्रापि नैकतरस्य, किं तु सर्वस्यापीत्यभिधादिवैधर्म्यसिद्धये प्रतिपादयति—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ।

अत्र वाच्यस्य यथा—

माए घरोवअरणं अज्जहु णत्थित्ति साहिअं तुमए ।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ ॥

अत्र वाच्येनैवार्थेन वक्तुर्वैशिष्ट्यात् स्वैरविहारार्थित्वं, गेहोपकरणत्वादिना चावश्यविधेयत्वं व्यज्यते । लक्ष्यस्य यथा—

साहेन्ती सहि सुहअं खणे खणे दूणिआसि मज्झ कए ।
सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ॥

अत्रापकारिण्यां बाधावतारान्मुख्यार्थः श्रोत्रा प्रत्येतुं न शक्यत इति सद्भावस्नेहकरणीयविसदृशं मत्प्रियरमणेन शत्रुत्वाचरणरूपं विरचितमिति मुख्यविपरीतं लक्ष्यते· तेन च कामुकविषयसापराधत्वप्रकाशनं व्यङ्ग्यम् । व्यङ्ग्यस्य यथा—

उअ णिच्चलणिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगअभाअणपरिट्ठिआ सङ्खसुत्तिव्व ॥

अत्र निष्पन्दत्वेनाऽऽश्वस्तत्वं, तेन निर्जनत्वम्· अतः सङ्केतस्थानमेतदिति कया चित्कञ्चित् सङ्केतस्थानाभिलाषिणं प्रति व्यञ्जनया प्रतिपाद्यते । अथ वा, निस्पन्दत्वेनाश्वस्तत्वं, तेन जनागमनाभावो, 'ऽतो न त्वमत्रागत इति मिथ्या वदसी' ति कया चिद्दत्तसङ्केता त्वं नागता, अहं त्वागत' इतिवादिनं प्रति व्यज्यते

एवमर्थं विभज्य वाचकादीनां स्वरूपं क्रमेणाह—

साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः ॥ ७ ॥

अभिधत्ते, प्रतिपादयतीत्यर्थः· अतो न विशेषणान्तरवैयर्थ्यम्· सङ्केतितं गृहीतसङ्केतम्· इदं चेष्टायां साक्षादर्थप्रतिपादिकायामतिव्याप्तिवारणाय, माधुर्यादिव्यञ्जकस्पर्शादिवर्णेष्वतिव्याप्तिवारणाय वा· नच साक्षादित्यधिकम्, 'यचामा यत्र चैत्यादिर्विषयोपि स तादृश' इत्यादिव्यत्रहितसङ्केतसत्त्वे ऽपि चैत्यादिनामके चैत्यादियोगिनि विषये प्रतिपाद्ये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चेत्यादिपदेतिव्याप्तिवारकत्वात्, तत्र शक्यसङ्केतव्यवहितसङ्केतसत्त्वात् नच तत्र शक्तिरेवेति सम्यक्, तद्योगिनि तत्पदप्रयोगस्य लक्षणयैवोपपत्तेः नच साक्षात्सङ्केतवान् वाचक इत्येतावतैव सुस्थत्वेऽभिधत्त इत्यस्य वैयर्थ्यम्, संयोगादिनाभिधायां नियमितायां वाच्यार्थव्यञ्जकतादशायामतिव्याप्तेर्वारणीयत्वात्· नच तथापि तत्रातिव्याप्तिरेवेति वाच्यम्· यस्य शब्दस्य यत्राव्यवहितसङ्केतग्रहो यदर्थग्रह उपयुज्यते, तत्र तदा स तदर्थवाचक इति हि लक्षणार्थः । अथ सङ्केतग्रहस्य शब्दसहकारितायां किं मानमिति चेत्, अगृहीतसङ्केतस्य[1] शब्दादर्थप्रत्ययाभावः· इदं च यत्राव्यवधानेन सङ्केतो गृह्यते इत्यादिवृत्तिदर्शनात् सङ्केतविशेषणतया साक्षात्पदं व्याख्यातम् । वस्तुतस्तु, संयोगादिनाऽभिधायां नियमितायां यत्र शक्यान्तरध्वननं, तत्र वाचकत्वं मा प्रसाङ्क्षीदित्यभिधानक्रियाविशेषणं साक्षादिति· तत्र तु वाच्यार्थप्रतीतिव्यवधानेन तत्प्रतीतिरित्यप्रसङ्गः । भास्करस्तु—लक्ष्यस्यान्विताभिधाननये सङ्केतितत्वात् तत्रातिव्याप्तिवारणाय साक्षादिति विशेषणम्· तदनभ्युपगमे तु, साक्षादभिधत्ते, सङ्केतितमभिधत्ते इति लक्षणद्वयम्· नचाद्यस्य चेष्टायामतिव्याप्तिः, शब्दत्वस्य प्रकरणादेव लाभादित्याह· तत्तु, साक्षात्सङ्केतो गृह्यत इत्यादिवृत्तौ साक्षात्वस्य सङ्केतविशेषणतया व्याख्यानेन विरोधादुपेक्षणीयम्· किञ्च, प्रथमे माधुर्यादिव्यञ्जकस्पर्शादिवर्णेष्वतिव्याप्तिः, तेषां साक्षादेव शृंगारादिव्यञ्जकत्वात्· द्वितीयं तु, वाच्य एव व्यङ्ग्यतादशायामतिव्याप्तम्· नच तत्रेष्टापत्तिः, सङ्केतवान् वाचक इत्यस्यैव तदा सम्यक्त्वेन शेषवैयर्थ्यात् ॥ ७ ॥

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

नन्वयं विभागो ऽनुपपन्नः, जात्यादेरसङ्केतितत्वात्, आद्ये, सङ्केतग्रहस्य व्यवहारमात्राधीनतया प्रवृत्तिनिवृत्तियोग्यायां व्यक्तावेव तदौचित्यादिति, मैवं, किं हि, व्यक्तिषु सर्वासु सङ्केतग्रहो व्यवहाराङ्ग,मुत यस्यां कस्यां चित्· नाद्यः, आनन्त्यात्· नान्त्यः, व्यभिचारप्रसङ्गात्, यतो, ऽगृही

(१) पुंसः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तसङ्केतगोपिण्डस्येव घटादेरपि गोपदात् प्रतीतिः प्रसक्ता, अगृहीतसङ्केतत्वस्य तुल्यत्वात्· किंच, न यत्र संङ्केतग्रहस्तस्यापि प्रतीतिरिति व्यभिचाराच्च व्यक्तौ सङ्केतः· अपि च, व्यक्तिसङ्केतपक्षे, गौः शुक्लश्चलो डित्थ इत्यादिशब्दानामर्थभेदो न प्राप्नोति· किमेवमनिष्टमिति चेत्, सद्प्रयोगानुपपत्तिः· तस्मादुपाधावेव सङ्केतः। स च द्विविधः—स्वभावतो वस्तुधर्मो घटत्वादि, वक्तुर्यदृच्छया सन्निवेशितो नामरूपः· तत्राद्यो द्विविधः—सिद्धः साध्यश्चेति। सिद्धोपि द्वेधा—पदार्थस्य प्राणप्रदो, विशेषाधानहेतुश्च· प्राणप्रदत्वं च यावत्स्थितिसम्बन्धित्वम्· यद्यपि शुक्लादेर्नित्यत्वाभ्युपगमे ऽपि गोत्वादिना समकालमेव सम्बन्धित्वम्, तथापि तस्य सम्बन्धः कदाचिदपैत्यपि न तु गोत्वादेरिति विशेषः· तत्र प्राणप्रदो जातिः· उक्तं हि वाक्यपदीये "नहि गौः स्वरूपेण गौ नोप्यगौ गोत्वाभिसम्बन्धात्तु गौ"रिति· अस्यार्थः—गौः स्वरूपेण न गोव्यवहारस्य, नाप्यगोव्यवहारस्य विषयः· गोत्वाभिसम्बन्धात् तु गोव्यवहारस्य विषय इति। तथाच, प्राणप्रदत्वमस्य सिद्धमिति। विशेषाधानहेतुस्तु गुणः· गोत्वादिना लब्धसत्ताकं हि वस्तु शुक्लादिना विशिष्यते। साध्यस्तु पूर्वापरीभूतैकदेशत्वेन विवक्षितक्रियारूपः छेदनादिः· यदुक्तं—

"यावत्सिद्धमसिद्धं वा साध्यत्वेन विवक्ष्यते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते" ॥

इति। वक्तृयदृच्छासन्निवेशितस्तु शब्दरूपः· डित्थादिशब्दानां प्रथमवर्णप्रतीत्या किञ्चित्प्रकाशितम,न्त्यवर्णबुद्ध्या निश्शेषतो ग्राह्यं, नानावर्णात्मकघटादिपदवद्वर्णक्रमशून्यं स्फोटाख्यं शब्दस्वरूपं डित्थादिष्वर्थेषूपाधित्वेन वक्त्रा यदृच्छया कल्प्यत इति संज्ञारूपयदृच्छात्मको डित्थादिशब्दः। चण्डीदासस्तु—"अन्त्यं स्वलक्षणं बुद्ध्या निःशेषतो ग्राह्यं यस्य तज्जातिप्रतीत्यनन्तरं व्यक्तिप्रतीतिरिति क्रमशून्यं च डित्थादीनां शब्दानां स्वरूपं डित्थादिष्वर्थेषूपाधित्वेन पदार्थोपस्थित्यनुकूलतया सङ्केत्यते, उपाध्यन्तरं तेषां नास्ति, किंतु धर्मिमात्रं ततः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतीयते" इतिवृत्त्यर्थमाह· तच्च भाष्यविरुद्धम्, तत्र शब्दस्यैवोपाधित्वेन व्यवस्थापनात्, डित्थादिशब्दात् डित्थादिनामायमिति प्रतीतेः· एवं हि गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः। नन्वेवं परमाण्वादिशब्दानां जातिशब्दत्वं स्यात्, न गुणशब्दत्वम्, परमाणुत्वादीनां प्राणप्रदत्वेन जातित्वादिति चेत्सत्यम्, जातिशब्दा एवैते वैशेषिकमतानुसारेण तु तत्र गुणशब्दव्यवहारः। ननु पटादिनिष्ठानां शुक्लादिगुणानां, गुडतण्डुलादिनिष्ठानां पाकादिक्रियाणां च भेदस्य प्रत्यक्षतः सिद्धौ व्यक्तिसङ्केतपक्षोक्तदोषः समान इति चेन्न गुणादीनां स्वरूपत एकरूपाणामाश्रयभेदाद्भेद इव लक्ष्यते, यथैकस्यैव मुखस्य खड्गमुकुराद्यालम्बनभेदात्। अपरे तु, हिमपयःशङ्खादिषु शुक्लादिगुणः परमार्थतो भिन्न एव, पाकाच्छुक्लं रूपं नष्टं, श्याममुत्पन्नमिति प्रतीतेः· नचेयं भ्रान्तिः, बाधकाभावात्· नचोत्पादविनाशौ समवायस्य प्रतीयेतेइति युक्तम्· तदनुल्लेखात्· तथाचानुगतप्रत्ययानुरोधेन तत्रापि शुक्लत्वादिजाति, लाघवाच्च तत्रैव सङ्केत इत्युपेयम्· एवं गुडतण्डुलपाकादिष्वपि पाकत्वादिकम्· तथा, तारत्वादिविरुद्धधर्माध्यासाद्बालवृद्धशुकाद्युदीरितडित्थादिशब्देष्विव डित्थाद्यर्थेष्वपि बालाद्यवस्थापरिणतनानापरिमाणरूपविरुद्धधर्माध्यासाद्भिन्नेषु डित्थत्वादिकं जातिः· सैव च डित्थादिपदशक्या, एकत्वादित्यङ्गीकर्तव्यम्· एतेन बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमाने डित्थाद्यर्थे वा डित्थादित्वमस्तीति व्याख्यातम्—इवार्थेन वाशब्देन चशब्दस्य स्थानविनिमयात्· यद्वा, सर्वेष्वेव वाच्येषु सामान्यमस्तीत्यत्र तद्वाक्यतात्पर्यम्· अथ वा, भाष्यकारमते डित्थादिशब्द एवोपाधिरिति तन्मतेपि शब्दस्य नानात्वात् तन्निष्ठा· जातिरेव शक्याङ्गीकार्येति तत्तात्पर्यम्· तस्मात्सर्वशब्दानां ज्ञातिरेव सङ्केतविषय इत्याहुः। येषां मते संज्ञाशब्दानां शब्दो नोपाधिः, किंतु धर्मिमात्रप्रतीतिस्तेषां मते आकाशादिशब्दानां च कथं जातौ सङ्केत इति चिन्त्यम्। नैयायिकादयस्तु—न व्यक्तिमात्रं शक्यं, न वा ज्ञातिमात्रम्, आद्ये आनन्त्याद् व्यभिचाराद्वा· अन्त्ये, व्यक्तिप्रतीत्यभावप्रसङ्गात्· नचाक्षेपात् व्यक्तिप्रतीतिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्माद्विशिष्ट एव सङ्केतः· नचानन्त्याद्शक्यता, व्यभिचारो वा, गोत्वादिसामान्यलक्षणया सर्वव्यक्तीनामुपस्थितौ सर्वत्र सौकर्यादित्यातिष्ठन्ते । सौगतास्तु—व्यक्तावानन्त्यादिदोषाद्भावस्य च देशकालानुगमाभावात्तदनुगतायामतद्व्यावृत्तौ सङ्केत इत्यादिमतानि प्रकृतानुपयोगाच्च सूत्रकृता दर्शितानि ॥

ननु वाच्यलक्ष्यव्यङ्ग्याः पदार्था इति विभागो ऽनुपपन्नः, मुख्यत्वेन प्रसिद्धस्य तुरीयस्यापि भावादित्यत आह—

स मुख्योऽर्थः—

साक्षात्सङ्केतित एवार्थो मुख्यत्वेन प्रसिद्ध इत्यर्थः· कथमसौ तथेत्यत आह—

—तत्र मुख्यो व्यापारो स्याभिधोच्यते ॥ ८ ॥

अस्य शब्दस्य, तत्रार्थे योभिधारूपो व्यापारः स मुख्यो यत उच्यत इत्यर्थः· यद्वा, अभिधाव्यवहारस्य नाभिधासमयाभावादित्यादौ दर्शनात्तां लक्षयति मुख्य इत्यादि· तत्र यो व्यापारः सोभिधेत्युच्यते इत्यर्थः· मुख्यत्वोत्कीर्त्तनं च वक्ष्यमाणस्य लक्षणाया तद्बाधपुरःसरत्वस्योपपत्तये· यत्तु "मुख्यार्थबाधे तद्योग इत्यादिकोपयुक्ततया वाच्यस्य संज्ञान्तरं करोति स मुख्य इत्यादी"ति सूत्रावतरणम्, तदयुक्तम्, 'वाच्यार्थबाधे तद्योग' इत्येवमेव तत्रोपपत्तौ तदर्थं संज्ञान्तरकरणस्य गौरवेणानौचित्यात् ॥ ८ ॥

वाचकं निरूप्य लाक्षणिकं लक्षयितुं लक्षणां लक्षयति—

मुख्यार्थबाधे तद्योगे रूढ़ितो ऽथ प्रयोजनात् ।
अन्यो ऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया ॥ ९ ॥

रूढ़िः प्रसिद्धिः· प्रयोजनं व्यङ्ग्यार्थप्रतिपादनरूपम्· क्रिया व्यापारः· अत्रान्योऽर्थो यल्लक्ष्यते सा लक्षणेति तल्लक्षणम्· लक्ष्यते प्रतिपाद्यते इत्यर्थो ऽतो नात्माश्रयः· मुख्यार्थबाधः, शक्यसम्बन्धो, रूढ़िप्रयोजनान्यतरच्चेति हेतुत्रयवचनं व्यञ्जनायां शक्तिस्मृतौ चातिव्याप्तिवारणाय· तद्योग इति लक्षणेपि प्रवेशनीयम्· योगस्य च हेतुत्वं विवक्षित-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मतो न मुख्यार्थसम्बन्धिव्यञ्जनायामप्यतिव्याप्तिः· मुख्यस्याप्यभिधारूप· मुख्यार्थसम्बन्धेन प्रतिपादनं सम्भवतीति तद्वारणायान्य इत्युक्तम्· अन्यो· ऽमुख्यः· यदिति गुणीभूतलक्षणक्रियामात्रपरामर्शः· तेन शक्यसम्बन्धेनाऽ· शक्यप्रतिपत्तिर्लक्षणेति प्राचीनमतेनैतल्लक्षणम्· तद्धेतुशक्यसम्बन्धो लक्ष· णेति परमार्थः· प्रतिपत्तिहेतुर्हि वृत्तिर्न तु प्रतिपत्तिरेव । यत्तु यदित्यस्य यत इत्यर्थकतया सम्बन्धपरतयैव सूत्रव्याख्यानं तदयुक्तम्, "नाभिधा समयाभावाद्धेत्वभावाच्च लक्षणे"त्यत्र मुख्यार्थबाधादित्रयं हेतुरितिव्या· ख्यानविरोधात्· नहि सम्बन्धरूपत्वे लक्षणायाः सम्बन्धो हेतुर्घटते। ननु प्रतिपादनं चेल्लक्षणा न तर्हि शब्दधर्मः, गङ्गादिशब्दानां नीरा· दिकमुपस्थाप्य विरामे नीराद्यर्थेनैव सम्बन्धेन(१) नीराद्यर्थप्रतिपादनादि(क) त्यत आह–आरोपिता क्रियेति· शक्यव्यवहितलक्ष्यार्थविषयत्वाच्छब्दे आरोपित एव स व्यापारो वस्तुतो ऽर्थनिष्ठ एवेत्यर्थः· तदेतदुक्तं 'सान्त रार्थनिष्ठ' इति· रूढितो यथा, कर्मणि कुशल इत्यादौ· अत्र दर्भग्रहणा· योग्यत्वान्मुख्यार्थबाधः· विवेचकत्वं च सम्बन्धः· एवमन्यत्राप्यूह्यम्· तथा च तैलङ्गादिजनपदशब्दा जने त्वक्शब्दस्त्वगिन्द्रिये । प्रयोजनाद्यथा गङ्गायां घोष इत्यादौ· अत्र हि गङ्गातीरे घोष इति मुख्यशब्दात् तादृशं पावनत्वं न प्रतीयते यादृशं गङ्गायां घोष इतिलाक्षणिकात् ॥ ९ ॥

लक्षणा तावद्द्विविधा शुद्धा गौणी च। तत्राद्या द्विविधा उपादा· नलक्षणा लक्षणलक्षणा च· ते अपि प्रत्येकं सारोपा साध्यवसाना चेति द्विविधे इति शुद्धाभेदाश्चत्वारः । गौणी तु द्वेधा सारोपा साध्यवसाना चेति षड्विधत्वं च लक्षणायाः कारिकात्रयेण प्रतिपादयति–

स्वसिद्धये पराक्षेपः परार्थं(ख) स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥ १० ॥

(१) सामीप्यादिना ।

(क) ०दि लक्ष्यस्य पदेन सम्बन्धविरहाच्चे०–इत्यन्यतमे पठ्यते· तत्र, चेत्यन्तं केन चिद्विदुषा मातृकायामुपालेखीति लेखाऽऽजीविना तत्पुत्त्रिकायामन्तवन्तः प्रावेशि तीत्थं संवृत्तमिति 'दि' इत्यस्य स्थाने 'ल' मात्र पाठमिति विदाङ्कुर्वन्तु कृतिनः ।

(ख) परार्थे–इत्यपि क्व चित्प्रकाशपु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वसिद्धये स्वार्थस्यान्वयप्रवेशसिद्धये पराक्षेपः परलक्षणं, स्वार्थापरित्यागेन परार्थलक्षणमुपादानमित्यर्थः· अतः काकेभ्यो दधि रक्ष्यतामित्यस्य न तृतीयभेदत्वम्· एवं परार्थं स्वसमर्पणं परस्यान्वयप्रवेशसिद्ध्यर्थं स्वसमर्पणं स्वार्थसमर्पणं स्वार्थपरित्यागः, स्वार्थपरित्यागेन परार्थलक्षणं लक्षणामित्यर्थः· एता द्वाभ्यामुपाधिभ्यां शुद्धैव द्विविधोक्ता नतु गौण्यपीत्यर्थः· एते एवान्यत्राजहत्स्वार्थाजहत्स्वार्थे[क] इत्युच्येते· ननु शुद्धैवेत्यनुपपन्नं, गौण्या अपि तथात्वसम्भवात्· तथाहि, गौर्वाहीक इत्यादौ लक्षणलक्षणा तावत् स्फुटैव· उपादानलक्षणा तु गोवाहिकोभयविषये गाव एते समानीयन्तामित्यादाविति चेन्मैवम्, अत्रोपचारबीजं सम्बन्धः सादृश्य,मन्यो वा· आद्ये, शक्यसादृश्यस्य शक्यावृत्तितया कथं शक्यस्यापि लक्ष्यता, येनोपादानलक्षणा स्यात्· अन्त्ये, कथं गौणी, सादृश्यसम्बन्धप्रयुक्तलक्षणाया एव गौणीत्वात्· अत्रोपादानलक्षणा यथा कुन्ताः प्रविशन्ति, यष्टीः प्रवेशयेत्यादौ· अत्र कुन्तादयः स्वतोऽसम्भवत्प्रवेशास्तत्सिद्धये स्वसंयोगिपुरुषाँल्लक्षयन्ति· यथा च काकेभ्यो दधि रक्ष्यतामित्यादिसंग्रहस्तत्रोक्तम्· अन्ये तु पुनर्जातिपदार्थवादिन उपादानलक्षणामन्यामुदाहरन्ति यथा "गौरनुबन्ध्य" इति श्रुत्या प्रतिपादितमनुबन्धनं गोपदार्थस्य जातेर्मम कथं स्यादिति जात्याऽवच्छेदकतया कथं चित् स्वान्वयसिद्धये व्यक्तिर्लक्ष्यते· ननु व्यक्तिरभिधेयैव नतु लक्ष्येति चेन्न· व्यक्तौ केवलायामेवाभिधा, जातिविशिष्टायां वा? आद्ये, आनन्त्यव्यभिचारौ· अन्त्ये, "नागृहीतविशेषणा"-न्यायेन जातावेवाभिधा, व्यक्तिप्रतीतेराक्षेपादेव सम्भवात्· तदुक्तं "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इति· तदेतदपेशलम् प्रयोजनस्य रूढेर्वा तृतीयलक्षणाहेतोरभावात्· जातिव्यक्तिपदार्थौदासीन्येन हि लोकप्रसिद्धिमाश्रित्य रूढिविचारः· कथं तर्हि भट्टमते व्यक्तिप्रतीतिः? जात्याऽऽक्षेपात्, व्यक्तिं विना तस्या अभावात्· यथा क्रियतामित्यत्र क्रियया कर्तुः, कुर्वित्यत्र कर्मणः· अपरे तु, पीनो देवदत्तो दिवा न भुङ्क्ते

(क) ०र्थेत्युच्येते इति, जहत्स्वार्थाऽजहत्स्वार्थेत्यु० इति च पाठे व्यासः, उत्तरत्र तु क्रमो ऽप्यविवक्षित इतीयाँस्तु विशेषः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति वाक्यमभोजी पीन इतिवत् पीनत्वान्वयप्रयोजकस्य भोजित्वस्य प्रतीत्या योग्यतामलभमानमन्वयं न बोधयति· तेन तत्सिद्धये रात्रिभोजनं लक्ष्यते· तथा च दिवा न भुङ्क्ते इति मुख्यमर्थमादायैव तल्लक्षणेत्युपादानलक्षणेयमित्याहुः· तदप्यसम्यक्, शब्दाध्याहारनये श्रुतार्थापत्ते, रर्थाध्याहारनये ऽर्थापत्तेरेव रात्रिभोजनप्रत्यये लक्षणाऽनङ्गीकारात्· लक्षणलक्षणा तु गङ्गायां घोष इत्यादौ· अत्र तटादेर्घोषाधिकरणत्वसिद्धये गङ्गादिशब्दाः स्वार्थमर्पयन्ति, स्वार्थं परित्यज्य तत्रैव वर्तन्ते· उभयरूपा चेयमुदाहृता शुद्धा, न तु गौणी· उपचारमिश्रा हि गौणीत्युच्यते· उपचारश्च सादृश्यसम्बन्धेन प्रवृत्तिः, सादृश्यातिशयमहिम्ना भिन्नयोर्भेदप्रतीतिस्थगनं वा· न चोक्तयोस्तत्सम्भवः· केचित्पुनराचक्षते—उपचारमिश्रत्वं न शुद्धाया मिश्राता भेदकं, किंतु तटस्थत्वं· तच्च लक्षकस्य मुख्यार्थस्य लक्ष्यस्य च भेदप्रतीतिः· तथा हि गौर्वाहीको गौरयमित्यादौ भेदे ऽपि शक्यलक्ष्ययोरभेदः प्रतीयते, नतु गङ्गायां घोष इत्यादौ· तत्र भेदमात्रप्रतीतेरिति· अन्ये तु गङ्गायां घोषः, यष्टीः प्रवेशयेत्यनयोरेव परस्परभेदहेतुस्तटस्थत्वं गङ्गायामित्यत्र तत्सत्त्वात्, यष्टीरित्यत्र तदभावादिति मन्यन्ते· तदुभयमप्यसत्, अस्ति हि गङ्गादिपदैस्तीरादिप्रतिपादने गङ्गादिनिष्ठपावनत्वादिरूपप्रतिपिपादयिषितप्रयोजनप्रत्ययः· तत्र गङ्गात्वादिप्रतीतिरेव बीजं नतु तीरत्वादिप्रतीतिरेव, तीरे घोष इत्यत्रापि तत्प्रतीतिप्रसङ्गात्· अथ गङ्गाशब्देन तत्प्रतिपादने गङ्गासम्बन्धस्तत्र प्रतीयते· तदेव च तद्बीजमिति चेन्न, एवं हि गङ्गातटे घोष इति मुख्यप्रयोगे ऽपि तत्प्रतीतिः स्यात्, सम्बन्धप्रतीतौ विशेषाभावात्· अथ बाधे जागरूके कथं गङ्गाशब्दादिभिर्गङ्गात्वादिकं तीरे बोध्यत इति चेत्, उच्यते, शब्देन लक्ष्याऽर्थे प्रतिपादिते तत्र मुख्याभेदो व्यञ्जनया प्रतिपाद्यते· तदेतदुक्तं "तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः" इति· अत्र प्रतिपादने इति सतिसप्तम्या प्रत्ययस्यानन्तर्यं बोध्यते· न च व्यञ्जने बाधः प्रतिबन्धक इति काव्यविदां पन्थाः· वक्ष्यति हि "सारोपसाध्यवसानयोर्गौणीभेदयोर्भेदेऽप्यभेदावगमः सर्वथैवाभेदप्रतीतिश्च फलं"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मिति· किं बहुना, बाधित एव पावनत्वादिविशेषस्तटादौ प्रतीयते, यत्सूत्रयिष्यति "योगः फलेन नो" इति· नन्वेवं कथं गौण्यामेवाभेदप्रत्ययं प्रयोजनं वक्ष्यति, शुद्धभेदयोस्तु प्रयोजनान्तरमिति चेत्, गौण्यां तन्मात्रस्य प्रयोजनत्वात्, शुद्धभेदयोस्तु मुख्यस्य प्रयोजनान्तरस्या ऽपि भावात्, न तु शुद्धायामभेदप्रत्ययस्याभाव इति संक्षेपः ॥ १० ॥

गौणीभेदौ लक्षयन्नेव विभजते—

सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा ।

अन्या अर्थाद्गौणी आरोपाध्यवसानाभ्यां भिद्यते, नतूपादानलक्षणाभ्यामिति तु शब्दार्थः· विषयी आरोप्यमाणो गवादिः, विषय आरोपस्य वाहीकादिश्च यत्र तथा अनपह्नुतभेदौ सामानाधिकरण्येनोक्तौ शब्दप्रतिपाद्यौ सा लक्षणा सारोपा· विषयविषयिणोर्भेदेनोपन्यासस्यात्रारोपपदार्थत्वात् ।

विषय्यन्तःकृते ऽन्यस्मिन्सा स्यात्साध्यवसानिका ॥ ११ ॥

विषयिणा ऽऽरोप्यमाणेनान्यस्मिन्नारोपविषये ऽन्तःकृते निगीर्णे भेदेनानुपस्थित इति यावत्, विषयिमात्रं यत्र निर्दिश्यते नतु विषयो ऽपि, तत्र साध्यवसाना· विषयिणा विषयतिरोभावस्यात्राध्यवसानपदार्थत्वात् ॥ ११ ॥

एतौ भेदौ शुद्धभेदे ऽपि भवत इति प्रतिपादयन्नेव शुद्धाया गौण्याश्च लक्षणमाह—

भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा ।

गौणौ शुद्धौ च विज्ञेयौ—

इमौ आरोपाध्यवसानरूपौ भेदौ· तौ यदि सादृश्यसम्बन्धात्तदा गौणौ· अथ सम्बन्धान्तरात्तदा शुद्धौ· तत्र सादृश्याद्यथा गौर्वाहिक इति सारोपः· गौरयमिति साध्यवसानः· यद्यपि वाहीकस्य वाहिकत्वेनेदन्तया वोपस्थितौ सारोपत्वमेवोचितं, तथापीदन्त्वस्यारोप्यविशेषणतया तदुदाहरणं द्रष्टव्यम्· अत एव वक्ष्यते अनिश्चयरूपसङ्करावसरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"नयनानन्ददायीन्दोर्बिम्बमेतत्प्रसीदति" इत्यत्र "एतदिति बिम्बविशेषणतया किमियमतिशयोक्तिः· किं वा एतदिति वक्त्रं निर्दिश्य बिम्बमित्यारोपाद्रूपकमि"ति· अत्र केचित् गोशब्दस्य मुख्यतो गोत्वं प्रवृत्तिनिमित्तं, लक्षणया तु गोशब्दार्थगतं जाड्यमान्द्यादि तथा भवतीति गोशब्देन जड़त्वेन रूपेण वाहीक उच्यते· तदयुक्तम्, अशक्यस्याऽशक्यवृत्तेश्च धर्मस्याप्रवृत्तिनिमित्तत्वात्· शक्यत्वे शक्यवृत्तित्वे स्वभिन्नशक्यानधिकरणत्वस्य तथात्वात्· परे तु, न गवादिशब्देन वाहीकादिः प्रतिपाद्यते किन्तु गवादिगतस्य जाड्यादिगुणस्याभिन्नतया वाहीकादिगता जाड्यादयो गुणा एव लक्ष्यन्त इत्याहुः· तदप्यसम्यक्, गौर्वाहीक इत्यादिसामानाधिकरण्यानुपपत्तेः· इदं पुनरत्र तत्त्वम्—साधारणं जाड्यमान्द्यादि लक्ष्यतावच्छेदकमाश्रित्य वाहीकादिर्लक्ष्यत इति तेन जड़ो वाहीक इत्यादिवाक्यार्थो भवति· तदुक्तमन्यत्र—

"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता" ॥

इति· लक्ष्यमाणगुणैरिति· लक्ष्यमाणा ये गुणा जाड्यादयस्तैरेव यदि योगः शक्यसम्बन्ध,स्तदा गौणी वृत्तिरिति· अविनाभावश्चात्र सम्बन्धमात्रमभिमतं नतु व्याप्तिः, मञ्चाः क्रोशन्तीत्यादावभावात्· दशाविशेषविशिष्टस्य तत्रापि सास्त्येवेति चेत्, तर्हि आक्षेपादेव व्यापकप्रतीतिरस्तु, किं लक्षणयेत्युक्तं गौरनुबन्ध्य इत्यत्र· सम्बन्धान्तरात्सारोपा(क) यथा आयुर्घृतमिति· साध्यवसाना यथा आयुरेवेदमिति· एवमादौ सादृश्यादन्यः कार्यकारणभावादिः सम्बन्धस्तत्पूर्वे "के"—आरोपाध्यवसाने· अत्र गौणभेदे सारोपे भेदे ऽपि ताद्रूप्यप्रतीतिः, साध्यवसाने तु सर्वथैवाभेदावगमः प्रयोजनम्· शुद्धभेदे सारोपे ऽन्यवैलक्षण्येन कार्यकारित्वादेः साध्यवसाने त्वऽव्यभिचारेण कार्यकारित्वादेः प्रतीतिः फलम्· तदुभयं चाभेदप्रतीतिपूर्वकमित्युक्तम्· क्वचित्तत्प्रयोजनकत्वेनोपचारः—यथा इन्द्रार्थ

(क) ०पो यथेत्येकत्र पु० पाठ, स्तत्र भेदपदस्य विशेष्यसमर्पकतया पुंस्त्वम्· लक्षणाविशेष्यतातात्पर्येण तु स्त्रीत्वम् इति ध्येयम्· एवमेव, साध्यवसानो यथेत्यनुपपन्नम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूणा इन्द्रः· क्वचित् स्वस्वामिभावात् यथा राजकीयः पुरुषो राजा· क्वचिदवयवावयविभावात्—यथा कर्मधारये ऽग्रहस्त इत्यत्रावयवे ऽग्रमात्रे हस्तोपचारः· क्वचित्तदीयकर्मशालित्वात् यथा अतक्षा तक्षा· चतुर्षु क्रमेण वन्द्यत्वानतिक्रमणीयत्वसामर्थ्यनैपुण्यानि व्यङ्ग्यानि ॥

लक्षणा तेन षड्विधा ॥ १२ ॥

उपादानलक्षणारूपशुद्धभेदाभ्यां सह· रूढिप्रयोजनाभ्यां भेदे संभवत्यपि न ते विभाजकत्वेनोक्ते, किन्तु हेतुत्वेनेति न तत्कृतो भेदो गणितः· अत एव च पश्चा"द्व्यङ्ग्येन रहिते"त्यादिना तत्कृतं भेदं दर्शयिष्यति, अन्यथा पुनरुक्तिः स्यात्· एवं च यथोक्तव्याख्यानेन षड्विधत्वे निर्व्यूढे यत् "षड्विधेति रूढिप्रयोजनोपादानलक्षणारोपाध्यवसानरूपैः षड्रूपाधिभिः कल्पिता विधाः प्रकारा यस्यामिति षड्विधे"ति चण्डीदासव्याख्यानं, तत् 'शुद्धैव सा द्विधा सारोपान्या त्वि' त्येवतुशब्दयोरनालोचनविजृम्भितत्वादनादेयम् ॥ १२ ॥

एवमारोपादिकृतं प्रकारषट्कं प्रतिपाद्य व्यञ्जनकृतं प्रकारत्रयमाह—

व्यङ्ग्येन रहिता रूढा सहिता च(क) प्रयोजने ।

लक्षणेत्यनुवर्त्तते· ननु प्रयोजनस्थले कथं व्यङ्ग्यसाहित्यनियम इति चेत्, प्रयोजनस्य व्यञ्जनामात्रगम्यत्वात्· तदिदमुक्तं "प्रयोजनं हि व्यञ्जनव्यापारगम्यमेवे"ति· यत्तु ननु लक्ष्यप्रयोजनयोर्द्वयोरपि लक्षणयैव प्रतीतौ किमत्र व्यञ्जनयेत्यत आह प्रयोजनं हीतीति तत्फक्किकावतारणं, तदज्ञानविजृम्भितम्, अत्र व्यञ्जनस्थापनस्याऽप्रस्तुतत्वात्· तत्प्रकरणे च "व्यञ्जनाचापरा क्रिये"ति सूत्रेणैव प्रतिपादनात् ।

तच्च गूढमगूढं वा—

तदिति व्यङ्ग्यम्· लक्षणाभेदप्रयोजक आरोपादिर्यथा भिद्यते, तथा तत्प्रयोजकं व्यङ्ग्यमपीति चस्यार्थः· वाशब्दः समुच्चये· काव्यभावना-

(क) चस्थाने तुः प्रायः प्रकाशपुस्तकेषु पठ्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिपक्वबुद्धिः सहृदयः· तन्मात्रवेद्यं गूढम्· तदितरवेद्यमगूढम्· तत्र गूढं यथा—

मुखं विकसितस्मितं, वशितवक्रिम प्रेक्षितं,
समुच्छलितविभ्रमा गति,रपास्तसंस्था मतिः, ।
उरो मुकुलितस्तनं, जघनमंसबन्धोद्धुरं,
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥

अत्र विकासः पुष्पधर्मः स्मिते ऽनुपपन्न इति प्रसृतत्वं लक्षयता विकसितपदेन लोकोत्तररमणीयतातिशयो व्यज्यते· स च गूढः· एवं वशित,समुच्छलिता,पास्तसंस्था,मुकुलितो,द्धुर,मोदतेशब्दैरायत्तत्वो,ल्लसितत्वा,नेकविषयसञ्चारित्वो,द्भिन्नत्व,योग्यत्वा,ऽनियन्त्रितत्वानि लक्षयद्भिर्युक्तानुरागित्व,सकलवशीकारित्वा,नुरागातिशया,लिङ्गनयोग्यत्व,रमणीयत्व,स्पृहणीयत्वानि गूढानि व्यज्यन्ते· यथा वा मम—

चकोरीपाण्डित्यं मलिनयति दृग्भङ्गिमहिमा,
हिमांशोरद्वैतं कवलयति वक्त्रं मृगदृशः, ।
तमोवैदग्ध्यानि स्थगयति कचः, किंच वचनं
कुहूकण्ठीकण्ठध्वनिमधुरिमाणं तिरयति ॥

अत्र क्रियापदानामात्यन्तिकविच्छायत्वादीनि व्यङ्ग्यानि गूढानि· अगूढं यथा—

श्रीपरिचयाज्जड़ा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥

अत्रोपदेशकत्वं शब्दविशेषप्रयोक्तृत्वं मदे ऽनुपपन्नमित्याविष्कारं लक्षयतोपदिशतिपदेनाऽनायासेन शिक्षादानमभिव्यज्यते· तच्च सहृदयाऽसहृदययोरुभयोरप्यभिधेयवत्प्रकाशते ॥

—तदेषाकथिता त्रिधा ॥ १३ ॥

तत्, तस्मात्· त्रिधा—अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति ॥ १३ ॥

एवं लक्षणां निरूप्य तया लाक्षणिकं लक्षयति—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्भूर्लाक्षणिकः—

"स्याद्वाचको लाक्षणिकः" इतिसूत्रस्थः शब्द इत्यनुषज्यते. तद्भूः, तस्याः लक्षणाया आश्रयः ।

अथ व्यञ्जना निरूपणीया. सा च द्विधा शब्दनिष्ठा अर्थनिष्ठा च. तत्रान्त्या शब्दलक्षणे ऽनुपयुक्तेन्यत्र विवेचनीया. आद्या तु द्विधा अभिधामूला लक्षणामूला च. तत्र यद्यप्यभिधायाः प्राथम्यादुपजीव्यत्वाच्च तन्मूला प्रथमं निरूपयितुमुचिता, तथापि सुप्रसिद्धत्वाल्लक्षणायाः प्रकृतत्वाच्च तन्मूलामेव प्रथमं निरूपयति—

—तत्र व्यापारो व्यञ्जनात्मकः ।

तत्र लाक्षणिकशब्दे. व्यापारो व्यङ्ग्यप्रकाशानुकूलः ।

लक्षणादिनैव तत्प्रतीतौ किं तयेत्यत आह—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥ १४ ॥

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।

यस्य पावनत्वादेः फलस्य प्रतीतये लक्षणाश्रयशब्दप्रयोगस्तत्फलं तस्मादेव शब्दाद्गम्यते न तु प्रमाणान्तराद्, व्याप्तिस्मृत्यादेरनपेक्षणात्. नच तत्र शब्दस्य व्यञ्जनं विनाऽन्या क्रिया व्यापारः ॥ तथाहि—

नाभिधा समयाभावात्—

पावनत्वादौ फले सङ्केतग्रहाभावात्. अभिधा हि सङ्केतग्रहसहायैवोपयुज्यते न स्वरूपसतीति वक्ष्यते ।

—हेत्वभावान्न लक्षणा ॥ १५ ॥

मुख्यार्थबाधस्तद्योगो रूढिप्रयोजनान्यतरदिति त्रयं लक्षणाहेतुः ॥ १४ ॥ १५ ॥

तदभावमेवोपपादयति—

लक्ष्यं न मुख्यं, नाप्यत्र बाधा, योगः फलेन नो, ।

न प्रयोजनमेतस्मिन्,न च शब्दः स्खलद्गतिः ॥ १६ ॥

यथा गङ्गाशब्दस्य नीरं मुख्योऽर्थस्तत्र बाधः, तीरे च तत्सम्बन्धः, तीरस्य लक्षणयोपस्थापने मुख्यशब्देन प्रतिपादयितुमशक्यस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पावनत्वादेः प्रतीतिश्च प्रयोजनमिति गङ्गाशब्देन तटं लक्ष्यते· तद्वदि तटमपि मुख्यं स्या,त्तत्र च बाधो भवेत्, प्रयोजनस्य गङ्गादिगतपावनत्वादिविशेषस्य तटेन सम्बन्धः स्यात् लक्षणया प्रयोजनप्रतिपादनस्य प्रयोजनान्तरं सम्भवेत्, तदा गङ्गाशब्दः प्रयोजनं लक्षयेत्· नचैतदेकमप्यत्रेत्यर्थः· न केवलं मुख्यार्थबाधादीनामभावमात्रं, किं तु तेषामपेक्षाऽपि नेत्याह—नच शब्द स्स्खलद्गतिरिति· मुख्यार्थबाधादित्रयमपेक्ष्य बोधकत्वं स्खलिद्गतित्वम्· एवं "नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थं" इत्यादिवृत्तौ बाधादिकमनपेक्ष्येति शेषो द्रष्टव्यः· समर्थ इति पाठे तु बाधादित्रयमपेक्ष्यैवेति शेषः ॥ १६ ॥

नन्वस्तु प्रयोजने ऽपि लक्ष्ये प्रयोजनान्तरमिति वैयात्याद्ब्रूयात् तत्राह—

एवमप्यनवस्था स्याद्या मूलक्षयकारिणी ।

मूलं प्रकृतार्थप्रतीतिः ।

ननु पावनत्वादिविशिष्टमेव तीरं लक्ष्यतामिति किं व्यञ्जनया· नचैवं प्रयोजनस्यापि लक्ष्यकोटौ प्रवेशाल्लक्षणाप्रयोजनं नास्तीति वाच्यम्, गङ्गातटे घोष इत्यतो ऽधिकस्यार्थस्य प्रतीतेरेव प्रयोजनत्वादित्यत आह—

प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥ १७ ॥

कुत इत्याकाङ्क्षायामाह—

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।

ननु विषयफलयोर्भेद इति सूत्रार्थः· स चायुक्तः· फलत्वं हि जन्यत्वं जन्यप्रतीतिविषयत्वं वा ? आद्ये, पावनत्वादौ तदभावः· तद्द्वितीये च विषयाद्भेद एव· अन्त्ये, "प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वे"ति वृत्तिविरोधः· प्रकटताज्ञानस्य प्रत्यक्षजन्यत्वाभावात्· न च जन्यज्ञाप्यसाधारणमेकं साध्यत्वमस्तीति· अत्र ब्रूमः· ज्ञानस्य जनकीभूतो विषयो यथा ज्ञानादन्यः, तथा फलमपि तस्य स्वतो भिन्नं, कारणस्येव कार्यस्यापि भिन्नकालत्वनियमात्· शैत्यादौ तु क्वचित्फलपदमौपचारिकं दृश्यते· तथाच लक्ष्यज्ञानमेव यदि शैत्यज्ञानं तदा प्रयोजनं स्यादिति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भावः। ननु लक्ष्यप्रतीतेर्न शैत्यप्रतीतिः फलं, किंतु शक्यसम्बन्धरूपलक्षणाया,स्तथाच न किञ्चिद्दूषणमिति। अत्राहुः। अन्वयानुपपत्त्या हि लक्षणा प्रसरन्ती यावदन्वयोपपादकं तावदेव विषयीकरोति, न त्वनुपपादकमपीति कथं तटे पावनत्वमपि विषयीकुर्यात्। नन्वन्वयानुपपत्त्या कल्प्यमानापि सानुद्देश्यमपि शैत्यं विषयीकरोति। यथा तापोपशमायोपादीयमानं चन्दनं शैत्यमपि जनयतीति चेन्न। चन्दनस्य सन्निधिमात्रेण शैत्यजनकत्वम्, लक्षणायास्त्वनुपपत्तिप्रसारितयेति वैषम्यात्। यत्तूक्तं यथाश्रुते चण्डीदासेन—ज्ञानस्य विषयातिरिक्तं फलमात्रं वा विवक्षितं, ज्ञेयगतं वा? आद्ये, प्रकृतेप्यस्ति गोस्वामिगतप्रीतिः। अन्त्ये, प्रयोजनज्ञान एव व्यभिचारः। तेन हि गोस्वामिसन्तोषमात्रं जन्यते न तु तद्गतं किंचिदिति तस्माद्धेतुफलयोस्तटप्रतीतिफलप्रतीत्योर्भिन्नकालत्वेनाभिन्नव्यापारविषयत्वमसमीचीनमेवेति व्यञ्जनासिद्धिरित्यत्र सूत्रतात्पर्य"मिति, तदबोधविजृम्भितम्, नह्यनेन सूत्रेण यथाश्रुतेनापि ज्ञानत्वस्य विषयान्यफलत्वव्याप्यत्वं प्रतिपाद्यते, किंतु ज्ञानफलत्वस्य विषयान्यत्वव्याप्यत्वम्। तथा च शैत्यादेर्लक्षणाजन्यप्रतीतिविषयत्वे तत्प्रयोजनं न स्यादित्यर्थे दोषानवकाशः। वयं तु ब्रूमः। विशिष्टं लक्ष्यं तदा भवेत्, यदि विशिष्टत्वं लक्ष्यतावच्छेदकं पूर्वप्रतीतं सम्भवेत्, नत्वेवं, पावनत्वादिविशेषवैशिष्ट्यस्य तटे प्रमाणान्तरागोचरत्वात्, तत्र तस्याभावात्। यदुक्तवान् "योगः फलेननो"इति। अथ पावनत्वादिसामान्यवैशिष्ट्यमेव लक्ष्यतावच्छेदकमस्तु, तस्य प्रतीतत्वादिति चेत्तर्हि पावनत्वादिविशेषो न प्रतीयेतेति किं बहुना, गौर्वाहीक इत्यत्र गवाभिन्नजड़स्य लक्ष्यत्वे सैवान्वयानुपपत्तिः। उपसंहरति—

विशिष्टे लक्षणा नैवम्—

एवम् उक्तयुक्त्या। कथं तर्हि तत्प्रतीतिरित्यत आह—

—विशेषाः स्युस्तु लक्षिते ॥ १८ ॥

तटादौ लक्षिते सति पावनत्वादयो विशेषाः प्रतीतिविषयाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्युः· ते च प्रसिद्धातिरिक्तव्यापारगम्या एव· स च व्यापारो व्यञ्जनध्वनना-दिशब्दवाच्योऽवश्यमेषितव्यः· कथमन्यथा विशेषप्रतीतिरिति ॥ १७ ॥ १८ ॥

एवं लक्षणामूलं व्यञ्जकत्वमुक्तम्· अभिधामूलं त्वाह—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।—
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥ १९ ॥

अनेकार्थस्य शब्दस्य वाचकत्वे संयोगाद्यैर्नियन्त्रिते सति अवा-च्यार्थधीहेतुर्व्यापारोऽञ्जनं व्यञ्जनमित्यर्थः· अनेकार्थोऽनेकाभिधान-शक्तिः· अर्थभेदेन शब्दभेद इति नये तु अर्थान्तराभिधानशक्तशब्देन सदृश,स्तदभेदभ्रमविषयो वा· वाचकत्वमभिधा· अवाच्यार्थस्तदभिधा-व्यापाराविषयः· नियन्त्रणं नियमनमेकतरमात्रस्मरणानुकूलत्वम्· यदाहुः 'शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव' इति· एतेन, नियमनमेतस्मिन्नेवार्थे वक्तुस्तात्पर्यमिति तात्पर्यग्रह इत्यबोधप्रलापः· संयोगाद्यैरित्याद्यपद-संग्राह्यं विप्रयोगादि· यदुक्तमभियुक्तैः—

संयोगो, विप्रयोगश्च, साहचर्यं, विरोधिता, ।
अर्थः, प्रकरणं, लिङ्गं, शब्दस्यान्यस्य संनिधिः, ॥
सामर्थ्यमौचिती, देशः, कालो, व्यक्तिः, स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

इति· तत्र संयोगः प्रसिद्धार्थस्य गुणविशेषरूपः सम्बन्धः· तेनाभि-धानियमनं यथा सशङ्खचक्रो हरिरित्यत्र शङ्खादिसंयोगेनानेकार्थस्य हरिश-ब्दस्याच्युतेऽभिधा निम्यते, अन्यहरिपदार्थे तत्संयोगाभावात्। विप्रयोगस्ता-दृशसम्बन्धध्वंस,स्तेन यथा अशङ्खचक्रो हरिरित्यच्युते, संबन्धस्य प्रतियो-गिपूर्वकत्वात् । साहचर्यं सहचरता· तेन यथा रामलक्ष्मणाविति रामप-दस्य लक्ष्मणसाहचर्येण दाशरथौ। विरोधः सहानवस्थानं, बध्यघातकभा-वश्च· तेन यथा छायातपाविति(क) छायापदस्यातपाभावे· विरोधिनोः कयोश्चित्तस्योपमायां रामार्जुनगतिस्तयोरित्यत्र रामार्जुनपदयोर्भार्गव-

(क) ०ति कान्त्यादौ शक्तत्वेऽपि छा०—इत्यन्यतमे पठ्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कार्त्तवीर्ययोः। अर्थः प्रयोजनम्· तेन यथा स्थाणुं भज भवच्छिद इत्यत्र भवच्छेदनरूपप्रयोजनवशात् स्थाणुशब्दस्य हरे। प्रकरणं वक्तृश्रोतृबुद्धिस्थता· तेन यथा सर्वं जानाति देव इत्यत्र देवशब्दस्य राजनि· यत्तु 'युष्मदर्थे' इति व्याख्या· तस्या अपि प्रकृते राजादावित्यर्थः· किं वा सम्बोध्ये राजादावित्यर्थः, सम्बोध्यस्यैव युष्मदर्थत्वात्। लिङ्गं संयोगातिरिक्तसम्बन्धेन परपक्षव्यावृत्तो धर्मः· तेन यथा कुपितो मकरध्वज इत्यत्र मकराकारध्वजसमुद्राभ्यां व्यावृत्तेन समवायसम्बन्धवता कोपेन मकरध्वजशब्दस्य कामे· यत्तु लिङ्गं चिह्नमिति, तन्न कोपस्य कामचिह्नत्वाभावात्, असाधारणधर्मस्य चिह्नत्वात्, सशङ्खचक्र इत्यत्रातिव्याप्तिप्रसङ्गाच्च। शब्दस्यान्यस्य सन्निधिः नियतार्थकशब्दान्तरसामानाधिकरण्यम्· अतो भवच्छिद इत्यादावप्रसङ्गः· नच सशङ्खचक्रो हरिरित्यत्रातिव्याप्तिः· शङ्खचक्रशब्दसामानाधिकरण्याभावात्· यद्वा हरौ शङ्खचक्रे इति संयोगोदाहरणे तात्पर्यम्· तेन यथा देवस्य त्रिपुरारातेरित्यत्र त्रिपुरातिशब्दसामानाधिकरण्याद्देवशब्दस्य शम्भुरूपे ऽमरे, अन्यस्य देवशब्दार्थस्य राज्ञः त्रिपुरारातित्वाभावात्· यत्तु देवतान्तरस्या ऽतथाभावाच्छम्भौ शक्तिनियमनमिति· तन्न युक्तम्, देवतान्तरे देवशब्दस्य शक्तिभेदाभावादुदाहरणासामञ्जस्यापत्तेः। सामर्थ्यं कारणत्वम्· तेन यथा मधुना मत्तः कोकिल इति· अत्र मधुशब्दस्य वसन्ते· अन्यस्य मधुशब्दार्थस्य कोकिलमादनासामर्थ्यात्। औचिती अर्हता· तया यथा पातु वो दयितामुखमिति· अत्रोत्कण्ठितमनोरथसाधनौचित्येन मुखशब्दस्य सांमुख्ये नतूपायादौ· यद्यप्यत्रापि सामर्थ्यं सम्भवत्येव, तथापि मधुनेत्यत्र तृतीययेव तद्बोधाभावेप्यौचितीमात्रज्ञानादेव शक्तिनियमनमसङ्कीर्णमिति। देशेन यथा भात्यत्र परमेश्वर इति· अत्रेति राजधानीरूपाद्देशात् परमेश्वरपदस्य राजनि· कालेन यथा चित्रभानु र्विभातीत्यत्र चित्रभानुपदस्य दिवा दिवाकरे, रजन्यामाशुशुक्षणौ। व्यक्तिर्ल्लिङ्गं पुंस्त्वादिः· तया यथा मित्रं भातीति· अत्र नपुंसकरूपाल्लिङ्गात् मित्रपदस्य सुहृदि· मित्रो भातीत्यत्र पुंलिङ्गात् सूर्ये। स्वरस्तूदात्तादिर्वेदे बाहुल्येनार्थप्रतीतिकृद् दृश्यते· यथा इन्द्रशत्रो वर्द्धस्वेति· अत्रेन्द्रशत्रोरित्यस्यान्तोदा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्तत्वं षष्ठीतत्पुरुषव्यक्ताविन्द्रस्य शातनकर्मत्वं लभ्यते, पूर्वपदान्तोदात्तत्वे च इन्द्रः शातयिता यस्येति बहुव्रीहिलाभादिन्द्रस्य शातनकर्तृत्वं लभ्यते· काव्ये तु नैवं बाहुल्यम्·(क) ननु 'दृष्टे प्रसीदे'त्यादौ स्वरेण सम्बोधनं प्रकाश्यते· तेन चार्थविशेषे ऽभिधा नियम्यते, न तु साक्षात्स्वरेणैव· काकुस्थले तु न नानार्थाभिधानियमनं, किंत्वपदार्थस्यैव व्यञ्जनम्· यद्वा स्वरशब्देनोदात्तादित्रयं विवक्षितम्· अतः काव्ये स्वरस्याभिधानियामकत्वं नास्त्येवेति व्यर्थं बाहुल्येनेति विशेषणमिति मैवम्· "सुधाकरसुहृद्धक्रं दृष्टिः पङ्कजवैरिणी"त्यादाविन्द्रशत्रुरितिन्यायेनाभिधानियमनस्य काव्येपि दुर्वारत्वात्। स्वरादय इत्यादिग्रहणादभिनयापदेशौ गृह्येते· अत्रे चोक्तान्तर्भूता·· अभिनयश्च साक्षादिवार्थाकारादिप्रदर्शिका हस्तादिक्रिया· तया यथा—

एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं ।
एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअएहिं ॥

अत्र विकसितमुकुलिताभिनयविशेषसाहित्येन स्तनस्य, पीनत्वमुकुलितत्वाद्यर्थविशेषे ऽभिधा नियम्यते· एवं शेषपादत्रयेपि । अपदेशो ऽभिमतनिर्देशः· तेन यथा—

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षो ऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥

अत्रापदेशेन इदंशब्दस्याभिधा वक्तरि नियम्यते॥ इत्थं संयोगादिना ऽर्थान्तराभिधायकत्वे निवारिते ऽपि यदनेकार्थशब्देन क्वचिदर्थान्तरस्य प्रतिपादनं, तत्र नाभिधा शब्दस्य व्यापारो, नियमनात्तस्याः· नापि लक्षणा, मुख्यार्थबाधादिविरहात्, किंत्वञ्जनं व्यञ्जनमेव व्यापारः· यथा—

भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥

(क) अत्र, "उक्तानुदात्तादिरूपस्वरेण हि काव्येऽर्थविशेषावगतौ श्लेषभङ्गप्रसङ्गात्· अत एव श्लेषप्रस्तावे वक्ष्यति—काव्यमार्गे स्वरो न गण्यत इत्यादौ" त्येकत्राधिकमास्ते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र प्रकरणेन भद्रात्मन इत्यादिपदानां राज्ञि तदन्वययोग्ये चार्थे ऽभिधानियन्त्रणे गजस्य तदन्वययोग्यस्य चार्थस्य व्यञ्जनयैव प्रतीतिः। ननूपमानोपमेयभावकल्पनाच्छब्दश्लेषतो भेदेऽपि 'योऽसकृत्परगोत्राणा'-मित्याद्यर्थश्लेषतः कुतोऽस्य भेदः। अर्थश्लेषे चोभयत्र शक्तिरेव न व्यञ्जनेति चेत्, उच्यते, यत्रोभयोरर्थयोस्तात्पर्यं स श्लेषः। यत्र त्वेकस्मिन्नेव, तत्सामर्थ्यमहिम्ना तु द्वितीयार्थप्रतीतिः, सा व्यञ्जनेति ॥ १९ ॥

एवं व्यञ्जनां निरूप्य तया शब्दं लक्षयति—

तद्युक्तो व्यञ्जकः शब्दः—

अञ्जनमिति प्रस्तुते ऽप्यर्थगत्या तच्छब्देन व्यञ्जनं परामृश्यते। तेन व्यञ्जनयुक्तो व्यञ्जक इति सम्पद्यते। अन्यथा अञ्जनयुक्तोऽञ्जकःस्यादिति। तदेतदुक्तं अञ्जनयुक्तो व्यञ्जनयुक्तः। ननूक्तस्थले ऽर्थस्याव्यञ्जकत्वे कथं शब्दार्थयुगलरूपस्य काव्यस्य ध्वनित्वं स्यादित्यत आह—

—यत्सोऽर्थान्तरयुक्तथा ।

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥ २० ॥

स इति शब्दः। तथा व्यञ्जकः ॥ २० ॥

इति श्रीमहामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपे काव्यशरीरभूतशब्दार्थविभागो द्वितीय उल्लासः ॥ * ॥

॥ अथ तृतीय उल्लासः ॥

एवं शब्दे निरूपिते उपोद्घातेन शब्दव्यञ्जनायां निरूपितायां प्रसङ्गेनार्थव्यञ्जना निरूपणीया। तत्रैतदाशङ्क्येत—शब्दे निरूपिते ऽवसरोऽयमर्थनिरूपणस्य। किञ्च, अर्थे धर्म्मिणि निरूपिते तद्धर्मो व्यञ्जना सुनिरूपा भवति। तत्कुतस्तमनादृत्याऽऽहत्य व्यञ्जनानिरूपणमिति। तदेनां शङ्कामपनिनीषुरुक्तं स्मारयति—

अर्थाः प्रोक्ताः पुरा तेषाम्—

अर्था वाच्यलक्ष्यव्यङ्ग्याः। अर्थस्य सन्निकृष्टतरत्वे ऽपि तेषामित्यनेन योग्यतया वाचकादयः शब्दाः परामृश्यन्ते ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिष्यावधानाय प्रतिजानीते—

—अर्थव्यञ्जकतोच्यते ।

ननु सर्वेषामित्यादिना पूर्वमर्थानां व्यञ्जकता प्रोक्तैव· तदन्या कीदृशी सेत्याकाङ्क्षायामाह—

वक्तृ,बोद्धव्य,काकूनां, वाक्य,वाच्या,न्यसन्निधेः, ॥ २१ ॥
प्रस्ताव,देश,कालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ।
यो ऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥ २२ ॥

बोद्धव्यः प्रतिपाद्यनीयो जनः, अन्तर्भावितण्यर्थत्वात्· अतो न वाच्येनाऽभेदः· काकुः शोकभीत्यादिभिर्ध्वनिविकारः· वाक्यवाच्याभ्यां सहितोऽन्यसन्निधिर्वाक्यवाच्यान्यसन्निधिः· अतो न द्वन्द्वे एकवद्भावे नपुंसकत्वप्रसङ्गः· प्रस्तावः प्रकरणम्· वैशिष्ट्यं वैलक्षण्यम्· तच्च वक्त्रादिषु प्रत्येकमभिसम्बध्यते· अन्योऽर्थो वाच्यलक्ष्यव्यतिरिक्तः· व्यक्तिः व्यञ्जना, करणव्युत्पत्तेः· अर्थस्य त्रिविधस्यापि, न तु कस्यचिदेव· प्रतिभाजुषामित्यनेन, नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा या वासनेत्युच्यते, तस्यां सत्यामेव वक्तृवैशिष्ट्यादिसत्त्वे ऽपि व्यङ्ग्यप्रतीतिरिति प्रतिपादितम्· अत एव वैयाकरणादीनां न तथा रसप्रतीतिः· तथा चोक्तम्—

"सवासनानां नाट्यादौ रसस्यानुभवो भवेत् ।
निर्वासनास्तु रङ्गान्तर्वेश्मकुड्याश्मसन्निभाः" ॥

इति ॥ यथा क्रममुदाहरणानि—

अइपिहुलं जलकुम्भं घेत्तूण समागदम्हि सहि तुरिअं ।
समसेअसलिलणीसासणीसहा वीसमामि क्खणं ॥

अत्र वक्त्री कामिनी· तस्याः दुःशीलरूपवैशिष्ट्यं विजानतां चौर्यरतगोपनं व्यक्तीभवति ।

ओणिद्दं दोब्बल्लं चिन्ता अलसत्तणं सणीससिअं ।
मह मन्दभाइणीए केरं सहि तुहबि अअह परिहवइ ॥

अत्र दूती प्रतिपाद्या· तस्या अन्यदापि दृष्टदुष्टचेष्टायाः वैशिष्ट्येन तस्याः कामुकोपभोगो व्यज्यते· अत्रान्यदीयमुचिद्रतादिकमन्यत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बाधितमिति तत्सदृशमुचिद्रतादिकं लक्ष्यत इति केचित्, तदवेोधात्, सख्यास्तदीयोचितान्वयस्यावाक्यार्थत्वात् ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥

खेदो मात्सर्यम्· अत्र खेदं मयि भजति नाद्यापि कुरुष्विति काको-र्वैशिष्ट्या'न्मयि न योग्यं, कुरुषु पुनर्योग्यं मात्सर्यमि'ति व्यज्यते· नन्वत्रो-क्तेन काकुव्यङ्ग्येन वाच्यस्य सिद्धिः शोभनत्वनिष्पत्तिः क्रियते· तथाचाप-राङ्गतया व्यङ्ग्यं गुणीभूतम्· अतो न ध्वन्यङ्गं काकुरितिचेत्, उक्तव्यङ्ग्यस्य क्रोधप्रकर्षपर्यवसन्नतया वाच्यस्यैव तदङ्गत्वात्·तदेतदुक्तम्–" न च वाच्य-सिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यमि"ति· तथापि काक्वाक्षि-प्तव्यङ्ग्यगुणीभूतव्यङ्ग्यप्रभेदता कथमपनेयेति चेन्न, अत्र नेति प्रश्नकाक्वा ऽपि वाक्यार्थप्रतीतिपर्यवसानात्, यां काकुं विना वाक्यार्थबोध एव नोप-पद्यते तयैवाक्षिप्तस्य गुणीभावात्· यथा "मथ्नामि कौरवशत"मित्यादौ भीमसेनादौ तादृशे वक्तरि· तदेतदुक्तं–"प्रश्नमात्रेणापि काकोर्विश्रा-न्ते"रिति· अन्ये तु,'कुरुषु न भजती'ति नञ्काकुः किमर्था· ततः प्रश्नरूपः किमर्थ एवेहाक्षिप्त इति तस्यैव गुणीभावो न्याय्यः, नतु क्रमेणापि काक्वा व्यङ्ग्यो गुणीभूतो भवति· अत एव गुणीभूतविभागे काक्वाक्षिप्त-मिति हठार्थगर्भाक्षिप्तपदप्रयोग इति तात्पर्यमाहुः ॥

तइआ मह गण्डत्थलणिमिअं दिट्ठिं ण णेसि अण्णत्तो ।
एण्हिं सव्वेअ अहं ते अ कवोला ण सा दिट्ठि ॥

वाक्यमनेकं पदम्· तेनात्र तदेदानींपदात्मकवाक्यवैशिष्ट्यात् 'मत्स-खीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यादृशी, चलितायां तु तस्या-मन्यादृशीत्यहो प्रच्छन्नकामुकत्वं तवे'ति व्यज्यते ।

उद्देशो ऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंचैतस्मिन् सुरतसुहृदस्तन्वि ते वांति वाता–
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥

अत्र नर्मदोद्दिशरूपस्य तद्विशेषणीभूतवातकुञ्जादिरूपस्य च वाच्यस्य यथोक्तविशेषणस्य वैशिष्ट्यात्सुरतार्थं प्रविशेति व्यज्यते।

णोल्लेइ अणुल्लमणा(क) अत्ता मां घरभरम्मि सअलम्मि।
खणमेतं जइ संझाइ होइ ण वा होइ वीसामो ॥

अन्यसन्निधिः संनिहितोऽन्यः· तेनात्र प्रतिवेशिनीं प्रति प्रवर्त्तिते वाक्ये प्रच्छन्नपुरुषरूपस्यान्यस्य संनिधेर्वैशिष्ट्यात् संनिहितं प्रति सन्ध्या सङ्केतसमय इति व्यज्यते।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण।
एमेअ किन्ति चिट्ठसि ता सहि सज्जेसु करणिज्जं ॥

अत्र प्रकरणस्य प्रस्तावस्याभिसारसम्बन्धित्वरूपवैशिष्ट्यादुपपति प्रत्यभिसर्तुं न योग्यमिति व्यज्यते।

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः।
नाहं विदूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥

अत्र देशस्यातिविविक्ततादिरूपवैशिष्ट्याद्वक्तृवैशिष्ट्यादिसहितात्सख्या 'प्रच्छन्नकामुको युष्माभिः प्रहेय' इति प्रियसखीं प्रति व्यज्यते।

गुरुअणपरवस पिअ किं भणामि तुह मन्दभाइणी अहअं।
अज्ज पवासं वच्चसि वच्च सअं जेव्व सुणसि करणिज्जं ॥

अत्राद्यपदप्रतिपाद्यमधुसमयवैशिष्ट्याद् वक्तुरवस्थाविशेषसहिता· 'इदानीं यदि व्रजसि तदा अहं तावन्न जीवामि, तव तु न जानामि गति'मिति प्रियं प्रत्यनुरक्तया व्यज्यते ॥ आदिग्रहणाच्चेष्टालीलादेः· तत्र चेष्टा यथा–

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।
आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने
वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते ॥

(क) अणणणमणा–इति प्रकाशे क्व चित्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रोरुसमासङ्गादिचेष्टाविशेषात् प्रच्छन्नकामुकविषय आकूतविशेषो ध्वन्यते· तत्र प्रथमार्द्धेन स्पष्टकमा(क)लिङ्गनम्, शिरांशुकं पुरत आनीतमित्यनेन गूढमागच्छेरिति, अधःक्षिप्ते चले लोचने वाचस्तत्र निवारितं प्रसरणमित्येताभ्यां सूर्यास्तमये(ख) कालाहलरहिते काले समागन्तव्यमिति, सङ्कोचिते दोर्लते इत्यनेन पारितोषिकमालिङ्गनं करोमीति व्यज्यते । यद्यप्येकत्रैवोदाहरणे भेदान्तराण्यपि सन्तीति तदेवोदाहरणान्तरं सम्भवति, तथापि निःसन्देहव्युत्पत्तये प्राप्तावसरतया पुनः पुनरुदाह्रियते । वक्तृबोद्धव्यादीनां प्रत्येकमेव न व्यञ्जकत्वं, किन्तु मिलितानामपीति द्रष्टव्यम्· तत्र द्वयोर्व्यञ्जकत्वं यथा—

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसए पलोएहि ।
मा पहिअ रत्तिअन्धअ सज्जाए मह णिमज्जहिसि ॥

नन्वर्थमात्रव्यञ्जकत्वे शब्दार्थयुगलरूपकाव्यस्य व्यञ्जकत्वं न सिद्धमित्यत आह—

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥ २३ ॥

इति श्रीमहामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपेऽर्थव्यञ्जकतानिर्णयस्तृतीय उल्लासः ॥ * ॥

॥ अथ चतुर्थ उल्लासः ॥

यद्यपि काव्यलक्षणं विभागं च विधाय लक्षणपदार्थेषु विवेचनीयेषु विशेष्यपदस्यार्थः शब्दार्थौ विचारितौ· इदानीं विशेषणपदार्थानां दोषगुणालङ्काराणां निरूपणमुचितं, न तु काव्यभेदस्य ध्वन्यादेर्भेदानाम्· तथापि ध्वन्यादेर्भेदेषु ज्ञातेषु दोषादीनां हेयोपादेयतयोरवगमो-

(क) स्पष्टकमित्यन्यत्र पठ्यते· परं, स्पष्टकमित्येव साधीयान्पाठः, वात्स्यायनसूत्रादिषु तथैवोपलब्धेः ।

(ख) सूर्यास्तसमये—इति तु त्वेकत्रस्थो न खलु समञ्जसः पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवति, तयोर्विशेषनिष्ठत्वात्· यथा श्रुतिकटुत्वं दोषो ध्वनिविशेषे शृङ्गारादिध्वनौ हेयो, रौद्रादिरसध्वनौ चित्रभेदे वाऽहेय एव· माधुर्यादिगुणाः शृङ्गारध्वनावुपादेयो, रौद्रादिध्वनौ त्वनुपादेय एव· अलङ्कारोपि यमकादीरसादिध्वनावनुपादेयश्च, चित्रभेदे तूपादेय एव· तथाच दोषादिनिरूपणोपयोगिषु काव्यविशेषप्रभेदेषु निरूप्यमाणेषु प्रसङ्गादनुपयोगिनोऽपि निरूपणीया इत्युल्लासत्रयेण काव्यभेदत्रयभेदो निरूपणीयः· तत्र प्रथमे ध्वनिभेदः· तत्र तावद्ध्वनिर्द्विधा—अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्च· अत्र यद्यप्यभिधायाः प्राथम्यात्तन्मूलको विवक्षितान्यपरवाच्य एव प्रथमं निरूपयितुमुचित, स्तथापि लक्षणामूलव्यञ्जनायाः प्राङ्निरूपणा"त्यशूननत्तौ"त्यत्रेव प्रावृत्तिकं क्रममुपादाय सूचीकटाहन्यायेन वा प्रथममाद्यमुद्दिश्य विभजते—

अविवक्षितवाच्यो यस्तच वाच्यम्भवेद्ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥ २४ ॥

वाच्यः वाच्यजात्यादिधर्म्माणां धर्म्मी, अविवक्षितो वाच्येन रूपेणान्वयबोधविषयतया अनपेक्षितो यत्र सः· तत्र यद्यप्यविवक्षितवाच्यमात्रस्य नायं विभागः, किन्तु तद्विशेषस्य ध्वने,र्न तु शब्दात्तथावगम,स्तथापि यत्तदोरेकार्थपरामर्शकतया 'तत्र ध्वनावि'ति तच्छब्दार्थस्य ध्वन्यऽभेदे यच्छब्दार्थोपि ध्वनिरेव लभ्यते· अयं च ध्वनिभेदो लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सति सम्भवति· अविवक्षितत्वं च वाच्यस्यान्वयानुपपत्तेः· सा च वाच्यस्यानुपयुक्तत्वेनोपयोगिनि रूपान्तरे तात्पर्याद्वा, स्वत एवान्वयायोग्यत्वाद्वा· अनुपयुक्तत्वमपि पुनरुक्तत्वाद्, विशेषानाधायकत्वमात्राद्वा· तत्रोभयत्रापि वाच्यमर्थान्तर उपयोगिनि लक्ष्यतावच्छेदके संक्रमितमाश्रयत्वेन परिणमितं, वाच्योप्यर्थो रूपान्तरेण लक्ष्यत इत्यर्थः· द्वितीये तु वाच्यमत्यन्ततिरस्कृतं, न केनापि रूपेणान्वयप्रविष्टम् । तत्रार्थान्तरसंक्रमितवाच्यं पुनरुक्तेर्यथा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताला जाअन्ति गुणा जाला ते सहिअएहिं घेप्पंति ।
रइकिरणाणुग्गहिआइं होन्ति कमलाइं कमलाइं ॥

अत्र द्वितीयकमलशब्दः सौरभादिगुणयुक्तत्वरूपलक्ष्ये संक्रमितवाच्यः । विशेषानाधायकत्वमात्राद्यथा—

त्वामस्मि वच्मि विदुषां समवायो[(क)]ऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥

अत्र वच्मीत्यनुपयुक्तार्थ,मनुपादाने ऽपि वचनक्रियाप्रतीतेः· अत उपदेशत्वं लक्ष्यम्, तत्र वाच्यार्थः संक्रमितः· हितसाधनत्वं व्यङ्ग्यम्· एवं त्वामस्मीतिपदे अप्यनुपयुक्तार्थे, सम्बोध्यतयैव युष्मदर्थस्य वचनकर्मतावगते,र्वच्मीत्युत्तमपुरुषेणैवास्मदर्थस्य तत्कर्तृत्व[(ख)]प्रत्ययात्· अतस्ताभ्यां लक्ष्ययोरुपदेश्याऽऽप्तत्वयोस्तद्वाच्यौ संक्रमितौ· तथा आत्मीयाया एव मतेः सर्वैरास्थानादनुपयुक्तत्वेनात्मीयशब्देन प्रमाणपरिगृहीतत्वे लक्ष्यमाणे तद्वाच्यं संक्रमितम्· अस्मद्युत्तम इत्यत्रार्थग्रहणादस्मियोगे ऽपि वच्मीत्युत्तमपुरुषः । अत्यन्ततिरस्कृतं यथा—

उपकृतं बहु नाम किमुच्यतां सुजनता भवता प्रथिता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥

अत्रापकारिण्यन्वयायोग्यैरुपकृतादिभिः पदैः स्वार्थविपरीतं लक्ष्यते· न च तत्र वाच्यस्य कथंचित्प्रवेशः· त्वयैवमपकारेऽपि क्रियमाणे मया प्रियमेवोच्यत इति स्वसाधुत्वं व्यङ्ग्यं, तवोपकारापकारविवेको नास्तीति वा· अयं च प्रभेदो न केवलं विरोधिलक्षणायां, किन्त्वन्यत्रापि· यथा मम—

आधूतसस्वेदकरोत्पलायाः स्मितावगूढप्रतिकूलवाचः ।
प्रियो विहायाधरमायताक्ष्याः पपौ चिराय प्रतिषेधमेव ॥

अत्र पपावित्यनेन सोत्कण्ठनिरीक्षणं लक्ष्यम्,उत्कण्ठातिशयो व्यङ्ग्यः॥२४॥

द्वितीयं ध्वनिभेदं कारिकार्धाभ्यामुद्दिश्य विभजते—

(क) प्रदीपेषु, समुदायः—इत्युपलभ्यते· परम्, समवाय इति प्रायः प्रकाशः, "समवाय एकवाक्यतापन्नसमुदाय" इत्युदाहरणचन्द्रिकाप्रदीपोद्योतौ च भवन्ति ।

(ख) तत्कर्तृकत्वेति यावत्सु जाग्रत्यपि वस्त्वाहन्त्या 'कं' निरास्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विवक्षितं चान्यपरं वाच्यं यत्रा,परस्तु सः ।

ध्वनिरिति प्रकरणाल्लभ्यते· अन्यपरं व्यङ्ग्योपसर्जनीभूतम्· ॥

अयं भेदोऽभिधामूलगूढव्यङ्ग्यप्राधान्ये सति द्रष्टव्यः ॥ एष तु–

कोप्यऽलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥ २५ ॥

सूचीकटाहन्यायमाश्रित्याऽलक्ष्यक्रमव्यङ्ग्यस्य पूर्वमुद्देश,स्तस्यैकत्वात्· द्वितीयस्य तु पञ्चदशभेदत्वात्·[क] विभावादय एव न रसः, किन्तु रसस्तैर्निष्पद्यत इत्यस्ति विभावादिरसप्रतीत्योः क्रमः· स तु न लक्ष्यत इति क्रमस्याऽलक्ष्यत्वलक्ष्यत्वकृतं भेदद्वयमित्यर्थः ॥ २५ ॥

रसभावतदाभासभावशान्त्यादिरक्रमः ।

भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ॥ २६ ॥

अक्रमः अलक्ष्यक्रमः· तच्छब्देन रसभावयोः परामर्शः· आदिग्रहणाद्भावोदयभावसन्धिभावशवलत्वानि· नन्वाभासवद्रसस्य शान्त्यादयः किंनोक्ताः? निरन्तरावयवस्यापरिच्छिन्नस्य निरतिशयस्य वेद्यान्तरसम्पर्कशून्यस्य तदभावात्· आभासत्वं तु तिर्यगाद्यधिकरणतया अविरुद्धम्· भिन्न इति· यत्र प्रधानं रसादिस्तत्र ध्वनिः, यत्र त्वप्रधानं, तत्रालङ्कार इति भावः ॥ २६ ॥

रसस्वरूपमाह–

कारणान्यथ कार्याणि सहकारीणि यानि च ।

रत्यादेः स्थायिनो लोके, तानि चेन्नाट्यकाव्ययोः ॥ २७ ॥

विभावा अनुभावास्त[ख] त्कथ्यन्ते व्यभिचारिणः ।

व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसःस्मृतः ॥ २८ ॥

(क) एकस्मिंस्त्वादर्शे "पञ्चाशद्भेदत्वात्–इति· परं, लिपिप्रमादोऽयं, "पञ्चदशभेदत्वादिति· लक्ष्यक्रमः प्रथमतः शब्दार्थोभयशक्तिमूलत्वेन त्रिविधः· तत्र शब्दशक्तिमूलस्य चेतौ द्वौ भेदौ–वस्तु, अलंकृतिरिति· अर्थशक्तिमूलस्य द्वादश वक्ष्यन्ते· उभयशक्तिमूल एक एवेति पञ्चदशेत्यर्थः पदैकदेशादिकृतभेदास्तु सर्वेषां समाना इति न गण्यन्त इति भावः"–इत्युद्योतसन्दर्भावधूतार्थकत्वादिति ।

(ख) तदः स्थाने चः प्रकाशे प्यास्ते ।

Dr. Urmila Sharma Collection, Varanasi

अथेति समुच्चये· कारणानि प्रमदेन्दूदयादीनि कारकोद्दीपकरूपाणि· कार्याणि—

स्वेदः, स्तम्भो, ऽथ रोमाञ्चः, स्वरभङ्गो, ऽथ वेपथुः, ।
वैवर्ण्यं,मश्रु, प्रलय, इत्यष्टौ सात्त्विका मताः ॥

वाङ्मनोबुद्धिशरीरारम्भरूपाणि च कटाक्षभुजक्षेपादीनि· सहकारीणि तेषु जनयितव्येषु उत्कण्ठादीनि· विभावा आलम्बनोद्दीपनरूपाः· चेत् यदेत्यर्थः· तत् तदेत्यर्थः· यद्यप्युद्दीपकस्य स्थायिनि न कारणत्वं, किन्तूत्पन्ने तस्मिन्नीषदुत्कर्षाधायकत्वरूपमुद्दीपकत्वं, तथाप्यनुद्दीपितोऽप्यजातप्राय एवेत्युद्दीपके ऽपि कारकत्वोपचारात्तत्रापि विभावव्यवहारः· विभावादिसंज्ञा च विभावनादिव्यापारयोगात्· तद्यथा—वासनारूपतया स्थितान् रत्यादीन् स्थायिनो विभावयन्ति रसास्वादाङ्कुरयोग्यतां नयन्तीति विभावाः· अनुभावयन्ति च तानित्यनुभावाः· पोषकतया विशेषेणाभितः काये स्थायिनं चारयन्ति, विशेषेणाभिमुख्येन चरन्तीति वा व्यभिचारिणः । व्यक्तः स इति· व्यक्तिश्चर्वणेति पर्यायः· सा च विशेषणम्· तथा च व्यक्तिविशिष्ट एव स्थायी रसः· एवं च रसस्याकार्यत्ववचनं, विभावादिभिः काव्योपस्थापितैः स्थायिनोऽजननाद् विभावादिकार्यताया एव प्रकृतत्वात्, विशिष्टस्य त्वकार्यतानवच्छेदकत्वाद्वा, नीलघटत्ववत्· तस्मात् "स्थायी न रसः किंतु विभावादिमेलकं ब्रह्मैव वा· अन्यथा न कार्यं इत्यादिग्रन्थविरोध" इत्यादि प्रलपितमात्रमनादेयम्· स तैरिति, यस्य यानि कारणादीनि स तैस्तज्जातीयैरित्यर्थः· स्थायी, विरुद्धैरविरुद्धैर्वा भावैरतिरस्कृतप्रवाहो भावः· यदुक्तं—

विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः ।
आनन्दाङ्कुरकन्दोऽसौ भावः स्थायिपदास्पदम् ॥

इति· न चेयं स्वकपोलकल्पना सूत्रकारस्य· उक्तं हि भरतेन—

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति"रिति·

एतद्विवृण्वते भट्टलोल्लटप्रभृतयः——स्थायिनां विभावेनोत्पा-

CC0. In Public Domain, Digitizagtion by eGangotri

द्योत्पादकभावरूपा, दनुभावेन गम्यगमकभावरूपा, द्व्यभिचारिणा पोष्य-पोषकभावरूपात् संयोगात्सम्बन्धाद्रसस्य निष्पत्तिरुत्पत्तिरभिव्यक्तिः पुष्टिश्चेत्यर्थः· तथाहि—ललनादिभिरालम्बनविभावैः स्थायी रत्यादिको जनितः, उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः, अनुभावैः कटाक्षभुजक्षेपयादिभिः प्रतीतियोग्यः कृतः, व्यभिचारिभिरुत्कण्ठादिभिः परिपोषितो रामादावनुकार्ये रसः, नटे तत्तुल्यरूपतानुसन्धानवशादारोप्यमाणः सामाजिकानां चमत्कारहेतुरिति ।—तदेतदपेशलम्, सामाजिकेषु तदभावे तत्र चमत्कारानुभवविरोधात्· नच तज्ज्ञानमेव चमत्कारहेतुः·(क)लौकिकशृङ्गारादिदर्शनेनापि चमत्कारप्रसङ्गात्· नचानुभावादिज्ञानबलायात आरोपस्तथा, न तु साक्षात्कारमात्रमितिवाच्यं, चन्दनसुखादौ वैपरीत्यदर्शनात्, अन्यथैवोपपत्त्या तादृशकल्पनायां मानाभावाच्च ।

श्रीशङ्कुकस्तु——स्थायिनो विभावादिभिरनुमाप्यानुमापकभावरूपसम्बन्धाद्रसस्य निष्पत्तिरनुमितिरित्यर्थः· तथाहि—विषयनियमविषया धीः सम्यग्बुद्धिः· यथा 'राम एवाय', 'मयमेव राम'—इत्ययोगान्ययोगव्यवच्छेदविषये· अनन्तरावतीर्णबाधा तु मिथ्याधीः· यथोत्तरकालिके 'न रामो ऽय'मिति बाधे 'रामोयमि'ति· विरुद्धोभयकोटिका तु संशयः· यथा 'अयं रामो न वे'ति· सदृशोभयविषया धीः सादृश्यधीः· यथा 'रामसदृशो ऽयमि'ति· ताभ्यो लोकप्रसिद्धाभ्यो विलक्षणया चित्रे 'तुरगो ऽयमि'तिवद्रामोयमिति बुद्ध्या प्रथमं पक्षभूतो नटो विषयीक्रियते· ततस्तत्राविद्यमानमपि विभावादित्रयं लिङ्गमवगम्यते· कुतः,—पूर्वमेव रामास्वादाविर्भावेन गुरुशिक्षामासाद्य कृतातिशयिताभ्यासेन नटेन,

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरा(ख)लोचनगोचरं गता ॥ इति,

(क) अत्र, शब्दज्ञानेऽपि तदापत्तेः—इत्येकत्राधिकम्, न तु युक्तम्, तथात्वे, लौ० प्रसङ्गादित्यत्रान्ते चेनाधिकेन भाव्यं स्यात्· लौकिकशृङ्गारादिदर्शनापीति च लौकिकशब्दज्ञानादेरप्युपलक्षणम् ।

(ख) प्राणेश्वरीति पाठः पुस्तकद्वये· एतदीयसाधुत्वादिविचारश्चान्यत्र द्रष्टव्यः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दैवादहमद्य(क) तया चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥

इत्यादिकाव्यानुसन्धानबलादालम्बनोद्दीपनव्यक्तौ तदनुगुणस्य रोमाञ्चादेर्दर्शनीयस्याविर्भावेन व्यञ्जनीयस्योत्कण्ठादेः तत्कार्यप्रकटनेन च प्रकाशनात्, अथ तैः कृत्रिमत्वेन अतल्लिङ्गैरपि कृत्रिमत्वेनाज्ञानात्स्थायी रत्यादिरनुमीयते· सैव चानुमितिः· सचमत्कारप्रतीतिरूपा चर्वणा· अतस्तया विषयीक्रियमाणः स्थायी रस इत्युच्यते· चर्वणा च सामाजिकानामिति तेष्वेव रस इति व्यवहारः· ननु साक्षात्कार एव सचमत्कारो नत्वनुमित्यादिरपि· अन्यथा सुखादावनुमीयमाने ऽपि स स्यात्· न स्यात्,—वस्तुसौन्दर्यबलाद्रसनीयत्वेन स्थायिनामन्यानुमेयवैलक्षण्यात्· तथापि स्थायिनां नटे सत्त्वाद्बाधावतारेऽनुमितिरेव कथं स्यादिति चेच, अभावनिश्चयाभावात्, स्थायितया सम्भाव्यमानत्वादिति ।—एतदप्यहृदयग्राहि—यतः प्रत्यक्षमेव ज्ञानं सचमत्कारं नानुमित्यादिरिति लोकप्रसिद्धिमवधूयाऽन्यथाकल्पने मानाभावः· सूत्रस्यान्यथैव योजनासम्भवात् ।

भट्टनायकस्तु——न तावन्नटगतत्वेन न रामगतत्वेनानुमीयते· नवोत्पद्यते· न सामाजिकगतत्वेन व्यज्यते, आद्यपक्षयोरुक्तदोषाद्· अन्यगतेन ऽन्येषां चमत्काराभावाच्च· अन्त्ये सिद्धस्यैव व्यङ्ग्यत्वात् रसस्य चासिद्धत्वात्, सर्वेषामेवाभिव्यक्तिप्रसङ्गाच्च· तस्माद्विभावादिभिः संयोगाद्भोज्यभोजकभावसम्बन्धात् रसस्य निष्पत्तिर्भुक्तिरिति सूत्रार्थः । न च भोगपक्षे ऽपि दोषावकाशः, भोगस्यालौकिकत्वात् तथाप्यन्यनिष्ठःस्थायी अन्यनिष्ठैरेव विभावादिभिः कथमन्येन भोक्तव्यः, अतिप्रसङ्गादिति चेदुच्यते—शब्दात्मनः काव्यस्य त्रयो व्यापारा अभिधा, भावकत्वं, भोजकत्वं च· तत्राभिधा निरन्तरसान्तरार्थनिष्ठत्वेन द्विधा· भावकत्व साधारणीकरणम्·

(क) दैवादहमत्रेति पाठः क्वाचित्कस्तु नेत्रयेत्यनेन सह मैत्रीभागभवन्नपि चहृदयश्रोत्रयोगपदिकतायां अननुरूपतया न स्वरसमावहति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेन हि व्यापारेण विभावादयः स्थायी च साधारणीक्रियन्ते। साधारणीकरणं चैतदेव, यत् सीतादिविशेषाणां कामिनीत्वादिसामान्येनोपस्थितिः। स्थाय्यनुभावादीनां सम्बन्धिविशेषानवच्छिन्नत्वेन। अन्त्यं व्यापारद्वयं नाट्येऽपि। एवं काव्ये नाट्ये च द्वितीयव्यापारेण साधरणीकृतैर्विभावादिभिस्तृतीयव्यापारसाहित्येन तथाकृत एव स्थायी भुज्यते। भोगश्च सत्त्वगुणोद्रेकात् प्रकाशते य आनन्दः, तत्स्वरूपा ऽनन्यालम्बना या संवित्, तत्स्वरूपो लौकिकसुखानुभवविलक्षणः। सत्त्वरजस्तमसां गुणानामुद्रेकेण क्रमात् सुखदुःखमोहाः प्रकाश्यन्ते। उद्रेकश्च स्वेतरावभिभूयाऽवस्थानमिति साङ्ख्यसिद्धान्तानुसारेण विवृणुते। तदपि न सम्यक्, एतादृशव्यापारद्वयकल्पने प्रमाणाभावात्, भुक्तेर्ज्ञानातिरेकस्याऽनुभवबाधितत्वेन निष्पीड्यमानस्य चास्याभिव्यक्तिपक्ष एव पर्यवसानात् ॥

आचार्याभिनवगुप्तपादास्तु–स्थायिनो विभावादिभिः समं व्यङ्ग्यव्यञ्जकभावरूपात् सम्बन्धात्, विभावादीनामेव वा परस्परं संयोगात् मिलना(*)द्रसस्य निष्पत्तिरभिव्यक्तिः। तथा हि–लोके प्रमदादिभिः कारणादिभिः स्थायिनोरत्यादेरनुमानेऽभ्यासेन यत् पाटवं झटितिप्रवृत्ति,स्तद्वतां सामाजिकानां सूक्ष्मतयान्तःस्थितो रत्यादिः स्थायी काव्ये नाट्ये च गुणालङ्कारयोगाच्चतुर्विधाभिनयेन च यथोक्तविभावनादिव्यापारयोगादलौकिकविभावादिशब्दव्यपदेश्यैस्तद्दशाविशिष्टैस्तैरेव कारणादिभिर्व्यज्यते। नन्वेवं येषां पूर्वं रत्यादिर्नोत्पन्न,स्तेषां तद्वासनाविरहिणां किं रसाभिव्यक्तिर्नास्त्येव। कः सन्देहः। अत एव शृङ्गारिणामेव शृङ्गारस्य, निर्विण्णस्वभावानामेव शान्तस्याभिव्यक्तिरित्याद्यनुभूयते। किञ्च, अपरापि स्वाभाविकी वासना सहकारिणी, यां विना शृङ्गारिणामपि मीमांसकवैयाकरणादीनां न रसाभिव्यक्तिः। तदुक्तं–"वासना चेच हेतुः स्यात्स स्यान्मीमांसकादिष्वि"ति। ननु तथाप्यन्यनिष्ठैर्विभावादिभिः कथमन्यनिष्ठस्य स्थायिनो ऽभिव्यक्तिः। उच्यते–ममैवेते, शत्रोरेवेते, तटस्थस्यवेते,

(*) मिलनादित्यस्य सर्वत्रोपलभ्यमानत्वे ऽपि मेलनादित्येव न्याय्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इतिसम्बन्धिविशेषस्वीकारनियमस्य, न ममैवैते, न शत्रोरेवैते, न तटस्थस्यैवैते, इतिसम्बन्धिविशेषपरिहारनियमस्य चाज्ञानात्तेषां साधारण्येन प्रतीतिः· साधारण्येन प्रतीतिश्च न सर्वसम्बन्धितया प्रतीतिः, किंतु सम्बन्धिविशेषीयत्वेना ऽप्रतीतौ प्रतीतिः(क)· यद्वा, अमुकस्यैवेत्यवधारणं विना अमुकस्येत्येवं प्रतीतिः· अत एवोक्तम्—"ममैवैत इति नियमानध्यवसायादि"ति· तथाच, "स्वीयत्वासंसर्गाऽग्रहात्स्वीयत्वसंसर्गग्रहप्रयोजनं सम्पद्यते· एवं च वाक्यार्थबोधे सम्बन्धिविषयत्वानुभवो ऽपि न विरुध्यते· संसर्गबोधे सम्बन्धी न विषयः· किंतु पदार्थस्मरण एवे"त्यनुभवविरोधाद्विचारासहत्वाच्चानुपादेयम्· नन्वेवं विभावादीनां साधारण्यं विना तत्त्वव्याघातादस्तु साधारण्यं, स्थायिनस्तु तत्कथं स्या,त्तस्य तत्तदात्मनिष्ठत्वात्· यद्यप्यसाधारण्येपि तस्य न रसप्रतीतिविरोधः, तथापि तदंशे सहृदयसंवादो न स्यात्· स एव चालौकिकतादृशस्वीकारकारणमिति· उच्यते—उपायानां विभावादीनामुक्तरूपसाधारण्यबलाद्रसानुभवकाले स्थायिनां प्रमातृविशेषनिष्ठत्वलक्षणायाः परिमितप्रमातृतायाः यद्विगलनमज्ञानं, तद्वशेनोन्मिषितो वेद्यान्तरसम्पर्कशून्यो परिमितो भावो यस्य, तेन प्रमात्रा सकलसहृदयसंवादकारिणा प्रमातृविशेषसम्बन्धाग्रहरूपेण साधारण्येन स्थायी चर्व्यते। ननु चर्वणाविशिष्टः स्थायी रस इत्युच्यते· चर्वणया च स्थायी विषयीक्रियतां, नतु सुखात्मक आत्मेति न रसस्य व्यक्तिरिति चेत् न, स्वप्रकाशनये स्वाकारवदभिन्नस्याप्यात्मनो विषयीकरणात्· अभिव्यक्तिविशिष्टश्च रत्यादिस्थायी चर्व्यमाणतैकप्राणतया चर्वणानाशे 'विनष्टो रस' इति प्रतीतिविषयो विभावादिजीवितावधित्वेनाऽनित्यचर्वणः, पुर इव परिस्फुरन्, हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिरोदधद्, ब्रह्मास्वादमिवानुभावय,न्नत एवालौकिकचमत्कारकारी शृङ्गारादिको रस इत्युच्यते। नन्वेवं स्थायिविभावादिसमूहालम्बनात्मिका रसस्य प्रतीतिरिति पर्यवसन्नम्, तच्च न युक्तं, विभावादीनां पार्थक्येन प्रतीतिप्रसङ्गात्· घटपटाविति समूहालम्बनवदिति चेन्,

(क) अप्रतीतावित्येकत्र न पठ्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पानकरसन्यायेन चर्वणात्। यथा पानके कर्पूराद्यंशो न पार्थक्येनानुभूते, तथा ऽत्रापि विभावाद्यंशः। ननु विभावादीनां परामर्शस्यान्वयव्यतिरेकात्तत्कार्य एव रसः किं नोच्यत इति चेच्च, विभावादिपरामर्शस्य कारणत्वं यदि स्यात्तदा निमित्तकारणत्वमेव, नचैतन्नाशस्य कार्यनाशकता दृष्टा, द्वित्वादीनां तथात्वानभ्युपगमात्। चन्दनादिस्पर्शजन्यसुखादिन्यायो भविष्यतीति चेच्च, नहि तत्र स्पर्शाभावेन सुखं विनाश्यते, किंतु तदभावे कारणाभावात्कार्यं नोत्पद्यते। उत्पन्नस्य सुखस्य तर्हि कथं विनाश इति चेत्, विरोधिगुणान्तरात्। अत्रापि तथैवास्त्विति चेच्च, रसस्य वेद्यान्तरसम्पर्कशून्यत्वेन ज्ञानान्तरादेस्तत्काले ऽभावात्। नन्वेष दोषो व्यक्तावपि समान इति चेत्, न समानः, व्यक्तेर्लोकोत्तरतया दोषासंस्पर्शात्। किञ्च चर्वणाविशिष्टः स्थायी रसः। नच काव्याद्युपस्थाप्यो विभावादिर्विशिष्टे हेतुः। तर्ह्यस्तु ज्ञाप्य इति चेच्च, विभावादिपरामर्शं विना तत्सिद्धेरभावात्। नचैकैव सामग्री निष्पादिका ज्ञापिका चेति सम्भवति। किञ्च, स्वभिन्नतज्जन्यज्ञानविषयो हि तज्ज्ञाप्य उच्यते। अत एव स्वप्रकाशनये ऽपि चाक्षुषादिज्ञानं न चक्षुरादिज्ञाप्यं व्यवह्रियते। नचात्र तथा। स्वाभिन्नतज्जन्यज्ञानविषयतया(क) तु तज्ज्ञाप्यत्वं न निषेधामः। किंतु विभावादिभिर्व्यञ्जितश्चर्वणीयः। कारकज्ञापकाभ्यामन्यो हेतुर्न लोकसिद्ध इति चेत्, अलौकिकत्वसिद्धेर्भूषणमेत,च तु दूषणम्। कथं तर्हि 'विभावादिभिरुत्पन्नो रसो,' 'ज्ञेयो रस' इत्यादिव्यवहार इति चेत्। आद्यस्तावच्चर्वणोत्पत्त्या तत्रोत्पत्त्युपचारात्। द्वितीयो ऽपि गुणालङ्काराद्यसम्भिन्नरसादिविषया या लौकिकी प्रमिति,र्यच्चापरिपक्वयोगिनां युञ्जानपदवाच्यानां जगद्भेदविषयकत्वशालिविज्ञानं,यच्च परिपक्वयोगिनां युक्तपदाभिधेयानां बाह्यार्थसंस्पर्शरहितं स्वात्ममात्रविषयं संवेदनम्, तेभ्यो गुणालङ्काराद्युक्तरसादिमात्रविषयतया विलक्षणं यत्संवेदनं, तद्गोचरतयेति मन्तव्यम्। न केवलमसत्त्वादज्ञाप्यो रसः, किन्त्वितो ऽपि, यतस्तद्ग्राहकं न निर्विकल्पकं, विभावादिपरामर्शस्य निर्विकल्पकजननायोग्य-

(क) तथैवत्वित्यन्यत्र पठ्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वात्· नापि स्वाभिन्नसविकल्पकं, चर्व्यमाणस्यालौकिकानन्दमयस्य तस्य स्वसंवेदनमात्रसिद्धत्वात्, चर्वणादशायां ज्ञानान्तराभावात्· स्वाभिन्नसविकल्पकविषयत्वेन ज्ञाप्यत्वमिष्टमेव· ननु निर्विकल्पकस्वाभिन्नसविकल्पकयोरन्यतरविषयत्वाभावो ऽपरविषयत्वपर्यवसन्नः· तथा चैकविषयत्वाभावे ऽपरविषयत्वप्रसक्तिरित्युभयविषयत्वाभावे उभयविषयत्वं प्रसज्येतेति चेच, एवं ह्युभयरूपत्वमापद्यमानं स्वाभिन्नसविकल्पकविषयत्वरूपतृतीयकोटिशालितया लोकोत्तरचमत्कारमेवावगमयति, न पुनर्विरोधमिति। अथ विभावादयो मिलिताः किमिति व्यञ्जकत्वेन निर्दिष्टाः, एकैकस्य व्यञ्जकत्वे ऽन्वयव्यभिचारात्· अथैकैकस्मादन्यद्वयाक्षेपात् तत्राप्यस्त्येव रसव्यक्तिरित्यव्यभिचार इति चेच, व्याघ्रादयो विभावा भयानकस्येव रौद्राद्भुतवीराणाम्· अश्रुपातादयो ऽनुभावाः शृङ्गारस्येव करुणभयानकयोः· चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीरकरुणभयानकानामित्यन्यद्वयाक्षेपानियमात्· नन्वेवं मिलितस्यैव व्यञ्जकत्वे एकैकोपास्थितौ रसव्यक्तिर्न स्यात्, दृश्यते चासौ· यथा—

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः ।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे! ॥

इत्यादौ कामिनीगताया रतेरालम्बनोद्दीपनविभावमात्रस्योपस्थितौ· एवम्

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः-
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदकान्तः कपोलः ॥

इत्यादावङ्गम्लान्याद्यनुभावमात्रस्य·

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं-
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं-
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यादावुत्सुकादिविशेषणव्यङ्ग्यानामौत्सुक्यलज्जाहर्षकोपासूयाप्रसादानां व्यभिचारिमात्राणाम्· यद्यप्यत्र प्रेयसीत्यालम्बनविभावोऽप्यस्ति,तथापि रत्यनुकूलधर्मवत्तया ऽनिर्द्देशादनस्तिकल्प एवेति। मैवम्· एषां विभावादीनामसाधारण्येनान्यद्वयाक्षेपकत्वेनात्रापि मिलितानामेव व्यञ्जकत्वात्· नन्वेषां चेदसाधारण्यं, किमन्यद्वयाक्षेपणेन, एकैकव्यभिचारेण हि चयोपादानाम्· अथ साधारण्यमेव, कथं तर्हि स्थायिविशेषयोग्यविभावाद्याक्षेपकत्वमिति· उच्यते—एकैकस्य व्यभिचाराद् मिलितानां व्यञ्जकत्वे स्थिते साधारणेनापीतरद्वयमाक्षिप्यते· किञ्च रसस्य विभावादिसमूहालम्बनरूपत्वादेकैकस्मादसाधारणादपि व्यक्त्यभावान्मिलितानामेव व्यञ्जकत्वम्· अतो ऽसाधारणेनापीतरद्वयमाक्षिप्यते· ततो मिलितैस्तदभिव्यक्तिरिति ॥ २७ ॥ २८ ॥

केचिदाहुः—एक एव शृङ्गारो रसः· केचिच्च द्वादशेत्यादि· तन्निरासाय रसभेदानाह—

शृङ्गार,हास्य,करुण,रौद्र,वीर,भयानकाः, ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ २९ ॥

शान्तस्य रोमाञ्चादिविरहेणानभिनेयत्वात् काव्यमात्रगोचरत्वमित्यभिधानाचाट्य इत्युक्तम्· यद्वा नाट्ये तावदष्टौ रसाः प्रतिपादिता, अतः काव्येपि तावन्त एवेत्यर्थः· ननु रसः सुखात्मक इति प्रतिपादितं, तत्कथं दुःखमयः करुणादिको रस इति चेच, लोके तथात्वेपि काव्यादौ पार्यन्तिकालौकिकसुखोदयात्· अन्यथा प्रेक्षावतामप्रवृत्त्यापत्तेः । शृङ्गारादीनां लक्षणं च रत्यादिप्रकृतिकत्वम्· तत्र,

मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिः ।

तत्प्रकृतिको रसः शृङ्गारः· स द्वेधा सम्भोगो विप्रलम्भश्च· तत्र

अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ ।
दर्शनस्पर्शनादीनि स सम्भोगो मुदान्वितः ॥

स च परस्परालोकनालिङ्गनादिभेदादपरिगणेय इत्येक एव गण्यते·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भावो यदा रतिर्नाम प्रकर्षमधिगच्छति ।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥

स च सङ्गमपूर्वस्तदन्यश्च· तत्रान्त्योऽभिलाषहेतुक इत्युच्यते· अभिलाषपदेन तद्धेतोरनादिसङ्गमाभावस्योपलक्षणात्·आद्यस्तु क्वचिदीर्ष्यया प्रणयेन वा मानरूपः· स ईर्ष्याहेतुक इत्युच्यते, ईर्ष्यापदेन मानहेतोरुपलक्षणात्· क्वचिच्च कार्यवशाद्देशान्तरस्थितेः· स प्रवासहेतुकोऽभिधीयते· उत्पद्यमानोत्पत्स्यमानावपि प्रवासौ स्वज्ञानद्वारा विप्रलम्भप्रयोजकाविति नाव्याप्तिः, प्रवासपदेन ज्ञानलक्षणाद्वा· क्वचिच्छापात्· स च शापहेतुक इति व्यवह्रियते· क्वचिदुक्तत्रितयातिरिक्ताद्गुरुलज्जादितः कारणात्· स एव विरहहेतुक इत्युच्यते· करुणशृङ्गारस्याप्यत्रैवान्तर्भावः· तत्र सम्भोगो नायिकारब्धो नायकारब्धश्च । क्रमेणोदाहरणम्—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य(क) जातपुलकामालोक्य गण्डस्थलीं-
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

आलोक्येति लज्जया समानकर्तृकम्·

त्वं मुग्धाक्षि ! विनैव कञ्चुलिकया धत्से मनोहारिणीं-
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दिता-
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥

वीटिका वसनग्रन्थिः । विप्रलम्भेष्वभिलाषहेतुको यथा—

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥

(क) परिरभ्येति प्रायोऽनेकत्र सत्त्वेऽपि वस्त्वौचित्यनुसार परिचुम्ब्येत्येव न्यस्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रेम स्नेहः स एव प्रकृष्टः प्रणयः स एव परिचयातिशयेन रञ्जनक्षमो रागः । ईर्ष्याहेतुको यथा—

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति गलल्लोलालकैरश्रुभिः ॥

सख्येनोपदेशः सख्योपदेशः । भविष्यत्प्रवासहेतुको यथा—

प्रस्थानं वलयैः कृतं, प्रियसखैरस्रैरजस्रं गतं,
धृत्या न क्षणमासितं, व्यवसितं चित्तेन गन्तुं पुरः, ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमुत्सृज्यते ॥

भूतप्रवासहेतुर्यथा मम—

कियदम्बु भवेद्वसुन्धरायां कति वा पल्लवसञ्चया भवेयुः ।
कियती च समृद्धिरम्बुजानां परितापो ऽपह्रियेत यैः कृशाङ्ग्याः ॥

सख्याः प्रवासिनं नायकं प्रतीयमुक्तिः । भवद्धेतुको यथा ममैव—

किं मूढे! परिखिद्यसे कतिपयैरेव प्रिये! वासरै-
रायाता वयमेहि धेहि परितः प्रास्थानिकं मङ्गलम् ॥
एवंवादिनि वल्लभे दयितया निश्वस्य पाणौ कृतो
मङ्गल्यः कलसो विलोचनपयोराधाभिरापूरितः ॥

शापहेतुको यथा—

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥

आलिख्येत्यपीच्छाविषय एव । विरहहेतुको यथा—

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक्सुहृ-
द्यो मां नेच्छति नागतश्च सहसा कोयं विधेः प्रक्रमः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि ॥

एषा विरहोत्कण्ठितेत्यभिलाषहेतुकादेर्भिद्यते ॥

न्यङ्ग व्रीडादिभिश्चेतोविकासो हास उच्यते ।

न्यङ्गं वैकृतम्· तेन हासप्रकृतिको हास्यः· यथा–

आकुञ्च्य पाणिमशुचिं(क)मम मूर्ध्नि वेश्या मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे। तारस्वरं प्रहितथूत्कमदात्प्रहारं हा हा हतो ऽहमिति रोदिति विष्णुशर्म्मा ॥

अत्र ताड्यमानो विष्णुशर्मा, तत्क्रन्दनं च विभावौ· रसाश्रयस्य एतद्वाक्यमनुभावः· चापलादिर्व्यभिचारीति ॥

इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक् ।

आदियहणादनिष्टाप्तेः· शोकप्रकृतिकः करुणः· यथा–

हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो-
धिक्प्राणान्पतितो ऽशनिर्हुतवहस्ते ऽङ्गेषु दग्धे दृशौ ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥

अत्र विपन्ना का चिदीश्वरी सम्बोध्या, तदङ्गदाहश्च विभावौ·

प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते ।

तत्प्रकृतिको रौद्रः· यथा–

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं-
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥

कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।

तत्प्रकृतिको वीरः· स च त्रिधा–युद्धवीरो, दानवीरो, दयावीरश्च । तत्राद्यो यथा–

(क) अशुचिमित्येव प्रायः प्रकाशेऽपि· अशुभमिति त्वेकतमे, परं न प्रलक्ष्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षुद्राः सन्त्रासमेते विजहित हरयो, भिन्नशक्रेभकुम्भा-
युष्मद्गात्रेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे! तिष्ठ, पात्रं त्वमसि न हि रुषां, नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥

अपरावूहनीयौ ॥

रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ।

तत्प्रकृतिको भयानकः यथा—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

जुगुप्सा गर्हणा ऽर्थानां दोषमाहात्म्यदर्शनात् ।

तत्प्रकृतिको बीभत्सः यथा—

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥

स्थपुटं निम्नविषमम् ॥

विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात् ।

तत्प्रकृतिको ऽद्भुतः यथा—

चित्रं, महानेष बतावतारः, क्व कान्तिरेषा,भिनवैव भङ्गिः,।
लोकोत्तरं धैर्य,महो प्रभावः, काप्याकृति,र्नूतन एष सर्गः ॥ २९ ॥

एषां भेदो वचनमात्राच्च सिद्ध्यतीत्येषां विचित्रानुकूलरूपान् स्थायिभावानाह—

रति,र्हासश्च, शोकश्च, क्रोधो,त्साहौ, भयं तथा, ।
जुगुप्सा, विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ ३० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र

विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः ।
आनन्दाङ्कुरकन्दोऽसौ भावः स्थायिपदास्पदम् ॥

इति सामान्यलक्षणम्· अवस्थितिश्चैषां स्रक्सूत्रन्यायेन, फेनबुद्बुदन्यायेन तु व्यभिचारिणामित्यनयोर्भेदः· विशेषलक्षणान्युक्तानि· अष्टावेव चेत् स्थायिनोऽतो न्यूनाधिकसंख्याशङ्का रसे निरस्तेति ॥

यद्यपि विभावानुभावावप्रतिपाद्य व्यञ्जकत्वपुरस्कारेण व्यभिचारिभेदोपदर्शनेन कश्चिच्चाय,स्तथापि व्यङ्ग्यभावविवेचनाय निर्वेदस्य स्थायित्वव्यवस्थापनाय च व्यभिचारिभेदानाह–

निर्वेद,ग्लानि,शङ्काख्या,स्तथाऽसूया,मद,श्रमाः, ।
आलस्यं चैव,दैन्यं च, चिन्ता, मोहः, स्मृति,धृतिः, ॥ ३१ ॥
व्रीडा, चपलता, हर्ष, आवेगो, जडता तथा, ।
गर्वो, विषाद, औत्सुक्यं, निद्रा, ऽपस्मार एव च, ॥ ३२ ॥
स्वप्नो, विबोधो, ऽमर्षश्चा,प्यवहित्थ,मथोग्रता, ।
मति,र्व्याधि,स्तथोन्माद,स्तथा मरणमेव च, ॥ ३३ ॥
त्रासश्चैव, वितर्कश्च, विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥ ३४ ॥

नामत एव समाख्याता न तु लक्षणतः· तल्लक्षणानामन्यैरेव सप्रपञ्चं दर्शितत्वात्· तद्यथा–

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।
तत्र चिन्ताश्रुनिश्वासवैवर्ण्योच्छ्वासदीनताः ॥

"चित्तस्य खेदो निर्वेदस्तत्त्वज्ञानोदयादिभि"रिति केचित्·(१)

रत्यायासक्लाभ्यासाद्ग्लानिर्निष्प्राणतेव या ।
तस्यां वैवर्ण्यकम्पानु,त्साहकार्श्यादयो मताः ॥ (२)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनर्थप्रतिभा शङ्का परक्रौर्यात्स्वदुर्नयात् ।
वैवर्ण्यकम्पवैमुख्यपार्श्वालोकास्यशोषकृत् ॥ (३)
परोत्कर्षाऽक्षमाऽसूया गर्वदौर्जन्यमन्युजा ।
दोषोद्घोषभ्रूविभेदाऽवज्ञाक्रोधेङ्गितादयः ॥ (४)
सम्मोहानन्दसंभेदः स्खलदङ्गवचोगतिः ।
मधुपानादिजो ज्ञेयो मदो विविधभावकृत् ॥
उत्तमसत्त्वः प्रहसति, गायति तद्वच्च मध्यमप्रकृतिः, ।
परुषवचनाभिधायी शेते रोदित्यधमसत्त्वः ॥ (५)
श्रमः खेदोऽध्वरत्यादेः श्वासनिद्राभरादिकृत् ।
श्रमग्लान्योर्विभेदं तु चक्रे कारणकार्यता ॥
श्रमस्यातिशयावस्थामथ वा ग्लानिमूचिरे ।
"बलस्यापचयो ग्लानिराधिव्याधिप्रकर्षभूः" । इत्येके (६)
आलस्यं श्रमगर्भादेर्जैह्म्यं जृम्भासितादिकृत् । (७)
दौर्गत्यादेरनोजः स्याद्दैन्यं कार्श्याऽमृजादिमत् ॥ (८)
ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत् ।
प्रयत्नपूर्विकान्वेष्यस्मृतिश्चिन्तेति के चन ॥ (९)
मोहो विचित्तता भीतिदुःखवेगानुचिन्तनैः ।
घूर्णनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ (१०)
सदृशज्ञानचिन्ताद्यैः संस्काराज्जायते स्मृतिः ।
भ्रूसमुल्लासकरजवादनादिस्तदुद्भवः ॥ (११)
अभीष्टार्थस्य सम्प्राप्तौ स्पृहापर्याप्तता धृतिः ।
सौहित्यवदनोल्लाससहासप्रतिभादिकृत् ॥ (१२)
दुराचारादिभिर्व्रीडा धार्ष्ट्याभावोभिधीयते ।
वस्त्राङ्गुरीयकस्पर्शभूरेखाधोमुखादिकृत् ॥
"चेतोनिमीलनं व्रीडा न्यङ्गरागस्तवादिभिः"—इति केचित् । (१३)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मात्सर्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः ।
"आत्मप्रकाशनपरा चेष्टा चपलतोच्यते"–इति केचित् ॥
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः । (१४)
मनःप्रसादो लाभादेर्हर्षोऽश्रुस्वेदगद्गदाः । (१५)
आवेगो रागविद्रावरसादेः सम्भ्रमो मतः ।
तत्र विस्मरणं स्तम्भः स्वेदः कम्पः स्खलद्गतिः ॥ (१६)
अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥
क्रियास्वपाटवं जाड्यञ्चिन्तोत्कण्ठाभयादिभिः–इत्येके (१७)
गर्वोऽभिजनलावण्यधनैश्वर्यादिभिर्मदः ।
सविलासाङ्गवीक्षाऽविनयावज्ञादिकृत्तु सः ॥ (१८)
प्रारब्धकार्याऽसिद्ध्यादेर्विषादः सत्त्वसंक्षयः ॥
निश्वासोच्छ्वासहृत्ताप(क)सहायान्वेषणादयः ॥ (१९)
कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसंभ्रमैः ॥
तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः । (२०)
निद्रा व्यापारवैमुख्यमिन्द्रियाणां श्रमादिभिः ॥
तत्र जृम्भाङ्गभङ्गाक्षिमीलनोच्छ्वासनादयः । (२१)
व्याधि(ख)श्चात्यन्तदुःखादेरपस्मारस्तथाविधः ॥
मनःक्षेपस्त्वपस्मारो ग्रहावेशादिसम्भवः–इति केचित् ।
विरोधिभावात्पूर्वस्य प्रस्मृतिर्विस्मृतिर्भवेत् ।
ध्यानजाड्यप्रमोहाऽऽधिपरितापादिकृत्तु सा ॥ (२२)*

(क) हृत्तापेति सर्वत्रोपलम्भेऽपि उत्तरपद्यवत् हृत्तापेत्येव न्याय्यम् ।

(ख) आधिश्चेत्येव त्रिष्वप्यास्ते ।

* "निद्रापस्मार एव चे"ति सूत्रे 'निद्रा विस्मृति रेव चे'त्येवंरूपः क्वचित्पाठो भवति। तमनुरुध्य विस्मृतिं लक्षयति–विरोधीतीति विभाव्यताम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः[क] ।
कोपावेगभयग्लानिसुखदुःखादिकारकः ॥ (२३)
निद्रापगमहेतुभ्यः प्रबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥ (२४)
अधिक्षेपावमानादेरमर्षोऽभिनिविष्टता ॥
तत्र स्वेदशिरःकम्पनेत्ररागाङ्गविक्रियाः । (२५)
लज्जाद्यैर्विक्रियागोपोऽवहित्थाऽऽत्मन्यऽविक्रिया ॥
व्यापारान्तरसक्तित्वबदनानमनादयः । (२६)
दुष्टेऽपराधदौर्मुख्यचौर्यैश्चण्डत्वमुग्रता ॥
अत्र स्वेदशिरःकम्पताड़नातर्जनादयः । (२७)
भ्रान्तिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः ॥
स्मेरता धृतिसंतोषौ बहुमानस्तथात्मनि । (२८)
व्याधयः सन्निपाताद्यास्तेषामन्यत्र विस्तरः ॥
प्रस्वेदकम्पतापाद्या अनुभावतयोदिताः । (२९)
उत्कण्ठाहर्षशोकादेरुन्मादश्चित्तविप्लवः[ख] ॥
तस्मिन्नस्थानरुदितगीतहासाऽऽसितादयः[ग] ॥ (३०)
जीवस्योद्गमनारम्भो मरणं परिकीर्त्तितम् ॥
सम्मोहेन्द्रियसंग्लानिगात्रविक्षेपणादिकृत् । (३१)

अत्र च मरणस्थाने केचित्करुणां पठन्ति· सा च परदुःखप्रहाणेच्छारूपत्वाच्चित्तवैक्लव्यमयाच्छोकान्नातिरिच्यत इति तद्ग्रहणमत्रानुचितमित्यके· अन्ये तु तस्या दयावीरस्थायित्वमित्यऽत्र तद्ग्रहणानौचित्यमित्याहुः· न चान्यत्र सञ्चारित्वाद् गणनं फलवदिति वाच्यं, स्थाय्यन्तसाधारणत्वात्· तेपि हि क्व चन सञ्चारिणः· तदुक्तम्—

(क) स इत्यन्यत्रास्ते· तच्चोत्तरत्रान्वयि द्रष्टव्यम् ।
(ख) विक्लव इति तु नातिसमञ्जसः पाठः ।
(ग) 'हासाभिधादय'इत्येकत्रा, ऽन्यत्र च 'हासाऽसितादय' इत्याऽऽस्ते· परं, काञ्चित्कत्वादेनयोः "०हासाऽऽसिता०" इत्येवातिरिच्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः ।
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः ॥
इत्याद्यन्यत्समुन्नेयं स्वयं भावितबुद्धिभिः । इति·
गर्जितादेर्मनःक्षोभस्त्रासोऽत्रोत्कम्पितादयः । (३२)
ऊहो वितर्कः सन्देहे भ्रूशिरोऽङ्गुलिनर्त्तकः ॥ (३३)

निर्वेदस्यामङ्गलप्रायस्य पश्चान्निर्देश्यत्वेपि प्राङ्निर्देशो मुख्यत्वप्रकाशनेन स्थायित्वप्रतिपादनाय ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ तेन

निर्वेदस्थायिभावोऽस्ति(क) शान्तोपि नवमो रसः ।

तत्प्रकृतिकत्वात्· यथा—

अहौ वा हारे वा, कुसुमशयने वा दृषदि वा,
मणौ वा लोष्टे वा, बलवति रिपौ वा सुहृदि वा, ।
तृणे वा स्त्रैणे वा, मम समदृशो यान्तु दिवसाः
क्व चित्पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ॥

स्त्रैणं स्त्रीसमूहः· वाशब्दाभ्यां द्वयोर्द्वयोस्तुल्यता द्योत्यते· अत्र वदन्ति—शान्तो नाम रसस्तावदनुभवासिद्धतया दुरपह्नवः· न चास्य स्थायी निर्वेदो युज्यते, तस्य विषयेष्वलंप्रत्ययरूपत्वा,दात्मावमाननरूपत्वाद्वा· शान्तेश्च निखिलविषयपरिहारजनितात्मविश्रमानन्दप्रादुर्भावमयत्त्वानुभवात्· तदुक्तं—

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥

इति· अत एव "सर्ववृत्तिविरामो ऽस्य स्थायी"ति निरस्तम्, अभावस्य स्थायित्वायोगात्· तस्माच्छमो ऽस्य स्थायी· निर्वेदादयस्तु व्यभिचारिणः· स च "शमो निरीहावस्थायामानन्दः स्वात्मविश्रमा"दिति ॥

रसवद् भावोप्यलक्ष्यक्रमेषु पठितः, स किंरूपः, रत्यादीनां रस-

(क) 'निर्वेदस्थाविभावाख्यः'—इति प्रदीपेपूपलब्धावप्यस्याऽप्रलक्षणतया प्रकाशोपलब्धं ०'भावोऽस्ती' त्युपन्यस्यामः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपत्वाद्, व्यभिचारिणां रसाङ्गतानियमेन प्राधान्याभावात्, सात्त्विक नामव्यङ्ग्यत्वादित्यत आह–

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ॥ ३५ ॥
भावः प्रोक्तः–

रतिरिति स्थायिभावोपलक्षणम्· देवादिविषयेत्यपि, अप्राप्तरसा स्थत्वोपलक्षणम्·(क) तेन देवादिविषया सर्वा, कान्तादिविषयाप्यपुष्ट रति, हासादयश्चाप्राप्तरसावस्थाः, प्राधान्येन व्यञ्जितो व्यभिचारी च भाव इत्यवधातव्यम्· यदुक्तं–

रत्यादिश्चेद्विरङ्गः स्याद्देवादिविषयोऽथ वा ।
अन्याङ्गभावभाग्वा स्याच्च तदा स्थायिशब्दभाक् ॥

इति· तदेतदाह वृत्तिकारः–"कान्तादिविषया तु व्यक्ता शृङ्गारः" तत्र देवविषया रतिर्यथा–

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥

मुनिविषया यथा–

हरत्यघं सम्प्रति, हेतुरेष्यतः शुभस्य, पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यताम् ॥

एवम् अप्राप्तपरिपोषा पुत्रादिविषया रतिः स्थाय्यन्तरं चापुष्टमु दाहार्य्यम् । व्यभिचारी प्राधान्येन व्यञ्जितो यथा–

जाने कोपपराङ्मुखी प्रियतमा स्वप्ने ऽद्य· दृष्टा मया
मा मा संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।
नो यावत्परिरभ्य(ख) चाटुकशतैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥

अत्र विधिं प्रत्यसूया प्राधान्येन प्रतीयते ।

(क) "देवादिविषयेत्यपि, अप्राप्तरसावस्थत्वोपलक्षण"मित्येतावद्ग्रन्थः पुस्तके नास्ति, ऽथापि देवाचरपुस्तकयोस्सत्त्वाच्चौचित्याच्च संप्रत्यतिष्ठिपाम नाम ।
(ख) ०परिरुध्येति प्रकाशः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

—तदाभासा अनौचित्यप्रवर्त्तिताः ।

तदाभासा, रसाभासाभावाभासाश्चेत्यर्थः· अनौचित्येन प्रकर्षविरोधिना रूपेणेत्यर्थः· तच्चैकाश्रयत्वे तिर्यगादिविषयतायां, बहुविषयत्वे व्यभिचारिणामाभासाङ्गतायां वा द्रष्टव्यम्· एकविषया रतिरेव नेति तु प्रलापः, "वन्दीकृत्य नृप द्विषामि"त्यादावुदाहरिष्यमाणत्वात्· रसाभासो यथा—

स्तुमः कं वामाक्षि! क्षणमपि विना यं न रमसे,
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे, ।
सुलग्ने को जातः शशिमुखि! यमालिङ्गसि बला,-
त्तपःश्रीः कस्यैषा मदननगरि! ध्यायसि तु यम् ॥

अत्र बहुषु व्यापारोपादानेन बहुविषया रतिर्व्यज्यते· नन्वत्र व्यापारस्य बहुविषयत्वमसिद्धम्, एकत्रापि तादृशव्यापारसम्भवात्· यत्तु "अनेककर्मपदोपादानमनेकविषयत्वं क्रियाणां प्रकटयति· एकविषयत्वाभिप्राये त्वेकमेव कर्मपदमुपाददीते"ति, तत्तुच्छम्, स्तुमो विलेभइत्यादीनां-भिन्नवाक्यस्थानामेकविभक्त्यन्तपदोपस्थापितेनानन्वये तदन्वयिनोऽभिन्न-स्यापि कं क इत्यादिपदैरुपस्थापने भिन्नकर्मपदैरेवोपस्थापनार्हणात्· अत्र ब्रूमः—तुशब्देन व्यवच्छेदार्थेन व्यापारस्यानेकविषयत्वं लभ्यते, एवमेकत्र भेदाभिप्राये ऽवगते ऽन्यत्रापि तथैवावगम्यते· बहुपदमनेकपरं वा । भावाभासो यथा—

राकासुधाकरमुखी तरलायताक्षी
सा स्मेरयौवनतरङ्गितविभ्रमास्या ।
तत्किं करोमि विदधे कथमत्र(क) मैत्रीं
तत्स्वीकृतिव्यतिकरे क इवा(ख)भ्युपायः ॥

अत्र रतेर्व्यभिचारिभूता चिन्ता ऽनौचित्यप्रवर्त्तिता, नायिकाया-अननुरक्ततया रतेरनुत्कृष्टत्वेन तद्व्यभिचारिणोपि तथात्वात्· एवमन्येप्युदाहार्याः ।

(क) ०मि कथमत्र तनोमि—इत्यन्यत्र ।
(ख) ०क इवाभ्यु०—इति क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"भावशान्त्यादिरक्रम" इत्यत्र भावशान्त्यादिपदप्रतिपाद्यमाह-

भावस्य शान्तिरुदयः, संधिः, शबलता तथा ॥ ३६ ॥

संधिरेककालमेव तुल्यकक्षयोरास्वादः· शबलता तु कालभेदेन निरन्तरतया पूर्वपूर्वोपमर्दिनाम्· न च भावस्य शबलतायाः शान्त्युदयाभ्यामविशेषः, शान्तेरुदयस्य वा एकैकस्यास्वादे तद्द्वयोपगमात्। तत्र भावस्य शान्तिर्यथा–

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं-
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
सा ऽऽश्लिष्टा रभसेन तत्सुखवशात्तन्व्या ऽपि तद्विस्मृतम् ॥

अत्र कोपस्य शान्तावेव चमत्कारविश्रामः। उदयो यथा–

एकस्मिञ् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मान(क)परिग्रहग्लपितया चाटूनि कुर्वन्नपि।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणा-
न्मा भूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥

अत्रौत्सुक्यस्योदयः। संधिर्यथा–

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नाऽऽनन्दी हरिचन्दनेन्दुशिशिरस्पर्शो रुणद्ध्यन्यतः ॥

अत्र पूर्वार्द्धे सम्भ्रमात्मक आवेग, उत्तरार्द्धे हर्षः· अनयोस्तुल्यकालमेव स्वादः। शबलता यथा–

क्वाऽकार्यं शशलक्ष्मणः क्व च कुलं, भूयोऽपि दृश्येत सा,
दोषाणां प्रशमाय नः श्रुतमहो, कोपेऽपि कान्तं मुखम्,।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः, स्वप्नेऽपि सा दुर्लभा,(ख)
चेतः! स्वास्थ्यमुपेहि, कः खलु युवा धन्यो ऽधरं धास्यति।

(क) ०सद्यः कोपेति क्वचित्कपाठस्तु नातिप्रलक्षणः।

(ख) ०धियो लेखैव साऽन्याट्टश्रीति क्वाप्युपलभ्यते· परम्, "स्वप्ने·पीतिदैन्य" शितिप्रदीपानुररीकृतं तत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र, क्वाकार्यमित्यादौ वितर्कः, भूयोपीत्यौत्सुक्यं,दोषाणामिति मतिः, कोपेपीति स्मृतिः, किं वक्ष्यन्तीति शङ्का, स्वप्नेपीति दैन्यं,चेतः स्वास्थ्यमिति धृतिः, कः खल्विति चिन्ता, स्फुटं पूर्वपूर्वोपमर्दन प्रतीयमाना शबलता चमत्कारभूमिः· ननु भावस्य शान्त्यादिवत्स्थितिरपि प्रकारः सम्भवत्येव, तत्कथं नोक्त इति चेत्, भावोक्त्यैव तदुक्तेः, भावस्थितेर्भावाभिन्नत्वात् ॥ ३५ ॥ ३६ ॥

ननु व्यभिचारिस्थले नियमतो मुख्यस्य रसस्यावस्थानं, तत्कथं भावोदाहरणमेतत्, कथं वा भावध्वनित्वं, रसाङ्गत्वेन तेषां गुणीभावादित्यत आह—

मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदा चन ।

ते, भावशान्त्यादयः· कदा चन, यदा त एवाङ्गित्वेन विवक्ष्यन्ते, विवहनप्रवृत्तराजानुगम्यमानभृत्यवत् ॥ * ॥

एवमसंलक्ष्यक्रमव्यङ्ग्यभेदं विचार्य्य संलक्ष्यक्रमव्यङ्ग्यप्रभेदानाह—

अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥ ३७ ॥
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ।

घण्टायां हन्यमानायां मुख्यशब्दानन्तरं यथा क्षोदीयानपरोऽनुरणनरूपः शब्दः प्रतीयते· तद्वत्संलक्ष्यक्रमा व्यङ्ग्यस्थितिर्यत्र सः· शब्दश्चार्थश्चोभयं चेतिद्वन्द्वः· तेन शब्दशक्तिमूलव्यङ्ग्यः, अर्थशक्तिमूलव्यङ्ग्यः, उभयशक्तिमूलव्यङ्ग्यश्चेति त्रिधेत्यर्थः· शब्दशक्तिमूलत्वं चैतदेव, यत्तेनैव शब्देन तदर्थप्रतीतिर्न तु पर्यायान्तरेणापि· एतद्वैपरीत्यं चार्थशक्तिमूलत्वं· नत्वभिधया तत्प्रतीतिरिति· एतेना"भिधाया यत्र न नियमनं, तत्रैव भेदो द्रष्टव्यः· तन्नियमने तु नाभिधामूलत्वं, किन्तु व्यञ्जनामूलत्वमेव "भद्रात्मन"इतिवद्वेदि"ति यत्केन चिदुक्तं, तन्नादेयम्, "भद्रात्मन" इत्यादेरप्येतद्भेदत्वेनेष्टत्वात्· अन्यथा तस्य सर्वभेदबहिर्भावापत्तेः· किञ्च, प्रथमोदाहरणे प्राकरणिकाप्राकरणिकयोरितिव्याख्यानेन, द्वितीये भवानित्यनेन, तृतीये असीत्यनेन प्रकरणस्याभिधानियामकस्य स्पष्टत्वात्तेषामुदाहरणत्वं विरुद्ध्येत· तस्माद्यथोक्तमेव न्याय्यम् । तेषुमध्ये—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ॥ ३८ ॥
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ।

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यो द्विधा, अलंकृतस्यानलंकृतवस्तुमात्रस्य वा प्राधान्येन प्रकाशादित्यर्थः । तत्राद्यो यथा—

उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥

कालो वैरिसंहर्त्ता यः करवालः, स एव महदम्बु धाराजलं वहतीति महाम्बुवाहः· यद्वा, मह उत्सवः, स एवाम्बु तद्वाहः· गर्जितं सिंहनादः· अत्र 'करवालमुल्लास्यै'तावन्मात्रे वक्तव्ये यदेतादृशशब्दप्रयोगस्तस्याऽसम्बद्धार्थकता मा प्रसज्यतामित्यऽप्राकरणिकैरिन्द्रवारिवाहादिभिः प्राकरणिकानां राजकरवालादीनामुपमानोपमेयभावे कवेस्तात्पर्यमित्युपमालङ्कारोव्यङ्ग्यः· स च शब्दशक्तिमूलः, पर्यायान्तरेण भूपादिना तदर्थोपस्थितौ तदप्रतीतेः· एवमग्रेप्यूह्यम्· एवमलङ्कारान्तराण्यपि· यथा-

तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो ! मधुरलीलः ।
मतिमानतत्त्ववृत्तिः(क) प्रतिपदपक्षाग्रणीर्विभाति भवान् ॥

अत्र तिग्मरुचिः, अप्रताप एवं क्रमेण एकैकपदस्य द्विपदत्वे विरोधाभासः· पदाभेदेपि विरोधाभासो यथा—

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद: प्रभो ! ।
अहितः सहितः साधुयशोभिरसतामसि ॥

ननु विरोधस्य किं सर्वत्र व्यङ्ग्यत्वमेव· नेत्युच्यते· तत्किमत्र सीमा? अपिशब्दादेर्विरोधव्यञ्जकस्य भावे वाच्यत्वं, तदभावे व्यङ्ग्यत्वमिति ।

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥

चित्रं नानाकार,मालेख्यं च· कला चन्द्रस्य षोडशो भागः, कौशलं च· अत्रोपादानैर्भित्तावालेख्यकारिभ्यः कलावद्भ्यः शूलिनो व्यतिरेको व्यङ्ग्यः· तस्य चित्रकलाशब्दयोः परिवृत्त्यसहत्वेन शब्दशक्तिमूलता

(क) मितिमानतत्त्ववृत्तिरित्यन्यत्रत्यः पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननूदाहृतेषूपमादीनां प्राधान्यं, न वा· आद्ये कुतस्तेषामलङ्कारत्वम्,त्वा- नलङ्करणात्· द्वितीये कुतो ऽस्य काव्यस्य ध्वनित्वं, व्यङ्ग्यस्याप्राधान्या- दिति चेच्च, पूर्वमयमलङ्कार आसीदित्येतावता ऽलङ्कारव्यपदेशात्· यथा ब्राह्मणपूर्वबौद्धमंन्यासिनि ब्राह्मणव्यपदेशः· नन्वेवं व्यपदेशसमर्थने- प्यलङ्कारध्वनित्वं न समर्थितमिति चेन्न, अलङ्कारपदेन तद्योग्यताया वि- वक्षितत्वात्· नचैवं रसादिध्वनावप्यलङ्कारध्वनित्वप्रसङ्गः, संलक्ष्यक्रम- स्यैव तादृशस्य तथाभिप्रेतत्वात्· वस्तुतस्तु, प्राधान्याऽप्राधान्ये व्यङ्ग्यस्य वाच्यापेक्षयैव, न तु रसापेक्षयापि, तदपेक्षया सर्वत्र गुणीभावात्· तथा चोपमादीनां रसाङ्गतया ऽलङ्कारत्वं, वाच्यापेक्षया प्राधान्यं चेति न दोष- लेशावकाशः । वस्तुमात्रं यथा—

पंथिअ! ण एत्थ सत्थरमत्थिमणं पत्थरत्थले गामे ।
उण्णअपओहरं पेक्खिअ उण जइ वससि ता वससु ॥

अत्र यद्युपभोगक्षमोसि तदाऽऽस्स्वेति व्यज्यते· तच्च पओहरेति- शब्दशक्तिमूलमिति· तथा—

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।
यस्य (क)प्रसीदसि पुनः स भात्युदारो ऽनुदारश्च ॥

अत्र प्रथमार्द्धे 'शनिरशनिश्चे'त्यनेन 'विरुद्धावपि त्वदनुवर्त्तनार्थमेकं- कार्यं कुरुत' इति वस्तु ध्वन्यते, न तु विरोधालङ्कारः, शनिरशनिरित्यनयोः सामानाधिकरण्याभावात्, विरोधस्य च तत्रैव विश्रान्तेः· द्वितीयार्द्धे तु नोदाहरणम्, तत्र चशब्दस्य अप्यर्थत्वे विरोधस्य वाच्यत्वात्, समुच्चय- मात्रार्थत्वे तु विरोधस्यैव व्यङ्ग्यत्वादिति ॥ * ॥

अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यं विभजते—

अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः सम्भवी स्वतः, ॥ ३९ ॥
प्रौढोक्तिमात्रात्सिद्धो वा कवे,स्तेनोम्भितस्य वा, ।
वस्तु वा ऽलङ्कृतिर्वेति षड्भेदो ऽसौ व्यनक्ति यत् ॥ ४० ॥

(क) यत्र, यस्मिन्, यस्मै— इति पाठास्तत्र तत्र ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वस्त्वलङ्कारमथ वा, तेनाऽसौ[क] द्वादशात्मकः ।

स्वतः सम्भवी, न केवलं भणितिनिष्पन्नशरीरोऽपि तु बहिरप्यौचित्येन सम्भाव्यमानः॰ प्रौढोक्तिमात्रसिद्धः, बहिरसन्नपि वक्तृप्रतिभामात्रेण तथानिर्मितः॰ अयमर्थः—व्यञ्जकोऽर्थस्त्रिधा स्वतःसम्भवी, कविप्रौढोक्तिमात्रसिद्धः, कविनिबद्धनायकादिवक्तृप्रौढोक्तिमात्रसिद्धश्च॰ स त्रिविधोपि वस्तुमात्रमलङ्कृतिर्वेति षड्विधो व्यञ्जकः॰ यदाणां व्यङ्ग्यमपि प्रत्येकं वस्तु वा ऽलङ्कृतिर्वेति द्वादश भेदा भवन्ति । तत्र स्वतःसम्भविन्यर्थे भेदचतुष्टये वस्तुना वस्तुनो व्यक्तिर्यथा—

> अलससिरमणी[ख] धुत्ताणं अग्गिमो पुत्ति ! धणसमिद्धिमओ ।
> इअ जंपिएण[ग] णअंगी पप्फुल्लविलोअणा जाआ ॥ (१)

"अलसत्वेनान्यत्रगन्तुमनिच्छु,र्धूर्तत्वेन रतेष्वनादृतगुणो, धनसमृद्धिमयतया क्षपणः सुखी चे'ति निर्धार्य यत्प्रफुल्लनयनत्वं वस्तु, तेना'ऽन्यासामनाकर्षणीय इति ममैवोपभोग्य' इति वस्तु व्यज्यते । वस्तुनाऽलङ्कारस्य यथा—

> धन्याऽसि या कथयसि प्रियसङ्गमे ऽपि
> विस्रब्धचाटुकशतानि रतान्तरेषु ।
> नीवीं प्रति प्रणिहिते तु करे प्रियेण
> सख्यः! शपामि यदि किञ्चिदपि स्मरामि ॥ (२)

अत्र वाच्येनवस्तुना 'त्वमधन्या, अहं तु धन्ये' ति स्वस्य व्यतिरेकालङ्कारो व्यज्यते॰ ननु व्यञ्जको धन्यासीतित्वत्पदार्थस्य व्यतिरेकालङ्कार एव॰ तत्कथं वस्तुव्यञ्जकोदाहरणमेतदिति चेन्न, सम्बोध्यव्यतिरेकस्तावन्न वाच्यः, आत्मनि कथनाभावस्याऽशाब्दत्वात्॰ व्यङ्ग्यस्तु यद्यपि भवत्येव, तथापि तमनपेक्ष्यैव वाच्येन वस्तुमात्रेण यथोक्तव्यतिरेकव्यञ्जनादिति । अलङ्कारेण वस्तुनो यथा—

(क) तेनायमिति पुस्तकान्तरे प्रकाशेषु च ।
(ख) सिरोमणि इतीतरत्र ।
(ग) भणिएण—इति पुस्तकान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दर्पान्धगन्धगजकुम्भकपाटकूट-
संक्रान्तिनिघ्नघनशोणितशोणशोचिः ।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपाणः ॥ (३)

अत्र कालीकटाक्ष इव कृपाणो व्यलोकीत्युपमा, न पुनरुत्प्रेक्षा, सम्भावनाविरहात्· तया च 'सकलरिपुक्षयः क्षणात्करिष्यत' इति वस्तु प्रकाश्यते । अलङ्कारेणालङ्कृतेर्यथा—

गाढकान्तदशनक्षतव्यथासंकटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधि रुषा निजाधरम् ॥ (४)

अत्र निजाधरदशनवैरिवधूजनोष्ठदशनव्यथामोचनयोः कारणकार्ययोः पौर्वापर्याभावलक्षणया ऽतिशयोक्त्या ऽलङ्कारेण दशनसमकालमेव शत्रवो व्यापादिता इति "समुच्चयो ऽसौ स त्वऽन्यो युगपद्या गुणक्रिये" त्युक्तलक्षणः समुच्चयालङ्कारो द्योत्यते· एष एव च 'तुल्यकालं योगिते'ति व्युत्पत्त्या तुल्ययोगितेति कैश्चिदुच्यते· 'मम क्षत्या ऽप्यन्यस्य क्षतिर्निवर्त्ततामि'ति नृपबुद्धेरुत्प्रेक्षणादुत्प्रेक्षा ऽप्यत्र व्यङ्ग्या । एषु व्यञ्जको ऽर्थः स्वतःसम्भवी ॥ * ॥

कविप्रौढोक्तिसिद्धे व्यञ्जकेर्थे भेदचतुष्टये वस्तुना वस्तुनो व्यक्तिर्यथा—

कैलासस्य प्रथमशिखरे वेणुसंमूर्च्छनाभिः
श्रुत्वा कीर्त्तिं विबुधरमणीगीयमानां यदीयाम् ।
स्रस्तापाङ्गाः सरसबिसिनीकाण्डसंजातशङ्का-
दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्त्तयन्ति ॥ (५)

अत्र यद्यपि बिसिनीकाण्डसंजातशङ्का इति भ्रान्तिमान् ससन्देहो वाऽलङ्कारो व्यञ्जक इति वस्तुमात्रव्यञ्जकत्वोदाहरणमयुक्तम्, तथापि तद्भाननैरपेक्ष्येणापि 'किञ्चिच्छुक्तं कर्णं प्रविशती'त्येतावतापि वस्तुमात्रेण 'येषामप्यर्थाधिगमो नास्ति तेषामप्येवं श्वैत्यमूर्तत्वादिबुद्धिजननेन त्वत्कीर्त्तिश्चमत्कारोती'ति व्यक्तिसम्भवाद्वस्तुमात्रोदाहरणमुक्तम्·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र च कीर्त्तिश्रवणानन्तरं कर्णे हस्तावर्त्तनं हस्तिनो न स्वतःसम्भवि, किन्तु कविसम्प्रदायात् कविना वर्णितमिति कविप्रौढोक्तिसिद्धत्वम्। एवमग्रेऽपि द्रष्टव्यम्। अत्रैव वस्तुना अलङ्कारस्य यथा–

केसेसु बलामोडिअ तेण समरम्मि जअसिरी गहिआ।
जह कन्दराहि विहुरा तस्य दिढं कण्ठअम्मि संठविआ॥ (६)

अत्र 'तेन तथा समरे केशेषु जयश्रीर्गृहीता, यथा तस्यारयः कन्दराभिः कण्ठे स्थापिता' इति वस्तुना 'एकत्रैव संग्रामे विजयदर्शनात्तस्यारयः पलाय्य गुहासु तिष्ठन्ती'ति काव्यलिङ्गं, 'न पलाय्य गतास्तद्वैरिणो, ऽपि तु ततः पराभवं सम्भाव्य कन्दरा एव न तांस्त्यजन्ती'त्यपह्नुतिश्च व्यज्यते। यत्तु "केशग्रहावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान्कण्ठे गृह्णन्तीत्युत्प्रेक्षा व्यज्यत" इति, तद्व्वेदेवं, यदि पूर्वं कन्दरादीनां नायिकात्वाध्यारोपः स्यात्, अन्यथा केशग्रहणस्य मदनोद्दीपकत्वायोगात्, तदभ्युपगमे च न वस्तुमात्रस्य व्यञ्जकत्वं, किन्तु समासोक्तेरलङ्कारस्यापि। अत्रैवालङ्कारेण वस्तुनो यथा–

गाढालिङ्गणरहसुज्जुअम्मि दइए लहु समोसरइ।
मणंसिणीअ माणो पीलणभीरुव्व हिअआहि॥ (७)

अत्र पीडनभीरुरिवेत्युत्प्रेक्षया ऽलंकारेण 'प्रत्यालिङ्गनादि तत्र जृम्भत' इति वस्तु ध्वन्यते। अत्रैवालङ्कारेणालङ्कारस्य यथा–

जा ठेरं व हसंती कइवअणंबुरुहबद्धविणिवेसा।
दावेइ भुवणमंडलमण्णं विअ जअइ सा वाणी॥ (८)

अत्र 'जाठेरं व हसन्ती'त्युत्प्रेक्षालङ्कारेण 'चमत्कारैककारणं नवं नवंजगदम्बुजासना निर्मिमीत' इति वाण्या ब्रह्मणो व्यतिरेकः प्रकाश्यते। यद्यप्युत्प्रेक्षां विनापि व्यतिरेकोऽयं प्रकाशते नियतिकृतनियमेत्यादिवत्, तथापि न स्फुटो भवतीति। यद्वा तावन्मात्रस्य व्यञ्जकत्वेऽप्युत्प्रेक्षाव्यञ्जकत्वं न विहन्यत इति॥ * ॥

निबद्धवक्तृप्रौढोक्तिमात्रसिद्धव्यञ्जकार्थस्य ध्वनेर्भेदचतुष्टये वस्तुना वस्तुनो व्यक्तिर्यथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जे लङ्कागिरिमेहलासु खलिआ सम्भोअखिण्णोरई-
फारुप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तणं ।
ते एह्णिं मलआणिला विरहिणीणीसाससम्पक्किणो
जादा झत्ति सिसुत्तणेवि बहला तारुण्णपुण्णा विअ ॥ (९)

अत्र यथोक्तेन वस्तुना निश्वासेन 'प्राप्तैश्वर्य्या वायवः किं किं न कुर्वन्ती'ति वस्तु व्यज्यते· 'तारुण्णपुण्णाविअे'त्यस्य व्यक्तावनुपयोगात्· नचैवमस्याऽप्रयोजकत्व,मुक्तिविशेषपरिपोषकत्वात्· निश्वाससम्पर्कस्य बहुलत्वहेतोरुपादानात् काव्यलिङ्गस्यैव व्यञ्जकतेति चेच, तस्य हेतुत्वाऽविवक्षयापि तथाव्यक्तेः । तत्रैव वस्तुना ऽलङ्कारस्य यथा–

सहि विरइऊण माणस्स मज्झ धीरत्तणेण आसासं ।
पियदंसणविहलंखलखणम्मि सहसत्ति तेण ओसरिअं ॥ (१०)

अत्र 'प्रियदर्शनविह्वलत्वक्षणे धीरत्वेनापसृतमि'तिवस्तुना 'ऽकृतेऽपि प्रार्थने सा प्रसन्ने'ति विभावना, 'नूनं प्रियदर्शनसौभाग्यबलं धैर्येण सोढुं न शक्यत' इत्युत्प्रेक्षा च व्यज्यते । अत्रैवालङ्कारेण वस्तुनो यथा–

उल्लोल्लकरअरअणक्खएहिं तुअ लोअणेसु मह दिण्णं ।
रत्तंसुअं पसाओ कोवेण पुणो इमे ण अक्कमिए ॥ (११)

अत्र 'किमिति कुपिते लोचने वहसी'ति प्रश्नोन्नयनादुत्तरालङ्कारेण "कोवेण पुणोइमेणअक्कमिआ"इत्यपह्नुत्यलङ्कारसहितेन 'न केवलमार्द्रक्षतानि गोपयसि, किन्तु तेषामहं प्रसादपात्रमपि जाते'ति वस्तु व्यज्यते । अत्रैवालङ्कारेणालङ्कारस्य यथा –

महिलासहस्सभरिए तुअ हिअए सुहअ सा अमाअन्ती ।
दिअहं अणण्णकम्मा अङ्गं तणुअं वि तणुएइ ॥ (१२)

अत्र 'महिलासहस्रभरितत्वात्तव हृदि स्थानं न लभ्यते, ततोऽङ्गं तन्वपि तनयती'ति हेत्वलङ्काराभ्यां 'तनोस्तनूकरणेपि तव हृदये न वर्त्तत'-इति विशेषोक्तिः· अत्र कविनिबद्धा सखी वक्त्री ॥ एवमर्थशक्त्युद्भवस्य द्वादश भेदाः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दार्थोभयभूरेकः—

यथा—

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ॥

अत्र श्यामारूपकामिनीविशेषरजन्योरुपमा व्यङ्ग्या। सा चातन्द्रचन्द्रेत्यादेः परिवृत्त्यसहतया समुद्दीपितेत्यादेस्तत्सहतयोभयस्यापि व्यञ्जकत्वेन शब्दार्थोभयशक्तिमूला ॥

—भेदा अष्टादशाऽस्य तत् ॥ ४१ ॥

अस्य ध्वनेर्नतु शब्दार्थोभयभुवः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

ननु रसभावादीनां बहुत्वादष्टादशत्वमनुपपन्नमत आह—

रसादीनामनन्तत्वाद्भेद एको हि गण्यते ।

कथमनन्तत्वम् ? इत्थम्—नव रसाः। तत्र शृङ्गारस्य द्वौ भेदौ संयोगो विप्रलम्भश्च। तत्र संयोगस्यापि परस्परालिङ्गनादयो बहवो भेदाः। विप्रलम्भस्याभिलाषादय उक्ताः। तयोरपि विभावानुभावव्यभिचारिवैचित्र्य तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतिकत्वम्। तत्रापि देशकालावस्थाभेद इत्येकस्यैव रसस्यानन्त्यं, का गणना सर्वेषाम्। कुतस्तर्ह्येकत्वेन गणनम् ? असंलक्ष्यक्रमत्वरूपमेकं सामान्यमाश्रित्य ॥

वाक्ये द्व्युत्थः—

शब्दार्थोभयशक्तिमूलो ध्वनिर्वाक्य एव। ननु नायं नियमः, शिशुपालवधे दूतोक्तौ प्रबन्धेऽपि तद्दर्शनादिति चेन्न, तत्रोभयशक्तिमूलत्वेऽपि ध्वनित्वाभावात्, तुल्यप्राधान्याद् "ब्राह्मणातिक्रमत्याग" इतिवत्। अन्यत्राप्येवं सम्भाव्यत इति चेत्, सम्भाव्यतां, नतु क्वापि निश्चीयते येन तदादाय त्रिभागः स्यादिति ॥

—पदेऽप्यन्ये—

अन्ये सप्तदश ध्वनिभेदा वाक्ये पदेऽपि। ननु पदस्य व्यञ्जकत्वे किमायातं वाक्यरूपस्य काव्यस्य ध्वनित्वे, कथं वा पदमात्रस्य व्यञ्ज-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कत्वे वाक्यस्यैव समस्तस्य चारुतेति चेत्, उच्यते,पदप्रकाश्यत्वं न पदमात्रस्य व्यञ्जकतया, किन्तु तस्य प्राधान्येन· अविवक्षितवाच्ये पदमात्रस्य व्यञ्जकत्वेऽपि यद्वाक्यवृत्तिशब्दास्यार्थस्य वा कस्याप्यतिशयितार्थव्यञ्जकत्वं तद्वाक्यस्यैव ध्वनित्वमित्युपगमाच्च कश्चिद्दोषः· एकदेशस्थितेन च तादृशपदेन समस्तमेव वाक्यं चारुतामुपगच्छतीति कामिनीवैकावयवस्थेन भूषणेन· तदुक्तं ध्वनिकृता—

एकावयवसंस्थेन भूषणेनेव कामिनी ।
पदव्यङ्ग्येन सुकवेर्ध्वनिना भाति भारती ॥

इति । तत्र वाक्यव्यङ्ग्यमुदाहृतं, पदव्यङ्ग्यमुदाह्रियते· तत्राऽविवक्षितवाच्यभेदयोरर्थान्तरसंक्रमितवाच्यं यथा—

यस्य मित्राणि मित्राणि, शत्रवः शत्रवस्तथा, ।
अनुकम्प्यो ऽनुकम्प्यश्च, स जातः स च जीवति ॥

अत्र द्वितीयो मित्रशब्द आश्वस्तत्वे, शत्रुशब्दो नियन्त्रणत्वे, अनुकम्प्यशब्दः स्नेहपात्रत्वे संक्रमितवाच्यः· नायकस्य दृढप्रकृतित्वं व्यङ्ग्यम्· ननु "त्वामस्मि वच्मी"तिवाक्यप्रकाश्ये पूर्वमुदाहृतं, तस्मादस्य पदप्रकाश्यस्य को भेद इति चेन्न, अनवबोधात्· तद्धि प्रत्येकपदव्यङ्ग्यभिन्नं समस्तवाक्यव्यङ्ग्यं 'तस्मादत्र सर्वथा सावधानेन भाव्य'मित्येवंरूपं य,त्तत्परम्· इदं तु केवलमित्रादिपदव्यङ्ग्याभिप्रायमिति । अत्यन्ततिरस्कृतवाच्यं यथा—

खलववहारा दीसंति दारुणा जहवि तहवि धीराणं ।
हिअअवअस्सबहुमआ णहु ववसाआ विमुज्झंति ॥

अत्र विमोहेनाऽप्रवृत्तिर्लक्ष्यते· न च तत्र वाच्यस्य कथमपि प्रवेशः· इष्टकार्यकारित्वं च व्यङ्ग्यम्· यद्यपि व्यवसाये विमोहाभावोनान्वयायोग्य इति कुतो लक्षणा, तथापि धीराणामधीरेभ्यो वैलक्षण्यंप्रतिपाद्यम्· नच तल्लक्षणां विना सम्भवति· अधीरव्यवसायेऽपि विमोहाभावादित्यवश्यं लक्षणा स्वीकार्या । असंलक्ष्यक्रमव्यङ्ग्यं यथा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लावण्यं त,दसौ कान्ति,स्तद्रूपं, स वचःक्रमः, ।
तदा सुधास्पदमभू,दधुना तु ज्वरो महान् ॥

अवयवस्य संस्थानसौष्ठवं रूप,मवयविनस्तु तदेव लावण्यं, कान्तिरुज्ज्वलता· अत्र विप्रलम्भार्थे वाक्येऽनुभवैकगोचरमर्थं प्रकाशयतां तत्पदानां प्राधान्यम्· एवमन्येऽपि ।· न केवलं सर्वनामपदानामेव रसादिव्यञ्जकता, किन्त्वन्येषामपि यथा—

मुग्धे! मुग्धतयैव नेतुमखिलः कालः किमारभ्यते,
मानं धत्स्व, धृतिं बधान, ऋजुतां दूरे कुरु प्रेयसि!, ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥

अत्र भीताननेतिपदं नीचैःशंसनविधानस्य युक्ततां प्रकाशयत्प्राधान्येन रागातिशयं व्यञ्जयति । भावादीनां तु वाक्येऽपि न तादृक् चारुत्वम्, पदप्रकाश्यत्वे सुतराम्· अतस्तत्प्रभेदा नोदाह्रियन्ते ॥

लक्ष्यक्रमव्यङ्ग्यध्वनिभेदेषु शब्दशक्तिमूलालङ्कारव्यक्तिर्यथा—

रुधिरविसरप्रसाधितकरालकरवालरुचिरभुजपरिघः ।
झटितिभ्रुकुटिविटङ्कितललाटपट्टो विभासि नृप भीम(क) ॥

अत्र भीमेति भीषणीयार्थेन नृपसम्बोधनविशेषणेन(ख) भीमसेनोपमा व्यज्यते । अत्रैव वस्तुनो व्यक्तिर्यथा—

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥

(क) विभाति नृपभीमः—इत्यनेकत्र प्रकाशपुस्तकेषूपलभ्यते, लभ्यते चेत्थं पुस्तकद्वये, इति बह्वनुरुद्धत्वेऽप्यस्य 'विभासि नृप भीम!'—इत्येव न्याय्यत्वात् प्रतिष्ठाप्यते ।

(ख) विभातीतिमतेरेवैकत्र गौड़ाद्दरीये "अत्र भीमेति भीषणीयार्थेन नृपसम्बोधनविशेषणेन"ति वर्त्तते, अन्यत्र तु "अत्र भीमेति भीषणीयार्थेन नृपविशेषणेन"ति । तत्र तावत्पूर्वत्र व्याघातः स्फुट एव· उत्तरत्र तु नृपेत्यत्र विभक्त्यश्रवणा,न्नृपभीम इति कर्मधारयोपगमे भीमेत्यस्य प्राङ्निपातापाता,त्कथञ्चित्तदुपपानेऽपि सार्वत्रिकेण "भीमेति"त्यनेन विसंवादा,द्भीमपदार्थस्य प्रधानायितत्वेन स्वारस्यविलोपाच्चोपकल्पितः स केनचित्पण्डितदेशीयेनेति "नृपसम्बोधनविशेषणेन"त्येव न्याय्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

का चित्सङ्केतदायिनमेवं मुख्यया वृत्त्या शंसति· अत्र सदागमपदेन स्तुतिर्व्यज्यते· उभयोश्चैतयोः शब्दप्राधान्यं परिवृत्त्यऽसहत्वात् ॥
अर्थशक्त्युद्भवेषु स्वतःसम्भविन्यर्थे व्यञ्जके वस्तुना वस्तुनो व्यक्तिर्यथा–

सायं स्नानमुपासितं, मलयजेनाङ्गं समालेपितं,
यातोऽस्ताचलमौलिमम्बरमणि,र्विस्रब्धमन्दा गतिः, ।
आश्चर्यं तव सौकुमार्य,मभितः क्लान्तासि येनाधुना,
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासितुम् ॥

अत्र, 'तव सौकुमार्यमाश्चर्यं, येनाऽधुना क्लान्तासी'ति वस्तुना 'कृतपरपुरुषपरिचया क्लाताऽसी'ति वस्तु अधुनापदप्राधान्येन व्यज्यते । वस्तुनालङ्कृतेर्यथा–

तदप्राप्तिमहादुःखविलीनाऽशेषपातका ।
तच्चिन्ताविपुलाऽऽह्लादक्षीणपुण्यचया तथा ॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गता ऽन्या गोपकन्यका ॥ युग्मकम्·

अत्र जन्मसहस्रैरुपभोग्यानि दुष्कृतसुकृतयोः फलानि वियोगदुःखचिन्ताह्लादाभ्यां कयाप्यनुभूतानीत्युक्तम्· एवं च दुष्कृतसुकृतराशितादात्म्येनाध्यवसितौ भगवद्वियोगदुःखचिन्ताह्लादौ प्रतीयेते इति निगीर्याध्यवसानरूपातिशयोक्तिद्वयमशेषचयपदाभ्यां द्योत्यते । अलङ्कारेण वस्तुनो यथा–

चरणदा ऽसावचरणदा, वनमवनं, व्यसनमव्यसनम् ।
बत वीर! तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम् ॥

अत्र 'पराङ्मुखे त्वयि पराङ्मुखं सर्वे'मित्यर्थान्तरन्यासेन 'विधिरपि त्वामनुवर्तत' इति वस्तु सर्वपदप्राधान्येन व्यज्यते· ननु नायमर्थान्तरन्यासः, वनं रक्षकमित्यादेर्वाच्यस्यार्थस्यानुपपादकत्त्वादितिचेत्, शब्दशक्त्या व्यङ्ग्यस्य चरणदा चरणदाभिर्वेति विरोधस्योपपादकत्वेन तथात्वात् । अलङ्कारेणालङ्कारस्य यथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तुअ वल्लहस्स गोसम्मि आसि अहरो मिलाणकमलदलो ।
इअ णववहुआ सोऊण कुणइ वअणं महीसमुहं ॥

अत्रा'ऽधरो म्लानकमलदल'मिति रूपकेणालङ्कारेण 'त्वया ऽप मुहुर्मुहुश्चुम्बनं कृतं, तेन तस्य म्लानत्व'मिति काव्यलिङ्गं "मिलाणकमल दल"पदप्राधान्येन द्योत्यते ॥ अत्र कविप्रौढोक्तिमात्रनिष्पन्नशरीरे व्यञ्ज कार्थे वस्तुना वस्तुव्यक्तिर्यथा—

राइसु चन्दधवलासु ललिअमाप्फालिऊण जो चावं ।
एकच्छत्तं विअ कुणइ तिहुअणरज्जं(क) विअंभन्तो ॥

अत्र वस्तुना 'येषामसौ स्मरो राजा, तेषु मध्ये न कश्चिदपि तदादेशपराङ्मुख इति जागद्भिरुपभोगपरैर्निशाऽतिवाह्यत' इति वस्तु त्रिभुवनराज्यपदेन(ख) प्राधान्येन व्यज्यते । अखण्डाज्ञाविषयो हि राज्यमि त्यर्थो न व्यञ्जनोपयोगी, प्रत्युत तत्परित्यागे ऽतिशयो गम्यते । वस्तु नाऽलङ्कृतेर्यथा—

निशितशरधिया ऽर्पयत्यनङ्गो दृशि सुदृशः स्वबलं वयस्यराले, ।
दिशि निपतति यत्र सा च, तत्र व्यतिकरमेत्य समुन्मिषन्त्यऽवस्थाः ॥

अत्र 'व्यतिकरमेत्यावस्थाः समुन्मिषन्ती'ति वस्तुना 'परस्परविरुद्धा अपि निर्वेदोन्मादादयोऽवस्था भवन्ती'ति विरोधालङ्कारो व्यतिकर पदेन प्राधान्येन व्यज्यते । अलङ्कारेण वस्तुनो यथा—

वाहिज्जन्तोवि उणो सन्दावकअत्थिएण हिअएण ।
थणहरवअस्सएण विसुद्धजाई ण चलइ से हारो ॥

अत्र 'स्तनभरवयस्यत्वेन विशुद्धजातित्वाद्धारो न चलती'ति हेत्व लङ्कारेण'ऽनवरतं कम्पमान एव हारो ऽस्तीति वस्तु' "न चलती"ति पदेन व्यज्यते । अलङ्कारेणालङ्कारस्य यथा—

(क) कुणइ भुवणरज्जं—इति क्वचित्कपाठस्तु न युक्तः ।
(ख) वस्तु भुवनराज्यपदेनेति कुत्रचित् पाठः, स तु न युक्तः· उदाहरणे तिहु अणेत्यस्यावश्यकत्वादन्यथैकमात्राह्रासापत्तेः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सो सुद्धसामलंगो धम्मिल्लो कलिअललिअणिअदेहो ।
तीए खंधाहि बलं गहिअ सरो सुरअसंगरे जअइ ॥

अत्र 'सुरतसङ्गरे धम्मिल्लःस्मर' इति रूपकालङ्काराभ्यां 'तथा केशपाशः स्कन्धे पतितो, यथा रतिविरतावप्यनिवृत्तेच्छः कामुको ऽभू'दिति विभावना स्कन्धपदप्राधान्येन व्यज्यते ॥

अथ कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरव्यञ्जकार्थध्वनिषु पदप्राधान्येन वस्तुना वस्तुनो व्यक्तिर्यथा—

णअपुरिणमामिअंकस्स सुहअ को तुं सि भणसु मह सच्चं ।
का सोहग्गसमग्गा पओसरअणिव्व तुह अज्ज ॥

अत्र यथोक्तेन वस्तुना 'ऽन्यस्यामपि प्रथममनुरक्तस्त्वमभूर्न तत'-इति वस्तु 'णअपुरिणमामिअंक,पओसरअणी'पदप्राधान्येन द्योत्यते· अत्र परे रजनीवेत्युपमानैरपेत्येण कथं व्यञ्जकत्वमिति चिन्त्यम् । अत्रैव वस्तुना ऽलङ्कारस्य यथा—

सहि णवणिहुवणसमरम्मि अंकवालीसहीए णिबिड़ाए ।
हारो णिवारिओ ब्बिअ उच्चेरंतो तदो कहं रमिअं ॥

अत्र निधुवनसमर इतिरूपकस्य व्यञ्जनायामप्रयोजकतया वाच्येन वस्तुमात्रेण 'हारच्छेदानन्तरं प्रौढाङ्गनारताद्विलक्षणं नवोढायास्ते रतमभू,-त्तत्कथय कीदृगि'ति व्यतिरेकालङ्कारः कहम्पदप्रकाश्यः । अलङ्कारेण वस्तुनो यथा—

पविसन्ती घरवारं विवलिअवअणा पलोइऊण पहं ।
खंधा घेत्तूण घड़ं हा हा णट्ठोति रुअसि सहि किंत्ति ॥

अत्र 'नष्ट इति रोदिषी'ति हेत्वलङ्कारेण 'सङ्केतनिकेतनं गच्छतं-कामुकं दृष्ट्वा यदि गन्तुमिच्छसि, तदपरं घटं गृहीत्वा गच्छे'ति वस्तु किंत्तिपदप्राधान्येन प्रकाश्यते· यथा वा—

विहलंखलं तुमं सहि दिट्ठूण कुड़ेण(क) तरलतरदिट्ठिं ।
वारप्फंसमिसेण अ अप्पा गरुओत्ति पाड़िअ विहियणो ॥

(क) घड़ेणेति क्वचित्पाठः, अर्थस्त्वभिन्नः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'नदीकूले लतागहने कृतसङ्केतमप्राप्तं गृहप्रवेशसमये पश्चादागतं कामुकं दृष्ट्वा पुनर्नदीगमनाय बुद्धिपूर्वं द्वारस्पर्शव्याजेन त्वया घटः स्फोटित इति मयावगतं, तत्समाश्वासं विधाय समीहितसिद्धये व्रज, अहं तव श्वश्रूनिकटे सर्वं समर्थयिष्ये' इति वस्तु द्वारस्पर्शमिषेणेत्यपहनुत- "वारप्फंसमिसेणे''तिपदेन द्योत्यते । अलङ्कारेणालङ्कारस्य यथा-

जोह्लाइ महुरसेण अ वितिण्णतारुण्णउच्छुअमणा सा ।
वुड्ढावि णवोढ्ढिव्व परवहुआ अहह हरइ तुह हिअअं ॥

अत्र 'परवधूत्वेन सा तव हृदयं हरती'ति काव्यलिङ्गालङ्कारेण 'ऽस्मानुज्झित्वा वृद्धां परवधूमभिलषसीति त्वदाचरितं वक्तुं न शक्यत' इत्याक्षेपालङ्कारः प्राधान्येन परवधूपदद्योत्यः प्रकाश्यते ॥ शब्दार्थोभयशक्तिमूलस्तु पदप्रकाश्यो न भवति, तत्र वाक्यस्यैव प्राधान्यात् ॥ एवं पञ्चत्रिंशद्भेदाः ॥

—प्रबन्धेऽप्यर्थशक्तिभूः ॥ ४२ ॥

अर्थशक्तिमूलः पदवाक्ययोः, प्रबन्धे च, प्रबन्धश्च सघटितनानावाक्यसमुदायः, स च यन्यरूपस्तदवान्तरप्रकरणरूपश्चेति, तत्र पदवाक्ययोरुदाहृतम्, प्रबन्धेगृध्रगोमायुसंवादादौ, तथाहि-

अलं स्थित्वा श्मशानेऽस्मिन्गृध्रगोमायुसङ्कुले ।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे, ॥
नचेह जीवितः कश्चित्कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः, प्राणिनां गतिरीदृशी ॥

इति दिवा प्रागल्भ्यवतो गृध्रस्य मृताऽर्भकपुरुषविसर्जनपरं वाक्यमेलकम्,

आदित्योयं स्थितो मूढाः! स्नेहं कुरुत साम्प्रतम्, ।
बहुविघ्नो मुहूर्तोयं जीवेदपि कदाचन, ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशङ्किताः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति निशि प्रगल्भस्य गोमायोस्तत्रावर्त्तनपरं श्लोकद्वय,मिति प्रबन्ध एव व्यञ्जकः प्रथते· अत्र स्वतःसम्भविना वस्तुना गमननिवर्त्तनरूपवस्तुव्यक्तिः । एवमन्ये ऽप्येकादश भेदा द्रष्टव्याः ॥

पदैकदेश,रचना,वर्णेष्वपि रसादयः ।

रसादयो ऽलक्ष्यक्रमाः पदैकदेशे, रचनायां, वर्णेषु, अपिशब्दात्प्रबन्धे· पदवाक्ययोस्तु "पदे ऽप्यन्य" इत्यनेनैव प्रतिपादिताः· पदं द्विविधं सुबन्तं तिङन्तं च· तदेकदेशो नामधातुस्वरूपप्रकृतिभागः, प्रकृत्येकदेशः, सुप्तिङ्स्वरूपविभक्तिभागश्चो,पसर्गादिरूपश्च· तत्र पदवाक्ययोरुदाहृतं प्राक्· पदैकदेशादिषूदाह्रियते· तत्र धातुरूपप्रकृत्यात्मकदेशे रसादिव्यक्तिर्यथा–

रइकेलिहिअणिअसणाकर[(क)]किसलअरुद्धणअणजुअलस्स ।
रुद्दस्स तइअणअणं पव्वइपरिचुम्बिअं जअइ ॥

अत्र रतिव्यक्तौ जिधातुरूपप्रकृतेः प्राधान्यम्· यतः स्थगनव्यापारसाम्येऽप्यन्यनेत्रयोः कराभ्यां पिधान,मस्य तु लोकोत्तरेण कर्मणेति तदेवोत्कृष्टं· धन्यजीवितमिति रत्युत्कर्षप्रयोजकमनया व्यज्यते· अतएव जयतीत्युक्तं· नतु शोभत इत्यादि· एवमग्रेऽपि प्रकृत्यादे रसादिव्यञ्जने प्राधान्यं तत्तदर्थस्य । नामरूपतदेकदेशे तद्व्यक्तिर्यथा–

प्रेयान्सोयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावच्च यात्युन्मनाः, ।
तावत्प्रत्युत पाणिसंपुटलसन्नीवीनिबन्धं धृता-
धावित्वैव कृतप्रणामक,महो प्रेम्णो विचित्रा गतिः ॥

(क) ०णिअसणाकर०–इत्येवमेव त्रिषु, प्रकाशादिष्वपि च प्रायो भवति, व्याख्यायते चैवमेवोदाहरणचन्द्रिकाप्रदीपोद्योतकृदादिभिः–'रतिकेलौ हृतं निवसनं येन स चासौ, करकिसलयाभ्यां रुद्धं पिहितमर्थाद्गौर्या नयनयुगलं यस्य तथाभूतश्चेति बहुव्रीहिद्वयानन्तरं कर्मधारयः· 'रतिकेलौ हृतं निवसनं यस्यास्तस्या अर्थात्पार्वत्याः करकिसलयाभ्या'मिति चण्डीदासादिव्याख्याने तु णिअसणाकरेत्यत्र 'ह्रस्वश्चिन्त्य'इति· पर,मेते स्वच्छन्दमहानुभावाश्छन्दस्स्थितिं न पश्यन्ति, पश्यन्ति च प्रत्युत परस्य निरवद्यमपि वचः सावद्यमिति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र द्वारादिपदं परिहृत्य पदानीत्युक्तम्· तेन द्वारपर्यन्तं गमनेऽप्य सहिष्णुतयोत्कण्ठातिशयो व्यज्यते। तिङ्सुपोर्यथा–

पथि पथि शुकचञ्चूचारुराभाङ्कुराणां,-
दिशि दिशि पवमानो वीरुधां लासकश्च, ।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा,
पुरि पुरि विनिवृत्ता मानिनीमानचर्चा ॥

अत्र किरतीति तिङा किरणस्य(क) साध्यता, तिङ्योगे साध्यतयैव धात्वर्थोपस्थितेः· निवृत्तेति सुप्प्रत्ययेन निवृत्तेः सिद्धता, सुप्योगे तयैव प्रकृत्यर्थप्रतीतेः· तत्रापि क्तप्रत्ययेनातीतता प्रकाश्यत इति किरणनिवृत्त्योः पौर्वापर्यविपर्ययरूपातिशयोक्तिप्रकाशो रसोत्कर्षे पर्यवस्यति· यत्तु "लटा साध्यत्वं, क्तप्रत्ययेन भूतत्व"मितिव्याख्यानं, तदयुक्तं, सुप्तिङ्भ्यां सिद्धत्वसाध्यत्वमभिधाय "तत्रापि क्तप्रत्ययेनातीतत्व"मित्यनेन वृत्तिव्याख्यानेन विरोधात्। अथ सुप्तिङ्विशेषेषु यथा–

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो,
निराहाराः सख्यः सततरुदितोच्छूननयनाः, ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै,-
स्तवावस्था चेयं, विसृज कठिने! मानमधुना ॥

अत्र लिखन्नित्युक्तं, न तु लिखतीति· तेन शत्रा लिखनस्या(ख)ऽप्राधान्यमबुद्धिपूर्वकत्वरूपम्· आस्त इत्युक्तं, नत्वासीदिति· तेन तथावस्थानस्य प्रसादपर्यन्तता तिङ्विभक्त्या व्यज्यते· यद्यपि शतृप्रत्ययः सुप्प्रकृतिरेव, तथापि तिङादेशितद्विकृतितया तिङ्त्वेनैवोदाहृतः· भूमिमित्युक्तं,–नतु भूमाविति· तेन 'बुद्धिपूर्वकं भूमौ न किंचिल्लिख्यत' इति सुब्विभक्त्या व्यज्यते।

गामारिअम्हि, (ग)गामे वसामि, णअरट्ठिइं ण जाणामि, ।
णाअरिआणं पइणो हरेमि जा होमि सा होमि ॥

(क) किरणस्येत्येव सर्वत्र पाठः· एतदीयसाधुत्वादिविचारस्त्वन्यत्र द्रष्टव्यः।
(ख) लिखनस्येति प्रायः पुस्तकेषूपलभ्यमानत्वेऽपि लेखनस्येति न्याय्यम्।
(ग) गामरुअम्हि–इति केषुचित्पाठः ग्रामरुहास्मीति च तदर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र नागरिकाणामितिषष्ठ्या पतिपदार्थे तादृशकलाभिज्ञताविरूप उत्कर्षः प्रकाश्यते। "रमणीयः क्षत्रियकुमार आसी"दित्यत्र लङाऽतीतकालविहितेना विरक्तदीयहिंसायाः सुकरत्वं व्यञ्जयता प्राधान्येन धूर्जटिधनुर्भङ्गजन्या भार्गवक्रोधः प्रकाश्यते । वचनविशेषो यथा—

ताणं गुणगहणाणं ताणुक्कंठाणं तस्स पेम्मस्स ।
ताणं भणिआणं सुन्दर! ईरिसिअं जाअमवसाणं ॥

अत्र 'गुणग्रहणादीनां प्रेमहेतूनां नानाप्रकारकत्वेऽपि कार्ये ह्येकजातीयमेव, न कदाचिन्यथाभावं प्राप्त'मिति बहुवचनैकवचनाभ्यां व्यज्यते । पुरुषव्यत्ययस्य व्यञ्जकत्वं यथा—

रे रे चञ्चललोचनाञ्चितरुचे चेतः! प्रमुच्य स्थिर-
प्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि, ।
त्वं मन्ये विहरिष्यसे, बत हतां मुञ्चान्तराशामिमा,-
मेषा कण्ठतटे कृता खलु शिला संसारवारांनिधौ ॥

अत्र 'त्वं मन्ये, ऽहं विहरिष्यस' इति 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्चे"ति सूत्रेण युष्मदस्मदोर्योग उत्तममध्यमयोर्विपर्ययेण विधानं प्रहासमभिव्यनक्ति· पूर्वनिपातादयः पदैकदेशधर्मत्वात् पदैकदेशा एव गण्यन्ते· पूर्वनिपातस्य यथा—

येषां दोर्बलमेव, दुर्बलतया ते सम्मता,स्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः, ।
ये क्ष्माशक्र! पुनः पराक्रमनयस्वीकारकान्तक्षमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम् ॥

अत्र चाटुके पराक्रमनयेत्यत्र नयस्याल्पाच्तरत्वेन पूर्वनिपातमविधाय पराक्रमस्य तथाभावो ऽभ्यर्हितत्वं द्योतयति । उपपदविभक्तिविशेषस्य यथा—

प्रधनाऽध्वनि वीर! धनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम् ।
दिवसेन तु नरप! भवानयुद्ध विधिसिद्धसाधुवादपदम् ॥

अत्र वीररसात्मनि भवान् दिवसेनायुद्धेत्यपवर्गे तृतीया· अपवर्गश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फलप्राप्तौ क्रियापरित्यागः अतो भवत्पदार्थस्य युद्धरूपक्रियायां यत्फलं विजय,स्तत्प्राप्तिस्तृतीयया द्योत्यते. यस्तु "युद्धविधीत्यादि क्रियाविशेषण"मिति व्याख्यातवान्, सच्छन्दोभङ्गमपि नाज्ञासीदिति। प्रत्ययरूपस्य प्रकृत्येकदेशस्य यथा–

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं-
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था।
साक्षात्कामं नवमिव रतिर्मालती माधवं य-
द्गाढोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति॥

अत्राङ्गकैरिति कस्वरूपतद्धितेनाल्पार्थकेनानुकम्पातिशयो द्योत्यते। उपसर्गरूपस्य तदेकदेशस्य यथा–

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं(क) यो न गतवान्।
विवेकप्रध्वंसादुपचितमहामोहगहनो(ख)
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते॥

अत्र प्रध्वसादिति प्रशब्दः प्रकृत्येकदेशः प्रकर्षद्योतकः उपसर्गाणामवाचकत्वात्। निपातरूपपदैकदेशस्य यथा–

कृतं च गर्वाभिमुखं मनस्त्वया,
किमन्यदेवं निहताश्च नो द्विषः,।
तमांसि तिष्ठन्ति हि ताव,दंशुमा-
न्न यावदायात्युदयाद्रिमौलिताम्॥

अत्र चद्वयेन मनोगर्वाभिमुखीकरणशत्रुहननयोरेककालतारूपसमुच्चयो द्योत्यते. यद्यपि चेति भिन्नमेव पदं, नत्वन्यस्यैकदेश,स्तथापि केवलस्य तस्याऽसाधुत्वात्पदैकदेशत्वोपचारेणोदाहरणम्. अत एवोक्तं भोजराजेनोपमाप्रकरणे "नहीवादेः सार्थकत्वेपि पृथक्पदतामनुशास्ती"ति. एतेन तिङन्तसमभिव्याहृता उपसर्गा अपि व्याख्याताः। अथ बहूनां यथा–

(क) अनुभवपथमित्याकरे क्वचित्।
(ख) महामोहमर्चिमा–इति चाकरः प्रायः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।
वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥

अत्रासावित्यत्र सर्वनाम्नः, भुवनेष्विति न तु देशेष्विति, भुवने वेति भुवनरूपप्रातिपदिकस्य, बहुवचनस्य च, विक्रमगुणैरिति न तु गुणेन दोषैर्वेति प्रातिपदिकवचनयोर्व्यञ्जकत्वम्· किञ्चास्मद्भाग्येत्यत्र न त्वद्भाग्येति, न वा मद्भाग्येतिकृतम्· तेनास्मदित्यस्य बहुवचनसिद्धतया सर्वाक्षेपकत्वम्· तथा भाग्यविपर्ययादित्यन्यथासम्पत्तिमुखेनोक्तं, नत्वभाग्यादित्यभावमुखेना,त-स्तथाविधानेनाऽभाग्यविरहेऽपि भाग्यान्येव तादृशत्वेन परिणतानीति व्यज्यते ।

तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे ।
अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना ॥

अत्र तरुणिमनीतीमनिचस्त्वप्रत्ययपदेन, अनुमदनधनुरित्यव्ययी-भावस्य धनुःसमीप इत्यनेन, मौलिमधिवसतीति कर्मभूताधारस्य मौलौ वसतीत्यनेन तुल्येऽपि वाचकत्वे ऽस्ति कश्चित्स्वरूपस्य विशेषो, यश्च-मत्कारकारी, स एव व्यञ्जकः· तत्र त्वशब्देन प्रकृत्यर्थस्य प्रौढत्वं व्यज्यते· इमनिचा तुतद्व्यतिरेको नवत्वम्· धनुषः समीप इत्यत्र धनुषोऽत्य-न्तगुणीभावः· अव्ययीभावे तु पूर्वपदार्थप्राधान्येऽप्युत्तरपदार्थस्य किञ्चि-देवाप्राधान्यम्· कर्मभूताधारस्थले तु व्याप्तिरवगम्यत इत्यवसेयम् । एव-मन्येषामपि बोद्धव्यम्· वर्णरचनयोर्व्यञ्जकत्वं गुणस्वरूपनिरूपणे उदाह-रिष्यते· प्रबन्धे तु नाटकादौ रसादिव्यञ्जकत्वं द्रष्टव्यम्· यत्तु "पूर्वं प्रबन्धशब्देन संघटितावान्तरवाक्यसमूहोऽभिहित, इदानीं तु संघटितम-हावाक्यमित्यपौनरुक्त्य"मिति कश्चिदाह, तदज्ञानात्, पूर्वं हि अर्थशक्तिमू-लमात्रस्य प्रबन्धविषयत्व,मत्र त्वसंलक्ष्यक्रमव्यङ्ग्यस्येति पौनरुक्त्याभावात् ॥

भेदास्तदेकपञ्चाशत्—

तथा हि, अविवक्षितवाच्यस्य द्वौ भेदौ· तौ च प्रत्येकं पदवाक्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योरिति चत्वारोभेदाः· विवक्षितान्यपरवाच्येषु मध्ये ऽलक्ष्यक्रमव्यङ्ग्य पद,वाक्य,तदेकदेश,रचना,वर्ण,प्रबन्धभेदेन षड्विधः· लक्ष्यक्रमेषु शब्दश क्तिमूलस्य द्वौ भेदौ· तौ च प्रत्येकं पदवाक्ययोरिति तस्य चत्वारो भेदा· अर्थशक्तिमूलस्य द्वादश भेदाः· ते च प्रत्येकं पदवाक्यप्रबन्धेष्विति षट्त्रिं शदस्य भेदाः· उभयशक्तिमूलस्तु वाक्य एवेति ॥

—तेषां चान्योन्ययोजनम् ॥ ४३ ॥

सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया ।

वेदखाब्धिवियच्चन्द्राः—(१०४०४)—

सशयेनाऽङ्गाङ्गिभावेन,एकव्यञ्जकानुप्रवेशेन चेति त्रिविधः सङ्करः उक्तप्रकारत्रयं विना संयोगः संसृष्टिः· एवमेकपञ्चाशतो भेदानामेकपञ्चा शता भेदैर्योजनमिति तावता तावद्गुणनेन सहस्रद्वयमेकाधिका षट्शती च· संयोजनं च संसृष्ट्यादिचतुष्प्रकारैरिति तावतां चतुर्भिर्गुणने दश सह स्राणि चतुरधिकानि चत्वारि शतानि च सम्पद्यन्ते· नचानुग्राह्यानुग्राह कभावेन सङ्करस्थलेऽनुग्राहकस्याङ्गतया गुणीभाव इति न ध्वनिसङ्करत्व मिति वाच्यं, तत्र हि स्वतश्चमत्कारिण एव तस्य किञ्चित्परोपकारक तामात्रं नतु शेषशेषिभाव एवेति· नन्वस्त्वेकपञ्चाशद्भेदेष्वेकतराणां पञ्चाशता योजनं, स्वस्य तु स्वेन कथं योजनेति चेत्, व्यक्तिभेदमादाय विजातीयवत् सजातीयेनापि सङ्करादिति सूत्रकर्तुराशयः । अत्रार्वाचीनाः— गणनेयं न युक्ता, अयिमायिमभेदस्य योजन एकैकभेदह्रासात्· तथाहि, अर्थान्तरसङ्क्रमितवाच्यस्याऽत्यन्ततिरस्कृतवाच्येन योजने यो भेदः, स एवा त्यन्ततिरस्कृतवाच्यस्यार्थान्तरसङ्क्रमितवाच्येन योजनायाम्· एवमन्यत्रापि· तस्मात्,

"एको राशिर्द्विधा स्थाप्य एकमेकाधिकं कुरु ।
समार्धेनासमो गुण्य एतत्सङ्कलितं लघु ॥

इत्युक्तदिशा द्विपञ्चाशदर्द्धेन षड्विंशत्या एकपञ्चाशतं गुणयेत् तथाच, "रसदस्राग्निमेदिन्य" इति (१३२६) त्रयोदश शतानि षड्विंश

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्यधिकानि जायन्ते· योगश्चतुष्प्रकार इति तेषु चतुर्भिर्गुणितेषु "वेदाभ्रदहनेषव" इति (५३०४) पञ्च सहस्राणि चतुरधिकं शतत्रयं संकीर्णभेदा इत्येव न्याय इति वदन्ति· अत्र ब्रूमः—अनुभवसिद्धो तावत्पुण्ड्रकादीनुरसेष्विव(क) ध्वनिष्वपि हृद्यत्वातिशयानतिशयौ· तथाचार्थान्तरसङ्क्रमितवाच्यस्य यत्रातिशय,स्तत्रात्यन्ततिरस्कृतवाच्येन तद्योजनं, यत्र तु तद्वैपरीत्यं, तत्रात्यन्ततिरस्कृतवाच्यस्येतरेण योजनमिति व्यपदेशः· एवमन्यत्राप्यूह्यम्· एतदेव प्राधान्यमादाय गणना सैात्री· नन्वेवं यत्रोभयोस्तुल्यमेव चारुत्वं, तस्य भेदान्तरत्वं स्यादिति, मैवम्, अपकर्षाभावस्यातिशयपदेन विवक्षितत्वात् तत्रोभयभेदसङ्करस्वीकारात्· एतादृशे च स्थाने(ख) पदालम्बनमात्रमेव महत्पौरुषमिति सहृदयभावमास्थायालोचनीयमिति ॥

शुद्धभेदैः सह

—शरेषुयुगखेन्दवः (१०४५५) ॥ ४४ ॥

तेषु दिङ्मात्रमुदाह्रियते ।

कणपाहुणिआ देअर! जाआए सुहअ! किंपि दे भणिआ ।
रुअइ पड़ोहरवलहीघरम्मि अणुणिज्जउ वराई ॥

अत्रानुनयतेर्वाच्योऽनुनयः किमुपयोगलक्षणे लक्ष्ये सङ्क्रमित, आहोस्विद् विवक्षित एव उपभोगस्य व्यञ्जक इत्यविवक्षितवाच्यविवक्षितान्यपरवाच्ययोः सन्देहसङ्करः ।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना-
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे,
वैदेही तु कथं भविष्यति ह हा हा देवि! धीरा भव ॥

अत्र मुख्यार्थ बाधाल्लिप्तपदं सम्पर्कं लक्षयदतिशयं व्यनक्ति, पयोदे चाचेतने सौहृदाभावात् सुहृत्पदमुपकारित्वं लक्षयत्तदतिशयं प्रतिपादयति, पयोदानां मयूरनिष्ठकेकाद्युपकारशीलत्वात्· रामपदं च सर्वसहत्वानुप-

(क) पुण्ड्रकद्राक्षारसेष्विवेत्यकत्रस्थस्तु नात्यनुरूपार्थः ।
(ख) चाऽस्थाने—इत्यनेकस्थस्तु न सलक्षणवाचोयुक्तिः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युक्तशक्यार्थतया सकलदुःख भाजनत्वं लक्षयन् सीतां विनापि जीविष्यामीति व्यञ्जयदेव विप्रलम्भं व्यनक्ति· तत्र लिप्तेति पयोदसुहृदामित्यनयोरत्यन्ततिरस्कृतवाच्ययोः संसृष्टिः· ताभ्यां सह राम इत्यर्थान्तरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन सङ्करस्तयोस्तद्दीपकत्वात्· रामपदेन चैकव्यञ्जकानुप्रवेशेनार्थान्तरसंक्रमितवाच्यरसध्वन्योः सङ्करः· रामोस्मीत्यनेनैव लक्षणामूलस्य विप्रलम्भस्य च व्यञ्जनाद् विलम्भे वाक्यव्यङ्ग्येप्यस्य प्राधान्यात्· एवमन्यदप्युदाहार्यम् ॥ ४२ ॥ ४३ ॥ ४४ ॥

इति महामहोपाध्यायश्रीगोविन्दकृते(क) काव्यप्रदीपे ध्वनिभेदनिभागश्चतुर्थ उल्लासः ॥ ४ ॥

॥ अथ पञ्चम उल्लासः ॥

एवं ध्वनौ भेदप्रभेदाभ्यां निर्णीते गुणीभूतव्यङ्ग्यस्य भेदानाह-

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥ ४५ ॥
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदा मताः ।

वाच्यापेक्षया ऽचमत्कारकारित्वेन व्यङ्ग्यस्य गुणीभावः· तच्च स्वत एवासुन्दरत्वेनाऽगूढत्वादिविशेषणसप्तकेन चेत्यर्थः· अगूढं चा ऽसहृदयैरपि द्राग्वेद्यम्· तादृशं वाच्यायमानतया न तथा चमत्करोति, यथा कामिनीकुचकलशवद्गूढम्· एवमपरेष्वपि भेदेष्वनुभव एव साक्षी· अपरस्याङ्गम्, अपरस्य रसादेः स्वनैरपेक्ष्येण लब्धसिद्धेरुपकारकम्· वाच्यसिद्ध्यङ्गं वाच्यस्य सिद्धिरेव यदधीना, न तत्· अस्फुटं, सहृदयानामपि दुःखसंवेद्यम्· सन्दिग्धतुल्यप्राधान्येइति, सन्दिग्धप्राधान्यं, तुल्यप्राधान्यं चेति द्वयमित्यर्थः· काक्वाक्षिप्तं, यया काक्वा विना वाक्यार्थ एवात्मानं न लभते, तया प्रकाश्यम्, काक्वा हठेनोपस्थापितमिति वा· असुन्दरं, स्वभावादेव वाच्यापेक्षयाऽचारु । तेष्वऽगूढं यथा—

(क) ०श्रीगोविन्दठक्कुरकृते—इति त्वन्यत्र ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्याऽसुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीव्यधव्यतिकरेण युनक्ति कर्णौ, ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि,
जीवन्न सम्प्रति भवामि, किमावहामि ॥

अत्र जीवन्नित्यभिमतकार्याशक्तत्वे सङ्क्रमितवाच्यम्· तस्य च 'मरणमेव श्रेय' इति व्यङ्ग्यमसहृदयैरपि वाच्यवत् प्रतीयत इति गुणीभूतं व्यङ्ग्यम् । (१)

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा-
गायन्ति मञ्जु मधुपा गृहदीर्घिकासु ।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ॥

अत्र चुम्बतेर्वक्त्रसंयोगो मुख्यार्थोऽचेतने बाधित इति संयोगमात्रं लक्षयतीत्यन्ततिरस्कृतवाच्यत्वम्· व्यङ्ग्यश्चास्योपःकालो वाच्यायमानतया गुणीभूतः· नन्वत्र लक्ष्यतावच्छेदकस्य संयोगत्वस्य वक्त्रसंयोगेऽपि सत्त्वात् कथमत्यन्ततिरस्कृतवाच्यत्वमिति चेन्न, लक्ष्यतावच्छेदकस्य सत्त्वेपि वाच्यस्य संयोगविशेषस्य तत्र बाधात् ।

अत्रासीत्फणिपाशबन्धनविधिः, शक्त्या भवद्देवरे
गाढं वक्षसि ताड़िते हनुमता द्रोणाद्रिरत्राहृतः, ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः,
केनाप्यत्र मृगाक्षि! राक्षसपतेः कृत्ता(क) च कण्ठाटवी ॥

अत्रानुनायकोपनायकप्रतिनायकेषु निर्दिष्टेषु चतुर्थवाक्ये ऽनुक्तोपि नायको राम एवार्थशक्त्या प्रतीयते· स च केनापीत्युपादानेन वाच्यायमानतया ऽगूढ़ः कृतः· तस्याप्यत्रेतिपाठे गूढ़तया ध्वनित्वमव्याहतमेव· अत्र श्लोके प्रतिवाक्यमत्रेत्युपादानं प्रत्येकमेवाद्भुतत्वं व्यनक्ति । अपरस्य रसादेर्वाच्यस्य वा प्रधानस्याङ्गमलक्ष्यक्रमो, ऽनुस्वानाभलक्ष्यक्रमो वेति द्विविधं· तत्र प्रथमे रसस्याङ्गभावेन गुणीभूतत्वं यथा—

(क) कृत्तास्थाने लूनेत्यन्यत्रास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अयं स रशनोत्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥

अत्र भूरिश्रवसश्छिन्नं हस्तमासाद्य तद्वधूनां प्रलापे शृङ्गारः करुणस्याङ्गम्· निष्पन्नस्य रसस्यापराङ्गत्वाभावाद्रसपदेनात्र स्थायिभावो द्रष्टव्यः। रसस्यैव भावाङ्गता यथा–

कैलासालयभाललोचनरुचा निर्वर्त्तिताऽलक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम् ।
स्पर्द्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारसरसा सद्यः समुत्सार्यते ॥

अत्र वक्तुर्देवीविषयरतिरूपभावे देवयोः शृङ्गारोऽङ्गम् । भावे भावस्याङ्गत्वं यथा–

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुःस्तुतिमिति प्रस्तौमि यावद्भुव,-
स्तावद्बिभ्रदिमां स्मृतस्तव भुजो, वाचस्ततो मुद्रिताः ॥

अत्र भूविषयो रतिभावो राजविषयस्य रतिभावस्याङ्गम् । आभासस्याङ्गत्वं यथा–

वन्दीकृत्य नृपद्विषां मृगदृशस्ताः पश्यतां प्रेयसां·
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः ।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारांनिधे!
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिस्तूयसे ॥

अत्र प्रथमार्द्धे शृङ्गारो ऽननुरक्तविषयतया, द्वितीयार्द्धे तु रतिरूपो भावः शत्रुविषयतया ऽऽभासः· तौ च राजविषयरतिभावस्याङ्गम् । भावशान्तेर्यथा–

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणां मदः, स गतः क्वापि तवेक्षणे क्षणात् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र वैरिणो गर्वरूपो भाव,स्तस्य शमो राजविषयरतिभावेऽङ्गम् ।
भावोदयस्य यथा—

साकं कुरङ्गकदृशा मधुपानलीलां कर्त्तुं सहृद्भिरपि(क) वैरिणि ते प्रवृत्ते ।
अन्याभिधायि तव नाम विभो! गृहीतं केनापि तत्र विषमामकरोदवस्थाम् ॥

अत्र विषमावस्थाव्यङ्ग्यस्य त्रासस्वरूपभावस्योदयो राजविषयरतिभावस्याङ्गम् । भावसन्धेर्यथा—

असोढ़ा तत्कालोल्लसदसहभावस्य (ख) तपसः,
कथानां विस्रम्भेष्वथ च रसिकः शैलदुहितुः, ।
प्रमोदं वो दिश्यात्कपटवटुवेषापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥

अत्र स्मरहरगताऽऽवेगधैर्ययोः सन्धिर्नृपविषयरतिभावस्याङ्गम् ।
भावशबलताया यथा—

पश्येत्कश्चि,च्चल चपल! रे, का त्वरा, ऽहं कुमारी,
हस्तालम्बं वितर, ह ह हा, व्युत्क्रमः, क्वासि यासि, ।
इत्थं पृथ्वीपरिबृढ़! भवद्विद्विषो ऽरण्यवृत्तेः
कन्या कञ्चित्फलकिसलयान्याददाना ऽभिधत्ते ॥

अत्र पश्येत्कश्चिदिति शङ्का, चल चपल रे इत्यसूया, का त्वरेति धृति,रहं कुमारीति स्मृति,र्हस्तालम्बं वितरेति श्रमो,ह ह हेति दैन्यं, व्युत्क्रम इति विबोधश्चैतन्यागमरूपः, क्वासि यासीत्यौत्सुक्यम्· एषां शबलता नृपतिविषयरतिभावेऽङ्गम्· एते च गुणीभूता रसादयो रसवदाद्यलङ्कारव्यपदेशं लभन्ते· ननु गुणीभूतो रसो रसवद्, भावस्तु प्रेयो, रसभावाभासावूर्जस्वि, भावशान्तिः समाहित इत्यस्त्येव पूर्वेषामलङ्कारव्यवहारो, न पुनर्भावोदयादिषु, तत् कथमेतदुच्यत इतिचेत्, यद्यन्यवचनं विना मद्वचसि नादर,स्तर्हि कश्चित्प्रेक्षावानवश्यं ब्रूयात्, रसादिना तुल्यन्यायत्वादिति· ननूदाहृतेषु ध्वनिगुणीभूतव्यङ्ग्ययोर्भेदेषु ध्वनिभेदैर्गुणीभूत-

(क) सुहृद्भिरथेति क्वचित् ।
(ख) ०ल्लसदसमभावस्येति पाठान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यङ्ग्यभेदैरलङ्कारभेदैर्वाऽवश्यं सङ्करः संसृष्टिर्वा वर्त्तते, तत्कथं, ध्वनि रिति क्वचित्, क्वचिद्गुणीभूतव्यङ्ग्य इति, तत्रापि क्वचिदलङ्कारध्वनि रिति, क्वचिद्रसादिध्वनिरित्यादि, एवन्तद्गुणीभूतव्यङ्ग्य इत्यादिव्यपदे शानां नियम इति चेत्, प्राधान्यात्। यत्र हि यत् प्रधानं, तत्र तेन व्यप देशः। प्राधान्यं चातिशयितश्चमत्कारः। स च सहृदयहृदयैकवेद्य इति नासिद्धः। अथ वाच्याङ्गभावेन शब्दशक्तिमूलस्य लक्ष्यक्रमस्य गुणीभावो यथा–

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया,
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्, ।
कृतालङ्काभर्तुर्वदनपरिपाटीषु घटना,
मयाऽऽप्तं रामत्वं, कुशलवसुता नत्वधिगता ॥

अत्र पादत्रयद्योत्यापि रामेण सहोपमा 'मयाप्तं रामत्व'मित्यनेन वाच्यतां नीता। तदङ्गं च शब्दशक्तिमूलानुरणनरूपो द्वितीयोऽर्थः। वाच्य एवार्थशक्तिमूलस्याङ्गभावो यथा–

आगत्य सम्प्रति वियोगविसंष्ठुलाङ्गी-
मम्भोजिनीं क्वचिदपि क्षपितत्रियामः ।
एतां प्रसादयति पश्य शनैः प्रभाते
तन्वङ्गि! पादपतनेन सहस्ररश्मिः ॥

अत्रार्थशक्तिमूलो नायकनायिकावृत्तान्तो वाच्यरविकमलिनीवृत्तान्ताध्यारोपेण तदङ्गतयैव स्थितः। समासोक्तौ "वुपोढरागेण विलोले"त्यादौ सर्वत्र प्रतीयमानार्थोपस्कृतवाच्यस्यैव प्राधान्यात्। अयं च पादपतनेनेति श्लिष्टशब्दसद्भावेपि न शब्दशक्तिमूलत्वेन व्यपदेश्यः, किन्त्वर्थशक्तिमूलत्वेन, "प्राधान्येन व्यपदेश" इतिन्यायात्। तद्व्यतिरेकेणापि नायकनायिकावृत्तान्तव्यक्तिसम्भवाच्च। नचोपमाऽत्र व्यङ्ग्या, "उल्लास्य काल"इत्यादिवच्छ्लेषाभावात्। नच वाच्यसिद्ध्यङ्गत्वं, रविकमलिनीवृत्तान्तस्यैतदनपेक्ष्यैव सिद्धेरिति। वाच्यसिद्ध्यङ्गं द्विधा एकवक्तृकपदवाच्याङ्गं, भिन्नवक्तृकपदवाच्याङ्गं च। तत्राद्यं यथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादञ्च ।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥

अत्र हालाहलरूपो विषशब्दार्थो व्यङ्ग्यो, जलेऽभिधानियमनात्· स च जलदभुजगेतिरूपणस्य वाच्यस्य सिद्धिं करोति, अन्यथोपमासन्देहसम्भवात्· यथा वा मम—

ताटृग्भूतरसप्रसादकतकक्षोदाम्बुधारायिता-
जीयासुः कविरत्न खान! भवतस्तास्ता वचोभङ्गयः ।
अर्थान्विग्रहिणः पुरातनतरान् सद्यो नवान् कुर्वती
याभिः कल्पमहौषधीभिरगदङ्कारायते भारती ॥

अत्र रसप्रसाद इत्यत्र जलप्रसादरूपो ऽर्थो व्यङ्ग्यः· स च वाच्यायाः कतकक्षोदाम्बुधारोपमाया अङ्गम् । अन्यकर्तृकशब्दे वाच्यस्य सिद्ध्यङ्गं यथा—

गच्छाम्यच्युत! दर्शनेन भवतः किं तृप्तिरुत्पद्यते,
किन्त्वेवं विजनस्थयोर्हतजनः सम्भावयत्यन्यथा, ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन्पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ॥

अत्राऽच्युतेत्यनेन सोल्लुण्ठनेन त्वं मद्विषये न च्यवस इति व्यर्थमेवाऽवस्थानमिति, यद्वा, अच्युतो धैर्यादस्खलितस्त्व,मतो व्यर्थमेवावस्थानमिति,दर्शनेनेत्यादिना सम्भोगेनैव तृप्तिरिति, 'किन्त्वेव' मित्यादिना 'द्वयोरकीर्त्तिर्जातैव, तद्वृथैवात्मानं वञ्चयाव' इति खेदश्च व्यज्यते· तच्च 'इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा' मित्येतद्वाच्यस्य सिद्धिकृत्· तद्युक्तिं विनैतद्विशेषणपदार्थस्य शरीराऽलाभात् । अस्फुटं यथा—

अदृष्टे दर्शनोत्कण्ठा, दृष्टे विश्लेषभीरुता, । (क)
नाऽदृष्टेन न दृष्टेन भवता विद्यते सुखम् ॥ (ख)

(क) विच्छेदभीरुतेति क्वचित् ।
(ख) भवता लभ्यते सुखमिति पुस्तकान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र'ऽदृष्टो यथा न भवसि, वियोगभयं च यथा नोत्पद्यते, तथा कुर्या' इति व्यङ्ग्यं सहृदयस्यापि न स्फुटमवभासते। सन्दिग्धप्राधान्यं यथा–

हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाऽधरोष्ठे व्यापारयामास विलोचनानि॥

अत्र चुम्बितुमैच्छदिति व्यङ्ग्यं, युगपल्लोचनत्रयव्यापारणं वाच्यम्, तयोश्च प्राधान्ये साधकबाधकमानाभावेन सन्देहो,वाच्यस्याप्यलौकिकत्वेन चमत्कारकारित्वादुत्कण्ठातिशयव्यञ्जकत्वाच्च। तुल्यप्राधान्यं यथा–

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तथामित्रमन्यथा दुर्मनायते॥

अत्र 'जामदग्न्यः क्षत्रियाणामिव रक्षसामपि क्षयं करिष्यती'ति व्यङ्ग्यमिव वाच्यमपि प्रधानमेव, दुर्मनायत इति गम्भीरोक्त्या चमत्कारित्वाद्वियहवत् सन्धेरपि विवक्षितत्वाच्च। काक्वाक्षिप्तं यथा–

मथ्नामि कौरवशतं समरे न कोपाद्, दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू, सन्धिं करोतु भवतां नृपतिः पणेन॥

अत्र मथ्नामीति व्यङ्ग्यम्, तच्च वाच्यस्य निषेधस्य सहभावेनैव व्यवस्थितं, तादृशकाकुं विना वाच्यस्य बाधितत्वेनाऽप्रादुर्भावात्, हठेनैव तदाक्षेपादित्युक्तं प्राक्। असुन्दरं यथा–

वाणीरकुडंगुड्डीणसउणिकोलाहलं सुणंतीए।
घरकम्मवावडाए वहुए सीअंति अंगाइं॥

अत्र 'दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्ट' इति व्यङ्ग्यं; तस्माद्वाच्यं चमत्कारकारि, शब्दश्रवणसमकालमेव सर्वाङ्गावसादसन्तन्यमानतारूपस्य तस्यातिसौन्दर्यादुत्कण्ठातिशयपर्यवसन्नत्वात्॥

एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत्॥ ४६॥

ध्वनेरिव, चकारो भिन्नक्रमः, पूर्ववच्चेत्यर्थः, यथायोगं, यथासम्भवम्, तेनायमर्थः–न केवलमेत एव गुणीभूतव्यङ्ग्यस्य भेदाः, किन्त्वर्थान्तरसङ्क्रमितवाच्यत्वादिभिर्यथा ध्वनेर्भेदा,स्तथा ऽसम्भविनो विहायास्यापि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तैरुपाधिभिः शुद्धभेदा,स्सङ्करसंसृष्टिभ्यां योजने च तेषामिवेषां च सङ्कीर्णभेदा अपि बोद्धव्याः· असम्भविनश्च वस्तुमात्रेणालङ्कारव्यक्तिनिबन्धनाः· तदुक्तं ध्वनिकृता—

व्यज्यन्ते वस्तुमात्रेण यदालङ्कृतयस्तदा ।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ॥

अत्र ध्वन्यङ्गता व्यङ्गतया ध्रुवं ध्वन्यङ्गता ध्वनिनैव ता व्यज्यन्ते, तद्व्यञ्जकस्य ध्वनित्वमेवेत्यर्थः· कुतः, काव्यवृत्तेस्तदाश्रयात् काव्यप्रवृत्तेस्तदभिसन्धानपूर्वकत्वात्· वस्तुमात्रापेक्षयालङ्कारस्य चारुतानियमादित्यर्थः· ननु यद्यलङ्कारापेक्षया वस्तुमात्रस्य नातिशयनियम,स्तदा कथमलङ्कारेण वस्तुमात्रव्यञ्जने ध्वनित्वमिति चेत्, उच्यते, स एवार्थो वाच्यः सन्न तथा चमत्करोति, यथा व्यङ्गतापन्न इत्यनुभवसिद्ध,मतो वाच्यतापकर्षहेतुर्व्यङ्गता तूत्कर्षस्येति स्थितम्· यत्र चालङ्कारेण वस्तुमात्रं व्यङ्ग्यं, तत्रालङ्कारस्यापि वाच्यत्वेन किञ्चिदपकर्षाद्, वस्तुमात्रस्य च व्यङ्ग्यत्वे किञ्चिदुत्कर्षाद्युज्यत एव ध्वनित्वम्· यत्र तु वस्तुनालङ्कारो व्यज्यते, तत्र वस्त्वलङ्कारयोर्वाच्यत्वव्यङ्ग्यत्वाभ्यामतिशयेनैवोत्कर्षापकर्षाविति कुतो गुणीभूतव्यङ्ग्यत्वावकाशः· इदं तु चिन्त्यम्—एवं चारुत्वाभावनिबन्धनं गुणीभूतत्वं मा भूत्, अगूढत्वादिनिबन्धने तु तस्मिन्को वारयितेति· यत्पुनरष्टानामेव भेदानां सङ्कीर्णत्वमात्रातिदेशकमिदं सूत्रं व्याख्यातं, तदबोधात्· तथा सति हि यथायोगमित्यनेन वस्तुव्यङ्ग्यालङ्कारूपभेदपर्युदासवैयर्थ्यं, सङ्करादीनां तथाप्यव्याहतेः ॥ ४५ ॥ ४६ ॥

पूर्वं सजातीययोगो ध्वनेरुक्त, इदानीं विजातीययोगमाह—

सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः ।

सालङ्कारैरिति भिन्नार्थैकरूपनानाशब्दैकशेषः, एकत्राऽलङ्कारपदस्य भावप्रधानत्वात्· तथा च तैरेवालङ्कारै,रलङ्कारसहितैश्च तैरित्यर्थः· तेन ध्वनिना गुणीभूतव्यङ्गेन वाच्यालङ्कारेण च ध्वनेर्योग इति पूर्वापराभ्यामुक्तं भवति· तदुक्तं ध्वनिकृता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स गुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः ।
सङ्करसंसृष्टिभ्यां पुनरप्युद्द्योतते बहुधा ॥

इति· स ध्वनिः सालङ्कारैर्गुणीभूतव्यङ्ग्यैः स्वैः प्रभेदैश्च सह सङ्करसंसृष्टिभ्यां बहुधोद्द्योतत इत्यर्थः ॥

अन्योन्ययोगादेवं स्याद्भेदसङ्ख्याऽतिभूयसी ॥ ४७ ॥

एवं ध्वन्यादिभेदैस्तत्प्रभेदैश्च योजनेऽतिप्रभूता सङ्ख्या भवतीत्यर्थः· एतैः प्रभेदैरुपनिबद्ध्यमानः पुरातनोऽप्यर्थो नवनवीभवतीति सप्रयोजनं ध्वनिभेदोपदर्शनम्· यदुक्तं ध्वनिकृता—

ध्वनेर्यस्स गुणीभूतव्यङ्ग्यस्यात्मा निदर्शितः ।
एतेनानन्त्यमायाति कवीनां प्रतिभागुणः ॥

इति· तदेवमनन्तानां ध्वननव्यापारयोगिनां ध्वनीनां गुणीभूतव्यङ्ग्यानां च काव्यभेदानामनुगतोपाधिना सङ्कलने त्रयो भेदा, व्यङ्ग्यस्य त्रिरूपत्वात्· तथाहि किञ्चिद्व्यङ्ग्यं वाच्यत्वसहं, किञ्चिच्च तदसहम्· वाच्यत्वसहत्व,मभिधया प्रतिपाद्यमानस्यापि चमत्कारकारित्वम्· तयोराद्यं वस्तुमात्रमलङ्कारश्च· अलङ्कारस्य प्राधान्येपि यथालङ्कारत्वं तथोक्तं प्राक्· रसादिलक्षणस्त्वर्थो न कदाचिदपि वाच्यत्वं सहते· स हि सामान्यतो रसभावादिपदैर्विशेषतः शृङ्गारनिर्वेदादिपदैर्वाभिधीयमानश्चमत्कारकारी स्या,न्नत्वेवम्· तथा ऽभिधानेपि विभावाद्यप्रतीतौ चमत्काराभावाद्, विभावादिप्रतीतौ त्वनभिधानेपि व्यक्तस्य चमत्कारकारित्वादित्यन्वयव्यतिरेकाभ्यां विभावादिमुखेनैव प्रतीयमानस्तथेति निर्णीयते· तेनासौ व्यङ्ग्य एव चमत्कारकारी· ननु विभावादिवाचकपदैर्लक्ष्य एवास्तु रसादिः· नहि विभावादिवाचिपदं विना तत्प्रतीतिरिति चेन्न, मुख्यार्थबाधादिविरहात् ।

ननु व्यञ्जनायाः शशविषाणायमानत्वात् कुतो व्यङ्ग्यत्रैरूप्यकृतो भेद इति चेत्, उच्यते, लक्षणामूले वस्तुमात्रं व्यङ्ग्यं विना लक्षणैव न सम्भवतीति प्राक् प्रतिपादितम्· अभिधामूलेष्वपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दशक्तिमूलो द्वितीयोऽर्थ,स्तेन सममुपमा व्यङ्ग्यैवेति निर्विवादम्, अभिधाया नियमनात्· अर्थशक्तिमूलेप्येवमङ्गीकर्तव्यम्, यतः, पदेभ्यः प्रथमं पदार्थस्मृति,रथ पदार्थविशेषाणामन्वयविशेषरूपस्य वाक्यार्थस्य प्रत्यय,स्ततो व्यङ्ग्यप्रतीतिरिति तृतीयकक्षायां कुतोऽभिधायाः प्रसरणं, द्वितीयकक्षायामेव तदनपेक्षणात्· यतः,अभिहितान्वयवादे ऽशक्य एवान्वय आकाङ्क्षादिवशेन प्रतीयते· "शब्दबुद्धिकर्मणां विरम्यव्यापाराभाव" इति च सर्वसिद्धम्।

येऽप्यन्विताभिधानवादिनः—"देवदत्त! गामानये"त्यादि प्रयोजकवृद्धवाक्यं श्रुत्वा तदनन्तरं प्रयोज्यवृद्धेन साक्षादिमन्तमर्थं देशान्तरं नीयमानमालोक्या'यमेतद्विषयकैतत्क्रियागोचरकार्यताज्ञानवान्, तद्विषयकचेष्टावत्त्वात्तद्विषयकप्रवृत्तिमत्त्वाद्वा, मद्व'दितिप्रयोज्यवृद्धस्य ज्ञानमनुमिमीते· ततः कारणं विना कार्यानुपपत्त्या ऽखण्डवाक्यस्यान्वयव्यतिरेकिणस्तज्ज्ञानेन कार्यत्वकारणत्वरूपां शक्तिमवधारयति· अथ ज्ञेयसम्बन्धं विना वाक्यस्य सा शक्तिरनुपपन्नेत्यर्थापत्त्या ऽखण्डवाक्यार्थेनाखण्डस्य वाक्यस्य वाच्यवाचकभावरूपं सम्बन्धमवधारयति· यदुक्तं—

शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति, ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया, ॥
अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम्, ।
अर्थापत्त्या च बुद्ध्येत सम्बन्धं त्रिप्रमाणकम् ॥

इति· त्रिप्रमाणकमिति जात्यपेक्षया त्रित्वं, न तु व्यक्त्यपेक्षया· एवमखण्डयोः सम्बन्धमवधार्य विशेषतो व्युत्पद्यत इत्थम्—अनन्तरन्तेनैव प्रयोजकेन "चैत्र! अश्वमानय, देवदत्त! गां नये"त्यादिवाक्येषु कस्यचिदन्यपदस्याऽऽवापे कस्यचिदुद्धारे सति यस्य भागस्यान्वयव्यतिरेकाभ्यां यस्य वाक्यार्थभागस्यान्वयव्यतिरेकावुपलभते, तत्र तस्य शक्तिमवधारयति· तच्च शक्त्यवधारणमन्वित एव पदार्थे, प्रथममन्वय एव वाक्यस्य शक्तिग्रहात्, पदार्थमात्रे शक्तावुपजीव्यविरोधाद्, व्यवहारेणान्वितज्ञानस्यैवोपस्थापनाच्च· न च वाक्यं विना क्वचिदाद्यव्युत्पत्तिः, व्यवहारेणैवाद्यव्युत्पत्तेः· व्यवहारस्य च प्रवृत्तिनिवृत्तिरूपस्य पदमात्रेण कर्तुमशक्यत्वात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतो वाक्यस्थितानामेव पदानामन्वितेष्वेव पदार्थेषु सङ्केतग्रहादन्वित एव पदशक्याः· त एव च वाक्यार्थ इति न वाक्यार्थबोधे शक्तेर्विरामः, नत्व भिहितानां पदार्थानामन्वयो ऽशक्य एव प्रतीयते, योग्यतादिवशादि युक्तम्· ननु तथापि संसर्गविशेषो ऽशक्य एव, पदार्थसामान्यान्वित एव शक्ति ग्रहा,दन्यथा गामानयेतिपदं श्रुत्वा ऽश्वमानयेत्यादिवाक्ये तदेवेदमानयप मित्यादिप्रत्यभिज्ञा न स्यात्, पूर्वस्य गवान्वितानयनपरस्याश्वान्वितानय ऽशक्तत्वेनार्थभेदेन भेदादितिचेच,पदार्थत्वेन सामान्येन विशेषणामेवान्व शक्तिग्रहात्, अन्वितानां च विशेषरूपत्वादित्याहुः।—तेषामपि मते सामा न्येनैव रूपेण विशेषः शक्यो न तु विशेषरूपेण, तथाच पदार्थान्तरसामा न्यान्विते पदानां शक्तिः· गवादिविशेषान्वितस्तु विशेषो वाच्य एव· तस्मा दभिहितान्वयवादे ऽनन्वित एवा,न्विताभिधाननये तु पदार्थसामान्यान्वि तः स्वार्थः सङ्केतविषयो, गवादिविशेषान्वितानयनादिरूपस्त्वसङ्केतित एवे त्यवाच्य एव वाक्यार्थः ॥ यदपि कैश्चिदुच्यते "शब्दश्रवणानन्तरं यावा नर्थः प्रतीयते, तत्र सर्वत्रापि शब्द एव निमित्तम्· यतो नैमित्तिकानुरो धेन निमित्तानि कल्प्यन्त" इति· तदप्ययुक्तम्· शब्दस्य ह्यर्थे निमित्तत्वं कार कत्वं, ज्ञापकत्वं वा· न प्रथमं, शब्दस्यार्थानुत्पादकत्वात्· चरमं पुनरनु मन्यते, परं तु सङ्केतवत्त्वेन ज्ञातस्य· अज्ञातस्य, स्वरूपमात्रेण ज्ञातस्य वा ज्ञापकत्वे ऽतिप्रसङ्गात्· नचान्वयविशेषे सङ्केतग्रहः· अस्तु विशेष एव सङ्के तग्रह इति चे,ल्लोष्टाद्यन्वितानयनादेर्विशेषस्योपस्थापकान्तराभावेन श ब्दादेवोपस्थितिर्वाच्या· तथा च तत्र सङ्केतग्रहे शब्दात्तदुपस्थितिः, शब्दाच्च तदुपस्थितौ सङ्केतग्रह इत्यन्योन्याश्रयात्· तस्मान्नैमित्तिकानुरोधेन निमि त्तानि कल्प्यन्त इत्यविचारिताभिधानम्। अथ "सोयमिषोरिव दीर्घदीर्घत रो व्यापार" इति, "यत्परः शब्दः, स शब्दार्थ" इति च "नि.शेष"त्यादौ विधिरेव वाच्य इति भट्टमतोपजीविनः· अस्यार्थः, यथा बलवता प्रेरित इषु रेकेनैव वेगाख्येन ·व्यापारेण वर्मच्छेदमुरोभेदं प्राणहरणं च रिपोर्विधत्ते तथा एक एव शब्द एकेनैवाभिधाख्यव्यापारेण पदार्थस्मृतिं वाक्यार्थानु भवं व्यङ्ग्यप्रतीतिञ्च विधत्ते· अतो व्यङ्ग्यत्वाभिमतार्थस्य वाच्यत्वमेव·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किञ्च, यत्र शब्दस्य तात्पर्यं, स शब्दार्थ इति निःशेषेत्यादौ तात्पर्यार्थ· विषयतया विधियोच्य एवे"ति· ते तात्पर्यवाचोयुक्तेस्तात्पर्यमजानन्तः पशवः· तद्वाक्यवर्तिपदोपस्थापित एव हि तात्पर्यमुच्यते, न प्रतीतमात्रे· तथाहि, "भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत" इति सिद्धान्तः· अस्यार्थः, भूतं सिद्धं, भव्यं साध्यम्, तयोः समभिव्याहारे भूतं सिद्धं भव्याय साध्यायोपदिश्यते इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः सिद्धा-अपि प्रधानक्रियानुकूलतया साध्यीभूतया स्वक्रियया योगात् साध्यायमान-तामाप्नुवन्तः स्वरूपेण सिद्धा अपि साध्यक्रियाविशिष्टतया साध्या इव भव-न्ति· ततश्च दहनेनादग्धमात्रं यथा दह्यते, न तु दग्धमपि· तथा याव-देवाऽप्राप्तं तावदेव शब्देन विधीयते· यथा ऋत्विक्प्रचरणे प्रमाणान्तर-प्राप्ते "लोहितोष्णीषा ऋत्विजः प्रचरन्ती"त्यनेन लोहितोष्णीषत्वमात्रं विधीयते, न तु ऋत्विक्, प्रचरणं वा· उष्णीषस्यापि प्राप्तौ तु लौहित्यमा-त्रम्· हवनस्यान्यतः सिद्धौ च "दध्ना जुहोती"त्यनेन दध्नः करणत्वं, न तु दधि, हवनं वा· एवं "रक्तं पटं वये"त्यादौ रक्तत्वपटवयनानां(क) मध्ये एकस्य द्वयोस्त्रयाणां वा सिद्धौ एकविधिर्द्विविधिस्त्रिविधिर्वा· ततश्च यावदेव विधेयं, तावत्येव तात्पर्यम्· विधेयं च शब्दोपात्तमेवेति सुष्ठूक्तं शब्दोपात्त एव तात्पर्यमिति· यदि च प्रतीतमात्रे तात्पर्यं, तदा पूर्वो धावतीत्यादौ पूर्वोदिसमानसंवित्संवेद्यतया प्रतीते परार्थेऽपि कदाचित्तात्पर्यं स्यात्· ननु तद्वाक्यवर्तिपदोपस्थापित एव तात्पर्यमिति न व्याप्तिः, "विषं भुङ्-क्ष्व, मा चाऽस्य गृहे भुङ्क्था"(ख)इत्यत्र विषं भुङ्क्ष्वेतिवाक्यस्य मा चेत्यादि-वाक्यार्थेऽपि तात्पर्यादिति, मैवम्, यत एतदेकमेव वाक्यं, चकारस्यैकवाक्य-तासूचकत्वात्· अन्यथा तद्वैयर्थ्यप्रसङ्गात्· नचाख्यातवाच्यक्रिययोः सा-क्षादन्वयः सम्भवति, "गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्या"दिति-न्यायात् सुहृद्वाक्यं चेद,मतो भवितव्यमत्रान्वयेन· तथा च तद्वाक्यस्यपदो-

(क) ०वानानामिति तु न्याय्यम् ।

(ख) "भुङ्क्था"इत्येवं यावत्स्ववोपलभ्यमानत्वेऽपि वस्तुगतिपरवशा "भुक्था"· इत्येव स्थापयामः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पस्थापित एव तात्पर्यमिति सिद्धम्· तस्मा"द्यत्परः शब्द" इत्यादि यदुक्तं, तत्तात्पर्याज्ञानात्। यदपि "सोयमिषोरिवे"ति तदप्ययुक्तम्, यतः, शब्दश्रवणानन्तरं यावानर्थः प्रतीयते, तावति सर्वत्र यदि शब्दस्याभिधैव व्यापारः स्या,त्तदा "चैत्र! पुत्रस्ते जातः, कुमारी ते गर्भिणी"त्यादिवाक्यानन्तरं हर्षविषादयोः प्रतीते,स्तयोरपि तद्वाक्यस्याभिधा स्यात्· अथ तच्छब्दप्रतिपाद्ये सर्वत्राभिधा· हर्षादयस्तु न तत्प्रत्याय्या इत्युच्यते· तर्हि लक्षणीयेप्यभिधैव स्यादिति लक्षणोच्छेदः· किमिति च "श्रुति,लिङ्ग,वाक्य,प्रकरण,स्थान,समाख्यानां समवाये पारदौर्बल्य,मर्थविप्रकर्षा" दितिसूत्रेण भगवाञ्जैमिनिः श्रुत्यादिषु पूर्वबलीयस्त्वं प्रतिपादयाम्बभूव, सर्वत्रैवाभिधाप्रसङ्ग उत्तरस्य दौर्बल्ये बीजाभावात्· सूत्रं तु प्रकृतार्थविच्छेदकत्वेपि बहूपकारकत्वाद्दुरूहत्वाच्च व्याक्रियते· श्रुतिलिङ्गादयः षडिह विनियोजकाः· तत्र विरुद्धयोरेकत्रोपनिपाते समुच्चयो न सम्भवतीत्येकेनापरस्य बाधो वक्तव्यः· स च बलवता दुर्बलस्येति स्थिते दौर्बल्यप्रतिपादकं सूत्रं "श्रुतिलिङ्गे"त्यादि· अस्यार्थः—श्रुत्यादिनां समवाये, एकत्रोपनिपाते, तेषां मध्ये यदपेक्षया यत्परं, तदपेक्षया तद् दुर्बलम्· कुतः, अर्थविप्रकर्षात्, पूर्वापेक्षया विलम्बेनार्थप्रत्यायकत्वात्· यथा चैत,त्तथोदाहरणे स्फुटीकरिष्यते· तत्र निरपेक्षो रवः श्रुतिः· यथा "व्रीहीनवहन्ती"ति· अत्र क्रियाफलभागित्वं कर्मत्वं बोधयन्ती द्वितीया निरपेक्षैव व्रीहीणामवघातशेषित्वं प्रतिपादयति। अर्थविशेषप्रकाशनसामार्थ्यं लिङ्गम्· यथा "बर्हिर्देवसदनं दामी"ति· अत्र लवनार्थप्रकाशकतया बर्हिर्लवने विनियोगः। परस्पराकाङ्क्षावशात् क्वचिदेकस्मिन्नर्थे पर्यवसितानि पदानि वाक्यम्·(क) यथा "देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामी"त्यत्र लिङ्गेन निर्वापे विनियुज्यमानस्य समवेतार्थभागस्यैकवाक्यताबलेन देवस्य त्वेत्यादिभागस्यापि तत्र विनियोगः। लब्धवाक्यभा-

(क) अत्र खल्वेकत्र पुस्तके त्रुटिमुद्रया लिखितमास्ते—"ततश्च क्वचिद्वाक्यार्थतया विनियोगः सिध्यति, यथा "ऽरुणया क्रीणातीत्यत्र, क्वचिदेकवाक्यताबलात्" इति न्याय्यत्वेऽपि प्रक्षिप्तत्वान्न खल्विदं मूले निवेश्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वानां पदानां कार्य्यान्तरापेक्षावशाद्वाक्यान्तरेण सम्बन्धे आकाङ्क्षापर्यवसन्नं प्रकरणम्· यथा "समिधो यजती"त्यादौ· अस्य हि दर्शपौर्णमासकथंभावाकाङ्क्षायां पाठवशाच्छेषत्वम् । स्थानं क्रमः· स चानेकस्याम्नातस्य सन्निधिविशेषाम्नानम्· यथा "दब्धिरसी"त्यत्राग्नेयाग्नीषोमीयोपांशुयागाः क्रमेण ब्राह्मणेषु पठिताः· मन्त्रभागेपि क्रमेणानुमन्त्रणत्रयं पठितम्· तत्राग्नेयवैष्णवयोर्लिङ्गेनैव द्वयोर्विनियोगसिद्धिः· दब्धिरसीत्यत्र तु न लिङ्गादि विनियोजकं, किंतु यस्मिन् प्रदेशे ब्राह्मण उपांशुयागविधानं, तस्मिन्नेव प्रदेशे मन्त्रेप्यस्य पाठ इतिक्रमादुपांशुयागानुमन्त्रणेऽस्य विनियोगः । समाख्या योगबलम्· यथा हौत्र,मौद्गात्रमित्यादि· तच हि होतुरिदं हौत्रमित्यादियोगबलेन हौत्रादिसमाख्यातानि कर्माणि होत्रादिभिरनुष्ठेयानि ॥

अथैषां विरोधोदाहरणानि।–तत्र श्रुतिलिङ्गयोर्विरोधे लिङ्गस्य दुर्बलत्वं यथा "कदाचन स्तरीरसि नेन्द्र सश्चसी"त्यादिकाया ऋचो विनियोजिका श्रुति"रैन्द्र्या गार्हपत्यमुपतिष्ठत" इति· अत्र चेन्द्रप्रकाशनसामर्थ्यरूपाल्लिङ्गादिन्द्रोपस्थापने विनियोगः प्रतिभाति, अन्यप्रकाशकस्यान्यत्र विनियोगायोगात्· श्रुत्या गार्हपत्योपस्थापने स प्रतीयते· गार्हपत्यमिति द्वितीया हि कर्मविभक्तितया कामपि क्रियामपेक्ष्य प्रकृत्यर्थस्य शेषित्वं बोधयति, क्रियाजन्येष्टफलभागित्वस्य तदर्थत्वात्· एवमैन्द्र्येतितृतीया प्रकृत्यर्थस्य शेषत्वम्, क्रियां प्रति साधकतमत्वरूपकरणत्वस्य तदर्थत्वात्· तदत्र श्रुतिलिङ्गयोर्विरोधः· नच वाच्यं,–निरपेक्षया द्वितीयया शेषित्वमात्रं प्रतीयते, नत्वैन्द्रीमृचं प्रति, तच्चाग्नेयीमृचं प्रत्यपि सम्भवतीति कुतो विरोधः· ऐन्द्र्येतिपदमपेक्ष्य विशेषबोधनाद्विरोध इति चे,न्न तर्हि श्रुतेर्विरोधः, किन्तु वाक्यस्य· तच्च लिङ्गापेक्षया दुर्बलमेवेति,–यतः, शेषशेषिभावः सामान्यतः श्रुत्यैवावगम्यते, पदान्तरापेक्षया तु विशेषे व्यवस्थाप्यते· विशेषणसम्बन्धमात्रस्य पदान्तरसम्बन्धाप्रतीतेः· तस्मात् सामान्यतः श्रुत्या प्रतिपाद्योसौ वाक्यलभ्यं विशेषमपेक्ष्य लिङ्गप्रतिपाद्येन विरुध्यते । तत्रायं पूर्वः पक्षः–सामर्थ्यज्ञानमपेक्ष्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुतिर्विनियोजिका· नह्यसमर्थं श्रुतिसहस्रेणापि बोधयितुं शक्यते, यथा वह्निः प्रसेके, जलं वा दाहे· अतो लिङ्गस्य बलवत्त्वादिन्द्रस्योपस्थाने ऽस्या विनियोगः· तदनुरोधेन द्वितीया सप्तम्यर्थतया व्याख्येया· गार्हपत्यसमीपे ऽनयेन्द्र उपस्थातव्य इत्यर्थः पर्य्यवस्यति । सिद्धान्तस्तु—श्रुतिः स्वरूपसत्सामर्थ्यमपेक्षते, नतु तद्बोधमपि, येन लिङ्गम्बलवद् भवेत्· 'तस्य च पूर्वं सत एव ज्ञानं विनियोगान्यथानुपपत्त्या पश्चादुपजायते· लिङ्गं तु विनियोजने श्रुतिमपेक्षते· नह्य'नेनेन्द्र उपस्थातव्य' इति लिङ्गात् स्वरसतः प्रतीयते, किं त्वी'दृगिन्द्र' इत्येतावन्मात्रम्· तथाच प्रकरणाम्नानसामर्थ्यादिन्द्रप्रकाशनसमर्थाया ऋचोऽन्यथानुपपत्त्या विनियोगः कल्पनीयः· तथा चार्थविप्रकर्षः· तथाहि, श्रुतार्थापत्तिसाधकन्यायेन "शब्दोपस्थापितेनैव शाब्द्याऽऽकाङ्क्षा पूर्यत" इति लिङ्गेना'नयेन्द्र उपस्थातव्य' इति श्रुतिः कल्पनीया· ततस्तया विनियोगो भवेत्· ततो यावल्लिङ्गं श्रुतिकल्पनायै प्रक्रान्तव्यापारं, तावत् प्रत्यक्षया श्रुत्या गार्हपत्ये विनियोगः सिद्ध एवेति प्रकरणे निराकाङ्क्षे कयानुपपत्त्या श्रुतिः कल्पनीया· तस्माच्छ्रुतेर्बलवत्त्वात् तदनुगुणतया सामर्थ्यं नीयमान इन्द्रपदं परमैश्वर्यवाचकतया गार्हपत्यतात्पर्यकमित्यवधार्यते ॥

लिङ्गवाक्ययोर्यथा—पुरोडाशस्य स्थानकरणस्थापनस्वरूपयोः सदनसादनयोः प्रकरणे "स्योनं ते सदनं कृणोमि (क) घृतस्य धारया सुशेवं कल्पयामि, तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेद सुमनस्यमान" इति मन्त्रः पठित,स्तत्र कल्पयामीत्यन्तः पूर्वभागः सदने, शेषभागस्तु सादने प्रयोक्तव्य इति लिङ्गात् प्रतिभाति· अयं मन्त्र एकं वाक्यम्, यत्पदाद्यपेक्ष 'यत्कल्पयामि तस्मिन् सीदे'त्येकार्थावच्छिन्नत्वाद्विभागे साकाङ्क्षत्वाच्च· ततश्चैकवाक्यत्वात् समस्त एवोभयत्र विनियोक्तव्यो "देवस्य त्वे"त्यादिवदिति वाक्यादवगम्यते· तदनयोर्विरोधः । अत्र पूर्वपक्षः—अस्यैकवाक्यत्वे निश्चिते पश्चात्तदुपपत्तये ऽभिधानसामर्थ्यं कल्पनीयम्· यत्कल्पितया श्रुत्या विनियोगो भवेत्· यथा "देवस्य त्वे"त्यादिमन्त्रे 'अग्नये' 'निर्वपामी'ति प-

(क) करोमीति पुस्तकद्वये सङ्गावेऽपि श्रौतः "कृणोमी"त्येव न्यस्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वयोः समवेतार्थयोरेकवाक्यतया ऽतादृशां पदान्तराणां सामर्थ्यकल्पना· तथाचैकवाक्यत्वनिर्व्वाहाय क्लृप्तं सामर्थ्यं न तद्भागहन्तुमर्हति, किन्तु विनियोजिकां श्रुतिं कल्पयत् समस्तमन्त्रविनियोजिकामेव कल्पयतीति वाक्यस्योपजीव्यत्वेन बलवत्त्वात् समस्तस्यैवोभयत्र विनियोग इति । सिद्धान्तस्तु—यद्येकवाक्यतामवगम्यैव सामर्थ्यमवधार्य्येत, तदोपजीव्यत्वाद्वाक्यं बलवद्भवेत्· नत्वेवं, प्रत्युता,वधृतसामर्थ्यानां सन्निहितपठितानां पदानां सामर्थ्यवशेन प्रयोजनैकतया चैकवाक्यत्वावधारणम्· यावन्ति पदानि प्रधानमेकमर्थं प्रतिपादयितुं समर्थानि विभागे साकाङ्क्षाणि भवन्ति, तावन्त्येकं वाक्यं भवन्ति· अनुष्ठेयश्चार्थो मन्त्रे प्रकाशमानः प्रधानम्· सदनसादने चात्र तथाभूते· तथा च सदनप्रकाशनसमर्थः पूर्वभागः, सादनप्रकाशनसमर्थः शेषभाग इति प्रथमप्रतीताभ्यां तत्सामर्थ्याभ्यां क्लृप्तेन श्रुतिद्वयेन द्रागेव तद्भागयोः प्रत्येकं विनियोगे सिद्धे तावतैव प्रकरणपाठोपपत्तौ समस्तमन्त्रस्यैकवाक्यताबुद्धिरुत्पन्नाप्याभासी भवति, लिङ्गेन बाधात्· तथाक्लृप्तमपि सामर्थ्यं न श्रुत्यन्तरं कल्पयितुमर्हतीत्यर्थविप्रकर्षाद् वाक्यं दुर्बलम्· तस्माद्यत्रावान्तरवाक्ये विरोधिलिङ्गान्तरं नास्ति, तत्र समवेतार्थेनैकेन पदेन द्वाभ्यां त्रिभिर्वा सहैकवाक्यता पदान्तराणामपि सामर्थ्यं विनियोजकश्रुतिकल्पनानुकूलं कल्पयति· यथात्रैव "स्योनन्त" इत्यादिभागानाम्·

वाक्यप्रकरणयोर्यथा, दर्शपौर्णमासप्रकरणे "इदं द्यावापृथिवी भद्रमभू"दित्यादिकः सूक्तवाकनिगदः पठितः· तत्र चे "न्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायो ऽक्राता" "मग्नीषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायो ऽक्राता"मित्यवान्तरवाक्यद्वयं श्रूयते· तत्र पौर्णमास्यामिन्द्राग्नी न देवते इति लिङ्गात्तत्पदमपनीयते· अमावास्यायां तु समवेतार्थत्वात्प्रयुज्यते· एवमग्नीषोमपदममावास्यायामसमवेतार्थत्वेन त्यज्यते, पौर्णमास्यां तु प्रयुज्यते·(क) तत्रैवं सन्दिह्यते—इन्द्राग्नीपदेक-

(क) "एवमग्नीषोमपदममावास्यायामसमवेतार्थत्वेन त्यज्यते, पौर्णमास्यां तु प्रयुज्यते" इत्येतावदेकत्र नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाक्यतापन्नान्यवोवृधेतामित्यादिपदानि तत्रापनेयानि· अथवा प्रयोक्तव्यान्येवेति· तत्र प्रकरणात्तत्प्रयोगः प्रतिभाति· असमवेतार्थतया देवतामात्रस्यापनयनात्· वाक्यात्तु तान्यपनेयानीति प्रतीयते· येन सह यदेकवाक्यतापन्नं, तेन सहैव तदपनयनानौचित्यात्, तदनयोर्विरोधः तत्र प्रकरणमेवाङ्गं सम्बन्धप्रतिपादक,मतस्तस्य बलवत्त्वाच्छेषभागः प्रयोक्तव्य एवेति पूर्वपक्षे सिद्धान्तः—प्रकरणं विनियोज्यस्वरूपसामर्थ्यमनपेक्ष्य न विनियोजकं, येनैतदेवं भवेत्, किंतु तदपेक्षमेव· कथमन्यथा "पूष्णोऽहं देवयज्यया प्रजया पशुभिश्च जनिषीये"तिपूषानुमन्त्रणमन्त्रं तद्देवताविरहिणोर्द्दर्शपूर्णमासयोश्च विनियुङ्क्ते· "तिस्र एवोपसदः साह्नस्य द्वादशाहीनस्ये"त्यत्र चैकाहविधेयसोमयागस्वरूपे साह्ने ज्योतिष्टोमादौ द्वादशोपसत्तां न बोधयति· सा पुनर्बहुदिवसविधेया सोमयागरूपाऽहीननामकक्रतुविशेषं नीयते, "अह्नः खः क्रता"वित्यनुशासनात्· स्वरूपपर्यालोचनायां तु श्रुत्या लिङ्गेन वाक्येन वा झटितिप्रवृत्तिकेन यद्रूपमनीयते यद्वाऽन्यत्र नीयते, तद्विहायावशिष्टेन प्रकरणाकाङ्क्षा पूर्य्यते· यत्र तु विरोधे श्रुत्यादिकं नास्ति· तत्र प्रकरणं विनियोजकम्· यथा, "समिधो यजती"त्यादिबोधितस्य समिदादेः· अत्र तु यथा लिङ्गेनेन्द्रादिभागोऽपनीयते· तथा वाक्येन तच्छेषभागोऽपीति क पश्चात्प्रवृत्तिकस्य प्रकरणस्यावकाशः· न च तथात्वमस्याऽसिद्धम्, यतो, वाक्ये पदानां सम्बन्धः प्रत्यक्षसिद्धः, प्रकरणे त्वाकाङ्क्षावशात्कल्पनीयः· तथा च वाक्ये प्रथममेवाभिधानसामर्थ्यं कल्प्यते, ततस्तेन श्रुति,स्तया विनियोग इति तृतीयः कालो विनियोगस्य· प्रकरणे तु प्रथमं वाक्ययोः सम्बन्धः कल्प्यते, ततः सामर्थ्य,मथ श्रुति,रथ विनियोग इति चतुर्थः कालः· ततो वाक्यात्प्रथमं शेषभागस्यापनये सिद्धे क्लृप्तापि श्रुतिरकिञ्चित्करी, वाक्यविरोधादिति ॥

प्रकरणस्थानयोर्यथा राजसूयस्य प्रधाननानाकर्म्मात्मकस्य प्रकरणे प्रधानादभिषेचनीयादनन्तरं शौनःशेपोपाख्यानमाम्नातम्· तत्र, किं समस्तराजसूये तदङ्ग,माहोस्विदभिषेचनीयमात्र इति सन्देहः· तत्र प्रकर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णस्य बलवत्त्वात् सर्वाङ्गता ऽवगम्यते· स्थानस्य तु बलवत्त्वे ऽभिषेचनीयाङ्गता· तदनयोर्व्विरोधः· यद्यप्याकाङ्क्षाऽऽसत्त्योरुभयोरपि तुल्यबलता 'अयमेति पुत्रो राज्ञ' इत्यादौ 'गामानय प्रसादं पश्ये'त्यादावुभयविरहेणान्वयाबोधात्· तथापि विनिगमनाविरहादुभयोस्तुल्यबलत्त्वाच्च विकल्पेनाङ्गतास्त्विति पूर्व्वपक्षे सिद्धान्तः—आकाङ्क्षासन्निधी द्वे अपि विनियोगप्रयोजिके इत्युभयसम्मतम्· राजसूये च कथं स्यादित्याकाङ्क्षा क्षत्रियस्य धृतिं यावदनुवर्त्तते· सन्निधानं च प्राकरणिकत्वेन सर्व्वदा बुद्धिसन्निहितत्वादस्त्येव· अभिषेचनीये तु सत्यपि सन्निधाने आकाङ्क्षोत्थाप्या· तथाच यदोत्थिताकाङ्क्षया प्रकरणेनैकवाक्यत्वं कल्पनीयं, तदा सन्निधानादाकाङ्क्षोत्थापनं ततश्चैकत्र सामर्थ्यकल्पनं, श्रुत्युत्रयनं, विनियोगः· अपरत्र एकवाक्यताकल्पनं, सामर्थ्योन्नयनं, श्रुतिकल्पनं, विनियोगश्चेत्यर्थविप्रकर्षात् स्थानस्य दुर्बलत्वात् प्रकरणेन सर्वत्र राजसूये शौनःशेपोपाख्यानस्य विनियोगो, नतु विकल्प इति ॥

स्थानसमाख्ययोर्यथा—दर्शपौर्णमासप्रकरणे पौरोडाशिकसमाख्याते काण्डे सान्नाय्यक्रमे "शुन्धध्वं दैव्याय कर्म्मणे" इति मन्त्रः श्रूयते· स च प्रकरणाद्दर्शार्थ,स्तत्र तथात्वं च तस्य समवेतार्थतौचित्यात् कस्यचिच्छुन्धने विनियोगाद्भवेत्· शुन्धनीयं चात्र द्वयमुपस्थितं सान्नाय्यपात्रं पुरोडाशपात्रं च· तत्र समाख्यावशात् पुरोडाशपात्रशुन्धने विनियोगः प्रतिभाति, स्थानवशात्तु सान्नाय्यपात्राणाम्· तदनयोर्विरोधः· तत्र पूर्वपक्षः पौरोडाशशब्देन पुरोडाशसम्बन्धीन्युलूखलमुसलादीन्युच्यन्ते· तान्यधिकृत्य प्रवृत्तं काण्डं पौरोडाशिकमिति· अतः समाख्या श्रुतित एव साक्षाद्विनियोजिका· क्रमस्तु प्रकरणाच्छ्रुत्युन्नयनद्वारा तथेति समाख्या बलवतीति । सिद्धान्तस्तु पौरोडाशिकपदं न पुरोडाशमन्त्रविशेषयोः सम्बन्धमाह, किन्तु पुरोडाशविशिष्टं काण्डम्· वैशिष्ट्यानुपपत्त्या तु सम्बन्धस्तत्र कल्प्यते, सोपि न शेषशेषिभावः, किन्तु सम्बन्धमात्रम्· द्वारेण तु मन्त्रभेदस्यापि तदनुमानम्· तथाच समाख्ययापि क्रमादिक्रमेणैव विनियोगो, नतु श्रुत्यैव· एवं च समाख्यया क्रमो ऽनुमेय,स्तेन प्रकरणं, तेन वाक्यं, तेन लिङ्गं, तेन श्रुति, स्तया विनियोग

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति समाख्यायां षष्ठः कालो विनियोगस्य· स्थाने तु क्रमः प्रत्यक्ष एवेति न कल्पनीयः· तथाच तेन प्रथमत एव प्रकरणमनुमेयं, तेन च वाक्यं, तेन लिङ्गं, तेन श्रुति,स्ततया तु विनियोग इति पञ्चमः कालः· तस्मादर्थवि- प्रकर्षात्समाख्या स्थानतो दुर्बलेति न पुरोड़ाशपात्रशुन्धने ऽस्य विनियोगः कथं तर्हि काण्डस्य पौरोड़ाशिकसंज्ञा· पुरोड़ाशसम्बन्धिबहुमन्त्रघटितत्वा- दित्यवेहि· तदयं निर्गलितोर्थः—

एकद्वित्रिचतुःपञ्चवस्त्वन्तरयकारितम् ।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनां प्रतीयते ॥
बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा ।
मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया ॥

इत्यलमति विस्तरेणेति प्रकृतमनुसरामः ॥—

पूर्वोक्त इषुदृष्टान्तो वैषम्यादनुपपन्नः· तथाहि, तत्र वेगव्यापारस्य स्वरूपसत एव जनकतया दीर्घदीर्घतरत्वं सम्भवति· अभिधायास्तु ज्ञाताया एवानुकूलत्वाद्व्यङ्ग्यनिष्ठतया चाज्ञानादित्यन्विताभिधानवादेपि "निःशे- षे"त्यादौ विधेर्व्यङ्ग्यत्वमेवेति स्थितम्· किञ्च, यदि वस्तुगत्या पदार्थान्त- रेण यो ऽन्वितः, सोऽभिधयोपस्थाप्यत इत्यन्विताभिधानम्, तदावश्यं व्य- ञ्जना स्वीकार्य्या· अन्यथा 'रुचिं कुर्वि'तिशब्दस्य दुष्टत्वं न स्यात्· दुष्टहे- तोरसभ्यार्थोपस्थितेस्तत्राभावप्रसङ्गात्, तदर्थस्यानन्वितत्वात्· किञ्च, वा- च्यवाचकभावातिरेकी व्यङ्ग्यव्यञ्जकभाव इत्यवश्यं काव्यज्ञदृष्ट्यापि स्वीक- र्तव्यम्, अन्यथा कष्टत्वादयो ऽनित्यदोषा, असाधुत्वादयो नित्यदोषा इति विभागो न स्यात्· वाच्यस्यार्थस्याविशेषेण कष्टत्वादीनामपि सर्वत्र दुष्टत्व- स्याऽदुष्टत्वस्य वा प्रसङ्गात्· व्यञ्जनाभ्युपगमे तु व्यञ्जनीयस्य बहुविधत्वा- द्रौद्रादौ व्यङ्ग्येऽनुकूलत्वं, शृङ्गारादौ तु दुष्टत्वमिति युज्यते विभागव्यवस्था· एवं पर्य्यायेषु मध्ये कस्य चिदेव कुत्रचित्काव्ये ऽनुगुणत्वमित्यपि व्यवस्था न स्यात्, वाच्यार्थस्याऽविशेषात्· दृश्यते चासौ· यथा "द्वयं गतं सम्प्रति शोच- नीयतां समागमप्रार्थनया कपालिन" इत्यादौ न पिनाक्यादिपदमनुकूलं, किन्तु जुगुप्साव्यञ्जकतया कपालिपदमेव· ननु द्वयमप्येतदयुक्तं, व्यङ्ग्यत्वेना- भिमतस्य वाच्यत्वस्वीकार एवानुकूलत्वप्रतिकूलत्वयोर्व्यवस्थोपपत्तेरिति चेत्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न, अभिधास्वीकारे सङ्केतग्रहं विना तदनुपस्थितिप्रसङ्गस्योक्तत्वात्॰ किञ्च, काव्ये शास्त्रे वा वाच्यव्यङ्ग्ययोः प्रतिपत्तिहेतुव्यापारभेदनिबन्धनो भेदो ऽवश्यं स्वीकर्त्तव्यः, वैधर्म्यदर्शनात्॰ वाच्यो ह्यर्थः सर्वैरेक एव प्रतीयत इति नियतः॰ व्यङ्ग्यस्तु वक्तृप्रकरणादिवशादनियतः॰ तथाहि, "गतो ऽस्तमर्क" इति वाक्ये राज्ञः सेनापतीन्प्रति 'शत्रूणामाहवेनावमर्दनावसर'इति, दूतीनामभिसारिकाः प्रत्य 'भिसरणमुपक्रम्यता'मिति, सख्या वासकसज्जां प्रति 'प्राप्तप्रायस्ते प्रेया'निति, कर्मकरस्य सह कर्म्मकुर्वतः प्रति 'कर्म्मकरणान्निवर्तामह' इति, भृत्यस्य धार्म्मिकं प्रति 'सान्ध्यो विधिरुपक्रम्यता'मिति, आप्तस्य कार्यवशेन बहिर्गच्छतः प्रति 'दूरं मा गा' इति, गृहिणो गोपालकं प्रति 'सुरभयो गृहं प्रवेश्यन्ता'मिति, दिवसे ऽतिसंतप्तस्य बन्धून्प्रति 'संतापो ऽधुना न भवती'ति, आपणिकानां भृत्यान् प्रति 'विक्रेयवस्तूनि संह्रियन्ता'मिति, नायकाऽऽगमनप्रस्तावे प्रोषित भर्तृकायास्तत्कथकं प्रति 'नागतोऽद्य प्रेया'नित्येकस्यैव वक्तुर्बहून् प्रति तत्तत्प्रकरणवशादेवमादिरनवधिर्व्यङ्ग्योऽर्थः प्रकाशते, वाच्यस्तु सर्वान् प्रत्यविशिष्ट एव॰ ननु नैतद्वाच्यवैधर्म्यम्, नानार्थसैन्धवादिपदे नानार्थावगतिदर्शनादिति चेन्न, एकवाक्यवर्तिनस्तस्याप्यर्थैक्यनियमात्॰ यदग्रे वक्ष्यति "लक्षणीयार्थस्य नानात्वेप्यनेकार्थपदाभिधेयवन्नियतत्वमेवे"ति॰ तथापि यत्र लवणाद्यधिकारिणः प्रति सकलस्वामिनः सैन्धवमानयेतिपदप्रयोग,स्तत्रानियतत्वं दुर्वारमेवेति चेन्न, तात्पर्य्याज्ञानात्॰ नह्यत्र सर्वैर्वाच्यैः समं सर्वव्यङ्ग्यानां भेदः प्रतिपाद्यते, किंतु "गतो ऽस्तमर्क" इत्यस्य वाच्यव्यङ्ग्ययोः॰ तथाच तद्वाच्यस्य नियतत्वं, तदर्थपुरस्कारेणैव सर्वेषां व्यङ्ग्यस्यापि प्रतीतेः॰ तदयं नियतत्वानियतत्वरूपविरुद्धधर्मसंसर्गाभिहितः॰ एवं विलक्षणस्वरूपकालादिभेदेऽपि भेदको द्रष्टव्यः॰ वैधर्म्यसत्त्वेपि यद्यभेदः स्या,त्तदा नीलानीलादेरपि न क्वचिद्भेदः स्याद्, वैधर्म्यस्याऽविशेषात्॰ यदुक्तम्—"अयमेव हि भेदो भेदहेतुर्वा, यद्विरुद्धधर्माध्यासः कारणभेदश्चे"ति॰ सुप्रसिद्धश्च तत्र तत्र स्वरूपभेदेऽर्थभेदः, तत्र "निःशेषे"त्यादौ,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मात्सर्य्यमुत्सार्य्य विचार्य कार्य्यमार्याः समर्य्यादमुदाहरन्तु(क) ।
सेव्या नितम्बाः किमु भूधराणा, मुत स्मरस्मेरविलासिनीनाम् ॥ इत्यादौ,

कथमवनिप! दर्पो यन्निशातासिधारा-
दलनगलितमूर्द्धां विद्विषां स्वीकृता श्रीः ।
ननु तव निहतारेरप्यसौ किं न नीता-
त्रिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः ॥

इत्यादौ च स्वरूपभेदः· प्रथमे हि वाच्यो निषेधरूपो, व्यङ्ग्यस्तु विधिरूपः· द्वितीये वाच्यः संशयरूपः, प्रतीयमानस्तु शान्ते शृङ्गारिणि वा वक्तरि तदुचितैककोटिनिश्चयः· तृतीये वाच्यो निन्दारूपः, प्रतीयमानस्तु स्तुतिरूपः· कालभेदस्तु सर्वत्र, पूर्वं हि वाच्यः प्रतीयते, पश्चात्तु व्यङ्ग्य इति· वाच्यस्य तु शब्दमात्रमाश्रयः, प्रतीयमानस्य तु पदशब्दैकदेशीभूतकाक्कादितदर्थवर्णसंघटना इत्याश्रयभेदः· वाच्यस्य व्याकरणकोषादिमात्रेणावगमः, प्रतीयमानस्य तु प्रतिभानैर्मल्येनाप्यधिकेनेति ज्ञापकभेदः· वाच्येन व्युत्पन्नमात्रस्य प्रतीतिमात्र,मन्येन तु विदग्धपदवाच्यस्य सहृदयस्य चमत्कृतिरिति कार्य्यभेदः· "गतोऽस्तमर्के"इत्यादौ दर्शितनयेन वाच्य एकः, प्रतीयमानस्तु नानेति संख्याभेदः ।

कस्स वा ण होइ रोसा दट्ठूण पिआइ सव्वणं अहरं ।
सभमरपउमग्घाइणि वारिअवामे! सहसु एह्निम् ॥

इत्यादौ वाच्यार्थस्य संबोध्या सखी विषयः, तत्र हि वाच्योऽर्थः श्रोतुर्व्यवतिष्ठते· प्रतीयमानस्य तु 'भ्रमरेणास्या अधरः खण्डितो, नतूपपतिने'ति (१)तत्कान्तः, 'ममैवं वैदग्ध्य'मित्यस्य प्रतिवेशिनी, इदानीम्मया समाहितं पुनरेवं त्वया न विधेयमि'त्यस्योपपतिः, एवं सपत्न्यादिविषयोऽपीति विषयस्य भेदः· एवं स्वरूपादिभेदादवश्यमङ्गीकर्त्तव्यो वाच्यव्यङ्ग्ययोर्भेदः· किंच, वाचकव्यञ्जकयोरपि वैधर्म्याद्भेदो वक्तव्यः· यतो वाचकस्य सङ्केतितार्थापेक्षा, सङ्केतित एव ह्यर्थे ऽभिधा प्रवर्त्तते, नत्वेवं व्य-

(क) समर्यादमिदं वदन्त्वित्यपि क्वचित् ।
(१) इतीति· इत्यस्य प्रतीयमानस्य विषयस्तत्कान्त इति सम्बन्धः· एवमुत्तरत्रापि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ञ्जकः· अन्यत्रापि व्यञ्जनया प्रत्ययजननात् ॥ यच्चोक्तं "तात्पर्यविषये शब्दः प्रमाण"मिति तदितोऽप्यनुपपन्नम्· यतो व्यङ्ग्यस्य वाच्यताभ्युपगमे ऽपि नानार्थन्यायेन तात्पर्य्यादेव नियमो वाच्यः· अन्यथा सर्वत्र सर्वव्यङ्ग्यप्रतीतिप्रसङ्गात्· तथाच यत्र "वानीरकुडुंगे"त्यादौ व्यङ्ग्यप्रतीतावपि वाच्यएव चारुत्वविश्राम,स्तत्र तात्पर्याऽविषयो व्यङ्ग्योऽर्थः कथं प्रतीयेत· "यत्परः शब्द" इत्युक्तमते तु सुतराम्· एतेन तात्पर्य्यमेव व्यङ्ग्यप्रतीतौ व्यापार इत्यपि निरस्तम्· तस्मात्तात्पर्य्यमभिधा वा न प्रतीयमानेऽर्थे व्यापारः ॥ नन्वस्तु लक्षणा· नहि वाच्यवल्लक्ष्योपि व्यवस्थितो विशेषव्यपदेशाहेतुर्वा· यतो "रामोऽस्मि सर्वं सह" इत्यत्र रामपदेन सर्वदुःखभाजनत्वं,

> प्रत्याख्यानरुचेः कृतं समुचितं क्रूरेण ते रक्षसा,
> सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः, ।
> व्यर्थं संप्रति बिभ्रता धनुरिदं त्वद्व्यापदां साक्षिणा
> रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये ! नोचितम् ॥

इत्यत्र कातरत्वम्, "रामो ऽसौ भुवनेषु विक्रमगुणै"रित्यत्र खरदूषणादिहन्तृत्वं च लक्ष्यते· अतो रामपदलक्ष्य एवानेको भवति, अर्थान्तरसङ्क्रमितवाच्यादिविशेषव्यपदेशहेतुश्च[(क)] भवति· एवमन्यत्रापि स्यात्· तदुक्तं "भाक्तमार्गस्तदन्य"[(ख)] इति लक्षणीयविशेषावगमश्च प्रकरणादिसापेक्षेण शक्यार्थेन स्या,दतो नास्त्यतिरिक्तः प्रतीयमानो नाम । मैवम्, लक्षणीयस्य नानात्वेपि हि नानार्थसैन्धवादिपदाभिधेयस्येव नियतत्वमेव· न खल्वनियतसम्बन्धो मुख्येनार्थेन लक्षयितुं शक्यते· प्रतीयमानस्तु प्रकरणादिव·

(क) विशेषापदेशहेतुश्चेति पाठः क्वाचित्कोऽप्यनतिरिक्तार्थः ।

(ख) अत्र खलु, "भाक्तमार्गस्तदन्य" इत्येव पाठः, "तस्मादभिधेयादन्यो भक्तिलक्षणा, तया मार्गणं प्रकाशनं यस्य स इत्यर्थः"–इति प्रदीपप्रभासंमतः· "भाक्तमाहुस्तमन्ये" इति चैकत्रोपलभ्यते· सोऽपि प्रामाणिकः· तथा च प्रदीपोद्द्योतः–"तं व्यङ्ग्यस्वरूपमन्यं भाक्तं लाक्षणिकमाहुरित्यर्थः· भाक्तमार्गस्तदन्य इति पाठान्तरम्· तदन्यः शक्यान्यो भाक्तमार्गो लाक्षणिकमार्ग इत्यर्थः"–इति· बहूनामनुरोधो न्याय्य इतिन्यायेनात्र प्रभासंमतमेवाद्रियामहे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धेन नियतसम्बन्धो ऽनियतसम्बन्धः सम्बद्धसम्बन्धश्चेति· तत्स्वरूपं सोदाहरणमग्रे प्रदर्शयिष्यते· किञ्च, "अत्ता एत्थ णिमज्जइ" त्यादौ विवक्षितान्यपरवाच्ये कथं लक्षणा, मुख्यार्थबाधाऽभावात्· ननु तत्रापि तात्पर्याधीनान्वयानुपपत्ति "शङ्खिनो यान्ती" त्यत्रेवेति चेच, लक्षणायां प्रयोजननियमात्· तस्य च व्यापारान्तरागम्यत्वात् तदर्थं व्यञ्जनास्वीकारे किं प्रथमयापि लक्षणया· अथ निरूढलक्षणायामिवान्यत्राप्यस्तु प्रयोजनानपेक्षेति चेच, यथा हि सङ्केतग्रहसापेक्षा ऽभिधा, तथा मुख्यार्थबाधतद्योगरूढिप्रयोजनान्यतरस्य(क) मुख्यार्थसङ्केतग्रहस्य च सापेक्षा लक्षणा· तत्कथं रूढेः प्रयोजनस्य वा ऽभावे भवेत्· यतः सङ्केतग्रहसापेक्षा सा· अत एवा'भिधापुच्छभूता से'त्याहुः· किञ्च, न लक्षणाव्यञ्जनयोरभेदः, लक्षणामुपजीव्यतद्दर्शनात्· नापि लक्षणानुगतमेव ध्वननमिति ध्वनेस्तल्लक्षणमिति वाच्यम्, अभिधोपजीवनेनापि भावात्· नच लक्षणाभिधोभयानुसार्येव· वर्णमात्रानुसारेणापि हि दृश्यते रसादिव्यञ्जना· नच वर्णमात्रे ऽभिधा लक्षणा वा· नापि शब्दानुसार्येव, विकसच्चर्तकीनेत्रत्रिभागावलोकनादिगतत्वेनापि प्रसिद्धेः· तस्मादभिधालक्षणातात्पर्यविलक्षणस्तुरीयो ध्वननव्यञ्जनद्योतनप्रकाशनादिपर्यायो व्यापारो ऽन ऽपह्नवनीय एव। तत्र, "अत्ता एत्थ णिमज्जइ" त्यादौ व्यङ्ग्यार्थो नियतसम्बन्धः, "कस्स वा ण होइ रोसो" इत्यादावनियतसम्बन्धः· नियतसम्बद्धत्वं च व्यङ्ग्यप्रतीत्योरेकविषयतात्मकत्वम्· प्रथमे तस्य भावः, पथिकरूपैकविषयकत्वात्· द्वितीये तु तदभावः, सखीतत्कान्तादिविषयभेदादिति केचित्· तच सम्यगभाति, लक्ष्यस्य नियतसम्बद्धत्वमेव, व्यङ्ग्यस्य तु तथात्वमन्यथात्वं चेति पूर्वप्रतिपादितस्य हीदमुदाहरणमिति लक्ष्यसाधारणं नियतसम्बद्धत्वं वाच्यं, नचोक्तं तथा भवति· अन्ये तु प्रथमे सर्वेषामेव सत्यताप्रतीतिः द्वितीये तु कान्तस्यैव सत्यतया, ऽन्येषां त्वसत्यतयेति नियताऽनियतसम्बन्धत्वमित्याहुः· तदपि न मनोरमम्· यत, एवं वाच्यप्रतीतेरेव सत्य-

(क) मुख्यार्थबाधतद्योगेरूढिप्रयोजनान्यतरस्येत्येकस्य पुस्तकस्य पाठस्तु सर्वथैवोच्छृङ्खलः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वाऽसत्यत्वप्रतीतिविषयत्वरूपं वैलक्षण्यमुच्यते, नतु व्यङ्ग्यप्रतीतेः॰ तस्मान्नियतसम्बन्धत्वं तेन वाक्येन सह ज्ञाप्यत्वरूपसम्बन्धनियम इति युक्तमुत्पश्यामः॰ सम्बद्धसम्बन्धो यथा—

विवरीअरए लच्छी बम्हं दट्ठूण णाहिकमलट्ठं ।
हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ ॥

अत्र हरिपदेन दक्षिणनयनस्य सूर्यात्मकत्व,न्तन्निमीलनेन सूर्य्यास्तमय,स्तेन पद्मसङ्कोच,स्ततो ब्रह्मणः स्थगनं, तस्मिन् सति गोपनीयाङ्गस्याऽदर्शनेननिर्यन्त्रणं निधुवनविलसितमिति सम्बन्धसम्बद्धानि द्योत्यन्ते ॥ वेदान्तिनस्तु—क्रियाकारकादिपुरस्कारेण शब्दानां प्रवृत्तिर्धर्मधर्म्मिभावमपुरस्कृत्य न सम्भवति॰ धर्मधर्म्मिभावश्च प्रपञ्चगोचरो वा स्याद्, ब्रह्मगोचरो वा॰ नाद्यः, प्रपञ्चस्य बाध्यत्वात्॰ नान्त्यः, ब्रह्मणो धर्म्मशून्यत्वात्॰ अतः पदपदार्थविभागमन्तरेणैव "सत्यं विज्ञान"मित्यादि वाक्यमखण्डमेवाऽखण्डब्रह्मवाचकमित्यातिष्ठन्ते॰ अतस्तन्मतानुसारेण प्रतीयमानेपि वाच्यस्य शक्तिरेवेत्यपि न वाच्यम्, यतो व्यवहारमार्गे तैरपि पदपदार्थकल्पना ऽवश्यमङ्गीकर्त्तव्या॰ व्यवहारे तेषां भट्टनयस्वीकारात्॰ यदि च पदार्थकल्पना ऽविद्यादशायामपि नाङ्गीक्रियते॰ कुतस्तर्हि व्युत्पन्नाऽव्युत्पन्नविभागव्यवहारः॰ वाक्यार्थ एव वाक्यस्य सङ्केतग्रहमाश्रित्येति चेत्, वाक्यार्थस्यापूर्वत्वेनाऽऽनन्त्यात्तत्र(क) सङ्केतग्रहस्याऽशक्यत्वात्॰ अविद्यामार्गतिरस्कारे च कथमखण्डयोरपि वाच्यवाचकभावः, पारमार्थिकभेदाभावात्॰ तस्मात्तन्मतेपि विध्यादिर्व्यङ्ग्य एव ॥ महिमभट्टास्तु—न तावदसम्बद्ध एव वाक्यात् प्रतीयते, सर्वस्मात्सर्वोपलब्धिप्रसङ्गात्॰ सम्बन्धाच्च व्यङ्ग्यव्यञ्जकभावो भवन्वा ऽनियताद्भवतीति प्रतिबद्धरूपादेव भवतीत्यास्थेयम्॰ सम्बद्धोप्यर्थो न स्वाधिकरणत्वेनाज्ञाते व्यङ्ग्यं प्रतिपादयति, सर्वत्र तत्प्रतीतिप्रसङ्गात्॰ एवं च व्यङ्ग्यव्यञ्जकभावो ऽनुमेयानुमापकभाव एव पर्य्यवसन्नः॰ यतो व्याप्तत्वेन सकलपक्षनिष्ठत्वेन च सपक्षसत्त्ववि-

(क) अपूर्वत्वादानन्त्याच्चेति पाठः पुस्तकान्तरस्थस्तु नातियुक्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पक्षासत्त्वपक्षसत्त्वलक्षणरूपत्रयवतो लिङ्गाल्लिङ्गिज्ञानमेवानुमानम्· तदेतदुक्त"मनुमानं य,त्तद्रूप"इति· तेनानुमानेन रूप्यते नत्वतिरिक्तया व्यक्त्येति हि तस्यार्थः· एवमनुमानादेव व्यङ्ग्यप्रतीतिः· तथाहि ।

भम धम्मिअ बीसत्थो सो सुणओ अज्ज मारिओ तेण ।
गोलाणईकच्छकुडुंगवासिणा दरिअसीहेण ॥

सङ्केतनिकेतनीभूतं गोदावरीनिकुञ्जं पुष्पावचयादिहेतोः कदाचित्संचरतो धार्म्मिकस्य निवारणाया ऽविनयवत्या इयमुक्तिः· तदत्र निकुञ्जवासिसिंहकृतया श्वनिवृत्त्या गृहे भ्रमणविधिर्वाच्यः· स एव निकुञ्जभ्रमणायोग्यतानुमित्यै [क] प्रभवति· यद्यद्भीरुभ्रमणं तत्तद्भयकारणनिवृत्त्युपलब्धिपूर्वकं, निकुञ्जे च [ख] सिंहोपब्धिरिति व्यापकविरुद्धोपलब्धौ पर्य्यसानात्· भ्रमणस्य व्यापिका भयकारणाभावोपलब्धिः प्रतीता· तद्विरुद्धं यद्भयकारणं तदुपलब्धेः· यथा नात्र तुषारस्पर्शो वह्नेरिति· अनुमानं चैवं-गोदावरीनिकुञ्जं श्वभीरुभ्रमणायोग्यं, [ग] सिंहवत्त्वात् । अत्रोच्यते—श्वभीरोरवीरस्वभावस्य भ्रमणायोग्यत्वमत्र साध्यं,वीरस्वभावस्य वा, विशेषौदासीन्येन तत्सामान्यस्यैव वा· आद्ये व्यभिचारः, तादृशस्यापि प्रभोर्गुरोर्वा निदेशेन प्रियानुरागेण निधिलाभादिशङ्कया वा तत्र भ्रमणदर्शनात् । अत एव नान्त्योपि· मध्यमे तु विरोधः,स्पर्शादिशङ्कया ऽपौरुषेयतया वा श्वतो बिभ्यतो ऽपि मृगयादिकुतूहलेन सिंहवद्देशे वीरस्य [घ] भ्रमणदर्शनात्· किञ्चात्र पक्षे सिंहसद्भावो न मानान्तरेणावधारितः, किन्तु पुंश्चलीवाक्यादवगतः· नच तद्वचनं निश्चायकम्, अर्थेन समं सम्बन्धा ऽनियमादित्यनिश्चयरूपा ऽसिद्धिः· एवं "निःशेषच्युतचन्दने"त्यादौ चन्दनच्यवनादीन्युपभोगव्यञ्जकतयोपात्तानि· नच तानि तद्व्याप्यानि, कारणान्तरतो ऽपि सम्भवात्· अत एवात्र स्नानकार्य्यत्वेनोपात्तानि· अतो ऽनैकान्तिकत्वात्

(क) अयोग्यानुमित्यै प्रभवतीत्येकतमे ।
(ख) निकुञ्जे चेत्यस्य स्थाने लिङ्गं चेत्येकस्मिन्पुस्तके पठ्यते· तत्तु न युक्तम् ।
(ग) भीरुभ्रमणाऽयोग्यमिति 'श्व'पदरहितमेकत्रास्ते ।
(घ) वीरस्यापि भ्रमणादित्येकत्र, न तु युक्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथमनुमितिः स्यात्· ननु व्यक्तिरपि कथं तैरितिचे,द्धर्मपदसाहित्यादिति ब्रूमः· अस्माकमपि तत्साहित्येनानैकान्तिकताव्यतिरेक इति चेद्,भवेद-प्येवं यद्यधमत्वं प्रमाणावधारितं भवेत्, नन्वेवमस्ति· व्यक्तिरपि कथं तादृशाद्भवेदिति चेद्,धिङ्मूर्ख! व्यञ्जनायां न व्याप्ते,र्नापि पक्षधर्म्मताया निर्द्धारणमङ्गं, किन्तु सम्भावितादप्येवंविधादेवंविधो ऽर्थः प्रतीयत इति मूकीभव ॥ ४६ ॥ ४७ ॥

इति महामहोपाध्यायश्रीगोविन्दविरचिते काव्यप्रदीपे पञ्चम उल्लासः ॥ * ॥

॥ अथ षष्ठ उल्लासः ॥

एवं गुणीभूतव्यङ्ग्यभेदे निर्णीते चित्रभेदं दर्शयितुमवसरः· तत्र यद्यपि शब्दचित्रार्थचित्ररूपभेदद्वयं प्रथमोल्लास एव दर्शितं, तत्प्रभेदा-श्चालङ्कारप्रभेदप्रदर्शनेनैव दर्शिता भविष्यन्तीति न किञ्चदस्ति तत्र प्रद-र्शनीयम्, तथापि प्रदर्शितभेदद्वयमेव तावदनुपपन्नं शब्दार्थालङ्कारयोरन्यो-न्यनैरपेक्ष्येणानुपलम्भात्· उपलम्भेवाप्युभयसद्भावे तृतीयभेदप्रसङ्गादिति तदुपपादयति–

शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतम् ।
गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः[(क)] ॥ ४८ ॥

शब्दार्थालङ्कारयोरेकैकमात्रावस्थानपुरस्कारेण नायं विभागः, किन्तु प्राधान्यपुरस्कारेण· तथाच न काचिदनुपपत्तिरिति भावः· ननु तथापि विभागो ऽनुपपन्न एव, यतः, केचिच्छब्दालङ्कारमात्रं, केचिच्चा-र्थालङ्कारमात्रमूरीचक्रिरे, तत्कस्य मतमाश्रित्य विभाग इति चे,त्सन्त्येव केचिदुभयाङ्गीकारिणः· तथाचोक्तं–

(क) स्थितिः शब्दार्थचित्रयोरिति क्वचित्प्रकाशपुस्तके प्राप्यते, नत्वतियुज्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपकादिलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ॥
रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥ इति॰

अस्यार्थः—अर्थस्यैव विभावादिरूपत्वेन रसव्यञ्जकत्वात्तन्निष्ठो रूपकादिरेवालङ्कारः कैश्चिदुक्तः॰ केचित्तु काव्यस्यालङ्कारो वाच्यः काव्यं च कविकर्म्म शब्द एवेति तदाश्रितानां सुपां तिङां च विशिष्टा विशेषलक्षणयोगिन्युत्पत्तिरलङ्कारः॰ (क) रूपकादिस्त्वर्थाश्रितो ऽलङ्कारो बाह्यः॰ अलङ्कारपदप्रयोगस्तु तत्र गौण एवेति वाञ्छन्ति॰ व्युत्पत्तिरेव कथं नार्थालङ्कार इत्यत आह तदेतदाहुरित्यादि॰ शब्दाभिधेयेति, शब्दवदर्थस्यापि कविसंरम्भज्ञाप्यत्व,मर्थस्यैव शब्दस्यापि रसप्रतीत्युपयोगित्व; मत उभयाश्रितोप्युभयरूपो ऽलङ्कार इति॰ तत्र शब्दचित्रं यथा—

प्रथममरुणच्छायस्ताव,त्ततः कनकप्रभ,-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः, ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥

अत्रार्थालङ्कार उपमा गुणीभूतः, शब्दालङ्कारस्त्वनुप्रासः प्रधानम्, आसमाप्ति कवेस्तत्रैव संरम्भात्॰ प्राधान्यस्य कविविवक्षामात्रनिबन्धनत्वात् । अर्थचित्रं यथा—

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च, ।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥

(ख) विशिष्टोत्पत्तिरलङ्कार इत्येकत्रास्ते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र शब्दालङ्कारो ऽनुप्रासः, स गुणीभूतो, ऽर्थालङ्कारस्तु समुच्चयः प्रधान,मारम्भादासमाप्ति तन्निर्वाहणात्· यथा चात्र किंचिद्व्यङ्ग्यसत्त्वे ऽप्यधमकाव्यत्वं, तथोक्तं प्रथमोल्लास एव· एषां भेदाश्चालङ्कारभेदाद्भवन्तीत्यलङ्कारनिर्णयेनैव ते निर्णीयन्त इति ॥ ४८ ॥

इति महामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपे षष्ठ उल्लासः ॥ * ॥

॥ अथ सप्तम उल्लासः ॥

एवं धर्मिणि काव्ये सप्रभेदे निरूपिते प्राप्तावसरतया दोषाभावादीनि लक्षणस्थानि विशेषणानि विवेचनीयानि· तेषु च दोषाभावः प्रधानम्,सति दोषे गुणादेरकिञ्चित्करत्वात्· यदाह "स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भग"मिति· सति तु दोषाभावे गुणादिकं विनापि किञ्चिदाह्लादसम्भवात्, "अपदोषतैव विगुणस्य गुण" इतिन्यायात्· अतः प्रथमं तस्मिन्निरूपणीयेऽभावस्य स्वरूपतो निरूपणानर्हतया प्रतियोगिनिरूपणाधीनरूपणीयत्वाद्धेयापरिचये तद्धानाऽसम्भवाच्च दोषा निरूपणीयाः· नच सामान्ये ऽविज्ञाते विशेषे जिज्ञासेति तत्सामान्यलक्षणमाह–

> मुख्यार्थहतिर्दोषो, रसश्च मुख्यस्तदाश्रयाद्वाच्यः ।
> उभयोपयोगिनः स्युः शब्दाद्या,स्तेन तेष्वपि सः ॥ ४९ ॥

मुख्यार्थस्य हतिर्यस्मादिति व्यधिकरणत्वेपि गमकत्वाद्बहुव्रीहिः· करणसाधनो हतिशब्द इत्येके· मुख्यत्वमर्थस्य न शक्यत्वलक्षणं, येनार्थाऽसङ्गतिः स्यात्, किन्त्वन्यदित्याह रसश्च मुख्य इति· रस्यत इति व्युत्पत्त्या रसशब्देन भावादिरप्युपसंगृह्यते· नन्वेवं नीरसेषु न कश्चिद्दोषः स्याद् विघाताभावादित्यत आह (क)तदाश्रयाद्वाच्य इति· आश्रयणमाश्रयः· तथाच तेन रसेनाश्रयणादुपकारित्वेनानुगमापेक्षणाद्वाच्योपि मुख्य इत्यर्थः·

(क) विभावाद्यभावादित्यत आहेति पुस्तकान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नचैवं मुख्यशब्दार्थस्य नानात्वेनाऽननुगमः, काव्ये प्राधान्येनोद्देश्यप्रतीतिविषयत्वेनानुगमात्। तदेवं रसवति सर्व एव दोषा, नीरसे त्वऽविलम्बितचमत्कारिवाक्यार्थप्रतीतिविघातका एव हेया इति मन्तव्यम्। नन्वेवं तयोरेव दोषाधारत्वमुचितं, नतु शब्दादीनामित्यत आह उभयोपयोगिन इत्यादि। अत्र शब्दपदं प्रतिपादनात्मकशब्दनाव्यापारवतोः पदवाक्ययोर्वर्त्तते। तेनाक्षपदाद्वर्णरचने संगृहीते इति प्रकाशस्वरसः।(क) नच तत्र बीजाभावः, अन्यथावर्णस्यापि शब्दपदेनैव प्राप्तौ शब्दाद्या इति बहुवचनाऽसङ्गतेः। स्यादेतत्, हतिर्विनाशः। नच दोषेण रसो नाश्यते। तस्मादलक्षणमेतत्। मैवं,हतिशब्दस्यापकर्षवाचित्वात्। नन्वेवं रसानुत्पत्तिप्रयोजकेष्वव्याप्तिः। अथानुत्पत्तिरेव हतिशब्दार्थ,स्तर्हि,यत्र रस उत्पद्यत एव परंत्वपकृष्यते। तत्राव्याप्तिः। तदेतल्लक्षणमतिदरिद्रदम्पत्योः क्लेशतरनिशावगुण्ठनीयवसनमिवैकेनाऽऽकृष्यमाणमपरं परिहरति। किंचार्थरूपस्य मुख्यार्थस्यानुत्पत्तिरपकर्षो वा न दोषाधीन इत्यत्र ब्रूमः—उद्देश्यप्रतीतिविघातलक्षणोपकर्षो हतिशब्दार्थः। उद्देश्या च प्रतीती रसवत्यविलम्बिता,ऽनपकृष्टरसविषया च, नीरसेत्वऽविलम्बिता चमत्कारिणी चार्थविषया। तथाच तादृशप्रतीतिविघातकत्वं सर्वेषामविशिष्टम्। यतो दुष्टेषु क्वचिद्रसस्याऽप्रतीतिरेव। क्वचित्प्रतीयमानस्याप्यपकर्षः। क्वचित्तु विलम्बः। एवं, नीरसे क्वचिदर्थस्य मुख्यभूतस्याऽप्रतीतिरेव। क्वचिद्विलम्बेन प्रतीतिः क्वचिदचमत्कारितेत्यनुभवसिद्धमित्युद्देश्यप्रतीतिविघातो व्यक्त एव। तद्विघातकता च कस्यचित्साक्षात्, यथा रसदोषाणाम्। कस्यचित् परम्परया, यथा शब्दार्थदोषाणाम्। तेष्वपि कस्यचिदर्थोपस्थितेरभावात्, यथा समर्थत्वादेः। कस्यचित्तद्विलम्बात्, यथा निहतार्थत्वादेः। कस्यचिद्वाक्यार्थबोधाभावात्, यथा च्युतसंस्कृत्यादेः। कस्यचित्तत्र विलम्बात्, यथा क्लिष्टत्वादेः। कस्यचित्सहृदयवैमुख्यव्यग्रताद्यापादनेन, यथा निरर्थकत्वादेः। कस्यचिद्विरोध्युपस्थापनेन विपरीतोपस्थापनेन(ख) वा, यथा

(क) प्रकाशकारस्वरस इति पु०।
(ख) विपरीतार्थोपस्थापनेन वेति अन्यतमे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरसविरुद्धमतिकृत्त्वादे[क]रित्याद्यूहनीयम्· विघातकत्वं च कस्यचिज्ज्ञातस्य, यथा व्याहतत्वादेः, कस्यचित्तु स्वरूपसत एव, यथा निहतार्थत्वादेः· स चायं द्विविधो नित्यश्चाऽनित्यश्च· तत्रानुकरणादन्येन प्रकारेण समाधातुमशक्यो नित्यः; यथा च्युतसंस्कृत्यादिः· अन्यादृशस्त्वनित्यः, यथा ऽप्रयुक्तः ॥ अथ विशेषलक्षणानि वक्तव्यानि· तत्र द्विविधोप्ययं त्रिविधः—शब्ददोषो ऽर्थदोषो रसदोषश्चेति· तत्र शब्दार्थरसानां यथापूर्वमुपस्थितिः प्राथमिकीति तत्क्रमेणैव दोषभेदा निरूपणीया इति[ख] शब्ददोषाणां प्राथम्यम्· शब्दस्तु त्रिधा पदं तदेकदेशो वाक्यं च· एवं च तदाश्रितशब्ददोषोपि त्रिविधः· तत्र पदानां वाक्यघटकत्वेन प्राथम्यात् प्रथमं तद्दोषनिरूपणमिति परमार्थः· तत्रेदं शङ्क्यते—एवं पदैकदेशस्य पदापेक्षयापि प्राथम्यात्तद्दोषनिरूपणस्यैव प्राथम्यमर्हतीति· अत्र भास्करः, "सत्यमुच्यते, परं तु पददोषेष्वेव यथासम्भवं केचित्पदैकदेशदोषा" इति समादधे तन्नातिमनोरमम्· अस्त्वेवं तथापि पदैकदेशदोषत्वेन प्रथमाभिधानापादने किमुत्तरमिति । वयं त्वालोचयामः—उपदेशे तावत् प्राथम्यादिविचारणा· अतिदेशस्तूपदेशानन्तरमेव· नच पदैकदेशे दोषोपदेशो, ऽतिदेशेनैव तल्लाभे लाघवात्· नच पदैकदेश एवास्तूपदेशः, पदे त्वतिदेश इति वाच्यम् । पदैकदेशवृत्तीनामपि केषांचित् पदवृत्तित्वेन तदर्थं पदेषूपदेशस्यावश्यकत्वादिति ॥ ४९ ॥ पददोषविशेषलक्षणमाह—

दुष्टं पदं श्रुतिकटु, च्युतसंस्कृत्य, ऽप्रयुक्त, मसमर्थम् ।
निहतार्थ, मनुचितार्थं, निरर्थक, मवाचकं, त्रिधाऽश्लीलम् ॥ ५० ॥
सन्दिग्ध, मप्रतीतं, ग्राम्यं, नेयार्थ, मथ भवेत् क्लिष्टम् ।
अविमृष्टविधेयांशं, विरुद्धमतिकृत्समासगतमेव ॥ ५१ ॥

दुष्टं पदमिति प्रत्येकं सम्बध्यते· ननु श्रुतिकटुप्रभृतिशब्दानां लक्ष-

(क) विरुद्धमतिकृदादेरिति पुस्तकान्तरम् ।

(ख) अत्र खलु 'इति' शब्दस्य स्थाने एकत्र पुस्तके "अतस्तद्दोषा शब्दार्थाविव्यत्र काव्यलक्षणेपि शब्दस्य प्राङ्निर्देशाच्च· इति पाठो वर्त्तते· स तु नातिसमञ्जसः· टिप्पणी चेयं कदाचिल्लिपिकरप्रमादान् मूले प्रविष्टा स्यादिति संभावयामः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णपरत्वे विभागपरत्वाभावाल्लक्ष्यानुपस्थितौ कथं लक्षणवाक्यत्वनिर्वाह इति· उच्यते, रूढियोगाभ्यामुभयार्थोपस्थितौ लक्ष्यलक्षणयोरुभयोरपि प्रत्ययः· यथा "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्य" इती[क]न्द्रियलक्षणसूत्रे गोतमीये·[ख] अथैवं लक्षणवाक्यत्वे त्रिधा ऽश्लीलमित्यत्र त्रिधेति निरर्थकम्, तस्य विभागमात्रार्थत्वेन लक्षणे ऽनुपयोगादिति चेन्न, अश्लीलशब्दस्य व्रीडादिव्यञ्जकत्रितयसाधारणैकावयवशक्तिविरहेण नानार्थतया लक्षणत्रयार्थत्वमित्यस्य तदर्थत्वात्· तत्र श्रुतिकटुत्वं, श्रुत्युद्वेजकत्वम्· तच्च यद्यपि पुरुषभेदेना ऽनियतम्, तथापि तज्जनकतावच्छेदकरूपवत्त्वं विवक्षितम्· तच्च परुषवर्णवत्त्वं, तच्च दुर्वचत्वम्· उदाहरणम्–

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
तन्वङ्ग्या ऽऽलिङ्गितः कण्ठे[ग] कर्तार्थ्यं लभते कदा ॥

अत्र कार्तार्थ्यमितिपदं परुषवर्णप्रायम्· किं पुनरस्य दूषकताबीजम्· उद्वेजकत्वमिति चेन्न, रौद्रादावपि दोषत्वप्रसङ्गात्· माधुर्यव्यञ्जक[घ]रचनामध्यगुम्फितमेव तदुद्वेजयतीति चेत्, तत्किं तादृशत्वेन ज्ञातं तत्तथा, उत स्वरूपसदेव, नाद्यः, रसविशेषव्यञ्जकत्वाज्ञानेपि प्राथमिकतादृशपदश्रवणेनोद्वेगाभावप्रसङ्गात्· नचेष्टापत्ति,रनुभवविरोधात्· अन्त्ये तु, सत्यादयः प्रमाणं न ह्यऽविदितविशेषानपि तत्रैव तदुद्वेजयति, नान्यत्रेत्यत्र प्रमाणमस्ति· किंचैवं वैयाकरणादौ वक्तरि किञ्चिबन्धनो दोषत्वाभावः स्यात्· अत्रोच्यते–स्वायत्ते शब्दप्रयोगे कर्णापतापकशब्दप्रयोगे श्रोतुरुद्वेगो रसापकर्षायेति स एव तद्बीजम्· अत एव प्रतिकूलवर्णादस्य भेदः, तस्य कर्णापतापाऽहेतुत्वात्· अत एव चानुकरणे, वैयाकरणादौ वक्तरि

(क) एकत्र पुस्तके "भूतेभ्य इतो"तीन्द्रियेत्यादि भवति· परं, सूत्रकृद्भिस्य इतिकारो नाकरस्थः ।

(ख) देवाक्षरपुस्तकद्वये "गौतमीये" इति पाठस्यास्तित्वे ऽपि वङ्गाक्षरीपुस्तके गोतमीय इत्येव स्थाप्यते· गोतमो हि भगवान्महर्षिः शास्त्रकार इति स्थितिः· गोतमीयेत्यत्र च नामधेयत्वेन वृद्धत्वाच्छो गोनर्दीयादिवदित्याद्यन्यत्रास्माभिर्निरूपितम् ।

(ग) आलिङ्गितः स तन्वङ्गेति प्रायः प्रकाशः ।

(घ) ०व्यञ्जकवचनरचनेति क्वचित्·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रोतरि वा, रौद्रादौ रसे व्यङ्ग्ये, नीरसे च काव्ये ऽस्य दोषत्वाभावः· आद्ये तस्यैवानुकरणीयतया स्वायत्यभावात्· द्वितीये च तत्स्वभावावगमेनोद्वेगाभावात्· तृतीये च श्रोतुस्तेना ऽनुद्वेगात्· चतुर्थे तदनुगुणत्वेनोद्वेगाहेतुत्वात्· पञ्चमे मुख्यार्थहतेरभावात्· एवमर्थौचित्यप्रकरणादिवशेनाप्यनुद्वेजकतया दोषत्वाभाव उपपद्यते ॥ (१)

च्युतसंस्कृति, च्युता स्खलिता संस्कृतिः संस्करणं व्याकरणलक्षणानुगमो यत्र, यद्वाषासंस्कारकव्याकरणलक्षणविरुद्धं य,त्तत् तद्भाषायां च्युतसंस्कृतीत्यर्थः· देश्यं तु न लक्षणविरुद्धं, किन्तु तदविषयः· सञ्ज्ञाशब्दानां बहुलवचनेन संस्कृतत्वान्न तत्रातिव्याप्तिः· उदाहरणम्—

एतन्मन्दविपक्वतिन्दुकफलश्यामोदराऽऽपाण्डुर(क)-
प्रान्तं हन्तपुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते ।
तत्पल्लीपतिपुत्रि ! कुञ्जरकुलं कुम्भाऽभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्त्रावृत्तं मा कृथाः ॥

अत्र नाथत इति याचत इत्यर्थे च्युतसंस्कृति· सामान्यतस्तिङादिसूत्रेण प्राप्तस्यात्मनेपदस्य नियामकेना“शिषि नाथ” इति सूत्रेणा(ख)ऽनाशिषि तन्निषेधात्· तस्मा‘न्नाथति स्तनयुग’मिति पठनीयम्· ननु नाथत इति रूपं संस्कृतमेव, तथाचार्थविशेषे न तथेति वक्तव्यम्· एवं चार्थदोषत्वं प्राप्तमिति, मैवम्, यत्र शब्दपरिवर्त्तनेपि यो दोषो ऽनुवर्त्तते, तस्यार्थदोषत्वम्· यस्तु तथा सति निवर्त्तते, तस्य शब्ददोषत्वमिति विभागात्· अत्रार्थाऽप्रतीतिर्दूषकताबीजमिति नित्यदोषत्वम्· अनुकरणे ऽर्थपरत्वाभावाद्दोषत्वाभावः ॥ (२)

अप्रयुक्तं, तथा ऽनुशासनसिद्धमपि कविभिर्यन्न प्रयुक्तम्· यथा—

यथायं दारुणाचारः सर्वदैव विभाव्यते, ।
तथा मन्ये दैवतो ऽस्य पिशाचो राक्षसो ऽथवा ॥

(क) ०पाण्डुर० इत्येकत्रानतिशयितार्थकः· पाण्डरशब्दः पाण्डुरार्थकोऽव्युत्पन्नं प्रातिपदिकम् ।

(ख) वस्तुतस्तु वार्त्तिकमिदम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र "दैवतानि पुंसि वे"त्यनेना ऽऽम्नातोऽपि पुल्लिङ्गो दैवतशब्दः कविभिर्न क्वापि प्रयुक्तः। नन्वत्र किं दूषकताबीजम्। न तावच्छक्तिविरह,स्तत्सत्त्वात्। शक्तिस्मृतिविरह इत्यपि नास्ति, शब्दानुशासनेन तद्ग्रहे स्मृतौ प्रतिबन्धकाभावादिति चेत्, पदार्थोपस्थितिविलम्बस्तद्बीजम्। अत एव श्लेषयमकादावदोषत्व,मुद्भटालङ्कारसम्पत्त्या प्रतीत्यऽविलम्बस्य तत्रानुद्देश्यत्वात्। वस्तुतस्तु, तादृशकविसमयविलङ्घनप्रयोजनानुसन्धानव्यग्रतया मुख्यार्थविच्छित्तिर्दूषकताबीजम्। अत एवानुकरणे दोषाभावः यमकादावप्यदोषत्वम्। अन्यत्राऽप्रयुज्यमानस्यापि तदर्थं कविभिः प्रयोगस्य दर्शनेन व्यग्रताभावादिति ॥ (३)

असमर्थमित्यल्पार्थे नञ्। तेन यत्तदर्थपरिपठितमपि प्रकृतस्थले विवक्षितार्थसामर्थ्यरहितमित्यर्थः। समर्थस्यैवाऽसामर्थ्यं विरुद्धमिति चेन्न, उपसन्दानोपजीवित्वात्सामर्थ्यस्य। यथा हनधातोः पद्धतिजघनजङ्घादिषु पदादिपदोपसन्दानेन मार्गाद्यर्थोपसन्दानेन वा गतौ सामर्थ्यं, न पुनः विशिष्टस्य। यथा–

तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः(क) ।
सुरस्रोतस्विनीमेष हन्ति संप्रति सादरम् ॥

अस्यार्थानुपस्थितिर्दूषकताबीजमिति नित्यता ॥ (४)

निहतार्थम्, निहतः प्रसिद्धेनार्थेनाऽप्रसिद्धतया व्यवहितो विवक्षितोऽर्थो यस्य तत्। गूढेऽर्थे क्वचित्प्रयोगाच्चाऽप्रयुक्तसंकरः। उदाहरणम्–

यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन ।
मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा ॥

अत्र शोणितपदम्। अस्य हि रुधिरे प्रसिद्धि,रप्रसिद्धिस्तूज्ज्वलीकृतत्वरूपे विवक्षितार्थे। दूषकताबीजं प्रसिद्धस्यैव द्रागुपस्थित्या विवक्षितस्य विलम्बोपस्थितिः(ख) अतो यमकादावदोषत्वम्, तत्रोपस्थितिविलम्बस्यापि सहृदयसम्मतत्वेनाऽविलम्बस्यानुद्देश्यत्वात् ॥ (५)

(क) ०सत्क्रिय इत्येकत्रानतिशायि ।
(ख) विलम्बोपस्थितिरित्येकत्र, नार्थं विशेषकम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुचितार्थम्, अनुचितो विवक्षितार्थतिरस्कारको ऽर्थो यस्य तत्. यथा—

तपस्विभिर्या सुचिरेण मृग्यते प्रयत्नतः सत्रिभिरिष्यते च या, ।
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥

अत्र शौर्य्यं प्रतिपाद्ये पदान्तरानपेक्षमेव पशुपदं कातरतामभिव्यनक्ति,तदर्थे तस्या ऽदर्शनात्. विरुद्धमतिकृत् पदान्तरसापेक्षं तथेति तस्माद्भेदः. दूषकताबीजं च विवक्षिततिरस्कारकार्थोपस्थितिः. अतो ऽस्य नित्यदोषत्वम् ॥ (६)

निरर्थकम्, अविवक्षितार्थकम्. वृत्तनिर्वाहमात्रप्रयोजनकमिति यावत्. अत एव वाक्यालङ्कारभूतं यमकादिनिर्वाहकं च खल्वादिपदमदुष्टम् .तच्च निपातरूपं चादिपदं, बहुवचनादि वा. उदाहरणम्—

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥

अत्र 'हि'पदम्, अर्थस्याऽविवक्षणात्. दूषकताबीजं त्वस्य चिन्त्यताम्. तद्धि न तावदर्थानुपस्थितिः, पदान्तरैरेव यावदभिधेयोपस्थापनात्. न चैवमवाचकादौ, तत्र तदभिधेयस्य वाक्यर्थघटकस्य पदान्तरैरनुपस्थापनात्. नापि प्रतिकूलवर्णवद्रसविरोधिता, चादीनां सार्थकत्वस्थलेपि रसविरोधित्वप्रसङ्गात्, स्वरूपस्य ताद्रूप्यादिति. उच्यते—निरर्थकं प्रयुञ्जानस्य वचसि सहृदयानां वैमुख्यं दूषकताबीजम्, प्रयोजनानुसंधानव्यग्रता वा ॥ (७)

अवाचकं, विवक्षितधर्मविशिष्टस्य विवक्षितधर्म्मिणि क्वापि न वाचकं यत्, तदित्यर्थः. अत एवा ऽसमर्थाद्भेदः. तस्य क्वचिच्छक्तिस्वीकारात्. एतादृशविशिष्टविरहश्च क्वचिद्धर्म्मिणि शक्तावपि विवक्षिते प्रकारे शक्तिविरहात्, क्वचित्प्रकारे शक्तावपि धर्म्मिणि शक्तिविरहात्, क्वचित्प्रकारधर्म्मिणोरुभयोरपि शक्त्यभावात्. तत्राद्यं द्विधा,अपेक्षितयोगमनपेक्षितयोगं च. तयोराद्यं यथा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन च(क) विद्विषादरः ॥

अत्र पूर्वार्द्धे दारिद्र्यरूपापद्विघातकतया दातृत्वं विवक्षितमिति, द्वितीयार्द्धे तद्वैपरीत्यप्रदर्शकं जन्तुपदमदातरि प्रयुक्तं· तत्र च जायत इति योगमपेक्ष्य तस्य शक्तिसत्त्वेपि न विवक्षितया दातृतया प्रकारेण से-त्यऽवाचकम् । अनपेक्षितयोगं यथा—

हा धिक् सा किल तामसी शशिमुखी दृष्टा मया यत्र सा,
तद्विश्लेषरुजान्धकारितमिदं दग्धं दिनं कल्पितम्, ।
किं कर्म्मः कुशले सदैव विधुरो धाता, न चेत्तत्कथं
तादृग्यामवतीमयो भवति मे नो जीवलोको ऽधुना ॥

अत्र दिनपदं प्रकाशमयमित्यर्थे विवक्षितम्, तामसीत्यनेन ल-ब्धस्य तमोमयत्वस्य वैपरीत्याभिधानायोपादानात्· तत्र धर्म्मिणि योग-मनपेक्ष्यैव रूढ्या दिने दिनत्वेन शक्तं, न पुनः प्रकाशमयत्वेनेत्यवाचकम् । द्वितीयं यथा—

जलं जलधरे क्षारमयं वर्षति वारिधिः,(ख) ।
इदं बृंहितमश्वानां, ककुद्मानेष हेषते ॥

अत्र जलधरशब्दस्य जलधारकत्वे प्रकारे सामर्थ्येऽपि न समुद्रे धर्म्मिणि सामर्थ्यम्· यद्यपि योगशक्तिस्तत्राप्यस्त्येव, तथापि रूढ्या प्रतिबन्धादन-स्तिकल्पैव । तृतीयं तूपसर्गसंसर्गादर्थान्तरगतमन्यथा च· तयोराद्यं यथा—

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्राऽलक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्तुर्नृत्यानुकारे जयति निजतनुस्वच्छलावण्यवापी-
संभूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥

अत्र विदधातिर्धारणे प्रयुक्तः, नच धारणे धारणत्वे वा समर्थः

(क) न जातहार्देन न विद्विषेत्यन्यत्र ।

(ख) "वारिदः"—इति सर्वत्रैव जायत्यपि इतरचरणत्रयवदत्रापि न्यायतील्यार्थान्तररूढिदुष्टस्यैव प्रयोक्तुमुचितत्वाद्वारिदस्थाने वारिधिं निदध्मो ऽनुसंदधमश्चेत्यमेधेयवशिक्षाम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपसर्गसंसर्गेण[क] करणे नियतशक्तिकत्वात्[ख]। अन्त्यस्तु वाक्यनिष्ठाऽवाचकतायां "प्राब्भ्रभ्राडि"त्यादावुदाहरिष्यते· तदेवं "निर्दूषणे प्रकाशे यदसमर्थे धर्म्मधर्म्मिणोर्द्वयोरपि शक्तिविरहः· अवाचके तु धर्म्ममात्रे सः· विदधदित्युदाहरणं त्ववाचकप्रकरणमध्ये ऽसमर्थस्यैवे"ति प्रलपितं, तद्वाक्याऽवाचकत्वोदाहरणानवलोकननिबन्धनं सन्दर्भविरुद्धं चेत्यनादेयम्· दूषकताबीजं तु विवक्षितार्थानुपस्थितिरिति नित्य एवायम् ॥ (८)

त्रिधा ऽश्लीलमिति· अश्रीरस्यास्तीत्यर्थे सिध्मादित्वाल्लप्रत्ययः, कपिलकादित्वाद्रेफस्य लत्वम्· तथाच कान्त्यभाववदिति पर्य्यवसन्नम्· कान्त्यभावश्चातिप्रसक्त इति व्रीडाजुगुप्साऽमङ्गलव्यक्तिहेतुकस्तद्विशेषो वक्तव्यः· नचैतत्त्रये ऽनतिप्रसक्तमनुगतं रूपमस्तीति व्रीडादिहेतुकाऽकान्तिमत्सु नानार्थोऽयमश्लीलशब्द इत्यर्थः· तच्च प्रत्येकं त्रिविधम्, क्वचिद्विवक्षितस्यैवार्थस्य व्रीडाद्यालम्बनत्वात्, क्वचिदविवक्षितार्थस्य निर्वाहिणस्तथात्वात्, क्वचिदविवक्षितस्यानिर्वाहिणोपि स्मृतिमात्रहेतुत्वात्· एषु त्रिषु क्वचित्किञ्चिदुदाह्रियते· तत्र व्रीडाव्यक्तावर्थान्तरस्य तथाभावो यथा–

साधनं सुमहद्यस्य, यन्नान्यस्य विलोक्यते, ।
तस्य धीशालिनः कोऽन्यः सहेताऽरालितां भ्रुवम् ॥

अत्र सैन्यार्थकस्य साधनशब्दस्य पुंव्यञ्जनमर्थान्तरम् । जुगुप्साव्यक्तौ तथाभूतार्थस्मृतिमात्रहेतुत्वं यथा–

लीलातामरसाहतो ऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः, ।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्त्ततयाऽथवा नतिमृते तेनानिशं चुम्बिता ॥

अत्र वायुशब्दो ऽपानवायुं स्मारयति, नतु तदर्थतया वाक्यमुपपद्यते । अमङ्गलव्यक्तौ विवक्षितस्यैवार्थस्य तथात्वं यथा–

(क) 'वि' संसर्गेणेत्येकत्र· नार्थे विशेषः ।
(ख) नियमितशक्तित्वादित्यपरत्र· तुल्यार्थम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृदुपवनविभिन्नो मत्प्रियाया विनाशा-
द्घनरुचिरकलापो निःसपत्नो ऽद्य जातः, ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्ही[क] ॥

अत्र विनाशशब्दस्य विवक्षित एवार्थो ऽमङ्गल्यः । एवं त्रिषु भि-न्नभिन्नप्रकारोदाहरणेन प्रत्येकं त्रिप्रकारत्वमूहनीयं, न्यायसाम्यात्· दूष-कताबीजं त्वनुभवसिद्धरसापकर्षकतादृशार्थोपस्थितिः· नीरसे तु चम-त्कारापकर्षकत्वं तस्याः· अथ वा तादृशार्थोपस्थित्या श्रोतुर्वैमुख्यं तद्बीजम्· अतः शमकथायां दोषत्वाभाव,स्तादृशोपस्थितेः शमपोषकत्वात्· भाव्य-ऽमङ्गलादिसूचने कामशास्त्रस्थितौ च न दोषत्वम्, वैमुख्याभावात्, शिव-लिङ्गभगिनीब्रह्माण्डादिशब्देषु च समुवीतगुप्तलक्षितेष्व,ऽसभ्यार्थानुप-स्थितेः ॥ (९)

संदिग्धं विवक्षिताविवक्षितोभयार्थोपस्थापनानुकूलस्वरूपद्वयसंदे-हविषयः यथा—

आलिङ्गितस्तत्र भवान् संपराये जयश्रिया ।
आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥

अत्र वन्द्यामितिपदं वन्दीशब्दे सप्तम्यन्तं, वन्द्याशब्दे द्वितीयान्तं वेति संदेहः· प्रथमे हठगृहीतमहिलायां कृपां कुर्वेति, द्वितीये नमस्या-माशीःपरम्परामित्यर्थोपपत्तौ साधकबाधकप्रमाणाभावात्संशयः· दूषकता-बीजमुद्देश्यनिश्चयाभावः· अतो यत्र संदेह एवोद्देश्यस्तत्र, यत्र वाच्यादि-महिम्ना प्रकरणादिवशेन वा निश्चयस्तत्र चा ऽदोषत्वम् ॥ (११)

अप्रतीतमिति नञो ऽल्पार्थतया शब्दानुशासनातिरिक्तशास्त्रमात्र-सिद्धमित्यर्थः· अत एवाऽप्रयुक्ताद्भेद,स्तस्यान्यत्रापि प्रसिद्धेः· उदाहरणं-

सम्यग्ज्ञानमहाज्योतिर्गलिता[ख] शयताजुषः ।
विधीयमानमप्येतच्च भवेत्कर्म्म बन्धनम् ॥

(क) बर्हं इति पाठान्तरम् ।
(ख) दलितेत्यन्यत्र ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्राशयशब्दो मिथ्याज्ञानजन्यवासनार्थः· स चैवंभूतो योगशास्त्र एव प्रसिद्धः· एवं शास्त्रान्तरप्रसिद्धमप्यूह्यम्· दूषकताबीजं तच्छास्त्रानभिज्ञस्यार्थानुपस्थितिः· अत एव यत्र तच्छास्त्राभिज्ञ एव प्रतिपाद्यः, स्वयमेव वा परामर्शः,स्तत्र न दोषत्वं, प्रत्युत व्युत्पत्तिसूचकतया गुणत्वम् (१२)

"ग्राम्यं ग्रामे केवले लोके प्रसिद्धं, नतु शास्त्रेपि· अत एवाप्रयुक्ताद्भेद"इत्येके· अपरे "तद्देश्यमनेन संगृह्यते· कटिशब्दादयस्तु नोदाहर्तव्याः,किंतु गल्लभल्लादय" इत्याहुः· तदुभयमप्यसत्, कटिशब्दस्य शास्त्रेपि प्रसिद्धस्य व्युत्पन्नस्य वोदाहरणत्वेन दर्शितत्वात्· तस्मात्समस्तलोकप्रसिद्धं तस्मिन् देशे सर्वैर्लोकैर्य्यदाख्यया यद्वस्तु व्यवह्रियते, तदित्यर्थः· एतेन देश्यमपि संगृहीतम्· अत एवात्र खादनपानगल्लादय उदाहरणीयाः· कलममहिषीदध्यादयश्च प्रत्युदाहर्त्तव्याः· उदा०—

राकाविभावरीकान्तसंक्रान्तद्युति ते मुखम् ।
तपनीयशिलाशोभा कटिश्च हरते मनः ॥

अत्र कटिशब्दः· लोकानभिज्ञं प्रति तदर्थानुपस्थितिर्दूषकताबीजमिति च्छजवः· वस्तुतस्तु, नागरोपनागरौ विहाय ग्राम्यशब्दप्रयोगाद्वक्तुरवैदग्ध्योन्नयनेन श्रोतुर्वैमुख्यं तदित्यालोच्यते· अत एव विदूषकादावधमे वक्तरि न दोषत्वं, तस्य तथैवौचित्येन वैरस्याभावात्· कटिशब्दे च ग्राम्यताप्रयोजकं नाश्लीलत्वमिति न तत्सङ्करः ॥ (१२)

नेयार्थं, नेयो ऽर्थो यस्य तत्· नेयत्वं च

निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानत् ।
क्रियन्ते चाधुना(क)काश्चित्काश्चिन्नैव त्वऽशक्तितः ॥

इत्यनेन रूढिप्रयोजनाभ्यां विना या लक्षणा निषिद्धा, तद्विषयत्वम्· यथा—

शरत्कालमुल्लासिपूर्णिमाशर्वरीप्रियम् ।
करोति ते मुखं तन्वि! चपेटापातनातिथिम् ॥

अत्र चपेटादिपदं निर्जितत्वे लक्षणया प्रयुक्तम्· नच तत्रास्य

(क) साम्प्रतमिति क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूढिर्वा प्रयोजनं, मुख्यशब्दार्थातिरेकिणोऽर्थस्याऽप्रतीतेः दूषकताबीजं च वृत्त्यभावनार्थानुपस्थितिरिति नित्योऽयं दोषः ॥ (१३)

अथ भवेत्क्लिष्टमित्यादि· क्लिष्टादिकं दुष्टं पदं समासगतमेवेत्य-भिसम्बन्धः· तदयमर्थः—क्लिष्टत्वादिदोषत्रयं पदान्तरसाहित्येनैव सम्भवति· तथाच यदि तयोः पदयोः समासस्तदैव समासेनैकपद्यात्पददोषता· असमासे तु वाक्यदोषत्वमेव· इतरेषां तु समासेऽसमासे च पददोषत्वं, द्वितीयपदनैरपेक्ष्येणैव दुष्टत्वादिति· तत्र क्लिष्टमर्थप्रतीतौ क्लेशवत्· यतो विवक्षितस्यान्वितविशेषस्य प्रतिपत्तिर्विलम्बिता, तदित्यर्थः· निहतार्थादौ तु पदर्थोपस्थितिरेव विलम्बितेति ततो भेदः· विलम्बश्चा-प्रत्यासत्त्या सामान्यशक्तात् प्रकरणाद्यभावे विवक्षितविशेषस्य द्रागनुप-स्थितेर्वा· आद्ये वाक्यमात्रदोषत्वं "धम्मिल्लस्ये"त्यादौ· अन्त्ये तु पद-दोषत्वमपि· तद्यथा—

अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः ।
सदृशं शोभतेऽत्यर्थं भूपाल! तव चेष्टितम् ॥

अत्रात्रिलोचनसम्भूतेत्यादौ सामान्यतोऽन्वयबोधाविलम्बेपि अत्रि-लोचनसंभूतेत्यादिना चन्द्रादेर्न द्रागुपस्थितिः· अन्यस्यापि तथाभावात् नियामकस्याभावाच्च· अतः कुमुदैरित्यस्य व्यवधानेनोपस्थितिः· इदमेव च 'अत्रिदृष्टेः समुद्भूतस्य द्योतेनावभासिभि'रिति पाठे द्वितीयप्रभेदवाक्यदो-षोदाहरणं द्रष्टव्यम्· दूषकताबीजं प्रतीतिविलम्बः· प्रहेलिकादौ तु तत्सं-ष्टत्वाददोषत्वम्· मत्तोक्तादौ तु गुणत्वमपि, तदौचित्यात् ॥ (१४)

अविमृष्टविधेयांशम्, अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो, यत्र तत्· प्राधान्यं च विधिप्रतीतियोग्यता· साचानुपसर्जनीभूतत्वे सत्युद्देश्या-नन्तर्यम्· अतो "न्यक्कारो ह्ययमेवमे"त्यादौ "चरणमप्यमुक्त"त्यादौ वा नाऽव्याप्तिः· प्रथमे उक्तरूपप्राधान्याभावेन, द्वितीये विधेयस्य प्रसज्यप्रति-षेधस्याऽनिर्देशेन विशिष्टविरहसत्वात्· उदा०—

मूर्द्ध्नामुद्वृत्तकृत्ताऽविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोर्ष्णामेषां किमेतत्फलमिह, नगरीरक्षणे यत्प्रयासः॥

अत्र नगरीरक्षणे यत्प्रयास,स्तन्मूर्धां महिमा मिथ्येति मिथ्यात्वं विधेय,मप्राप्तत्वात्· अत एव च नानुवाद्यम्· प्राप्तत्वे तु मिथ्यामहिम्नामफलत्वमेवोचित,मतः किमेतत्फलमित्यादिना ऽनभिसम्बन्धः स्यात्· तच्च बहुव्रीहावन्यपदार्थे गुणीभूतं, विशेषणप्राधान्ये समासाननुशासनात्· किञ्च, उद्देश्यं विधेयं च यदि पृथक्पदाभ्यामुपतिष्ठेत, तदा प्राप्तमुद्दिश्या ऽप्राप्तं विधीयेत· नच समासे पृथक्पदादुपस्थितिः· अपृथगुपस्थितौ च न तथा व्युत्पत्तिरिति· एवं समासान्तरेष्वविमृष्टत्वं द्रष्टव्यम्· तत्र कर्मधारये यथा—

स्रस्तां नितम्बादवरोपयन्तीं पुनः पुनः केसरदामकाञ्चीम्।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य॥

अत्र द्वितीयत्वं मौर्व्यामुत्प्रेक्ष्य विधेयम्· तच्च समासे गुणीभूतम्· 'मौर्वीं द्वितीया'मिति पाठे तु निराबाधा प्रतीतिः· नन्वत्र काञ्च्यां द्वितीयमौर्वीत्वं विशिष्टमेवोत्प्रेक्ष्य,मतो नोक्तदोषावकाश इति चेत,तथापि हि विशेषणांशस्य द्वितीयत्वस्य प्राधान्यं, द्वितीयसद्भाव एकस्य न्यासीकरणौचित्यात्· मौर्वीत्वं तु तत्राप्रयोजकम्,अन्यस्यापि सद्वितीयस्य तदौचित्यादिति वस्तुविशेषपरिचायकतामात्रम्· तस्माद्विशिष्टविधावपि विशेषणमत्र प्राधान्येन वक्तव्यम्· अत एवा "ऽऽकडारादेका संज्ञे"त्यत्रैकत्वस्य प्राधान्यभङ्गभयेन समासो नाकारीति व्याख्यातारः· अन्यथा तत्राप्येकत्र संज्ञिन्युद्देश्ये एकत्वविशिष्टसंज्ञाविधाने दोषो न स्यात्। बहुव्रीहावपि तद्धितार्थगुणीभूते ऽन्यपदार्थे गुणीभावो यथा—

वपुर्विरूपाक्ष,मलक्ष्यजन्मता, दिगम्बरत्वेन निवेदितं वसु,।
वरेषु यद्बालमृगाक्षि! मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥

अत्र वरेषु मार्गणीयानां सुन्दरत्वमहाकुलीनत्वादीनां धर्माणां वैकल्यदर्शनप्रस्तावाज्जन्मन्य ऽलक्ष्यत्वं विधित्सितम्· तच्च समासे न्यग्भू-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तम्· "अलक्षिता जनि"रितिपाठे तत्पौर्व्वापर्य्यविपर्य्ययनिबन्धनाप्राधान्येपि समासनिबन्धनं तदप्राधान्यं निवर्त्तते । नञ्समासे यथा–

आनन्दसिन्धुरतिचापलशालिचित्त-
संदाननैकसदनं क्षणमप्यमुक्ता ।
या सर्वदैव भवता, तदुदन्तचिन्ता
तान्तिं तनोति तव संप्रति, धिग्धिगस्मान् ॥

अत्रावान्तरवाक्ये ऽमुक्तेत्यनेन

नवजलधरः सन्नद्धोयं, न दृप्तनिशाचरः,
सुरधनुरिदं दूराकृष्टं, न नाम (क) शरासनम्, ।
अयमपि पटुर्धारासारो, न बाणपरम्परा,
कनकनिकषस्निग्धा विद्युत्,प्रिया न ममोर्व्वशी ॥

इत्यत्रेव प्रसज्यप्रतिषेध एव विधित्सितः· नतु

जुगोपात्मानमत्रस्तो, भेजे धर्म्ममनातुरः, ।
अगृध्नुरादद्दे सोर्थो,न ऽसक्तः सुखमन्वभूत् ॥

इत्यत्रेवात्रस्तत्वाद्यनुवादेनात्मगोपनादिवदमुक्ततानुवादेनान्यत् किञ्चिद्विधेयमस्ति· नच समासे नञः प्रसज्यप्रतिषेधो ऽर्थः,किन्तु पर्युदास एव· यदुक्तं–

विधेयैत्र प्रधानत्वं, प्रतिषेधे ऽप्रधानता, ।
पर्युदासः स विज्ञेयो, यत्रोत्तरपदे न नञ् ॥

इति· कथं तर्हि, 'अश्राद्धभोजी'त्यादौ प्रसज्यप्रतिषेधलाभः, पर्युदासेनाक्षेपात्· ननु पर्य्युदासार्थे ऽमुक्तत्वमेव विधीयताम्, फलाऽविशेषादिति चेद्,भवेदप्येवं, यदि तथा सति क्षणमपीत्यनेन सम्बन्धः स्यात् स हि मुक्तत्वेन प्रतियोगिनैव विवक्षितो, नच पर्युदासे तथा सम्भवः· नन्वेवमपि नाविमृष्टविधेयांशता विधेयानुपस्थितेः, किंतु धारयो विदधदितिवदवाचकत्वमेव स्यात्· समासे ऽर्थान्तरनिरूढत्वादिति चेत्, प्राधान्येनानिर्द्देशस्य तथाप्यवृत्तेः· अत एव "प्राधान्येनानिर्दिष्टो विधेयांशो

(क) न तस्येति क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्रे"त्याह वृत्तिकृत्,नत्वप्राधान्येन निर्दिष्ट इति· तर्हि विदधदित्यस्याप्यत्रैवान्तर्भाव इति चेन्न, तदर्थस्यानिर्दिष्टत्वेप्यविधेयत्वात्· अमुक्तेत्यस्याऽविमृष्टविधेयांशस्याऽवाचकप्रवेश इति चेद्, उभयोरसङ्कीर्णस्थलसम्भवे क्वचित्सङ्करेप्यदोषात्· दूषकताबीजं त्वविवक्षितार्थोऽप्रत्ययः· तस्मान्नित्यदोषोऽयम् ॥ (१५)

विरुद्धमतिकृत्, पदान्तरसन्निधानेन प्रकृतप्रतीतिन्यक्कारकप्रतीतिजनकम्· तच्चेदमनेकधा प्रवर्त्तते, क्वचित्समासान्तरविग्रहेण यथा—

सुधाकरकराकारविशारदविचेष्टितः ।
अकार्य्यमित्रमेकोऽसौ, तस्य किं वर्णयामहे ॥

अत्र कार्य्यमन्तरेण मित्रमिति विवक्षितम्, अकार्य्ये मित्रमिति तु प्रतीयते । क्वचिन्नामपदयोः समासे विरुद्धार्थनिरूढपदघटनया यथा—

चिरकालपरिप्राप्तलोचनानन्ददायिनः ।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥

अत्र कण्ठग्रहार्थितया विवक्षितो गलग्रहशब्दो रोगविशेषे निरूढः । क्वचिद्विवक्षितविशेषपरत्वे पदवैयर्थ्यप्रसङ्गेनाविवक्षितविशेषपरत्वग्रहात्· यथा—

न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मनो
ऽनेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः, ।
तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः
स्कन्दः, स्कन्द इव प्रियोऽहमथवा शिष्यः कथं विस्मृतः ॥

अत्र भवस्य पत्नीत्यर्थे भवानीति सिद्धम्· तथाच भवपत्नीपतौ प्रतीयमाने भवातिरिक्त एव द्राक् प्रतीयते· न हि भव एवाभिधेये भवपत्नीपतिरिति प्रयोगो योग्यः सचेतसाम्· क्वचित्समासैक्येपि समस्यमानपदयोर्व्यर्थतया· यथा—

गौरपि यद्वाहनतां प्राप्तवतः सोपि गिरिसुतासिंहः ।
सविधे निरहङ्कारः, पायाद्वः सोऽम्बिकारमणः ॥

अत्राम्बिकारमणपदयोर्गौरीप्रीतिकरत्वजन्मातृस्वामित्वमप्यर्थः·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दूषकताबीजं विवक्षितार्थतिरस्कारकार्थोपस्थितिः· अतो यत्र विरुद्धोऽर्थो विवक्षित एव तत्राऽदोषत्वम् ॥ (१६)

क्लिष्टादिदोषविशेषेषु समासगतत्वनियमाभिधानाच्छ्रुतिकटुप्रभृतिष्वनियमोऽभ्यनुज्ञातः· तत्राऽसमासगतमुदाहृतमेव· समासगतं श्रुतिकटु यथा–

सा दूरे च सुधा सान्द्रतरङ्गितविलोचना, ।
बर्हिनिर्ह्रादनार्होऽयं कालश्च समुपागतः ।

समासादेकपद्यम्· एवं च्युतसंस्कृत्यादयो द्रष्टव्याः ॥ ५१ ॥

उक्तान् पददोषान् पदैकदेशे वाक्ये चातिदिशति–

अपास्य च्युतसंस्कारमसमर्थं निरर्थकम् ।
वाक्येऽपि दोषाः सन्त्येते, पदस्यांशेऽपि केचन ॥ ५२ ॥

च्युतसंस्कारेत्यादिर्भावप्रधानो निर्देशः· एते इति श्रुतिकट्वादिपदप्रवृत्तिनिमित्तभूताः श्रुतिकटुत्वादय इत्यर्थः· अत्र यत्र पदान्तरसाहित्येन पदानां दुष्टत्वं, स वाक्यदोषः· नचाऽसाध्वसमर्थनिरर्थकानां दुष्टत्वे पदान्तरसाहित्यापेक्षेति तन्निरतयापासनमिति संप्रदायः· तदसत्, "सोध्यैष्टे"त्यादौ श्रुतिकटोर्दुष्टत्वे पदान्तरसाहित्यस्यानपेक्षणीयतया तदुदाहरणविरोधात्· नच तत्रापि तथैवेति वाच्यम्, परुषवर्णारब्धत्वस्य स्वत एव सत्त्वात्· तथात्वेपि वा 'स पातु वो दुश्च्यवन' इत्याद्यप्रयुक्तोदाहरणाव्याप्तिः· नहि तत्रापि दुष्टत्वे पदान्तरपेक्षेति वक्तुमपि शक्यते· किञ्चाऽवाचकमसमर्थसमानशीलं किमिति नापास्तमिति सर्वव्याख्यानेषु विनिगमकं वक्तव्यमिति· अत्रोच्यते[क]–विवक्षितधर्म्मिप्रत्यायक[ख]शब्दवृत्तित्वे सति नानापदवृत्तित्वमेवात्र वाक्यवृत्तित्वमभिप्रेतम्, "न्यक्कारोह्यय"मित्यत्रापि नाऽव्याप्तिः, उद्देश्यविधेयाभिधायकयोर्द्वयोरपि दुष्टत्वात्· अत एवाऽविमृष्टविधेयांशमित्यत्रांशपदोपादानम्· "योसौ सुभगतवागत" इत्युदाहरणे प्रकाशेपि स्फुटमेतत्· एवं च युक्तं च्युतसंस्कृत्यादि

(क) अत्र ब्रूमः–इति पु· ।
(ख) ज्ञापकेति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दमनम्. नचाऽसमर्थसहोदरस्याऽवाचकस्यापि व्युदासो युक्तः, तेनापि केनचिद्विवक्षितधर्मिज्ञापनात्. यथोदाहृतेन 'जन्तु'पदेन. व्युदस्तेषु पुनर्न कोऽपि प्रभेदो विवक्षितधर्मिप्रतिपादक इति । तत्र श्रुतिकटु वाक्यगतं यथा—

सो ऽध्यैष्ट वेदांस्त्रिदशानयष्ट, पितॄनतार्प्सीत्[क] समममंस्त बन्धून्, ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ, समूलघातं न्यवधीदरींश्च ॥ (१)

व्यक्तम् । अप्रयुक्तं यथा—

स रातु[ख] वो दुश्च्यवनो भावुकानां परम्पराम्, ।
अनेडमूकताद्यैस्तु[ग] द्यतु दोषैरसम्मतान् ॥

अत्र दुश्च्यवनशब्द इन्द्रे, अनेडमूकशब्दश्च एडमूके ऽप्रयुक्तः ॥ (२)

निहतार्थं यथा—

सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः[घ] ।
अब्जरुचिभास्वरस्ते[ङ] भातितरामवनिप ! श्लोकः ॥

अत्र सायकशब्दः खड्गे, मकरध्वजशब्दः समुद्रे, क्षमाशब्दो भूमौ, अब्जशब्दश्चन्द्रे, श्लोकशब्दो यशसि चाप्रयुक्तः. नचैषामेतेषु प्रसिद्धिभूयस्त्वम्, अतः प्रसिद्धेः शरमदनक्षान्तिपयोजपद्येरर्थैर्निहतार्थः ॥ (३)

अनुचितार्थं यथा—

कुविन्दस्त्वं[च] तावत्पटयसि गुणग्राममभितो,
यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो !, ।
शरज्ज्योत्स्नाक्रान्तस्फुटविकटसर्वाङ्गसुभगा
तथापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह ॥

अत्र 'कुविन्द' इति तन्तुवायं, 'पटयसी'ति पटं करोषीति, 'गुणे'तितन्तुं, 'नग्ने'ति वस्त्रहीनं, 'यश' इत्यकारप्रश्लेषादयशः, विगताच्छाद-

(क) पितॄनपारीत्—इति पा० ।
(ख) स पातु—इति सर्वत्रसत्त्वे ऽपि मलत्वतयो दोषानुगुणतया च "स रातु"—इति प्रकाशस्यमेवात्र स्थाप्यते ।
(ग) द्यौश्चेति पा० ।
(घ) "सायकसाहायबाहो ! मकरध्वजनियमितक्षमाधिपते !" इत्येवमामन्त्रणपाठः प्रायः प्राकाशे उपलभ्यते ।
(ङ) भास्वरस्ते इति क्वचित् ।
(च) कुविन्द ! त्वमिति पाठस्तु "कुविन्द इतो"ति प्रदीपानभिमतः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नमित्यवसनमित्यर्थानु(क)पश्लोक्यमानापकर्षद्योतकतयाऽनुचितान्प्रकाशयन्ति ॥ (४)

अवाचकं यथा—

प्राभ्रभ्राड्विष्णुधामाप्यविषमाश्वः करोत्ययम् ।
निद्रां सहस्रपर्णानां पलायनपरायणाम् ॥

अभ्रे भ्राजत इत्यभ्रभ्राड् जलदः, प्रगतो ऽभ्रभ्राड् यत्र तद्विष्णुधामेत्यस्य विशेषणम्। अत्र 'प्राभ्रभ्रा'ड़िति प्रकृष्टजलदे, 'विष्णुधामे'ति विष्णुपदे, 'विषमाश्व' इति सप्ताश्वे 'निद्रे'ति संकोचे 'सहस्रपर्णा'ति सहस्रदले प्रकृष्टजलदत्वादिना प्रकारेण ऽवाचकानि, कानिचिच्चात्र धर्मिविशक्तान्येवेति यथोक्तवाक्यदोषत्वम् ॥ (५)

अश्लीलेषु व्रीड़ादायि यथा—

भूपतेरुपसर्पन्ती कम्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधे ॥

अत्रो'पसर्पन्ती'ति सुरतारम्भं, 'प्रहरणे'ति ताड़नविशेषं, 'मोहन'मिति निधुवनं चार्थान्तरं प्रतिपादयद्व्रीड़ादायि । जुगुप्सादायि यथा—

तेऽन्यैर्वान्तं समश्नन्ति, परोत्सर्गं च भुञ्जते, ।
इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्त्तनम् ॥

अत्र 'वान्तो,त्सर्ग'शब्दौ छर्दितपुरीषार्थतया, 'प्रवर्त्तन'मिति छत्यर्थकं पुरीषत्यागार्थान्तरतया (ख) जुगुप्सां प्रयच्छन्ति । अमङ्गलं यथा—

पितृवसतिमहं व्रजामि तां, सहपरिवारगणेन यत्र मे ।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम् ॥

अत्र पितृगृहं, पावनो वंश इति च विवक्षिते पितृवसतिपावकान्वयशब्दौ श्मशानवह्निसम्बन्धरूपमङ्गलार्थान्तरौ ॥ (६)

सन्दिग्धं यथा—

सुरालयोल्लासपरः प्राप्तपर्य्याप्तकम्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम्(ग) ॥

(क) विगताच्छादनमित्यर्थानित्येकपुस्तकस्थपाठस्तु न खलु युक्तः ।
(ख) प्रवर्त्तनमिति पुरीषार्थान्तरतयेति प्रदीपोद्योतसंमतः पाठः ।
(ग) विलोक्यते इति क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र सुरालयेति देवगृहमदिरामन्दिरयोः, प्राप्तमर्य्याप्तकम्पन इति प्राप्तसैन्यत्वप्राप्तकम्पत्वयोरुपस्थापकम्. एवमग्रेपि ॥ (७)

अप्रतीतं यथा—

तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः सफलितः सखे । [क] ॥

अधिमात्रो दृढज्ञानवानुपायो यमादिर्य्यस्य,तीव्रः परमः संवेगो वैराग्यं यस्य,तत्तायुक्तस्य. दृढभूमिर्दृढसंस्कारः. मदूपायो मध्योपायो ऽधिमात्रोपायश्चेति त्रिविधा अपि योगिनः प्रत्येकं मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्चेति त्रिविधाः. अत्राधिमात्रादयः शब्दा योगशास्त्रमात्रप्रसिद्धाः ॥(८)

ग्राम्यं यथा—

ताम्बूलभृतगल्लोयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव तु [ख] यथा तथा ॥

अत्र गल्लभल्लमानुषखादनपानशब्दा ग्राम्याः ॥ (९)

नेयार्थं यथा—

वस्त्रवैदूर्य्य[ग]चरणैः क्षतसत्त्वरजःपरः ।
निष्कम्पा रचिता, नेत्रयुद्धं वेदय सांप्रतम् ॥

अत्र वस्त्रवैदूर्य्यशब्देनाम्बरमणेर्विवक्षितत्वाद्वस्त्रशब्देन गगनं विवक्षितम्. नचास्य तत्र शक्तिरिति वाचकत्वलक्षणेन शक्यसम्बन्धेनाम्बरपदं लक्षयति. तस्माच्च गगनप्रतीतिः. यद्वा,स्ववाचकवाच्यत्वलक्षणशक्यसम्बन्धेन गगनमेव लक्षयतीति लक्षितलक्षणा, लक्षणा वेति वस्तुगतिः. एवं वैदूर्य्येत्यस्य मणौ, चरणेत्यस्य पादे, सत्त्वरजःपरेत्यस्य तमसि, निष्कम्पेत्यस्या ऽचलायां भूमौ, युद्धमित्यस्य द्वन्द्वे, वेदयेत्यस्य बोधने लक्षणैव । नच तद्बीजं रूढिः प्रयोजनं वेति नेयार्थत्वम् ॥ (१०)

क्लिष्टं यथा—

(क) प्रभो—इति क्वचित् ।
(ख) सर्वदेवेति पा० ।
(ग) वैडूर्य्येत्येवं मूर्द्धन्यमध्यपाठस्तु केषां चिद् "विदूराज्ज्य" इति सूत्रस्थभाष्याज्ञानमूलकः सर्वथा हेय एव ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥

अत्र कुरङ्गशावाक्ष्या धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धे प्रतीतिव्यवधानम् ॥ (११)

अविमृष्टविधेयांशं यथा–

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसभटान्, (क)जीवत्यहो रावणः, ।
धिग्धिक् शक्रजितं, (ख)प्रबोधितवता किं कुम्भकर्णेन वा,
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥

अत्र प्राप्तमरिसत्त्व'मय'मित्यनूद्या ऽप्राप्तं न्यक्कारवत्त्वं विधीयते· अतो 'ऽयमेव न्यक्कार' इति वाच्यम्· "अनुवाद्यमनुक्त्वैव नाभिधेयमुदीरये"दिति वृद्धवचनात्· अन्यथा तु वैपरीत्येन विलम्बेन वा तथाभावः प्रतीयेत· 'अयं न्यक्कार' इत्युभयोः पदयोर्दुष्टत्वाद्वाक्यदोषत्वम्· अत एव समासगतमेव दुष्टं पदमित्युक्तम्· अपि च, अत्र 'वृथोच्छूनै'रित्यसङ्गतम्, उच्छूनत्वमात्रस्यैवानुवादौचित्यात्, नतु वृथात्वविशेषितस्य, 'किमेभि'रित्यनेन वृथात्वस्यैव विधेयत्वात्· अर्थभेदोपगमेऽपि किमेभिरितिवैफल्याभिधानविरोधात्· वृथोच्छूनस्य तदौचित्यात्· ननु न्यक्कारोऽयमित्यत्र वैपरीत्येन विधेयत्वप्रत्ययादर्थदोष एवायं स्यादिति चेन्न, न खल्वत्र विवक्षितोऽर्थो दुष्टः, किन्तु क्रमविशेषादविवक्षितप्रत्ययो विवक्षिताप्रत्यय एव वेति शब्दविशेष एवापराध्यति· शब्दान्तरेण तत्प्रतीतेरवैकल्यात्, यथा विरुद्धमतिकृति । न केवलं विधेयस्योपसर्जनत्वव्युत्क्रमाभ्यामेवायं वाक्यदोषः, किन्तु विधेयानुपस्थित्यापि· यथा–

अपाङ्गसंसर्गितरङ्गितं दृशो, र्भुवोररालान्तविलासि वेल्लितम्, ।
विसारिरोमाञ्चन(ग)कञ्चुकं तनोस्तनोति यो, ऽसौ सुभगे! तवागतः।

(क) राक्षसकुलमिति तु प्रचुरप्रचारः पाठः ।
(ख) धिग्धिक्छक्रजितमिति प्रायिकः पाठः श्लक्ष्णः ।
(ग) रोमाञ्चितेति पाठोऽपि नार्थातिशायी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'योसा'विति पदद्वयमुद्देश्यविधेयार्थकतया विवक्षितम्· उद्देश्यवाचिनो यच्छब्दस्य स्वार्थपरामर्शकतच्छब्दापेक्षत्वात्· नचैतत्तत्प्रतिपादकं, यच्छब्दसान्निध्येना ऽदसादीनां प्रसिद्धपरामर्शकत्वात्· ननु केवलयोरपि यत्तदोः प्रयोगदर्शनात्सापेक्षत्वमेवानयोरसिद्धम्· उच्यते—अनयोः परस्परार्थापेक्षार्थकत्वं नियतमेव· एतदेवोच्यते "यत्तदोर्नित्यसम्बन्ध" इति· सचाभिसम्बन्धः शाब्द आर्थो वा· तत्र द्वयोरुपादाने शाब्दः· यथा "स दुर्म्मतिः, श्रेयसि यस्य नादरः" इति· एकस्य द्वयोरपि वाऽनुपादाने त्वार्थः, अनुपात्तस्यापि सामर्थ्यादेवाक्षेपात्· तत्र तच्छब्देन यच्छब्दाक्षेपः प्रक्रान्त-प्रसिद्धानुभूतार्थकेन· यथा—

कातर्य्यं केवला नीतिः, शौर्य्यं चापलचेष्टितम्,[(क)] ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥ [प्रक्रा०]

अत्र 'स' इति प्रक्रान्तं राजानमाह ।

द्वयं गतं संप्रति शोचनीयतां
समागमप्रार्थनया कपालिनः, ।
कला च सा कान्तिमती कलावत,-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ [प्रसि०]

अत्र 'से'ति प्रसिद्धा ।

उत्कम्पिनी भयपरिस्खलितांशुकान्ता
ते लोचने प्रतिदिशं विधुरे क्षिपन्ती ।
क्रूरेण दारुणतया सहसैव दग्धा
धूमान्धितेन दहनेन न वीक्षितासि ॥ [अनु०]

अत्र 'ते' इत्यनुभूते· त्रिष्वप्येषु यच्छब्दस्योपादानं नावश्यापेक्षणीयम्, तदभावेप्याक्षेपादेव 'यः पूर्वोक्तगुणवान्', 'या प्रसिद्धा', 'ये अनुभूते' इति च प्रत्ययाऽविघातात् । यच्छब्दस्तूत्तरवाक्यगत एव सर्वत्र तच्छब्दाक्षेपसमर्थः· यथा—

साधु चन्द्रमसि पुष्करैः कृतं, मीलितं यदभिरामताधिके ।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ॥

(क) शौर्यं श्वापदचेष्टितमिति प्रायः खल्वाधुनिकेषु पठितेषु पाठेषु चोपलभ्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा च मम

> मातर्भारति! वत्सवत्सलतया किंचाम नाचर्यते,
> मिन्नाणि स्थिरताविवेकविनयाः! कार्यं सुहृत्प्रार्थितम् ।
> इत्यालोच्य विमुच्य मामिह मनागन्तर्हितं स्थीयतां,
> यावत्त्वादृशविप्रयोगसुभगा लक्ष्मीर्मया लभ्यते ॥

पूर्ववाक्यगतं तु तदाक्षेपासमर्थतया तदुपादानमेवापेक्षते· यथा-त्रैव पूर्वार्द्धपादयोर्व्यत्यासे· ननु पूर्ववाक्यगतोप्ययं तदाक्षेपसमर्थो, यथा-"तच्चक्षुर्यदि, हारितं कुवलयै"रित्यादाविति चेत्, सत्यं, समर्थो, न तु सर्वत्र किन्तु 'यदी'त्येतावद्रूपस्तत्पर्य्याय'श्चे'दिति वा· उत्तरवाक्यगतस्तु सकलरूपस्तथेति विशेषः· यद्वा यदित्यव्ययमिदं, नतु यच्छब्दः· तच्च भिन्नस्वभावमेव· एवं चेच्छब्दोपि । द्वयोरप्यनुपादानेप्यार्थो यत्तदोः सम्बन्धः यथा—

> ये नाम केचिदिह नः प्रथयन्त्यवज्ञां,
> जानन्ति ते किमपि, तान् प्रति नैष यत्नः, ।
> उत्पत्स्यते ऽस्ति मम कोपि समानधर्मा,
> कालो ह्ययं निरवधि,र्विपुला च पृथ्वी ॥

अत्र 'य उत्पत्स्यते, ऽस्ति वा मम समानधर्मा, तं प्रति यत्नः' इति स्फुटमेवावगम्यते· यथाश्रुते हि न पूर्वार्द्धेन कथमप्यन्वयः· यत्तु प्रक्रान्तार्थकस्य तच्छब्दस्य यच्छब्दापेक्षैव नेति व्याख्यातम्, तद्व्यक्तिविवेकग्रन्थानालोचननिबन्धनं, प्रकाशकारानभिमतं च· यदयं "यच्छब्दोपादानं नापेक्षत" इत्याह, नतु 'यच्छब्दंनापेक्षत' इत्यादि· तस्माद्यथाव्याख्यातमेवादरणीयम्· एवं च "योसौ सुभगे" इत्यत्र तच्छब्दस्यानुपादानादाक्षेपासम्भवाच्च यच्छब्दसाकाङ्क्षः· ननु स्यादेवैतद्, यदि तच्छब्दार्थको ऽयमदःशब्दो न स्यादिति चेत्, तत्किमदसस्तच्छब्दपर्यायता· तथा सति

> असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः ।
> वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यत्रादःशब्दस्तच्छब्दार्थमेवाभिदध्यात्,नत्विदमर्थम्। अथात्र वैयाद्यादिष्टापत्तिमालम्बसे, तर्हि

करवालकरालदोःसहायो युधि योऽसौ विजयार्जनैकमल्लः,[क]।
यदि भूपतिना स तत्र कार्य्ये विनियुज्येत, ततः कृतं कृतं स्यात्॥

इत्यत्र 'स' इति पुनरुक्तं स्यात्, अदःशब्देन तदर्थाभिधानात्। नन्वर्थान्तरत्वमस्य न निषेधामः, किन्त्वनुजानीमस्तदर्थैकत्वम्। कथमन्यथा

यो ऽविकल्पमिदमर्थमण्डलं पश्यतीश! निखिलं भवद्वपुः।
आत्मपक्षपरिपूरिते जगत्यऽस्य नित्यसुखिनः कुतो भयम्॥

इत्यत्रे'दं'शब्दस्यापि तच्छब्दार्थकता,इदमदसोः समानशीलत्वादिति चेत्, सत्यमात्थ,परन्तु यच्छब्दाद्व्यवहितानन्तरवर्त्ती समानाधिकरणस्तच्छब्दोऽपि प्रसिद्धिमात्रनिरूढः, किं पुनरिदमादिः। यथा–

यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः।
दीव्यता ऽक्षैस्तदा ऽनेन नूनं तदपि हारितम्॥

इत्यादौ। तस्मा"द्यो विकल्प"मित्यत्रेव व्यवधानेनादःप्रयोगो युक्तो, नत्वव्यवधानेन। कथं तर्हि

न केवलं यो महतो ऽपभाषते,
शृणोति तस्मादपि यः, स पापभाक्॥

इत्यत्र तच्छब्दो न प्रसिध्यर्थ इति चेत्, 'यः'–इत्यत्र विच्छेदेन व्यवधानात्। "योऽसा"वित्यत्र तु सन्धिना यच्छब्दनिविष्टैकदेशत्वेनाविच्छेदात्। ननु भवेदेवं, यदि यत्तदोर्नित्याभिसम्बन्धः स्यात्। स एव तु नास्ति। कथमन्यथा "यदत्यापं, प्रतिजहि जगन्नाथ! नम्रस्य तन्म"इत्यत्रैकयत्पराम्रृष्टस्यैकेन तदा परामर्शेऽपि द्वितीययच्छब्देन निराकाङ्क्षा प्रतीतिः, द्वितीयतत्पदाभावात्। नच तत्राक्षेपोऽपि, यदः पूर्ववाक्यगतत्वादिति मैवम्, न खल्वेकेनैव रूपेण यत्तद्भ्यां परामर्शनियम इति ब्रूमः, किन्त्वेकस्य ताभ्यां परामर्श इति। तथाचात्रापि पापात्मकं वस्तु येन केन चिद्विशेषद्वयेन यत्पदाभ्यां परामृष्टं, तत्पदेन तु पापत्वेनैकेनेति को विरोधः। वस्तुतस्तु

(क) 'विजयार्जुनैकमल्ल' इति महेश्वरन्यायालङ्कारादयः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यद्यदिति न पदद्वयं किन्तु "नित्यवीप्सयो"रिति सूत्रेण वीप्सायां यदो द्वित्वापर्य्यायमादेशः· तथाचादेशिनैकेन यत्पदेन तत्पदेन च द्वाभ्यामेकेनैव रूपेण पापपरामर्शः· आदेशस्तु साकल्येन सम्बन्धपरतायाहक इति यत्पदीयेनैव तेन तदुपपत्तौ न तत्पदेपि· यत्र तु तत्पदेपि वीप्सा, न तत्र यत्पदेप्यादेशः, किन्तूभाभ्यां रूपद्वयेन सर्वोपस्थापनमिति सारम्। असमासवत्समासेप्यनेकपदगतत्वेनास्य वाक्यदोषत्वम्· यथा–

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
मात्रा, स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा,।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्य्यानुजो ऽसौ गुरु-
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम्॥

अत्र कलत्रे तातसम्बन्धस्यानुजे चाऽऽर्य्यसम्बन्धस्योत्कर्षाधायकत्वेन विधित्सितयोः समासाद्गुणीभावः· वाक्यदोषत्वं तु यथा, तदुक्तम्· सोयं षष्ठीतत्पुरुषः समासः। एवं समासान्तरेपि विरुद्धमतिकृत्· यथा–

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्त्तयः।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः॥

अत्र 'क्षान्तिमन्तोऽनुरक्तभुवः, कल्याणालिङ्गिता, युद्धक्षपणेन, दुःखाभाववन्तः शेरत' इति विवक्षिते 'भूमिपतिता रुधिरस्थानानि, शिवाभिरालिङ्गिताः, शरीरक्षपणेन, गतप्राणेन्द्रियाः शेरत' इति विरुद्धं प्रतीयते· अमतपरार्थे विरुद्धोप्यर्थो विवक्षित इति ततो भेदः· नच प्रकाशितविरुद्धस्य सङ्करः, तत्रार्थस्यात्र तु शब्दस्य व्यञ्जकतया विशेषात्॥

पदैकदेशे यथासम्भवमुदाहरणानि।–तत्र श्रुतिकटु यथा–

अलमतिचपलत्वात्स्वप्नमायोपमत्वा-
त्परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः।
इति यदि शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा॥

एकत्र पदे बहुवर्णकटुत्वे पददोषत्वं, पदस्यैव कटुत्वप्रतीतिः एकस्यैव तथात्वे पदैकदेशदोषत्वम्· नचैवं "सोध्यैष्ट"त्यादौ प्रती

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पददोषत्वाभावात् कथं वाक्यदोषतेति वाच्यम्, नहि नानापददुष्टत्वे वाक्यदोषता, किन्तु नानापदवृत्तितामात्रेण• सा च पदावच्छेदेन, तदेकदेशावच्छेदेन वेति को विशेषः । 'त्वा'दित्यस्य कटुत्वासम्मतौ

तद्गच्छ सिद्धै कुरु देवकार्य्यं,मर्थोयमर्थान्तरलभ्य एव, ।
अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः ॥

अत्र 'सिद्धै लब्ध्यै' इत्युदाहार्य्यम् ॥ (१)

निहतार्थं यथा—

यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्बिभर्त्ति ।
वलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ॥

अत्र 'मत्ता'शब्दः• स हि क्षीबायां सुप्रसिद्धः ॥ (२)

निरर्थकं यथा—

आदावञ्जनपङ्क(क)लिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्प्पद्विरहानलेन च ततः संतापितानां दृशाम् ।
संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म्म कुरुते कामं कुरङ्गेक्षणा ॥

अत्र 'दृशा'मिति बहुवचनमविवक्षितार्थमेव वृत्तपूरणायोपात्तम्, एकस्याः कुरङ्गेक्षणाया दृग्बहुत्वाभावात्• "अलसवलिते"त्यादिवद्व्यापारभेदाद्बहुत्वमिति चेच्च, तत्रेक्षणैरितिवदत्र तदनुपादानात्• नच भावसाधनतया दृक्शब्द एव व्यापारे वर्त्तते, "अञ्जनलेपनादिविशेषणानन्वयप्रसङ्गात्• एवं 'कुरुत' इत्यात्मनेपदमपि निरर्थकम्, प्रधानक्रियाफलसम्बन्धस्य कर्त्तर्य्यऽविवक्षणात्• ननु "आशिषि नाथ"इतिवत् कर्त्रभिप्रेतक्रियाफलत्वाभाव आत्मनेपदमसाध्वेव, नतु निरर्थकम्• "नाथत"इत्यपि वा निरर्थकमेवा, ऽविशेषात्• एवं द्वयोरर्थयोर्बहुवचनमसाध्वेवेति• उच्यते, "आशिषि नाथ"इत्यनेनाशिष्यात्मनेपदं नियमयता ऽनाशिषि तदभावो बोध्यते• तस्माद्याचने तस्य युक्तमसाधुत्वम्• "स्वरितञितः कर्त्रभिप्राये

(क) पङ्कस्थाने पुञ्जेति क्वचित्पठ्यते, न तु तद्युक्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रियाफल" इत्यनेन तु कर्त्रभिप्रेतक्रियाफलविवक्षायां तन्नियमयता पराभि-सम्बन्धविवक्षायां तन्निषेधः प्रतिपाद्यत इति तत्रैवासाधुत्वं, न तु कर्त्र-भिप्रेतक्रियाफलत्वाभावमात्रे· अत एव "कर्त्रभिप्राय इति किम्· पराभि-प्रेते क्रियाफले मा भूदि"त्यवोचन्, नतु 'कर्त्रभिप्रेतक्रियाफलत्वाभाव' इति नचात्र पराभिप्रेतक्रियाफलं द्योत्यम्, किन्तु कर्त्रभिप्रेतक्रियाफलत्वाऽद्योत-नमात्रमिति नासाधुत्वम्· एवं "बहुषु बहुवचन"मित्येतत्सूत्रं बहुषु बहुव-चनं नियमयद् द्व्येकयो(क)स्तन्निषेधति, नतु बहुत्वविवक्षामात्रे· 'दृशा'मित्यत्र च न द्वित्वैकत्वे विवक्षिते, येना ऽसाधुत्वं स्यात्, किन्तु बहुत्वाविवक्षा-मात्रमित्यनर्थकत्वैवेति युक्तमुत्पश्यामः· एतेना"वयवाभिप्रायेण निरर्थकत्वं समुदायाभिप्रायेणात्वऽसाधुत्वमेवे"ति चण्डीदासमतमनादेयम्· ॥ (३)

अवाचकं यथा—

चापाचार्य्यस्त्रिपुरविजयी, कार्त्तिकेयो विजेयः,
शस्त्रव्यस्तः सदनमुदधि,र्भूरियं हन्तकारः, ।
अस्त्येवैत,त्किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्द्धस्तव परशुना लज्जते चन्द्रहासः ॥

अत्र 'विजेय' इति यत्प्रत्ययः क्तप्रत्ययार्थे प्रयुक्त,स्तत्र वाऽवा-चकः ॥ (४)

अश्लीलेषु व्रीडादायि यथा—

अतिपेलवमतिपरिमितवर्णं लघुतर(ख)मुदाहरति शठः, ।
परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥

अत्र 'पेले'ति पेलवशब्दैकदेशो ऽयं गुह्याङ्गस्मारकतया व्रीडादायि। जुगुप्सादायि यथा—

यः पूयते सुरसरिन्मुखतीर्थसार्थे-
स्नानेन शास्त्रपरिशीलनकीलनेन ।
सौजन्यमान्यजनिरूर्ज्जितमर्जितानां
सोयं दृशोः पतति कस्यचिदेव पुंसः ॥

(क) द्व्येकयोरुपस्थितयोरित्येकत्र पठ्यते ।
(ख) दृढतरमिति क्वचित्कस्तु नानुरूपः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'पूये'ति पूयव्यञ्जकतया जुगुप्सादायि । अमङ्गल्यं यथा–

विनयप्रणयैककेतनं सततं यो ऽभवदङ्ग ! तादृशः[क] ।
कथमेष स तद्वदीत्यतां [ख]तदभिप्रेतपदं समागतः ॥

अत्र 'प्रेते'तिभागो ऽमङ्गल्य[ग]स्मारकः ॥ (५)

सन्दिग्धं यथा–

कस्मिन् कर्म्मणि सामर्थ्यमस्य नोत्तपतेतराम्, ।
अयं साधुचर,स्तस्मादञ्जलिर्बध्यतामिह ॥

अत्र 'चर'भागो "भूतपूर्वं चर"डिति चरट्प्रत्ययो वा, "चरेष्ट" इति टान्तश्चरधातुर्वेति सन्देहा'त्पूर्वं साधुरि'ति वा, 'साधुषु चरती'ति वा ऽर्थे इति सन्देहः ॥ (६)

नेयार्थं यथा–

किमुच्यते ऽस्य भूपालमौलिमालामहामणेः, ।
सुदुर्ल्लभं वचोवाणैस्तेजो यस्य विभाव्यते ॥

अत्र 'वचोवाण'शब्दो गीर्वाणे विवक्षितः· नच तत्र समर्थः, गी,र्वाणशब्दयोरेव समस्तयोस्तदर्थे रूढेः, नतु तत्पर्यायान्तराणाम्· अत एव गोःशरादिशब्दोऽपि तत्रा ऽसमर्थः, पर्यायपरिवृत्त्यसहत्वात्· तस्माद्वचःशब्देन गोःशब्दो लक्ष्यते· न च तत्र रूढिः प्रयोजनं वेति नेयार्थता· एवं जलध्यादिशब्देऽपि पदपरिवर्त्तनं द्रष्टव्यम्, परंतु तत्रोत्तरपदमेव परिवृत्त्यसहम्, वड़वानलादौ तु पूर्वपदमेवेति तदन्यपदपरिवर्त्तनेप्यदोषः· नन्व ऽसमर्थत्वं विवक्षितार्थप्रतीतिसामर्थ्यविरह एवोच्यताम्· स च प्रसिद्धभावात्समयाभावद्वेत्य ऽप्रयुक्ता ऽवाचकनिहतार्थोदयो ऽप्यसमर्थभेदा एव भवितुमर्हन्तीति किमिति पृथङ्निर्दिष्टा इति चेत्, तथ्यमात्थ, [घ]परंत्वन्यैरलङ्कारकारैर्भेदेन दर्शिता इति तथैव निर्दिष्टाः· चिञ्च वैजात्या·

(क) योभवदङ्गताजुष इत्येकस्मिन्भवति· स च सर्वथाऽयुक्तः ।
(ख) 'तत्त्वदीक्षता'मिति पाठ,स्तत्त्वव्रतित्वमिति तदर्थश्च माहेश्वरीसंमतः ।
(ग) माङ्गल्येति पु· ।
(घ) सत्यमात्थेति पुस्तकान्तरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भावेपि शिष्यबुद्धिवैशद्याय तत्प्रभेदा वक्तव्या एवेत्यतोपि विभज्यो[ते]
इति ॥ ५२ ॥

अथ वाक्यमात्रदोषलक्षणमाह–

प्रतिकूलवर्ण,मुपहतलुप्तविसर्गं, विसन्धि, हतवृत्तम्, ।
न्यूना,धिक,कथितपदं, पतत्प्रकर्षं, समाप्तपुनरात्तम्, ॥५३॥
अर्द्धान्तरैकवाचक,मभवन्मतयोग,मनभिहितवाच्यम्, ।
अपदस्थपदसमासं, सङ्कीर्णं, गर्भितं,प्रसिद्धिहतम्[क], ॥५४॥
भग्नप्रक्रम,मक्रम,ममतपरार्थं च, वाक्यमेव तथा ।

अत्रापि रूढियोगाभ्यामर्थद्वयोपस्थितेः लक्ष्यलक्षणवाक्यत्वोपपत्तिः वाक्यमेव तथा, प्रतिकूलवर्णत्वादिकं वाक्य एव दोषो न तु पदादि-ष्वपीत्यर्थः· तत्र प्रतिकूलवर्णं विवक्षितरसादेः प्रतिकूला अननुगुणा वर्णा यत्र तत्· अनुगुणत्वं वर्णानां गुणविवेचनावसरे वक्ष्यते । शृङ्गारे यथा-

> अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि ! माम् ।
> कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥

अत्र टवर्गः शृङ्गारप्रतिकूलः, "अटवर्गा"इत्यादिना प्रतिषेधात् । रौद्रे यथा–

> देशः सोय,मरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः,
> क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहात् । [ख]
> तान्येवाऽहितहेति[ग]घस्मरगुरूण्यऽस्त्राणि भास्वन्ति मे,
> यद्रामेण कृतं, तदेव [घ]कुरुते द्रोणात्मजः [ङ]क्रोधनः ॥

अत्र मृदवो वर्णाः प्रतिकूलाः, ओजस्विनि रसे विकटवर्णत्वस्य दीर्घसमासत्वस्य चानुगुणत्वात्· यथा–

(क) प्रसिद्धिहतमिति प्रायः प्रकाशेषूपलभ्यते ।
(ख) केशग्रहइति पाठे तु सामानाधिकरण्यं हेतुहेतुमतोरभेदोपचारात् ।
(ग) हेतिस्थाने शस्त्रेति भवति क्वचित् ।
(घ) तदद्येति पुस्तकान्तरम् ।
(ङ) द्रोणायनिरितिप्रायः कोशस्थः पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वैधाविधाविर्भवत्-
क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात् ।
उज्ज्वालः परशुर्भवत्वशिथिलं त्वत्कण्ठपीठातिथि,-(क)
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥

इत्यत्र· यत्र तु न क्रोध,स्तत्र चतुर्थे पादे शिथिल एव प्रयोगः· अपरुषस्यापि रौद्रादिविरोधितयास्य न श्रुतिकटुभेदत्वम्· नच श्रुतिकटोरेव तद्विशेषत्वं, तस्य सकृत्प्रयोगेप्यात्मलाभात्· अस्य तु वाक्यव्यापित्वेन· अत एवास्य न पददोषत्व,मेकत्र तादृशवर्णप्रयोगस्य रसाविरोधित्वात्· दोषत्वबीजमप्यस्य रसव्यक्तिविरोधित्वमेव·(ख) अत एव नित्यदोषोयम्· नीरसादावात्मलाभाभावात्· श्रुतिकटोस्तु नीरसादावात्मलाभादनित्यत्वमिति महान् भेदः· इदं तु चिन्त्यं–रौद्रादिरसे श्लोकार्द्धपर्य्यन्तं समासेनैकपदे मृदुवर्णप्राये ऽस्य कथञ्च पददोषत्वमिति· अथान्यसाहित्येन दोषत्वं वाक्यदोषत्वं, निरपेक्षदोषत्वं तु पददोषत्वमिति चेत्, न, एवं हि क्लिष्टादावपि पददोषत्वं न स्यादिति· किं बहुना यादृशविवक्षया क्लिष्टत्वं पददोषत्वेनोक्तं, तयेदमपि तथेति न्यूनः पददोषविभागः(ग) ॥ (१)

'उपहतलुप्तविसर्ग'मिति· उपहतविसर्गं, लुप्तविसर्गं चेति द्वयमित्यर्थः· उपहता ओत्वं प्राप्ता लुप्ता वा विसर्गा यत्रेति बहुवचनान्तो विग्रहः· एकविसर्गस्य तथात्वेऽवैरस्यात्· उपघातश्च ओत्वप्राप्तिः· उपघातान्तरस्य दोषान्तरानुप्रवेशात्· तेन नैरन्तर्य्येणोत्वप्राप्तबहुविसर्गत्वं तथा लुप्तबहुविसर्गत्वं च लक्षणे· द्वयोरेकमुदाहरणं यथा–

धीरो विनीतो निपुणो वराकारो नृपो ऽत्र सः ।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ॥

दूषकताबीजं वन्धपारुष्येण सहृदयोद्वेगः· अत एवायं नित्यः·

(क) भवत्वशिथिलस्त्वदित्यादिः क्वचित् ।
(ख) रसविरोधित्वमेवेति पा· ।
(ग) पददोषत्वविभाग इत्येकतमपुस्तकस्थपाठस्तु हासास्पदम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रापीदं चिन्त्यं—'भूयोमहीयोतियशोविभूषित'इत्यादौ कथन्न पददो
त्वमस्येति ॥ (२, ३)

विसन्धि, विरूपः सन्धिः सन्निकर्षो यत्र· वैरूप्यं च त्रिधा, वि
श्लेषो, ऽश्लीलत्वं कष्टत्वं च· विश्लेषस्तु प्राप्तस्य श्लेषस्य संहिताका
स्याभावः· "सैवान्यत्र विभाषये"ति(क)वचनादैच्छिकः· आनुशासनिकश्च
त्रान्त्यः प्रगृह्यसन्धित्वात्, "पूर्वत्रासिद्ध"मित्यादिना विसर्गादिलोपासिद्धे
तेष्वाद्यः सकृदपि वर्त्तमानो दोषाय, इच्छानिबन्धनत्वेना ऽशक्तिमूलक
तया (ख)प्रथमतएव सहृदयोद्वेजकत्वात्· अन्त्यो त्वसकृत्, आनुशासनि
त्वेनाऽशक्त्यनुन्नायकतया बन्धपारुष्येणैवहि तस्य दोषत्वम्, तच्चास
त्प्रयोग एव· तद्वैरूप्यवतामनुगमश्चान्यतमत्वेन, अश्लीलवचानार्थत्वे
वा· एवं त्रिप्रकारकेपि विश्लेषे आद्यप्रकारद्वयं यथा—

राजन्! विभान्ति भवतश्चरितानि तानि,
इन्दोर्द्युतिं दधति यानि रसातले ऽन्तः, ।
धीदोर्बले अतितते उचितानुवृत्ती
आतन्वती विजयसम्पदमेत्य भातः ॥

अन्त्यो यथा—

तत उदित ,उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः ।
निजवंश उदात्त(ग)कान्तकान्तिर्भुवि मुक्तामणिवच्चकास्त्यनर्घः ।
दूषकताबीजमस्योक्तम् । अश्लीलत्वं यथा—

वेगादुड्डीय गगने चलण्डामरचेष्टितः ।
अयमुत्तपते पत्री, ततोत्रैव रुचिङ्कुरु ॥
अत्र "चिङ्कु"इत्यऽश्लीलम् ॥

कष्टत्वं यथा—

उर्व्यसावत्र तर्व्वाली मर्व्वन्ते चार्व्ववस्थितिः ।

(क) सचान्यत्र तु विभाषयेतीति पुस्तकान्तरे, नार्थे विशेषः ।
(ख) अशक्तिमूलकतयेति पाठान्तरम् ।
(ग) उदारेति पुनः क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

नात्रर्जु नम्यते गन्तुं (क)शिरो नमय तन्मनाक् ॥

अत्र दूषकताबीजं पददोषप्रस्ताव उक्तमिति॰ अत्रापीदं चिन्त्यं—समासेनैकपद्ये ऽश्लीलकष्टेच्छानिबन्धनविश्लेषाणामश्लीलकष्टासाधुमध्यप्रवेशे ऽपि लोपासिद्धिनिबन्धनविश्लेषस्य पदेऽपि सद्भावात् कथमस्य न पददोषत्वम्॰ यथा "भूयउच्चैर्म्महउदात्तयशउदार" इति॰ वयं तु तर्कयामः,—सकलप्रभेदभिन्ना एव दोषा दूषणान्तरासङ्कीर्णा वाक्य एवेति वाक्यमेव तथेति नियमार्थः॰ अत एव न पददोषविभागन्यूनतापि॰ तादृशस्यैव पदवृत्तेस्तत्र विभागादिति ॥ (४)

हतवृत्तम्, हतं वृत्तं यत्र, तत्॰ हतत्वं चा ऽश्रव्यत्वं, गुरुकार्याक्षमपादान्त्यलघुवर्णत्वं, प्रकृतरसाननुगुणत्वं वा॰ अन्यतमत्वेनैषामनुगमः॰ अश्रव्यत्वं च लक्षणाननुगमाद्, यतिभङ्गात्, स्थानविशेषे गणविशेषयोगाच्च॰ यद्वा, हतत्वमश्रव्यत्वमेव॰ तच्च गुर्वादिनियमरूपलक्षणाननुगमाद्, यतिभङ्गात्, स्थानविशेषे गणविशेषयोगाच्च॰ शिखरिण्यादावन्त्यस्य लघोर्गुरुकार्य्याक्षमत्वात्॰ प्रकृतरसानुगुणत्वाच्च॰ तत्राद्यं यथा—

यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः ।
तमेव धीरो विज्ञाय प्रज्ञां कुर्व्वीत ब्राह्मणः ॥

अत्र श्लोके पञ्चमस्य गुरुत्वाच्छन्दोभङ्गः । यतिभङ्गो वर्णवृत्ते यथा—

अमृतममृतं कः संदेहो, मधुन्यपि नान्यथा,
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम्, ।
सकृदपि पुनर्म्मध्यस्थः सन् रसान्तरविज्जनो
वदतु, यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात् ॥

अत्र हरिणीच्छन्दसि षष्ठे दशमे च यतिरुचिता, चतुर्थे तु

(क) नात्रर्जुः नमतं इत्येकपुस्तकस्थपाठे 'कश्चिज्जन' इति कर्तृपदमध्याह्रियताम्॰ नात्रर्जु युज्यते गन्तुमिति महेश्वरादिसम्मतः प्रकाशस्थः पाठः ।

CC0. In Public Domain, Digitizagtion by eGangotri

यदिहान्यदित्यत्र तद्वङ्ग[क] इत्यश्रव्यता । मात्रावृत्ते स्थानविशेषे[ख] गुरु-विशेषयोगो यथा—

> जो परिहरिउं[ग] तीरइ मणं पि ण सुन्दरत्तणगुणेण ।
> अह णवर जस्स[घ] दोसो पड़िवक्खेहिं पि पड़िवण्णो ॥

अत्रार्य्यायां द्वितीयतृतीयौ सगणभगणौ· तौ च तथाविधे छन्दःशास्त्रेण दुःश्रवत्वेन प्रतिपादितौ । पादान्तलघोर्गुरुकार्य्याक्षमत्वं यथा—

> विकसितसहकारतारहारिपरिमलगुञ्जितपुञ्जितद्विरेफः[ङ] ।
> नवकिसलयचारु[च]चामरश्रीर्हरति मुनेरपि मानसं वसन्तः ॥

अत्र "वा पादान्त"इति पादान्तस्य गुरुत्वाच्छन्दोभङ्गाभावेऽपि प्रथमपादान्तवर्त्तिन इकारस्य लघोर्गुरुकार्यकरणाक्षमत्वम्· इन्द्रवज्रादिषु[छ] तु तत्कार्य्यक्षमत्वाद्दोषः· तस्मात्, 'हारिप्रमुदितसौरभे'ति पठनीयम् न केवलं प्रथमतृतीयपादयोरेवायं दोषः, किंत्वन्ययोरपि· तत्र चतुर्थे यथा—

> अन्यास्ता गुणरत्नरोहणभुवो, धन्या मृदन्यैव सा,
> सम्भाराः खलु तेऽन्य एव, विधिना यैरेष सृष्टो युवा, ।
> श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलाद्
> दृष्टे यत्र पतन्ति मूढमनसां शस्त्राणि वस्त्राणि च[ज] ॥

अत्र 'वस्त्राण्यपी'ति पाठे गुरोरेव संयोगपरतया स्वरवृद्धौ लघुरपि गुरुकार्य्यकारी सम्पद्यते· एवं द्वितीयपादेप्यूह्यम्· एषु चाश्रव्यता सहृदय-

(क) चतुर्थे तु पादे तद्वङ्ग इत्येकस्यः पाठः ।
(ख) स्थापनविशेषे-इत्यत्र पठ्यते ।
(ग) जं परिहरउ तीरइ मणाअपिणेत्यादि पुस्तकान्तरम् । जं परीत्यादिः पाठः प्रभासम्मतः· जो परीत्यादिस्तु महेश्वरादिसम्मतः ।
(घ) तस्सेति पाठान्तरं तु न प्रलक्षणम् ।
(ङ) ०भारहारिपरिमलपुञ्जितगुञ्जितद्विरेफः—इति महेश्वरसम्मतः पाठः ।
(च) किशलयेति पु० । उभयविधाश्च किसलयसूकरादिशब्दाः साधव इति सिद्धान्तः ।
(छ) वसन्ततिलकेन्द्रवज्रादिष्वित्येकीयपाठस्तु न युक्तः ।
(ज) मूढमनसामस्त्राणि वस्त्राणि चेति पुस्त० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योद्वेजिनी दुष्टताबीजम्· अतो नित्यदोषो ऽयम्। प्रकृतरसाननुगुणत्वं यथा—

हा नृप! हा बुध! हा कविबन्धो! विप्रसहस्रसमाश्रय देव!।
मुग्धविदग्धसभान्तररत्न! क्वासि गतः, क्व वयं च तवेते॥

इदं दोधकवृत्तं शोकाननुगुणं, तद्विरोधिहास्यव्यञ्जकत्वात्· अस्य च प्रतिकूलवर्णवद् दुष्टताबीजम्· (क) नीरसे च नास्यात्मलाभ इति नित्यदोषता॥ (५)

"न्यूनाधिके"त्यादि· न्यूनपद,मधिकपदं, कथितपदं चेत्यर्थः· तत्र, न्यूनपदम्, न्यूनं पदं वाचकशब्दो यत्र, तत्· (ख) द्योतकन्यूनतायां त्वऽनभिहितवाच्यत्वमिति (ग) विशेषः· उदा०—

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चलतनयां
वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः,।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं,
गुरुः खिन्ने खेदं मयि भजति, नाऽद्यापि कुरुषु॥

अत्र पादत्रयमध्ये 'ऽस्माभि'रिति, 'खिन्ने इत्यस्य पूर्वं'मित्थ'मिति च पदत्रास्ति· आवश्यके च ते, अन्यथा कर्त्तुरलाभादेकवाक्यत्वाऽसम्भवाच्च· (घ)अर्थश्चैतादृश एव विवक्षित इति शब्दस्यैवायमपराधः· यत्र त्वर्थ एव न तादृशो विवक्ष्यते, तत्रार्थ एव दुष्ट इति साकाङ्क्षत्वं दोषान्तरमिति(ङ) द्रष्टव्यम्· विवक्षिताप्रतिपत्तिश्च दूषकताबीजम्· अतो झटित्याक्षेपादितस्तल्लाभेन क्वचिद्रसादिपरिपोषकत्वेन चादोषत्वम्(च)॥ (६)

अधिकपदं यथा—

(क) अस्य च प्रतिकूलवर्णत्वं दुष्टताबीजमित्येकस्मिन्नास्ते, न तु न्याय्यम्।
(ख) तत्त्वमित्यन्यत्र।
(ग) वाच्यमिति पा०।
(घ) अत्र "तदर्थस्य विवक्षितत्वा"दित्यधिकमेकत्र पुस्तक आस्ते· तत्तु प्रमादपतितमिति ज्ञेयम्।
(ङ) "यत्र त्वर्थ एव तावत्क्रूरं विवक्ष्यते, तत्रार्थ एव दुष्ट इति साकाङ्क्षं तु दोषान्तरमितो"त्येकत्र पुस्तके भवति, न तु भवति युक्तम्।
(च) "आक्षेपतस्तल्लाभेऽदोषत्व"मिति त्वन्यपुस्तकस्थं न पर्याप्तार्थकम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फटिकाकृतिनिर्म्मलः प्रकामं प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः।
अविरुद्धसमन्वितोक्तियुक्तः प्रतिमल्लास्तमयोदयस्स कोऽपि॥

अत्र स्फटिकमेव निर्म्मलतायामुपमानं विवक्षितम्· उपात्तेऽप्याकृतिपदे यथाकथञ्चित्तेनैवोपमितिपर्य्यवसानादित्याकृतिपदमधिकम्· न व्यर्थत्वादपुष्टार्थेन सङ्कर इति वक्ष्यते· न केवलं समास एव पदाधिक्यं किंत्वसमासेऽपि· यथा—

इदमनुचितमक्रमश्च पुंसां, यदिह जरास्वपि मान्मथा विकाराः।
यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा।

अत्र 'कृत'मधिकम्, पूर्वार्द्धवत्तेन विनैव प्रतीतिपर्य्यवसानात्· कृतं प्रत्युत प्रक्रमभङ्गमावहति, पूर्वार्द्धेऽकरणात्· तथाच 'यदपि च न कुरङ्गलोचनाना'मिति पठनीयम्· निष्प्रयोजनशब्दप्रयोगश्रवणेन श्रोतुर्वैमुख्यं दूषकताबीजम्· अतो हर्षादावभिव्यङ्ग्ये न दोषत्वम्· ॥ (७)

कथितपदं यथा—

अधिकरतलतल्पं कल्पितस्वापलीला-
परिमिलननिमीलत्पाण्डिमा गण्डपाली।
सुतनु! कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम्॥

अत्र लीलापदं वारद्वयमुपात्तम्· दूषकताबीजं च कवेरशक्त्युन्नयनेन श्रोतुर्वैमुख्य,मतो लाटानुप्रासादावदोषत्वम्· अशक्त्यऽनुन्नयनात् इदं तु चिन्त्यम्—समासे सत्येकस्मिन्नपि पदे व्यवधानाल्लाटानुप्रासविरहेऽप्यस्य सम्भवात् कथं न पददोषत्वमपीति ॥ (८)

पतत्प्रकर्षम्, अलङ्कारकृतस्य बन्धकृतस्य वा प्रकर्षस्य निमित्तं विषये चोत्तरोत्तरं पातो निकर्षः· यथा—

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः,
कः कः कं कमलाकरं विकमलं कर्त्तुं करी नोद्यतः,।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयु,र्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्त्तते॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र सूकरा(क)द्यभिधाने विकटबन्धकृतो ऽनुप्रासकृतश्च प्रकर्षः सिंहाभिधाने पतितः· दूषकताबीजं चाशक्त्युन्नयनेन श्रोतुर्वैरस्यम्· रसानुगुणतया तत्पातेऽपि न दोषः॥ (९)

समाप्तपुनरात्तम्, समाप्तं सत् पुनरूपात्तम्· वाक्ये समाप्ते पुनस्तदन्वयिशब्दोपादानं यत्रेत्यर्थः· यत्तु समाप्ते वाक्ये ऽविशेषविधायिविशेषणान्तरोपादानवत्त्वं तल्लक्षणमिति· तच्च, "प्रागप्राप्ते"त्यादौ वाक्यान्तरारम्भे विशेषणान्तरानुपादाने तल्लक्षणविरहेण तत्रानित्यदोषव्युत्पादनविरोधात्· उदा०—

क्रेङ्कारः स्मरकार्मुकस्य, सुरतक्रीडापिकीनां रवो,
झङ्कारो रतिमञ्जरीमधुलिहां, लीलाचकोरीध्वनिः, ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कणक्वाणः प्रेम तनोतु वो, नववयोलास्याय वेणुस्वनः॥

अत्र "तनोतु व" इति समाप्तमेव वाक्यं "नववय"इत्यादिविशेषणेनोपात्तम्· निराकाङ्क्षत्वं च दूषकताबीजम्· अतश्चानित्यदोषोऽयम्, वाक्यान्तरारम्भे तदभावात्॥ (१०)

अर्द्धान्तरैकवाचकम्, द्वितीयार्द्धगतमप्रधानहेत्वाद्यर्थैकमेकं वाचकं यत्र, तत्· यथा—

मसृणचरणपातं गम्यतां, भूः सदर्भा,
विरचय सिचयान्तं मूर्ध्नि, धर्मः कठोरः, ।
त,दिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिः शिक्षिता वीक्षिता च॥

अत्र 'भूः सदर्भा, तन्मसृणचरणपातं गम्यता'मिति वाक्यम्· तत्र च "त"दित्यर्द्धान्तरगतम्·अत्र च निराकाङ्क्षता दुष्टिबीजम्· (ख) श्रुतमात्रस्यैव भूसदर्भत्वस्याक्षेपादिना हेतुत्वप्रतीतेः·यस्य तु कर्त्रादेर्न तथा प्रतीति,स्तस्यार्धान्तरोपादाने ऽप्यत्मलाभ एव नास्ति,तल्लाभेऽपि वा न दोषत्वम्॥ (११)

(क) शूकरेत्यन्यत्र।
(ख) दुष्टताबीजमिति पु·।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभवन्मतयोगम्, अभवन्नभिमतो योगो यत्र· नचाविमृष्टविधेयमध्ये ऽस्यान्तर्भावः, उपजीव्यत्वेन भेदादिति केचित्· वस्तुतस्तु, तत्र पदार्थयोरुपस्थितयोरन्वयो भवत्येव, परं त्वनभिमतेनाप्राधान्यादिना रूपेण· तेन तत्र विधेयत्वानवगममात्रम्·(क) अत्र तु सम्बन्ध एव तयोर्न प्रतीयत इति महान् भेदः· नन्वेवमभवन्मतयोगमित्यत्र योगे मतत्वविशेषणानर्थक्यमिति चे,न्न, एकवाक्यस्यपदोपस्थापितत्वादिरूपस्य योगस्य सर्वत्रापि सत्त्वात्·(ख)मतत्वं चान्वयबोधविषयत्वमित्यप्रसङ्गः· एतच्च क्वचिद्विभक्तिभेदात्· यथा–

येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभि,-
र्लीलापानभुवश्च नन्दनतरुच्छायासु यैः कल्पिताः, ।
येषां हुंकृतयः कृतामरपतिक्षोभाः क्षपाचारिणां,
किं तैस्त्वत्परितोषकारि विहितं किञ्चित्प्रवादोचितम् ॥

अत्र यैरित्यस्य विशेष्यतया क्षपाचारिशब्दार्थो विवक्षितः· नच तेन तैस्तथायोगः प्रतीयते, विभक्तिभेदात्· अथ यैर्लीलापानभुवः कल्पिता, येषां प्रतापोष्मभिरित्यादिप्रकारेण यच्छब्दाभिधेययोरेव तथान्वयोस्तु, किं विशेष्यान्तरविवक्षयेति चे,न्न, अनुवाद्यानां हि विधेयेनैव साक्षादन्वयो, नतु तदनन्तर्भाव्या ऽनुवाद्यान्तरेण, गुणत्वस्योभयत्र तुल्यतया विशेष्यत्वविनिगमनाया अशक्यत्वात्· तदेतदुक्तम्–"गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्या"दिति· अत एवा'ऽरुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाती"त्यत्रारुण्यादीनां पिङ्गाक्ष्यादिभिर्नान्वयः· नापि गवा, तस्या अपि क्रयसाधनत्वेन गुणत्वा(ग),त्किन्तु क्रयेणैव· कथं तर्हि न धर्म्यन्तरस्यैरारुण्यादिभिः क्रय इति चेन्न, आरुण्यादीनां गोत्वान्ताना(घ)प्राथसमाजात्· तर्हि तद्वदेवात्राप्यार्थ एव समाजोऽस्त्विति चेद्, भवेदेवं,

(क) "तेन तत्र विधेयत्वानवगममात्र" मित्येतावदेकत्र नास्ति ।
(ख) योगस्याऽपि सत्त्वादित्येकत्र भवति ।
(ग) "विशेषणविभक्तिवैयर्थ्यात्"–इत्येतावन्मात्रमत्र स्थाने खल्वेकत्र पुस्तके ऽधिकं पठ्यते ।
(घ) गवान्तानामिति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदि तद्वत्समानविभक्तिकत्वं भवेत्· कथं तर्हि भवत्यभिमतो योग इति चेत्, 'त्रपाचारैरभि'रिति पाठे· कथम्· सकलयत्पदनिर्दिष्टानां तत्पदेन परामर्शे तेषां सर्वेषां त्रपाचारित्वावगतेः । क्वचिच्न्यूनतादिनिबन्धनः· यथा—

त्वमेवंसौन्दर्य्या, स च रुचिरतायाः परिचितः,
कलानां सीमानं परमिह युवामेव भजथः, ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वा,
मतः शेषं यत्स्या,ज्जितमिह तदानीं गुणितया ॥

अत्र शेषसम्पत्ते[क] र्गुणिताजयप्रयोजकत्वान्वयो विवक्षितः· स च द्विधा संभवति, "य" दित्यस्य 'चे' दित्यर्थकतया, "तद्यदि" पदार्थयोर्विवक्षया वा· तयोर्य्यदि प्रथमे तात्पर्य्यं, तदाऽवाचकता· द्वितीये तु न्यूनपदत्वमिति· नच न्यूनपदस्याप्यत्रैवान्तर्भावः, क्वचिच्न्यूनपदेऽप्यध्याहारादिना मतयोगसम्भवे ऽपि विलम्बादेव दुष्टत्वसम्भवात् । क्वचिदाकाङ्क्षाविरहात्· यथा—

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः, शरैररिशिर,स्तेनापि भूमण्डलं,
तेन त्वं, भवता च कीर्त्तिरतुला,[ख] कीर्त्या च लोकत्रयम् ॥

अत्र पूर्वार्द्धार्थेन उत्तरार्द्धस्य योगो विवक्षितो, नच कथञ्चित्सम्पद्यते· तथाहि, अर्थानां वाक्यार्थे योगः क्रियात्वेन वा, (१) कारकत्वेन वा, (२) सम्बन्धित्वेन वा, (३) एषां विशेषणतया वा, (४) हेतुत्वलक्षणत्वादिना वा, (५) तदादिना पूर्ववाक्यार्थमनूद्य वाक्यान्तरावष्टम्भाद्वाक्यैकवाक्यतया वा, (६) भवेत्· तत्र कोदण्डादेः प्रथमतृतीयपञ्चमषष्ठाः पक्षास्तद्विशेषणता च असम्भाविता एव· कारकत्वमपि[ग] कर्मकर्तृभावाभ्यामत्यत्र घटते· तत्राकर्णनक्रियायां पदार्थमात्रस्य कर्मत्वे विवक्षिते 'को-

(क) मङ्गलशेपसम्पत्तेरित्येकत्र ।
(ख) कीर्त्तिरनघेति पु· ।
(ग) कारकमपीति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दण्डं शरानि'ति द्वितीया स्यात्· अथ परस्परान्विता मिलिताः पदार्थाः कर्म्म, न प्रत्येक,मतो न प्रत्येकवाचकात् कोदण्डादिशब्दाद् द्वितीयेति चेत्, तर्हि, शुद्धप्रातिपदिकार्थमात्रार्थत्वात् कोदण्डः शरा इत्यादिप्रथमा स्यात्· "माहिषं दधि सशर्करं पय"इत्यादिवत्· अथ समासादनक्रियायां कोदण्डादीनां तु कर्तृतया शरादीनां तु कर्म्मभावेनान्वय इति चेत्, न, शराः समासादितमित्यनन्वयात्· किञ्च, येन यत्समासादितं कोदण्डेन शराः समासादितास्तदाकर्ण्यतेति प्रतीतिपर्य्यवसाने कर्त्रोः कर्म्मणोश्च भेदः प्रतीयेत, नचाकाङ्क्षानिवृत्तिः स्यात्· अथ यच्छब्दस्य बुद्धिस्थवाचकतया कोदण्डादिपदार्थ एव यच्छब्दार्थः· तथाच यच्छब्दार्थस्य क्रियान्वये कोदण्डादीनामन्वयो जात एवेति चेत्, न, एवं हि कोदण्डादीनां पुनरुपादानं व्यर्थमेव स्यात्· तस्मादस्ति कश्चित् प्रकारकृतस्तदर्थयोर्भेद इति तदवच्छिन्नतया योगः कथंचिदुपपादनीयः· एतेना,क्षिप्ततच्छब्दार्थत्वमपि निरस्तम्· अथ कर्तृकर्म्मणोर्विशेषणानि कोदण्डादीनीति चेत्, न, 'कोदण्डेन येन शरा यत्समासादितं तदाकर्ण्यते'ति वाक्यार्थपर्य्यवसाने पुनर्विशेषानुक्तावाकाङ्क्षाया अनिवृत्तिप्रसङ्गा,च्छरा यदित्याद्यन्वयप्रसङ्गाच्च· अत एव, कोदण्डादिशरादिकर्तृकर्म्मणी, तद्विशेषणं तु यच्छब्दार्थ इत्यपि व्युदस्तम्· अथ येन यदासादितमिति सामान्यतोऽवगमात् केन किमिति विशेषप्रश्ने कोदण्डेन शरा इत्याद्युत्तररूपाणि वाक्यान्तराणीति चेत्, न, तादृशप्रश्नाश्रवणात्· अथासावुन्नीयते· एवमुत्तरालङ्कारोपि लभ्यत इति चेत्, न, येन यदासादितं तदाकर्ण्यते'ति प्रतिज्ञाय प्रश्नं विनापि कोदण्डादिनिर्देशसम्भवेन तदुन्नयनाऽसिद्धेः· ननु चासादितमित्यस्य क्रियापदस्य वचनादिविपरिणामेनानुषङ्गे 'कोदण्डेन शराः समासादिता' इत्यादिवाक्यान्तरारम्भे को दोष इति चेद्, वाक्यभेदः, पूर्वापरार्द्धयोरनन्वयतादवस्थ्यात्· लोके तादृशवाक्यभेदेपि दोषाभावात्तथा प्रयोग इति· व्यङ्ग्यस्यापि विवक्षितयोगाभावेऽस्यावतारो यथा–

चापाचार्य्यस्त्रिपुरविजयी, कार्त्तिकेयो विजेयः,
शस्त्रव्यस्तः सदनमुदधि,र्भूरियं हन्तकारः, ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्त्येवैतत्, किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्द्धस्तव परशुना लज्जते चन्द्रहासः ॥

अत्र रेणुकाकण्ठबाधाजन्यनिन्दया भार्गवस्य योगो विवक्षितः· तन्निन्दाप्रकरणात्परशोः स्वक्रियापाटवेनानिन्दनीयत्वाच्च· नच तथा-प्रतीयते,कृतवतेति तृतीयया परशुनैव सम्बन्धावगमात्· कृतवत इतिपाठे तु भार्गवे निन्दायोगः प्रतीयते· यदि तु परशुनिन्दानन्तरं विदग्धोक्त्या भार्गवेपि निन्दावगम,स्तदा कृतवत्त्वस्य तेनाऽयोगाद्वाच्यायोगोदाहरण-मेवैतत्· तथाहि, यथा स्पर्द्धायोग्यत्वोपपत्तये परशुस्वामिनो महादेव· शिष्यत्वादीनि विशेषणान्युपात्तानि, तथा तदयोग्यत्वोपपादनाय तस्यैव कश्चिद्धर्मो वक्तुमुचित इति भार्गवेण कृवत्त्वस्यान्वयो विवक्षितो, नच प्रतीयत इति दुष्टत्वम्· एवं च चण्डीदास(क)व्याख्यानमनादेयम् । क्वचि-त्समासाच्छन्नतया मतयोगाभावः यथा—

चत्वारो वयमृत्विजः, स भगवान्कर्म्मोपदेष्टा हरिः,
संग्रामाध्वरदीक्षितो नरपतिः, पत्नी गृहीतव्रता, ।
कौरव्याः पशवः, प्रियापरिभवक्लेशोपशान्तिः फलं,
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः ॥

अत्र संग्रामाध्वरस्य ऋत्विगादिषु सर्वत्रान्वयो विवक्षितः· नतु प्रतीयते, समासच्छन्नत्वात् । क्वचिद्व्युत्पत्तिविरोधात्· यथा—

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्त्तुर्नृत्यानुकारे जयति निजतनुस्वच्छलावण्यवापी·
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥

अत्र तनुपदार्थस्य पार्वत्या योगो ऽभिमतो,दण्डपादेन प्रतीयते· वाक्ये यत्प्रधानं, तत्रैव निजादिपदव्युत्पत्तेः·(ख) दूषकताबीजमिष्टप्रतीति-विरह इति नित्यदोषोऽयम् ॥ (१२)

(क) चण्डीदासादीत्येकत्र ।
(ख) निजारिपदेत्येकपुस्तकस्यस्तु पाठो नातियुक्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"अनभिहितवाच्य"मित्यावश्यको ग्रयः· तेनानभिहितं वाचकपदातिरिक्तमवश्यवाच्यं यत्र, तदित्यर्थः· वाचकपदानभिधाने न्यूनपदत्वस्यावस्थापनात्· यत्तु "न्यूनपदे प्रतीतिमात्र,मत्र तु विरुद्धा प्रतीतिरित्यनयोर्भेदः· "अप्राकृतस्ये"तिवक्ष्यमाणोदाहरणे च मत्सम्बन्धित्वेन वीरशिशुप्रतीतिरेव विरुद्धा प्रतीति"रिति कस्यचिद्व्याख्यानम्, तदनुभविरुद्धम्, तथानुभवस्याप्रतीतेः· इदं चान्यथावाच्यस्या(क)न्यथाभिधानाद्वा, अवाचकस्य द्योतकादेरनभिधानाद्वा· आद्यं यथा–

अप्राकृतस्य चरितातिशयैश्च दृष्टै-
रत्याहृतस्य मम नाम तथापि नास्था(ख) ।
कोऽप्येष वीरशिशुकाकृतिरप्रमेय-
सौन्दर्य्यसारसमुदायमयः पदार्थः ॥

अत्राहमपहृतोऽस्मीतिप्रकारेणापहृतत्वस्य विधिर्वाच्यः· तेन वाक्यद्वयसम्पत्तौ तथापीत्युपपद्यते· द्वितीयवाक्यगतत्वेनैव तस्योपपत्तेः·(ग) नन्वयमविमृष्टविधेयांश एवेति चेन्न, नहि विधेयाविमर्शमात्रमत्र दूषणं, किंतु तथापीत्यस्याऽसङ्गतिरपि· तदनुरोधेनैव ह्यपहृतत्वस्य विधेयत्वाभ्युपगमो, नतु तत्प्राधान्यात्· एतेना'ऽवान्तरवाक्ये न विधेयाविमर्श' इति समाधानमनादेयं, बीजाभावात्· "तृणमप्यमुक्ते"त्यवान्तरवाक्य एव तदुदाहरणाच्च· अस्तु वात्रोदाहरणे विधेयाऽविमर्शः, तथापि द्वितीयभेदे तदसङ्करमात्रेणैव दोषभेदव्यवस्थितिः·(घ) यथा–

एषोऽहमद्रितनयामुखपद्मजन्मा
प्राप्तः सुरासुरमनोरथदूरवर्ती ।
स्वप्नेऽनिरुद्धघटनाधिगतानुरूप-
लक्ष्मीफलामसुरराजसुतां विधाय ॥

(क) अन्यथावाच्यस्य पदस्येति पा· ।
(ख) तथाप्यनास्थेति पुस्तकान्तरम् ।
(ग) तस्य प्रतीतेरिति पा· ।
(घ) दोषभेदव्यवस्थितेरिति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र सुरासुराणामपि मनोरथस्य दूरवर्तीत्यप्यर्थोऽवश्यं वाच्यः[क] अन्यथा ऽन्यमनोरथविषयत्वं प्रतीयेत । असमासेऽप्येष दोषः यथा—

प्रणयभङ्गपराङ्मुखचेतस-
स्त्वयि निबद्धरतेः प्रियवादिनः ।
क्षमपराधलवं मम पश्यसि,
त्यजसि मानिनि! दासजनं यतः ॥

अत्र लवमपीत्यप्यर्थो ऽवश्यं वाच्यः अन्यथा लवनिषेधे स्थूलप्रतीतिप्रसङ्गात् दूषकताबीजं प्रथमेऽभिमताऽप्रतीति,रन्त्ययोस्तु विरुद्धप्रतीतिरिति नित्यदोषोयम् ॥ (१३)

"अपदस्थे"ति अस्थानस्थपद,मस्थानस्थसमासञ्चेति द्वयमित्यर्थः अस्थानस्थत्वं चायोग्यस्थानस्थत्वम् तयोराद्यं यथा—

प्रियेण संग्रथ्य विपक्षसन्निधा
वुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाबिलां,[ख]
वसन्ति हि प्रेम्णि गुणा, न वस्तुनि ॥

अत्र 'न काचि'दिति न योग्यं नञः स्थानम् प्रतियोगिसन्निधिर्हि तथेति न युक्तम्, तद्व्यवधानेऽपि "न खलु न खलु बाणः[ग]सन्निपात्योऽयमस्मि"न्नित्यादौ निरवद्यप्रयोगदर्शनात् परं तु 'काचिन्न विजहा,वपि तु सर्वा एव विजहु'रितिविरुद्धप्रतीतिप्रसङ्गादयोग्यं स्थानमेतत् । विरुद्धप्रतीतजननादिव विवक्षितोपयोगस्य पदस्योपयोगासम्भवादपि स्थानस्यायोग्यत्वम् यथा—

लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तःकपोलस्थलम् ।

(क) ०ऽवश्यवाच्य इतीतरत्र न त्वर्थे विशेषः उत्तरत्राप्येवम् ।
(ख) जलाविलामिति पु० ।
(ग) बाणा इति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पार्वत्या नखलक्ष्मशङ्कितसखीनर्मस्मितव्रीडया
प्रोन्मृष्टः करपङ्कजेन कुटिलाऽऽताम्रच्छविः पातु वः ॥

अत्र कुटिलाताम्रच्छवित्वं नखलक्ष्मशङ्काबीजमिति तत्पूर्वमेव प्रयुज्यमानमुपयुज्यते, नतु पश्चादिति स्पष्टं दुष्टिबीजम्। नित्यश्चायम् ॥ (१४)

अस्थानस्थसमासं यथा—

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एव(क) धिगिति क्रोधादिवाऽऽलोहितः।
उद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणा-
त्फुल्लत्कैरवकोशनिस्सरदलिश्रेणीकृपाणं शशी ॥

अत्र पूर्वार्द्धं क्रुद्धस्य शशिन उक्तिरिति तत्समासस्य योग्यं स्थानं, न पुनः कवेरुक्तिरुत्तरार्द्धमित्यस्थानसमासता। नच प्रतिकूलवर्णत्वानतिभावः, समासस्यावर्णरूपत्वात्। नापि पतत्प्रकर्षता, प्रथमप्रवृत्तस्य प्रकर्षस्यापि त्यागे हि तत्सम्भवो, ऽत्र तु तद्विपरित्यात्।(ख) किञ्च, उभयत्रोचितस्यैव प्रकर्षस्याभावे तत्सम्भवः। अत्र त्वेकतरत्रैव समासौचित्यमिति दूषकताबीजं सहृदयवैमुख्यम् ॥ (१५)

सङ्कीर्णम्, वाक्यान्तरपदेन मिश्रम्। यथा—

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम्।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम् ॥

अत्र पादगतं हृदयनाथं किमिति न पश्यसि, इमं कण्ठे गृहाण, कोपं मुञ्चेति वाक्यत्रये ऽन्योन्यवाक्यस्थपदमादायानभिमतं प्रतीयते। इदमेव च दुष्टिबीजं, प्रतीतिविलम्बो वा। एकवाक्ये क्लिष्टत्वमिति ततो भेदः। ॥ (१६)

गर्भितम्, जातगर्भम्। अन्तःस्थितवाक्यान्तरवाक्यमित्यर्थः। तत्र(ग)

(क) कोप एव इति पाठस्तु न प्रलक्ष्यः।
(ख) तद्विपरीत्यमिति पु०।
(ग) तत्त्विति पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाक्यं क्वचित्स्वाभावत एवैकं,(क) क्वचित्तु वाक्ये ऽवाक्यतयैकीभूतम्· तत्राद्यं यथा—

परापकारनिरतैर्दुर्जनैः सह सङ्गतिः, ।
वदामि भवतस्तत्त्वं, न विधेया कदाचन ॥

अत्र 'वदामि भवतस्तत्त्व'मिति वाक्यान्तरं प्रथमवाक्ये स्थितम् । द्वितीयं यथा—

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्याऽरिकण्ठे,
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती, ।
तत्सक्तोऽयं न किञ्चिद्गणयति, विदितं तेऽस्तु, तेनास्मि दत्ता
भृत्येभ्यः, श्रीनियोगाद्गदितु(ख)मिव गतेत्यम्बुधिं यस्य कीर्त्तिः ॥

अत्र "तत्सक्तोऽयं न किञ्चिद्गणयति" 'तेन भृत्येभ्यो दत्तास्मी'ति वाक्यैकवाक्यमध्ये "विदितं तेऽस्त्वि"तिवाक्यान्तरं स्थितम्· प्रत्युत 'लक्ष्मीस्ततो ऽपसरती'ति विरुद्धमतिकारित्वात् प्रकाशितविरुद्धत्वम्· प्रतीतिविच्छेदोऽत्र(ग) दुष्टिबीजम्· अतो न यत्र प्रतीतिर्विच्छिद्यते, तत्र नायं दोषः ॥ (१७)

प्रसिद्धिहतम्,(घ)

"मञ्जीरादिषु रणितप्रायं, पक्षिषु च कूजितप्रभृति, ।
स्तनितमणितादि सुरते, मेघादिषु गर्जितप्रमुखम्" ॥

इति प्रसिद्धिमतिक्रान्तम्· यथा—

महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥

(क) स्वभावादेवैकमित्यन्यत्र ।
(ख) वदितुमिति पु॰ ।
(ग) प्रतीतिच्छेदोऽत्रेति पु॰ ।
(घ) प्रसिद्धिहतमिति पु॰ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रवो मण्डूकादिशब्दे कविप्रसिद्धेः नतूक्तविशेषणाके(क) सिंहनादे. न चावाचकसङ्करः· तुल्येनैव रूपेणोभयत्र शक्तिसत्त्वेप्येकत्रैव कविप्रयोगनियमात्· अत एवायं वाक्यदोषः· विशेषणविशेषसन्निधानेन (ख)विशेषपरत्वादिति ॥ (१८)

भग्नप्रक्रमम्, भग्नः प्रक्रमः प्रस्तावाचित्यं यस्य, तत्· एतच्चा(ग)नेकधावस्थितम्· तत्र प्रकृतेः प्रक्रमभङ्गो यथा—

नाथे निशाया नियतेर्वियोगादस्तंगते हन्त निशापि याता, ।
कुलाङ्गनानां हि दशानुरूपं नातः परं भद्रतरं समस्ति ॥

अत्रा"स्तंगत"इति गमेः प्रकृतेः प्रस्तावे "याते"ति यातेः प्रयोगे प्रकृतिप्रक्रमभङ्गः· भिन्नाभ्यामुपस्थापितं भिन्नवद्भातीति कुलाङ्गनानां स्वामिसदृशावस्थाप्रतीतिर्न सम्भवति· तस्माद् 'गता निशापी'ति युक्तः पाठः· (घ)ननु "नैकं पदं द्विः प्रयोज्यं प्रायेणे"ति वामनसूत्रम्· अत्रापि कथितपदं दुष्टमनुपदमेवोक्तम्· तथाच पुनर्गमेः प्रयोगोपि दुष्ट एव स्यादिति चेत्, न, उद्देश्यप्रतिनिर्देश्याऽतिरिक्त ह्येकपदद्विःप्रयोग(ङ)निषेधविषयः· तादृशे तु विषये प्रत्युत तस्यैव पदस्य सर्वनाम्ना वा प्रयोगं विना दोषः· यथा—

उदेति सविता ताम्र,स्ताम्र एवास्तमेति च, ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥

इति· अत्र 'रक्त एवास्तमेति चे'ति यदि क्रियेत, तदा पदान्तरप्रतिपाद्यमानः(च) स एवार्थो भिन्न इव प्रतीयमानः प्रतीतिं व्यवदधीत। प्रत्ययस्य यथा—

यशो ऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा(छ)।

(क) विशेषणे इति, विशेषे इति च पा· ।
(ख) विशेषणविशेष्यसंनिधानेनेति पा· ।
(ग) तच्चेति पा· ।
(घ) युक्तपाठ इति क्वचित् ।
(ङ) द्विःप्रयोगेति क्वचित्· उभयथा च साधु ।
(च) पदान्तरप्रतिपद्यमान इति पाठान्तरं तु न प्रलक्षणम् ।
(छ) अपवर्त्तितुमिति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुत्सुकाना[क]मभियोगभाजां समुत्सुकेवाङ्कमुपैति लक्ष्मीः ॥

अत्र तुमुनः प्रक्रमे सनोऽभिधानमेकरूपप्रसृतां प्रतीतिं[ख]स्थगयति॰ 'सुखमीहितुं वे'ति युक्तः पाठः । सर्वनाम्नो यथा—

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥

अत्रा"स्मै"इतीदमा प्रक्रमात् "तद्विसृष्टा"इत्यत्राप्य'नेन विसृष्टा'॰ इत्येव वाच्यम्॰ नच तदिदमोरर्थाभेदः, इदमः प्रस्तुतप्रत्यक्षपरामर्शक॰ त्वात्, तदसत्वऽप्रत्यक्षपूर्वानुभूतपरामर्शकत्वात्॰ [ग]अन्यथा ऽनयोः [घ]पर्या॰ यतापत्तेः । पर्यायस्य यथा—

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ॥

अत्रापत्येषु बहुषु सत्स्वपि तस्मिन्नपत्ये स्नेहातिशयविवक्षणादप॰ त्यशब्दे प्रयोक्तव्ये पुत्रशब्दप्रयोगात् पर्यायप्रक्रमभङ्गः॰ केचित्व'ऽसति पुत्रे सुतायां स्नेहो युक्त, स्तस्य तु सत्यपि पुत्रे तस्यां सो ऽभूदिति विवक्षणाचात्र दोषप्रतीति'रिति समादधिरे॰ तदयुक्तम्, "अनन्तपुष्पस्य मधोर्हि चूत" [ङ] इति दृष्टान्तवैषम्यप्रसङ्गात्॰ अत्र च सामान्यविशेषभावेनोपादानाद्दार्ष्टा॰ न्तिकेऽपि [च]तथैवौचित्यात्॰ तस्मा'दपत्यवतोऽपी'ति युक्तः पाठः॰ नचात्रापि बहुत्वालाभाद्दृष्टान्तवैषम्यम्॰ अपत्यान्यऽस्य सन्तीति बहुत्व एव [छ]मतु॰ पो विधानात्॰ एतेन "साधुरेव 'पुत्रवत' इति पाठ" इत्यतः "केचि"॰ दित्यन्तेन साम्प्रदायिका इत्यर्थकेन वृत्तिकृतो ऽत्रानुमतिरेवेति चण्डी॰ दासमतमनादेयम्॰ अथापत्यपुत्रशब्दयोः कथं पर्यायता॰ तत्र केचित्,

(क) निरुत्सुकानामिति सर्वत्रोपलभ्यते,ऽथापि न्याय्यत्वादनुत्सुकानामिति स्थाप्यते ।

(ख) एकरूपतापतीतिमिति पु॰ ।

(ग) तदसत्वप्रत्यक्षपूर्वानुभूतपरामर्शकत्वादित्येतावन्मात्रमत्र स्थाने खल्वेकत्र पुस्तके नास्ते ।

(घ) अन्यथा तयोरिति पु॰ ।

(ङ) अनन्तपुष्पस्य चूत इति पु॰ ।

(च) एकत्र 'अपि'र्न पठ्यते ।

(छ) बह्वर्थे एवेति पु॰ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपत्यपर्य्यायोऽपि पुत्रशब्दः· अन्यथा पुत्रीत्यत्र स्त्रीप्रत्ययस्य(क) कुत्रान्वय इत्याहुः· तन्न युक्तम्, तथा सति दोषस्यैवाऽप्रसङ्गाद्, अपत्यार्थकत्वावि- शेषात्· तस्मात्पर्य्यायत्वमेकार्थप्रतिपादकत्वमात्रम्, नत्वेकप्रकारकप्रतीति- जनकत्वमपि· अत एव लघुतामुपक्रम्या'गरीया'नित्युक्तावपि पर्य्यायप्रक्रम- भङ्ग उच्यते· यथा—

विपदोऽभिभवन्त्यऽविक्रमं, रहयत्यापदुपेतमायतिः, ।
नियता लघुता निरायते,रगरीयान्न पदं नृपश्रियाम्(ख) ॥

इति· अत्रैव विपदापदोरुपसर्गप्रक्रमभङ्गोऽपि(ग)द्रष्टव्यः· 'तदभिभव कुरुते निरायतिम्, लघुतां भजते निरायतिर्लघुताभागऽपदं नृपश्रिया'मिति पाठो युक्तो, यदि न च्छन्दोभङ्गः ॥

काचित् कीर्णा रजोभिर्दिवमनुविदधे(घ)मन्दवक्त्रे(ङ)न्दुलक्ष्मी- रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः, ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमानाः,
प्रस्थाने पार्थिवानामशिवमिति पुरोभावि नार्य्यः शशंसुः ॥

अत्र 'काचि'दित्युपक्रम्य 'काश्चि'दिति वचनप्रक्रमभङ्गः· तस्मा- 'त्काश्चित्कीर्णा रजोभिर्दिवमनुविदधुर्मन्दवक्त्रेन्दुशोभा निःश्रीका' इति पठनीयम्· "कम्पमाना" इत्यत्र च कम्पमापु(च)रिति पठनीयम्· शतृशानचो- र्गुणीभूतक्रियान्तराभिधायकत्वनियमात्· नचात्र क्रियान्तरं प्रधानमस्ति,(छ)

गाहन्तामम्हिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं,
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु,(ज) ।

(क) पुत्रस्त्रीप्रत्ययस्येतिपाठस्तु कथंचिदुपयोजनीयः ।
(ख) नृपश्रिय इति प्रायः पठ्यते ।
(ग) एकत्राऽपिक्कारररचितं पठ्यते ।
(घ) विदधाविति पा· ।
(ङ) भिन्नवक्त्रेति क्वचित् ।
(च) कम्पमापुरिति पा· ।
(छ) आख्यातप्रक्रमभङ्गप्रसङ्गाच्च—इति खल्वेकत्र पुस्तके ऽत्राऽधिकं भवति ।
(ज) रोमन्थमभ्यस्यतामित्यात्मनेपदीयस्त्वेकतमपुस्तकस्थः पाठोऽपि साधुः एव चाभ्यस्यतामित्यनेन पदप्रक्रमप्रकल्पनमुद्द्योतकृतः भवति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विश्रब्धैः (क)क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले,
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥

अत्र "गाहन्ता"मितिकर्तृकारकवाचितिङः प्रक्रमे "क्रियता"मिति कर्मकारकवाचकस्य· 'विश्रब्धा रचयन्तु शूकरवरा'इत्यदुष्टम् ।

अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा (ख)
ववितथमदाध्माते रोषान्मुनावभिगच्छति(ग) ।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात्पाणिः पादोपसंग्रहणाय च ॥

अत्र तपस्तेजोवीर्य (घ)क्रमेणोपक्रम्य तदुभयोचितयोः पादोपसंग्रह-(ङ)धनुर्ग्रहणयोः पौर्वापर्यं योग्यम्· "यथासङ्ख्यमनुदेशः समाना"मितित्यायादिति तदन्यथाकरणे क्रमप्रक्रमभङ्गः । एवमन्यदप्यूह्यम्· अत्र सर्वत्रैकरूपप्रसृताया प्रतीतेः स्खलन(च)मुपघातो वा दूषकताबीजम्· यदुक्तम्—

"प्रक्रमस्यान्यथात्वेन प्रतीतौ प्रस्खलद्गतौ ।
ह्लादः स्फुरच्छ्रनास्वादो यत्र म्लानत्वमश्नुते ॥
दोषप्रक्रमभेदाख्यः शब्दानौचित्यभूश्च सः"

इति· अत एव नित्यदोषोयम्· ॥ (१९)

अक्रमम्, अविद्यमानः क्रमो(छ) यत्र, तत्· यत्पदानन्तरं यत्पदोपादानमचितं, ततोन्यत्र तदुपादानं यत्रेत्यर्थः· यथा—

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

(क) विसब्धैरिति विश्रब्धैरिति च भवतः क्वाचित्कौ पाठौ ।
(ख) तपोनिधावितित्वेकस्यो नातियुक्तः ।
(ग) ०वभिधावतीति पाठान्तरम् ।
(घ) तपस्तेजोवीर्यरोषावित्येकत्र पठ्यते, तेजोवीर्यरोषाविति चोभयत्र· "अत्र तपस्तेजोवीर्यं क्रमेणेति पाठ" इति तूद्योतः· अत्र पाठानां पराम्परापरिप्राप्तेऽपि नानात्वे टीकासम्मत पाठार्हत्वाच्चान्तः ।
(ङ) पदोपसङ्ग्रहेत्यन्यत्रास्ते ।
(च) स्थगनमिति त्वेकत्र ।
(छ) क्रमे इति त्वयुक्तः पाठः खल्वेकत्रत्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र "लोकस्य चे"ति चकार"स्त्वं"शब्दानन्तरं युक्तः, 'त्वं'शब्दार्थस्यैव शोच्यतायां समुच्चयस्य द्योतनीयत्वात्, लोकपदार्थे समुच्चयाभावात्, अथाऽपदस्यपदादस्य को भेदः· "तत्र प्रतीत्यन्तर,मत्र सैव प्रतीतिः, किन्तु विलम्बिते"ति(क) केचित्· तच्च, "कुटिलाताम्रच्छवि"रित्युदाहृतेऽपदस्यपदे प्रतीत्यन्तराभावात्· वयं तु ब्रूमः–अव्यवधानेनैव यत्राभिमतप्रतीतिजननसामार्थ्यं, तदेतस्य विषयो,ऽन्यः पुनरितरस्य· चादीनां चाव्यवहितपदार्थेष्वेव समुच्चयादिद्योतकता· यदुक्तं महिमभट्टेन–

"अत एव व्यवहितैर्बुधा नेच्छन्ति चादिभिः ।
सम्बन्धं, ते हि स्वां शक्तिमुपदध्युरनन्तरे ॥"

इति· नच नञोऽप्यव्यवहितस्यैव तथात्व,मतः "स्रजत्र काचिद्विरहा"वित्यादिकमप्यक्रमभेदः स्यादिति वाच्यम्, "न खलु न खलु बाणसंनिपात्यो ऽयमस्मि"न्नित्यादौ व्यवधानेपि प्रतीतिविशेषाभावात्· नचायं चादिपदेष्वेव दोषः, किन्त्वि'त्थ'मादिपदेष्वपि· (ख) यथा–

शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ !, दोषाकरश्री-
र्वक्त्रे, पार्श्वे तथैषा प्रतिवसति महाकुट्टनी(ग) खड्गयष्टिः, ।
आज्ञेयं सर्वगा ते प्रसरति च पुरः, (घ) किममया वृद्धया ते,
प्रोच्येवेत्थं (ङ) प्रकोपात्सितकरसितया यस्य कीर्त्या प्रयातम् ।

अत्र "इत्थं प्रोच्येवे"ति वाच्यम्, 'इत्थं' शब्दस्याऽव्यवहितपरामर्शकत्वात्, पादत्रयस्यैव च परामर्शनीयत्वात्· एवं "लग्नं रागावृताङ्ग्ये"त्यादावपि 'इति श्रीनियोगा'दिति वाच्यम्, 'इते'रपि तत्तुल्यत्वात् दूषकताबीजं चोद्देश्यप्रतीतिविरह इति नित्योऽयम् ॥ (२०)

अमतपरार्थम्, अमतः परार्थो द्वितीयो ऽर्थो यस्य, तत्, अमतत्वं च-

(क) किन्तु लम्बितेति पाठः ।
(ख) किन्त्वित्थमादिष्वपीति पु· ।
(ग) महाकुट्टिनीति त्वन्यत्र ।
(घ) प्रसरति पुरतः–इति पुस्तकान्तरम्· 'विलसति च पुनः'–इति महेश्वरसंमतः पाठः ।
(ङ) प्रोच्यैवेत्थमिति पाठस्तु न युक्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"ज्ञेयौ शृङ्गारबीभत्सौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥"

इत्याद्युक्तदिशा प्रकृतरसविरुद्धरसव्यञ्जकत्वम्· यथा—

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥

अत्र प्रकृतस्य बीभत्सस्य विरोधी शृङ्गार,स्तस्य व्यञ्जको द्वितीयोऽर्थः· तादृशार्थोपस्थित्या रसापकर्षकता ऽस्य दोषत्वबीजम्· अतो नित्योयं दोषः, नीरस आत्मलाभस्यैवाभावात् ॥ (२१) ॥ ५३ ॥ ५४ ॥ ऽ ॥

अथार्थदोषलक्षणान्याह—

अर्थोऽपुष्टः, कष्टो, व्याहत,पुनरुक्त,दुष्क्रम,[क]ग्राम्याः, ॥ ५५ ॥
संदिग्धो, निर्हेतुः, प्रसिद्धि,विद्याविरुद्धश्च, ।
अनवीकृतः, सनियमा,नियम,विशेषा,विशेषपरिवृत्तः,[ख] ॥५६॥
साकाङ्क्षो,ऽपदमुक्तः,[ग]सहचरभिन्नः प्रकाशितविरुद्धः, ।
विध्य,नुवादायुक्त,स्त्यक्तपुनःस्वीकृतो, ऽश्लीलः ॥ ५७ ॥

पददोषलक्षणसूत्रस्थं दुष्टमितिपदं लिङ्गविपरिणामेन सम्बध्यते· तत्राऽपुष्टः, पुष्टाद्भिन्नः· पुष्टत्वं च विवक्षितार्थबाधप्रयोजकानुपादनत्वम्· तद्विरहश्च द्विधा—अप्रयोजकत्वात्, प्रयोजकत्वेप्यन्यलभ्यत्वाच्च· यमेनं "व्यर्थमाहुर्गतार्थं य,द्यच्च स्याचिष्प्रयोजन"मित्यनेन भोजराजो "व्यर्थ"माह· अत एव प्रकाशकारो ऽपि· "अत्रातिविततत्वादयो[घ]ऽनुपादनेपि प्रतीयमानमर्थं[ङ]च बाधन्त"इत्येवाह 'नत्वप्रयोजका एवे'ति· उदा०—

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः ।

(क) दुःक्रमेति त्वेकस्यो दुःस्थः पाठः ।
(ख) सनियमाऽनियमविशेषाविशेषपरिवृत्ताः—इति क्वचित् ।
(ग) साकाङ्क्षोऽपदयुक्तः—इति क्वचित् ।
(घ) "अत्र विततत्वादय"इति प्रायो लभ्यते ।
(ङ) प्रतिपाद्यमानमर्थमिति महेश्वरसंमतम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मरुदुल्लासितसौरभकमलाकरहासकृ[क]द्रविर्जयति ॥

अत्रातिविततं निरवलम्बे व्योम्न्यविश्रामं गमनाद्दिनराऽप्रकाश्यकमलप्रकाशनाच्च रवेरुत्कर्षो विवक्षितः, स्तत्रातिविततत्वं गगनस्यार्थादेवावगम्यते, ऽग्नेरवैष्ण्यम्· सर्वाणत्वं मरुदुल्लासितसौरभत्वं चाप्रयोजकमेवेत्यपुष्टा एते ऽर्थाः· नन्वेते ऽर्था अपुष्टा इति सिद्धम्· परं त्वतिविततेति पुनरुक्तः, गगनपदादेव तदुपस्थितेः· मरुदुल्लासितसौरभेति विरुद्धम्, विकासात् पूर्वं सौरभाभावेन तद्विशिष्टस्य सूर्य्येणाप्रकाश्यत्वादिति नायं पृथगिति चेच्, गगनपदं हि न विततत्वे शक्तम्· अर्थलभ्यत्वे च न पुनरुक्तता· यदुक्तं भोजराजेन "काव्येतिहासादावार्थ्या वृत्त्या[ख]लब्धस्य साक्षाद्ग्रहणमपि नरुक्त्याये"ति· [ग]नापि विरुद्धम् सौरभस्योपलक्षणत्वात्· यद्वा चित्रहेतुपुरस्कारेण पूर्वभावाभिधानात्· अथाधिकपदादस्य को भेदः· अप्रयोजकप्रयोजनाभावकृतोऽपि भेदो न सम्भवति· अत्र कश्चित्, तत्र पदार्थान्वयसमकालं दुष्टत्वप्रतिभास, इह तु तदनन्तरमिति विशेष इति· तच्चातिसमीचीनम्, तथानियमे प्रमाणाभावात्· एतावता च विशेषेण शब्ददोषत्वमेकस्या, ऽपरस्यार्थदोषत्वमिति विभागानुपपत्तेश्च· विरुद्धमतिकृद्मतपरार्थादौ शब्ददोषे ऽन्वयप्रत्ययोत्तरमेव दुष्टत्वप्रतिभासात्· वय तु पश्यामः—यत्र विवक्षित एवार्थो ऽन्यथाभिधानेऽपि दुष्यति, सो ऽर्थदोषो, ऽन्यस्तु रसदोषभिन्नः शब्ददोष इति विवेकः· तथा च यत्राविवक्षितो ऽप्यर्थः कथञ्चिदन्विततयाभिधीयते, तत्राधिकपदत्वम्, तत्पदेन विना ऽपि तन्निर्वाहात्· यत्र तु सोऽर्थो विवक्षित एव· परन्त्वप्रयोजकत्वान्यलभ्यत्वाभ्यां शब्देनोपादातुमनर्हं, स्तत्रापुष्टत्वम्· "स्फटिकाकृती"त्यत्र नाकृतिपदार्थ उपमानत्वेन विवक्षितः, तस्य नैर्मल्याभावात्· "यदपि च न कृतं नितम्बिनीना"मित्यत्रापि च रतस्य स्तनपतनावधित्वव्यतिरेक एवानुचितत्वेन विवक्षितो, नतु तत्कृतिव्यतिरेकः, पूर्वार्द्धे तथै-

(क) कमलाकरविकासकृदिति पाठस्तु टिप्पणिकारपरिवृत्तः प्रतिभाति ।

(ख) ०वर्थवृत्त्येति पा· ।

(ग) अत्र "परन्त्वपुष्टत्वमेवे"त्येतावदेकत्र पुस्तकेऽधिकं भवति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वोपक्रमात्,(क) किन्तु च्छन्दोनुरोधादिना द्वयमपि कथञ्चिदन्वितत्वेनोपात्तमित्यधिकपदत्वम्· "अतिविततै"त्यादौ त्वतिविततत्वादिकं वक्तुर्विवक्षितमेव· परन्त्वर्थलभ्यत्वाद्विना नोपादानार्हमित्यऽपुष्टम्· व्यक्तं च पूर्वस्य शब्ददोषत्व,मुत्तरस्य चार्थदोषत्वमिति· दूषकताबीजं चाशक्त्युन्नयनेन श्रोतुर्वैमुख्यम्· अत एव यमकादावदोषता, तत्रालङ्कारान्तरारम्भेणा(ख)शक्त्युन्नयनात्· कर्णावतंसादिपदे च विशेषद्योतकतया तदुपादानं नाशक्त्युन्नायकमित्यदुष्टत्वम्· अत एव विशेषणादानार्थविशेष्यप्रयोगेपि दोषाभावः ॥ (१)

कष्टः, प्रतीतिक्लेशवान्, दुरूह इत्यर्थः· यथा—

सदा मध्ये यासामियममृतनिस्यन्दसरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिमलम्, ।
प्रसादं ता एता घनपरिचिताः(ग) केन महतां
महाकाव्यव्योम्नि स्फुरितरुचिरा यान्तु रुचयः ॥

अत्र 'यासां कविरुचीनां मध्ये सुकुमारविचित्रमध्यात्मकमार्गत्रयवती भारती चमत्कारं वहति· ता गम्भीरकाव्ये घनपरिचिताः कथमितरकाव्यवत् प्रसन्ना भवन्तु· तथा, यासामादित्यप्रभाणां मध्ये त्रिपथगा नदी सम्बन्धं वहति· ता मेघपरिचिताः कथं प्रसन्ना भवन्ती'त्यर्थो विवक्षितः· स च शब्दान्तरैरपि क्लेशेनैव प्रतीयत इत्यर्थ एवायं दुष्टः· क्लिष्टत्वादिकं शब्ददोषः, घटनान्तरेणास्य सुखेनैव प्रतीतेः· सम्यक्प्रतीतिविरहश्च दूषकताबीजम्· अतो नित्योयं दोषः ॥ (२)

व्याहतः,

"उत्कर्षो वापकर्षो वा प्राग् यस्यैव निगद्यते ।
तस्यैवाथ तदन्यश्चेद्, व्याहतो ऽर्थस्तदा भवेत्" ॥

इत्युपलक्षितविरुद्धत्ववान्· यथा—

(क) तथैव क्रमादिति पु· ।
(ख) ०रम्भेनेति तु बालिशपाठः ।
(ग) घनपरिचया इति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जयति जयिनस्ते ते भावा नवेन्दुकलादयः[क]
प्रकृतिमधुराः सन्त्येवान्ये, मनो मदयन्ति ये, ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं, जन्मन्येकः स एव महोत्सवः ॥

अत्र पूर्वार्द्धे साधारणं चन्द्रिकाचन्द्रकलाः स्वं प्रत्य ऽसारतया प्रतिपादिता,[ख] स्तेनैवोत्तरार्द्धे चन्द्रिकात्वमुत्कर्षायारोप्यत इति व्याघातः· दूषकताबीजं च वाच्यार्थप्रतीति,रयं नित्यो दोषः ॥ (३)

पुनरुक्तः, शब्देन प्रतिपन्नत्वे सति पुनस्तेनैव प्रतिपादितः· अर्थेन प्रतिपन्नस्य प्रतिपादने अपुष्टत्वमुक्तम्· यत्तु प्रयोजनं विनेति विशेषणमिति· तदयुक्तम्· एवं सत्यऽस्याऽनित्यदोषत्वं न स्यात्· प्रयोजनस्थले पुनरुक्तत्वस्यैवाऽभावप्रसङ्गात्· स चायं द्विधा, पदार्थवाक्यार्थभेदात्· तयोराद्यो यथा–"अरे रे अर्जुनार्जुन! सात्यके सात्यके[ग]! न युक्त ईदृशो मम तातस्य[घ] सुतशोकभ्रान्त्या न्यस्तशस्त्रस्य दिवमुपगच्छतः केशाकर्षणरूपः परिभवः· अपि वा,[ङ]

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः, ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥"

अत्रा'र्जुनार्जुने'तिसम्बोध्य 'यैर्भवद्भि'रित्यनेन परामृश्य[च] तेषामित्यनेन परामर्शादर्ज्जुनस्यापि प्राप्तेः 'सभीमकिरीटिना'मिति किरी·

(क) पुस्तकान्तरे नवेन्दुकलादयइत्यत्र मकारं प्रक्षिप्य कमलादय इत्यकल्पयत्कश्चित्तत्तूदात्तत्वप्रदर्शनमात्रं तस्येति ।

(ख) साधारणं चन्द्रिकाचन्द्रकला स्वं प्रत्यसारतया प्रतिपादिता–इति एकत्र पुस्तके ऽस्ति ।

(ग) एकत्र 'सात्यके'–इति सकृदेव पठ्यते ।

(घ) मत्तातस्येति पाठस्त्वर्थाऽविशेषेऽपि न युक्तः ।

(ङ) अपि चेति पु· ।

(च) परामृश्येति परामर्शादिति च पाठो ऽपि नातिशायकः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

टिपदार्थः पुनरुक्तः· नच प्राधान्यप्रतिपत्तये पुनरुपादानमित्यदोषता, संबोधनेनैव तल्लाभात् । वाक्यार्थस्य पुनरुक्तत्वं यथा—

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थिते ऽस्मिन्मम पितरि गुरौ सर्व्वधन्वीश्वराणाम् ।
कर्ण! ऽलं सम्भ्रमेण, व्रज कृप! समरं, मुञ्च हार्दिक्य! शङ्कां,
ताते चापद्वितीये वहति रणधुरां(क) को भयस्यावकाशः ॥

इत्यत्र 'अलं सम्भ्रमेण को भयस्यावकाश' इत्यऽभिचार्थौ· नच वक्तृरौद्ररसाविष्टत्वं समाधानमाशङ्कनीयम्, वीरस्यायुक्तकारित्वावर्णनात्· दूषकताबीजं च निष्प्रयोजनाभिधानेन श्रोतुर्वैमुख्यम्· अत एव प्रयोजनसत्त्वेनाऽदोषत्वादनित्योयं दोषः· केचित्तु—अर्थप्राप्तस्यापि वचने पुनरुक्तता· तदुदाहरण"मस्त्रज्वाले"ति· अप्रयोजकाभिधानमात्रस्थलेत्वऽपुष्टार्थत्वमित्याहुः ॥ (४)

दुष्क्रमः, दुष्टक्रमः· दुष्टत्वं च क्रमस्य लोकशास्त्रविरुद्धत्वम्· तत्राद्यं यथा—

भूपालरत्न! निर्दैन्यप्रदानप्रथितोत्सव! ।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम् ॥

अत्र तुरङ्गभूयिष्ठं प्रति 'मातङ्गं देहि तुरङ्गं वे'ति लौकिकक्रमः, गुरुदानाशक्तौ लघुदानौचित्यात्· वक्तुश्च यथास्थित एव क्रमो विवक्षित इत्यर्थदोष एवायम् । द्वितीयं तु

कावारिऊण(ख)खउरं गामडलो मज्जिऊण जेमिअ अ ।
णक्खत्तं तिहिवारे जोइसिअं पुच्छिदुं चलिदो ॥

नक्षत्रादिज्ञानपूर्व्वकं क्षौरस्य शास्त्रेण विधानात्तद्विरुद्धमिदम्· दूषकताबीजं च विरोधेनाऽप्रतीतिः, सहृदयोद्वेगो वेति नित्य एवायम् ॥ (५)

ग्राम्यः ग्रामसंभवः· अविदग्धोक्तिप्रतिपादितो रिरंसान्दिः·(ग) यदुक्तम्—

(क) रणधुरमिति प्रायः सर्वत्रोपलभ्यमानत्वे ऽपि रणधुरामिति न्याय्यमिति न्यस्यते ।

(ख) कारविऊणखउरअं—इति पु· ।

(ग) रिरंसादिश्चेति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"स ग्राम्यो ऽर्थो रिरंसादिः पामरैर्यच्च कथ्यते ।
वैदग्ध्यवक्रिमबलं हित्वैव वनितादिषु" ॥

इति यथा–

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते।
तदुपसंहर[क] कूर्परमायतं त्वरितमूरुमुदञ्चय कुञ्चितम् ॥

अत्र 'निकटे तावदहं स्वपिमी'त्यविदग्धस्य रिरंसोक्तिः एवमन्यत्. दूषकता चाश्लीलवत् किञ्चैतादृशोक्तिकवलितो विभावादिरूपो ऽर्थो न रसाय पर्य्याप्यते, भृष्टमिव बीजमङ्कुरायेति ॥ (६)

संदिग्धः, सन्देहविषयः तत्प्रयोजकरूपवानिति यावत् यथा–

मात्सर्य्यमुत्सार्य्य विचार्य्य कार्य-
मार्य्याः समर्य्यादमुदाहरन्तु ।[ख]
सेव्या नितम्बाः किमु भूधराणा-
मुत स्मरस्मेरविलासिनीनाम् ॥

अत्र भूधरनितम्बानां कामिनीनितम्बानां वा सेव्यत्वं व्यञ्जनया प्रतिपिपादयिषितं द्वितीयेन संदिह्यते, प्रकरणाद्यभावात् यत्तु वक्तृविशेषसन्देह इति व्याख्यानं सर्वमान्यानाम्, तदुत्तानताविलसितम् वक्तुः पदवाक्यार्थत्वाभावेन तत्सन्देहस्यार्थदोषत्वाभावात् अतएव ध्वनिकृता[ग] वक्तृविशेषनिश्चयः सन्देहाभावप्रयोजकत्वेनोक्तः तन्निश्चये एकतरनितम्बस्य सेव्यत्वनिर्णयेनाऽसन्देहात् "वन्द्या" मित्यादौ द्वितीयासप्तम्यन्तत्वाभ्यां पद एव सन्देहो, ऽत्र तु पदानामसन्दिग्धत्वे सत्येव इति पदसंदिग्धत्वाद्भेदः दूषकताबीजं च उद्देश्यनिश्चयविरहः यत्र तु तत्सन्देह एवोद्देश्यस्तत्रादोषत्वमेवेति ॥ (७)

निर्हेतुः, निष्क्रान्तो हेतुर्यस्मात् यथा–

(क) तदपि संहरेति पुस्तकान्तरं तु न प्रलब्धम् ।
(ख) ०मिदं वदन्त्विति प्रायः कोशे ।
(ग) "ध्वनिकृते" त्येकत्रास्ति पुस्तके ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभूच्च खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमसि सुतशोकान्नतु भयाद्-
विमोक्ष्ये शस्त्र! त्वामहमपि ततः[क] स्वस्ति भवते ॥

अत्र स्वशस्त्रत्यागे हेतुर्नोपात्तः· ननु हेतुं विना[ख]प्रतीतिः पर्य्यवसानं, न वा· आद्ये दोषाभावः· अन्त्ये साकाङ्क्षसङ्कर इति· अत्र कश्चित्, उपात्तस्य परेणानन्वये साकाङ्क्षत्वम्· अनुपादाने निर्हेतुत्वमिति विशेष इति· तन्न, साकाङ्क्षोदाहरणे उपेक्षितुमित्याकाङ्क्षतीत्यनेनानुपात्तसाकाङ्क्षताया एव वृत्तौ प्रदर्शनात्· तस्मात्, हेतुतद्भिन्नसापेक्षतया द्वयोर्भेद इत्येव न्यायः· यद्वा, अत्राऽप्रतीतिमात्रम्, तत्र तु विरुद्धा प्रतीतिः, स्वैरव एवामर्षप्रतीतेरिति[ग]विशेषः· दुष्टिबीजं च उद्देश्यप्रतीतिविरहः· अत एव प्रसिद्धावनुपादानेऽपि न दोषः ॥ (८)

प्रसिद्धिविरुद्धो लोकस्य कवेर्वा यत्रार्थे न प्रसिद्धिः· यथा—

इदं ते केनोक्तं कथय कमलातङ्कवदने!
यदेतस्मिन्हेम्नः कटकमिति धत्से खलु धियम् ।
इदं तद्दुःसाधाऽऽक्रमण[घ]परमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥

अत्र कामस्य चक्रं लोके कविमार्गे वा न प्रसिद्धमिति प्रसिद्धविरुद्धः· यत्र तु लोकस्य कवेश्च प्रसिध्योर्विरोध,स्तत्र कविप्रसिद्धेर्बलवत्त्वम्· तथाच[ङ] लोकविरुद्धेऽपि कवीनां यथा यत्र समय,स्तत्र न दोषः· यथा—

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः, ।

(क) यत इति पा· ।
(ख) तं विनेति पु· ।
(ग) प्रतीतिरितीति पाठस्तु न युक्तः ।
(घ) दुःसाध्याक्रमणेत्येकत्र, दुःसाध्यक्रमणेति चान्यत्रास्ते· न त्वतियुक्तम् ।
(ङ) चेनास्ते एकत्र ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
पतिगृहमगान्मुक्ताशङ्का, क्व नाऽसि शुभप्रदः ॥

अत्र कीर्त्तेर्मूर्त्तत्वं, ज्योत्स्नावत्मकाशकता च लोकविरुद्धे अपि कविसमयसिद्धे इत्यऽदोषः · एवमकीर्त्यादेर्म्मालिन्यादौ द्रष्टव्यम्· यत्तु-

उपपरिसरं गोदावर्य्याः परित्यजता ऽध्वगाः?
सरणि,मपरो मार्गस्तावद्भवद्भिरवेक्ष्यताम्(क) ।
इह हि विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥

इति कविसमयसिद्धोदाहरणम्· तदयुक्तम्, चरणन्यासेनाऽशोकाङ्कुरोद्गमस्य कवीनामप्यऽसम्मतेः, पुष्पोद्गम एव तेषां समयात्· दूषकतावीजं च विरोधादर्थाप्रतीतिरित्युत्पातादिना (ख) तत्प्रतीतावऽदोषः ॥ (९)

विद्याविरुद्धः, शास्त्रेण विरोधवान्· स चाऽयं शास्त्रभेदाद्भिद्यते· तत्र धर्म्मशास्त्रविरुद्धो यथा–

सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥

ग्रहोपरागादिकं विना रात्रौ स्नानं धर्म्मशास्त्रेण प्रतिषिद्धमिति तद्विरुद्धोऽयमर्थः । अर्थशास्त्रविरुद्धो यथा–

अनन्यसदृशं बाह्वोर्बलं यस्य विलोक्यते ।
षाड्गुण्यानुसृतिस्तस्य सत्यं स्यान्निष्प्रयोजना ॥

अत्र महाबलस्यापि सन्ध्यादिषड्गुणानुसरणमर्थशास्त्रेण विहितमिति तद्विरोधः । कामशास्त्रविरुद्धो(ग) यथा–

विधाय दूरे केयूरमनङ्गाङ्गणमङ्गना ।
बभार कान्तेन कृतां करजोल्लेखमालिकाम् ॥

(क) ०रिहेक्ष्यताम इति क्वचित् ।
(ख) ०"ऽप्रतीतिरिति· उत्पातादिने"ति पु· ।
(ग) कामशास्त्रे विरुद्धमिति प्रायः प्राप्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र केयूरपदे नखक्षतं कामशास्त्रविरुद्धम्,(क) बाहुमूलावयवविशेषे तस्य विधाना,दर्थतः शेषेषु प्रतिषेधात् । योगशास्त्रविरुद्धो यथा–

अष्टाङ्गयोगपरिशीलनकीलनेन
दुःसाध(ख)सिद्धिसविधं विदधद्विदूरे ।
आसादयन्नभिमतामधुना विवेक-
ख्यातिं समाधिधनमौलिमणिर्विमुक्तः ॥

अत्र मुक्तिसमीपस्थमसंप्रज्ञातयोगमनपेक्ष्यैव मोक्षो योगशास्त्रे विरुद्धः· प्रथमं(ग) विवेकख्यातिः प्रकृतिपुरुषयोर्भिन्नत्वज्ञानरूपा· ततो वितर्क-विचाराद्यनुसारिरूपः संप्रज्ञातयोगः, पश्चात्संस्कारमात्राऽऽलम्बनस्वरूपोऽसं-प्रज्ञातयोग,स्ततो मुक्ति,र्नतु विवेकख्यातिमात्रत एवेति हि योगशास्त्रम् । एवं तुरगादिशास्त्रविरोधोऽप्यूहनीयः· अभिमतप्रतीतिविरहो दूषकता-बीजम् ॥ (१०)

अनवीकृतः, भङ्ग्यन्तरेण यन्नवत्वं तन्न प्रापितः· एकभङ्गिनिर्दि-ष्टानेकार्थ इत्यर्थः· यथा–

प्राप्ताः श्रियः सकलकामदुघा,स्ततः किं,
दत्तं पदं शिरसि विद्विषतां, ततः किम्, ।
सम्मानिताः प्रणयिनो विभवै,स्ततः किं,
कल्पं स्थितं तनुभृतां तनुभि,स्ततः किम् ॥

अत्र सर्वेष्वर्थेषु 'ततः किं'मित्येकैव भङ्गिः· अथैष कथितपद एवा-न्तर्भविष्यतीति चेन्न, पर्य्यायान्तरप्रयोगे भङ्गेरेकरूपतायामसाङ्कर्य्यात्·(घ) अथ नवीकृतं कीदृक्·

"यदि दहत्यनलो,ऽत्र किमद्भुतं, यदि च गौरवमद्रिषु, किं ततः, ।
लवणमम्बु सदैव महोदधेः, प्रकृतिरेव सतामविषादिता" ॥–

(क) शास्त्रे विरुद्धमिति पु· ।
(ख) दुःसाध्येति क्वचित् ।
(ग) प्रथममित्येकत्र नास्ति ।
(घ) ०मसंकरादिति क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इतीदृक्. अत्र हि सतामविषादिता या, सा स्वाभाविकीति नाश्चर्याय,(क) यथा ऽनलादेर्दाहकत्वादीति विवक्षितम्. तच्च च "ततः कि"मित्यादिना 'किमद्भुत'मित्यादि नवीकृतम्. पिष्टपेषणादिन्यायेन(ख) पाल्प्येना, ऽशक्तिप्रकाशनेन वा हृदयोद्वेजकत्वं दूषकताबीजमिति निर्णेयम् ॥ (११)

सनियमादिभिश्चतुर्भिः परिवृत्तपदान्वयात् सनियमपरिवृत्तादिचतुष्टयं लभ्यते. परिवृत्तिश्च सनियमानियमयोर्विशेषाविशेषयोश्च. अविशेषः सामान्यम्. तत्र सनियमपरिवृत्तः सनियमत्वेन वक्तुमुचितोऽनियमत्वेनोक्तः. नच न्यूनपदत्वे ऽनभिहितवाच्यत्वे वानुप्रवेशः, तादृशार्थे विवक्षिते तयोरवकाशात्. अविवक्षिते त्वेतत्प्रसरात्. अत एवायमर्थदोषः. विवक्षितमात्रस्य पदान्तरेणाप्युपस्थितौ तस्य तादवस्थ्यात्. एवमितरेष्वप्यूह्यम्. यत्तु, अर्थत्वेनविशेषणं समाधानमिति, तच, न्यूनपदादिषु त्रिषु अयाथा सङ्करप्रसङ्गात्. चण्डीदासस्तु "शब्दोच्चारणानन्तरमेव यत्प्रतिभासः, स शब्ददोषो, यस्य त्वर्थप्रत्ययानन्तरं, सो ऽर्थदोषः. अस्य त्वर्थप्रत्ययानन्तरमेवत्य ऽसावर्थदोषः अत एवानाभिहितवाच्याद्भिद्यत" इत्याह तच्चायुक्तम्. बहुषु स्थानेषु व्यभिचाराच्छब्दार्थविभागस्यासङ्गतत्वात्. उदाहरणम्—

> यत्रानुल्लिखितार्थमेव(ग) निखिलं निर्म्माणमेतद्विधे-
> रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा, ।
> याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्सम्पद-
> स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम् ॥

अत्रान्यापदेशे आभासमात्रेण मणीकृतेष्विति वाच्यम्, गुणान्तरव्यावर्त्तनेन निन्दातिशयप्रतीतेः. अनियमे तु ननिन्दनीयानां गुणान्तराणामवच्छेदप्रत्ययः. तस्मा'च्छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिते'ति

(क) सतामविषादिता स्वाभाविकीति नाश्चर्यायेति पु. ।
(ख) "पिष्टपेषणादिन्यायेने"ति पुस्तकान्तरे नास्ति ।
(ग) यत्रानुल्लिखिताख्यमेवेति पा. ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पठनीयम्· अव्युत्पत्त्युन्नयनेन वैमुख्याधायकत्वं दुष्टिबीजम्· नित्यदोषोयम्[क] ॥ (१२)

अनियमपरिवृत्तो यथा—

वक्त्राम्भोजं सरस्वत्यधिवसति सदा, शोण एवाधरस्ते,
बाहुः काकुत्स्थवीर्य्यस्मृतिकरणपटुर्दक्षिणास्ते समुद्रः, ।
वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्ति देव![ख]
स्वच्छे ऽन्तर्मानसेऽस्मिन्नवतरति कथं तोयपानाभिलाषः ॥

अत्र शोण एवेति नियमो न वाच्यः, वैय्यर्थ्यात्· प्रत्युतान्यजलाशयानात्मकत्वप्रतीतौ पिपासानौचित्यातिशयाऽप्रतीतेः· अधिकपदभेदो दूषकताबीजं च पूर्ववत् ॥ (१३)

विशेषपरिवृत्तो यथा—

श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मसीकूर्चकै[ग],-
र्मन्त्रं तन्त्रमपि[घ] प्रयुज्य हरत श्वेतोत्पलानां त्विषम्[ङ], ।
चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलपट्टके,
येन द्रष्टुमहं क्षमे दश दिशस्तद्वक्त्रमुद्राङ्किताः ॥

अत्र "ज्योत्स्नी"मिति रात्रिविशेषो वाच्यः· अपरविशेषस्य स्वतएव श्यामत्वा,त्तत्राकाङ्क्षाविरहात्· इदमेव चात्र दूषकताबीजम्· अन्यत्र तु[च] विरोधादिकमपि तद्बीजं द्रष्टव्यम्· विशेषनियामकप्रकरणादिसत्त्वे त्वऽदोषत्वम् ॥ (१४)

सामान्यपरिवृत्तो यथा—

कल्लोलवेल्लितदृषत्परुषप्रहारैरत्नान्यमूनि मकराकर[छ]! मावमंस्थाः, ।
किं कौस्तुभेन भवतो विहितो न नाम याञ्चाप्रसारितकरः पुरुषोत्तमोपि ॥

(क) वैमुख्याधायकत्वमेव दुष्टिबीजमिति नित्यदोषोऽयमिति पु· ।
(ख) मुञ्चन्त्यऽभीक्ष्णमिति केचित्पठन्ति ।
(ग) मषीकूर्चकैरिति क्वचित् ।
(घ) तन्त्रमथेति क्वचित् ।
(ङ) श्रियमिति पा· ।
(च) एकत्र 'तु'कारो नास्ति ।
(छ) मकरालय—इति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'कौस्तुभेने'तिविशेषतो रत्नवचनं नोचितम्, कौस्तुभमात्रस्य प्रकारकत्वेनान्यावमाननिषेधायोगात्· 'एकेन किञ्च भवतो विहितः सं नामे'तिपाठे तु भेदानवगमाद्विवक्षितनिर्वाहः· अत्र विवक्षितानिर्वाहा दिकं च दूषकताबीजमिति नित्य एवायम्· ॥ (१५)

साकाङ्क्षः, सहाऽऽकाङ्क्षया वर्त्तते· इतरपदार्थान्वयाय विशेषणसाकाङ्क्ष इत्यर्थः· निर्हेतुभेदस्तु तदवसर एवोक्तः· उदा०—

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः, प्रत्युत
द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया; ।
उत्कर्षश्च परस्य, मानयशसोर्विस्रंसनं चात्मनः,
स्त्रीरत्नं च जगत्पतिर्दशमुखो देवः कथं मृष्यते ॥

अत्र स्त्रीरत्नमित्यस्यार्थे उपेक्षितुमित्यस्यार्थमाकाङ्क्षति· अन्यथा "कथं मृष्यत" इत्यनेनामर्षार्थकेनान्वयाऽप्रसङ्गः·(ग) नहि स्त्रीरत्न एवाऽमर्षः किन्तु तदुपेक्षायाम्· नचपरस्येत्यतदन्तर्भाव्य तदन्वयोऽस्त्विति वाच्यं, तस्य जनितान्वयबोधत्वेन निराकाङ्क्षत्वात्· [नचानुषङ्गः, "असम्बद्धव्यवायें तु वैषम्याच्चानुषज्यत" इत्युपगमात्·] नचाऽभवन्मतयोगसङ्करः, वक्तृविवक्षितयोगस्यात्र सत्त्वात्· परन्तु विवक्षित एवार्थः साकाङ्क्षतया दुष्टः अतएव न न्यूनपदान्तर्भावः· दूषकताबीजं चाऽभिधानापर्य्यवसानम् अतो नित्य एवायम्· कश्चित्तु—स्त्रीरत्नस्य "मृष्यत"इत्यनेन कथमाकाङ्क्षा तदर्थान्वयश्च· परस्येत्यन्तर्भाव्य सम्भवति· तच्च जनितान्वयबोधत्वेन निराकाङ्क्षमिति दूषणार्थः· अन्वयप्रयोजकरूपवत्त्वेनोपस्थितत्वे सत्यपर्यवसितान्वयत्वं च लक्षणं, मतो ऽभवन्मतयोगाद्भेदः, तत्रान्वयप्रयोजकरूपेणानुपस्थितेः· समाप्तपुनरात्ते विशेषणस्यापर्य्यवसानमिह तु विशेष्यस्येति ततो भेद'इत्याह· तद्वृत्तिविरोधादियस्तम्· ॥ (१६)

(क) 'विहितो नें'ति पुस्तकान्तरे, 'एकेन किञ्च विहितो भवत' इति च।
(ख) 'अत्र तदनिर्वाहे'ति पु· ।
(ग) ०र्थकेनान्वयप्रसङ्ग इति पु· ।
(घ) इत्येतावान्पाठः पुस्तकद्वये नास्ति· टीकागतोऽयं संदर्भः क्वचिदुपलब्धस्तट्टिप्पणीरूपेण· तदनुचाऽऽलेखकेनान्तर्लिखित इतीत्थं संवृत्त इति प्रतीमहे, प्राचीन्याद्इति मूलएव स्थापितः प्रस्खलितश्च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपदयुक्तः, अपदे अस्थाने युक्तः, यत्र तद्योगे प्रकृतविरुद्धप्रतीतिः· उदा०—

आज्ञाशक्रशिखामणिप्रणयिनी, शास्त्राणि चक्षुर्नवं,
भक्तिर्भूतपतौ पिनाकिनि, पदं लङ्केति दिव्या पुरी, ।
उत्पत्तिर्द्रुहिणान्वये च, तदहो नेदृग्वरो लभ्यते(क),
स्याच्चेदेष न रावणः, क्व नु पुनः सर्वत्र सर्वे गुणाः ॥

अत्र जगदाक्रन्ददायित्वादिना रावणस्य त्याज्यत्वं विवक्षितम्· तथाच 'स्याच्चेदेष न रावण' इत्यत्र 'क्व नु पुन'रित्यादि योजितं समाधाने पर्य्यवस्यतीति दुष्टम्· उत्पत्तिर्द्रुहिणान्वये चेत्यत्र यदि योज्यते तदा विवक्षितासिद्धिरेवेत्यपदस्यपदवदऽस्य दोषत्वम्·नच प्रकाशितविरुद्धान्तर्भावः, स्थानविशेषयोगमनपेक्ष्य तस्य प्रवृत्तेः· दुष्टिबीजं च विरुद्धप्रतीतिः· अतो नित्य एवायम्· केचित्तु—"अपदमुक्त"इति पठित्वा व्याचक्षते· अपदमुक्तः, पदे स्थाने यो ऽत्यक्तः·(ख)"आज्ञाशक्रे"त्यादौ च "स्याच्चेदेष न रावण"इत्येतावता विच्छेदे कापि कान्तिरनुभवसिद्धा, "जीवत्यहो रावण"इतिवत्· सोयमर्थोऽत्र चेच्च त्यज्यते, "क्व नु पुन"रित्यादिना विस्तार्य्यते, तदा मध्यप्रवेशेनायमर्थो ऽलक्षितप्राय(ग)श्चमत्कारञ्चावहतीत्यनुभवसिद्धमिति ॥ (१७)

सहचरभिन्नः, समभिव्याहृतविजातीयः· वैजात्यं चोत्कृष्टत्वापकृष्टत्वाभ्याम्· उदा०—

श्रुतेन बुद्धि,र्व्यसनेन मूर्खता, मदेन नारी, सलिलेन निम्नगा, ।
निशा शशाङ्केन, धृतिः समाधिना, नयेन चालंक्रियते नरेन्द्रता ॥

अत्र श्रुतबुद्ध्यादिभ्य उत्कृष्टेभ्यः समभिव्याहृतेभ्यो व्यसनमूर्खतयोर्निकृष्टयोर्विजातीयत्वम्· उभयोरुपादेयत्वमनुपादेयत्वं वा प्रतीयत इति दूषकताबीजम्· नित्यश्चायम् ॥ (१८)

(क) नेदृग्वरो लभ्यत इत्येकस्थः पाठस्तु नाऽत्यर्हः ।
(ख) "पदे स्थाने योगो ऽमुक्तः"—इति इति पुस्तकान्तरन्तु न युक्तम् ।
(ग) ०मर्थो लक्षितप्रायइत्येकत्रास्ते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशितविरुद्धः, प्रकाशितो विवक्षितार्थस्य विरुद्धोऽर्थो[क] येन वा-क्यार्थेन सः· सहचरभिन्ने पदार्थस्यैव तथात्वमिति ततो भेदः· उदा०-

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्याऽरिकण्ठे,
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती, ।
तत्सक्तोयं न किञ्चिद्गणयति, विदितं तेऽस्तु, तेनास्मि दत्ता
भृत्येभ्यः, श्रीनियोगाद्गदितुमिव[ख] गतेत्यम्बुधिं यस्य कीर्त्तिः ॥

अत्र 'विदितं तेऽस्त्व'ति वाक्यास्यार्थो 'लक्ष्मीस्ततोऽपसरतो'ति विरुद्धं प्रकाशयति· इदमेव च दूषकताबीजमिति नित्यदोषोयम् ॥ (१८)

विध्ययुक्तः, अयुक्तविधिरित्यर्थः· अयुक्तत्वं च विधेरविधेयस्यै विधेयत्वेन वा, ऽयुक्तक्रमतया वा· तत्राद्यो यथा-

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा,-
मकेशवमपाण्डवं भुवनमद्य निस्सोमकम्, ।
इयं परिसमाप्यते रणकथाऽद्य दोःशालिना-
मपैति[ग] रिपुकाननातिगुरुरद्य भारो भुवः ॥

अत्र 'पाण्डवभयेनाद्यावधि तव निद्रा नाभूदेव, अद्य तु मया शमितेषु तेषु निःशङ्कतया निद्राणस्त्वं प्रयत्नेन बोध्यस'इति तात्पर्य्यम्· तथाच 'शयितस्त्वं प्रयत्नेन बोध्यस'इति विधिर्युक्तो, नतु 'शेष'इति शय-नस्य· अविमृष्टविधेयांशे तु युक्तस्यैव विधिः, परन्त्वविमर्शमात्रम्· अत्र त्वयुक्तस्यैव विधिरिति भेदः· विवक्षितानिर्वाहोऽत्र दुष्टिबीजम् । द्वितीयो यथा-

वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं,
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः, ।
तेपि क्रूरचमरुचर्म्मवसनैर्नीताः क्षयं लुब्धकै,-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ॥

मृगचर्म्मवसनं, मेघतोयकणिकापानं, वायुभक्षणं चेत्युत्तरोत्तरं तीव्र-

(क) विरुद्धार्थ इति पु· ।
(ख) ०द्गदितुमिच्छेति पु· ।
(ग) ०मपैत्विति पाठस्तु प्रक्रमविरुद्धः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मिति तत्क्रमेण विधिर्युक्तः· लोकप्रसिद्धक्रमलङ्घनेन श्रोतुरुद्वेगो ऽत्र दुष्टिबीजमिति नित्योयम् ॥ (२०)

अनुवादायुक्तः, अयुक्तानुवादः· अयुक्तत्वं चात्र विध्यननुगुणत्वम्· यथा—

अरे रामाहस्ताभरण! भसलश्रेणिशरण!
स्मरक्रीडाव्रीडाशमन! विरहिप्राणदमन!।
सरोहंसोत्तंस! प्रचलदलनीलोत्पल! सखे!
सखेदो ऽहं, मोहं श्लथय, कथय क्वेन्दुवदना॥

अत्र "विरहिप्राणदमने"त्यनुवादः "कथय क्वेन्दुवदने"तिविधिविरुद्धः· तदेव च दूषकताबीजमिति नित्यदोषोयम् ॥ (२१)

त्यक्तपुनःस्वीकृतः, पूर्वं त्यक्तो[क] ऽनन्तरं पुनःस्वीकृत उपात्तः· तस्मिन्नेव वाक्यार्थे विशेषणान्तरोपादाने समाप्तपुनरात्तम्, अत्र त्वन्य एव वाक्यार्थ इति ततो भेदः· उदा०—"लग्नं रागावृताङ्ग्ये"ति· अत्र "विदितं तेऽस्त्वि"त्युपसंहृतेऽपि राजदेश"स्तेनास्मि दत्ता भृत्येभ्य"-इत्येतावता पुनरुपात्तः· स चाऽप्रयोजकः· उत्प्रेक्षयोपसंहृतेनैव निर्वाहात्· "श्रीनियोगा"दित्यादिकं[ख] त्वदुष्टमेव· अन्यथा वाक्यैकवाक्यताच्छेदाऽऽपत्तेः· दूषकताबीजं त्वप्रयोजकत्वं, सहृदयवैरस्याधानं वा· लोके ऽपि हि त्यक्तस्य भक्ष्यादेः पुनरुपादानं वैरस्यमावहति· नित्यश्चायम् ॥ (२२)

अश्लीलो, व्रीडादिसमर्पकोर्थः· यथा—

उद्धतस्य परं हन्तुं स्तब्धस्य विवरैषिणः।
यथाऽऽशु जायते पातो, न तथा पुनरुन्नतिः॥

शब्दान्तरेणाप्युपादीयमानो ऽयमर्थः पुंव्यञ्जनादिसाधारण्येन प्रतीतेर्व्रीडादायी· ननूदाहरणेषूक्तेषु किमुदाहृता एव दोषाः· तथा सत्यऽन्य-

(क) पूर्वंत्यक्त इति पु०।
(ख) श्रीनियोगादिकमिति पु०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्षणानां तेषु दर्शनादतिव्याप्तिः· अथ तत्र दोषान्तराण्यपि, तर्हि किमिति न प्रकाशितानीति चेत्, अप्रकृतत्वादिति (२३) ॥ ५५ ॥ ५६ ॥ ५७॥

अथैवं यथायथमदोषत्वे प्रतिपादयितव्ये ऽर्थदोषाणां सन्निधानात् प्रथममर्थदोषस्यैव तत् प्रतिपादयति—

कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः ।
सन्निधानादिबोधार्थम्—

अवतंसादिपदैर्जात्यादिपुरस्कारेण कर्णाभरणादीन्येवोच्यन्त इत्यर्थतः प्राप्तौ कर्णपदादीनां यद्यप्यपुष्टार्थत्वं पुनरुक्तत्वं वा युज्यते, तथापि क्वचि'त्कर्णेऽवतंस' इत्यादिव्युत्पत्त्या क्वचिल्लक्षणादिना च कर्णस्थित्यादिरूपस्याधिकस्य विवक्षितार्थस्य प्रतिपत्तेरदोषत्वम्· यथा—

तस्याः कर्णावतंसेन जितं सर्वं विभूषणम्, ।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम् ॥

अत्रावतंसस्य कर्णस्थित्यवस्था कर्णपदोपादानेनावगम्यते· तदवगत्या किं प्रयोजनमिति चेद्, वर्णनीयोत्कर्षः· कथमिति चेत्, स्वरूपतोऽस्य भूषणजेतृत्वं न, किंतु तत्कर्णावस्थित्यैति तत्पर्यवसानात्· एवं श्रवणकुण्डलपदेऽप्यूह्यम्· न केवलं कर्णश्रवणपदयोरेवायं महिमा, किन्त्वन्येषामपि· यथा—

अपूर्वमधुरालापप्रमोदितदिशस्ततः ।
आययुर्भृङ्गमुखराः शिरःशेखरशालिनः ॥

अत्र 'शिरः'पदानुपादाने(क) शेखरस्वाम्यमात्रं लभ्यते, नतु तदलङ्कृतत्वम्· तथाच तत्प्रतीतेरदोषत्वम् ।

विदीर्णाभिमुखारातिकराले संयुगान्तरे ।
धनुर्ज्याकिणचिह्नेन दोष्णा विस्फूर्जितं तव ॥

अत्र 'धनुः'शब्दो ज्याया आरूढत्वप्रतिपादनाय· तच्च किणस्य

(क) "शिरःपदादाने"—इति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रहारकृतत्वप्रतिपत्तये। यत्र त्वारूढत्वप्रतीतिप्रयोजनं नास्ति।[क] तत्र न धनुःशब्दोपादानमपि। यथा—

ज्यावन्धनिष्पन्दभुजेन यस्य विनिश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमाऽऽ प्रसादात् ॥ इत्यत्र।
प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः ।
मुक्ताहारेण लसता हसतीव स्तनद्वयम् ॥

अत्र हारशब्दस्य मुक्तासन्दर्भशक्तत्वेपि न मुक्ताशब्दवैयर्थ्यम्, अन्यरत्नाऽमिश्रत्वप्रतिपादनेनोत्प्रेक्षायामुपयोगात्।

सौन्दर्य्यसम्पत्तारुण्यं यस्यास्ते ते च विभ्रमाः ।
षट्पदान् पुष्पमालेव काचा ऽऽकर्षति[ख] सा सखे ! ॥

मालाशब्दो यद्यपि पुष्पस्यैव स्रजि शक्तः। तथापि न पुष्पपदमपुष्टार्थं, लक्षणयोत्कृष्टत्वप्रतिपादकत्वात्। अयमेव करिबृंहितन्यायः। ननु मालाशब्दस्य पुष्पसङ्घातशक्तत्वमित्यऽसम्यक्, रत्नमालेत्यादिप्रयोगदर्शनादिति चेत्, अनुपपदस्य तथात्वात् ॥

—स्थितेष्वेतत्समर्थनम् ॥ ५८ ॥

महाकविप्रयुक्तेष्वेवं समाधानं, नतु स्वेच्छया कर्णावतंसादिपदवज्जघनकाञ्च्यादि, करिकलभवदुष्ट्रकरभादि वा प्रयोक्तव्यम्। वामनस्तु—'अपुष्टस्यापि तत्रोपादानमुचितं, यत्र तद्विशेष्यते। अन्यथा कुतस्तद्विशेषणान्वयः स्यात्। यथा, "जगाद विशदां वाचं मधुराक्षरशालिनी"मित्यादौ। अत्र हि वाचमित्यनुपादाने मधुरत्वादितद्विशेषणयोगः क्व प्रत्येतव्य' इत्याह। तच्च युक्तमुदाहृतम्, 'विशदं जगादे'त्यादिक्रियाविशेषणत्वेनैव समीहितसिद्धेः। तस्मादत्र न क्रियाविशेषणत्वं योग्यं, तदुदाहरणीयम्। यथा—

(क) "यत्र त्वारूढत्वं तत्प्रतीतिप्रयोजनं वा नास्ती"त्येकम्, "यत्र त्वारूढत्वप्रतीतिः प्रयोजनं नास्ती"त्यपरञ्च पुस्तकमास्ते ।
(ख) 'कचाऽऽकर्षती'ति, 'कान्ताकर्षती'ति च पाठौ न युक्तौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणत्रपरित्राणरहिताभ्यामपि द्रुतम्[(क)] ।
पादाभ्यां [(ख)]दूरमध्वानं व्रजन्नेष न खिद्यते ॥

अत्र न क्रियाविशेषणार्हमिति प्रकाशकृत्· तदपि न युक्तमु·दाहृतमिति वयम्, कर्तृविशेषणत्वेनैवोपपत्तेः· तस्मान्मदीयं यद्यमुदाहरणीयम्, यथा—

निर्वातपद्मोदरसोदराभ्यां विलोचनाभ्यामवलोकयन्ती ।
न केवलं यूनि मनोभवेऽपि व्यनक्ति कंचित्तपसः प्रभावम् ॥

अत्र 'निर्वातपद्मोदरसोदराक्षी'त्येवं कर्तृविशेषणत्वेऽप्युपपत्तिरिति चे,त्सत्यम्, परंत्वाक्षिपदोपादानमपेक्ष्यैव· किंच, सोदरत्वमात्रं नान्यविशेषणीभवितुमर्हति, यथा मधुरत्वचरणत्रपरित्राणरहितत्वे ॥ ५८ ॥

ख्याते ऽर्थे निर्हेतोरदुष्टता—

यथा— चन्द्रं गता पद्मगुणान् न भुङ्क्ते,
पद्मं श्रिता[(ग)] चान्द्रमसीमभिख्याम्, ।
उमामुखं तु प्रतिपद्य लोला
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥

रात्रौ चन्द्रगतायाः पद्मगुणानुपभोगे पद्मसङ्कोचो हेतुः· दिवा च पद्मश्रितायाः चन्द्रगुणानुपभोगे चन्द्रस्य निष्प्रभत्वं कारणम्· ते चातिप्रसिद्धेरेवावगम्येते इति न तदुपादानापेतेत्यदोषः ॥

अथ पदादिदोषाणामप्यदोषत्वं क्वचिदित्याह—

—अनुकरणे तु सर्वेषाम् ।

प्रतिपादितदूषकताबीजाभावात् । तत्र वैरस्याभावस्यानुभाविकत्वेन तदतिरिक्तस्थल एव दोषत्वव्यवस्थितेर्वा· यथा—

मृगचक्षुषमद्राक्षमित्यादि कथयत्ययम्, ।
पश्यैष च गवित्याह, सुत्रामाणं यजेति च ॥

(क) स्फुटमिति सर्वत्रोपलब्धत्वे ऽपि द्रुतमिति प्रकाशोपलब्धं स्थापितम् ।
(ख) पदाभ्यामिति पा· ।
(ग) पद्मश्रितेति, पद्माऽश्रितेति च पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्राद्राक्षं,गो,सुत्रामपदानि श्रुतिकटु,च्युतसंस्कृत्य,ऽप्रयुक्तानि· अनुकरणे चैषामदोषत्वबीजं प्रतिपादितं, तद्वदत्राप्यूह्यम् ॥

वक्तृप्रतिपाद्यव्यङ्ग्यवाच्यप्रकरणादिमहिम्ना दोषस्यापि क्वचिद्दोषत्वाभावमात्रं, क्वचित्तु भाक्तो गुणव्यहारोपीत्याह–

वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित्, क्वचिन्नोभौ ॥ ५९ ॥

नोभौ, न गुणो न दोषश्च· तत्र स्वस्य वैयाकरणत्वं प्रतिपिपादयिषौ[क] वक्तरि कष्टत्वं गुणः, प्रतिपाद्यस्य ततोऽतिशयेन प्रतीतेः· दोषत्वाभावश्चोपपादित एव· यथा–

> दीधीङ्वेवीट्समः कश्चिद्गुणवृद्ध्योरभाजनम्, ।
> क्विप्प्रत्ययनिभः कश्चि,द्यत्र सन्निहिते न ते ॥

वैयाकरणादौ प्रतिपाद्ये च तस्य गुणत्वम्, तद्भावनाभावितस्य तच्छ्रवणेन[ख] प्रीत्युपचयात्· यथा–

> यदा त्वामहमद्राक्षं पदविद्या[ग]विशारदम्, ।
> उपाध्यायं तदाऽस्मार्षं समस्प्राक्षं च संमदम्[घ] ॥

ओजस्विनि रौद्रादिरसे व्यङ्ग्ये तस्य गुणत्वं, कठिनशब्दस्य तद्व्यञ्जकत्वात्· तत्र बीभत्से यथा–

> अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
> प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम्[ङ] ।
> पीतच्छर्दितरक्तकर्दमघनप्राग्भार[च]घोरोल्लस-
> द्व्यालोलस्तनभारभङ्गुरवपुर्दर्पोद्धतं[छ] धावति ॥

(क) वैयाकरणत्वप्रतिपिपादयिषौ–इति पु· ।
(ख) तच्छ्रवणे–इति पु· ।
(ग) शब्दविद्येति पा· ।
(घ) संपदमित्येकस्यस्तुनानुरूपार्थः ।
(ङ) ०राघोषयत्यम्बरमिति त्वनर्थः ।
(च) ०घनप्राग्भारेति पा· ।
(छ) ०र्बन्धोद्धतमिति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ओजस्विनि सिंहादौ वाच्येऽपि तस्य गुणत्वम्, यतो मसृणशब्दप्रयोग ऊर्जितोऽप्यर्थो मृदुवद्भासते, ऊर्जितशब्दप्रयोगे त्वौर्जित्येन। उदा०—

मातङ्गाः किमु वल्गितैः, किमफलैराडम्बरैर्जम्बुकाः,
सारङ्गा महिषा मदं व्रजत किं. शून्येषु शूरा न के, ।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः[क]
सिन्धुध्वानिनि हुङ्कृते स्फुरति य,त्तद्गर्जितं गर्जितम् ॥

अत्र सिंहो वाच्यः । प्रकरणविशेषे च गुणत्वं वक्तुर्वैयाकरणत्वाभावेऽपि कोपादिप्रस्तावे च तदनुगुणत्वात्। यथा—

रक्ताशोक! कृशोदरी क्व नु गता त्यक्त्वा ऽनुरक्तं जनं,
नो दृष्टेति मुधैव चालयति किं वातावधूतं शिरः, ।
उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ॥

अत्र मिथ्याशिरोवधूननेन कोपप्रकरणे। नचास्य व्यङ्ग्य एव प्रवेशः, कोपस्य व्यङ्ग्यत्वादिति वाच्यम्, वक्त्राद्यतिरिक्तस्थानीयस्य व्यङ्ग्यस्य व्यङ्ग्यपदेनोपादानात्, गोबलीवर्दन्यायात्। दोषत्वाभावश्चैतेषु गुणत्वप्राप्तेः स्फुट एव। क्वचित् पुनर्न दोषत्वं, नवा गुणत्वं, यत्र न रसो न वा प्रतिपाद्यौचित्यम्। अथ नीरसे यदि विघात्याभावादस्यादोषत्वं, तदान्येषामपि स्यात्। तथा च नीरसदोषोदाहरणं विरुद्धेतेति चेत्, तस्योपलक्षणत्वात्, दोषपरिचयमात्रार्थत्वाद्वा। यथा—

शीर्णघ्राणाङ्घ्रिपाणीन् घृणिभिरपघनैर्घर्घराव्यक्तघोषान्[ख]
दीर्घाघ्राता[ग]नघौघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्ते-
र्दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम्[घ] ॥

(क) पुनरिति क्वचित् ।
(ख) वर्णिभिरपघनैर्घर्घराऽव्यक्तदोषानिति पु० ।
(ग) दीर्घघातानिति क्वचित् ।
(घ) शीघ्रमङ्घोविघातमिति तूच्चारणदोःस्थ्यप्रयुक्तः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीरसत्वं चात्रानुप्रासमात्रमग्नतया रसे तात्पर्य्याभावात्· नचानुप्रासस्यदैकतयैव गुणत्वं "सौध्येष्टवेदा"नित्यादावपि तदापत्तेरिति· नच परुषवर्णत्वमनुप्रासे प्रयोजकं, येन तदघटकतया दोषत्वं स्यात्· अप्रयुक्तनिहतार्थौ श्लेषयमकादावदुष्टाविति प्रतिपादितं प्राक्· यदि च प्रयोजनानुसंधानव्यग्रता दुष्टिबीजम्· तथाप्यत्र न दोषता,तदलंकारस्य प्रयोजनस्य प्रतीतेर्व्यग्रताऽभावात्· यथा–

> येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
> योगङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्त्रप्रियः ।
> यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामाऽमराः
> सोऽव्यादिष्टभुजङ्गहारबलयस्त्वां सर्वदोमाधवः ॥

अत्र माधवपक्षे राहौ 'शशिमत्'पदमप्रयुक्तम्, 'क्षय'पदं गृहे निहतार्थम्· नच श्लेषरूपालङ्कारप्रयोजकतया गुणत्वमपि शङ्कनीयम्, तत्त्वस्य तत्राप्रयोजकत्वात्· एवमन्येषु प्रतीतिविलम्बवत्सु द्रष्टव्यम् ॥

अश्लीलत्वं क्वचित् गुणः· यथा सुरतारम्भगोष्ठ्यां "द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्त्वि"ति कामशास्त्रस्यितौ दोषत्वाभावे व्युत्पत्तिप्रकटनात्· यथा–

> करिहस्तेन सम्बाधे प्रविश्याऽन्तर्विलोड़िते ।
> उपसर्प्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥

अत्र सम्बाधादिपदानि । शमकथास्वप्यश्लीलं गुण,स्तत्पोषकत्वात्· यथा–

> उत्तानोच्छूनमण्डूकपाटितोदरसंन्निभे ।
> क्लेदिनि स्त्रीव्रणे सक्तिरक्रमेः कस्य जायते ॥

सूचनीयविशेषे यथा–

> निर्वाणवैरदहनाः प्रशमादरीणां
> नन्दन्तु पाण्डुतनयाः सह माधवेन, ।
> रक्तप्रसाधितभुवः क्षतविग्रहाश्च
> स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'प्रशमा'दिति 'स्वस्था' इति च मरणार्थकत्वादश्लीलत्वेऽपि भाव्यऽमङ्गलसूचनाद्गुणः ॥

सन्दिग्धमपि वाच्यमहिम्ना नियतार्थप्रतीतिकारित्वाद्व्याजस्तुतिपर्य्यवसायितया गुणः यथा—

> पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव! ।
> विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥

अत्र पृथुकार्त्तस्वरादिशब्दाः पृथुकानामार्त्तस्वरः पृथु बहुलं कार्त्तस्वरं चेति सन्दिग्धाः ॥

अप्रतीतमपि यत्र प्रतिपाद्यप्रतिपादकयोर्द्वयोरपि तज्ज्ञता, तत्र 'गुणः, अर्थाऽप्रतीतिरूपबीजाभावेनादोषतायां व्युत्पत्तिप्रकटकत्वात्(क) यथा—

> आत्माऽऽरामा विहितरतयो(ख) निर्विकल्पे समाधौ
> ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।
> यं वीक्षन्ते(ग) कमपि तमसां ज्योतिषां वा परस्ता,-
> त्तं मोहान्धः कथमयममुं वेत्ति(घ)देवं पुराणम् ॥

इयं भीमसेनस्य सहदेवं प्रत्युक्तिः अत्र निर्विकल्पकादिशब्दा आत्ममात्रावलम्बनत्वादावर्थे योगशास्त्रमात्रप्रसिद्धाः । स्वयंपरामर्शेऽप्येवमेव गुणत्वम् यथा—

> षड्धिकदशनाडीचक्रमध्यस्थितात्मा
> हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः ।
> अविचलितमनोभिः साधकैर्मृग्यमाणः
> स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥

अधमप्रकृतीनां चेटविटदूषकादीनां हास्यरसप्रधानानां तथैवौचित्याद्दोषत्वाभावे हास्यपर्य्यावसायित्वाद्ग्राम्यो गुणः यथा—

(क) प्रकटनादिति पा० ।
(ख) विहतरतय इति क्वचित् ।
(ग) ध्यायन्ते—इति सर्वत्रैवोपलब्धत्वे ऽप्यर्हत्वाद्वीक्षन्ते इति कोशानुसारि न्यस्तम् ।
(घ) वेत्त्विति, वेदेति च क्वचिद्दृश्यति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फुल्लुक्करं कलमकूरणिहं वहंति जे सिंधुवारविड्वा मह वल्लहा दे ।
जे गालिदस्स महिसीदहिणो सरिच्छा दे किंच मुद्धविअइल्ल[क]पसूणपुंजा॥

अत्र कलममहिसीदधिशब्दाः ॥

न्यूनपदमपि क्वचिद्गुणो, यत्र न्यूनतयैवाभिमतविशेषसिद्धिः यथा—

गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा
सान्द्रानन्दरसातिरेकविगलच्छ्रीमन्नितम्बाऽम्बरा ।
मा मा मानद! मा ऽति मामऽलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु, मृता नु, किं मनसि मे लीना, विलीना नु किम् ॥

अत्र 'मा मे'त्यत्राऽऽयासय,'माऽती'त्यत्र पीड़येति न्यूनम् नच दोषः, प्रतीतेः स्फुटत्वात्, प्रत्युत गुणरसातिरेकव्यञ्जकत्वात् । क्वचित्तु न दोषो, नापि गुणः यथा—

तिष्ठेत् कोपवशात् प्रभावपिहिता, दीर्घं न सा कुप्यति,
स्वर्गायोत्पतिता भवे,न्मयि पुनः स्नेहार्द्रमस्या मनः, ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं,
सा चात्यन्तमगोचरं नयनयोर्यातेति[ख] कोऽयं विधिः ॥

अत्र पिहितेत्यनन्तरं 'नैतद्युज्यत'इत्येतन्न्यूनम् एवं द्वितीयपादेपि नचात्र गुणत्वं, विशेषबुद्धेरनुत्पादनात् नापि दोषत्वम्, तद्व्यतिरेकेणापि 'दीर्घं न सा कुप्यती'त्यादिप्रतीत्या 'तिष्ठेत् कोपवशादि'त्यादिप्रतीतानां बाध्यत्वावगमात् ॥

अधिकपदं क्वचिद् गुणो, यत्र विशेषप्रतिपत्तिः यथा—

यद्वञ्चनाहितमतिर्बहु चाटुगर्भं
कार्योन्मुखः खलजनः कृतकं ब्रवीति ।
तत्साधवो न न विदन्ति, विदन्ति,
किन्तु कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥

(क) विकचिल्लेति पु० ।

(ख) सा चात्यन्तमगोचरं नयनयोर्जातेति पाठस्तूच्चारणापष्ठवजः प्रचरतीति प्रतीमः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र द्वितीयं 'विदन्ती'तिपदमन्ययोगव्यवच्छेदं प्रतिपादयदा-धिकपदत्वेऽपि दुष्टम्· यदुक्तं–

"विस्मये च विषादे च तथा दैन्ये ऽवधारणे।
प्रसादने तथा हर्षे वाक्यमेकं द्विरुच्यते" ॥

इति· एवं हर्षशोकादियुक्ते वक्तरि गुणत्वम्, त्वरादिव्यक्त्या हर्षा-द्यभिव्यञ्जकत्वात्· यथा--

वद वद जितः स शत्रु, र्न हतो जल्पंस्तव तवास्मीति,।
चित्रं चित्रमरोदीद्धा हेति परं मृते पुत्रे ॥

अत्र पादचतुष्टये क्रमेण हर्षभीतिविस्मयविषादयुक्ता वक्तारः एवं पुनरुक्तेऽपि द्रष्टव्यम् ॥

कथितस्यापि लाटानुप्रासे तन्निर्वाहकतया, ऽर्थान्तरसङ्क्रमितवाच्ये च विशेषव्यञ्जनाद्, विहितस्य यत्रानुवाद्यत्वं तत्र स्वाभिमतनिर्वाहकतया गुणत्वम्· क्रमेणोदाहरणानि–

सितकरकररुचिरविभाविभाकराकारधरणिधरकीर्त्तिः।
पौरुषकमला कमला सापि तवैवास्ति नान्यस्य ॥

अत्र लाटानुप्रासः।

ताला जाअंति गुणा जाला ते सहिअएहिं घेप्पंति।
रइकिरणाणुग्गहिआइं होंति कमलाइं कमलाइं ॥

अत्र द्वितीयं कमलपदं सौरभादिमदर्थकतया ऽर्थान्तरसङ्क्रमित-वाच्यम्· तथात्वे च कथितपदत्वमेव प्रयोजकम्।

जितेन्द्रियत्वं विनयस्य कारणं, गुणप्रकर्षो विनयादवाप्यते,।
गुणाधिके पुंसि जनो ऽनुरज्यते, जनानुरागप्रभवा हि संपदः।

अत्र कारणमालायां पूर्वोपात्तपदेनैव विनयादिकमुपादेयम्, पदा-न्तरेणानूद्यमानं तद्भिन्नतयेव प्रतिभाति· तथाच तादृशालङ्कारसम्पादक-तया गुणत्वम्, दोषत्वाभावश्च, तद्बीजाभावात् ॥

पतत्प्रकर्षमपि क्वचिद्गुणः· यथा "प्रागप्राप्ते"त्यादौ· अत्र हि चतुर्थे पादे क्रोधाभावान्मसृणमेव पदं युक्तमिति दोषत्वाभावः, गुणत्व

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तु विनयप्रकाशकतया ॥

समाप्तपुनरात्तं क्वचिच्च गुणो, न दोषः· यथा "प्रागप्राप्ते"त्यादौ· अत्र 'येनानेने'त्यादि न विशेषणदानमात्रार्थम्, किंतु वाक्यान्तरमेवाविधेयम्· अतो बीजाभावान्न दोषः· न च गुणो, विशेषबुद्धेरकरणात्· ॥

अपदस्थसमासमपि क्वचिद्गुणः· यथा "रक्ताशोके"त्यादौ·(क) अत्रापदस्थसमासत्वमेव कथमिति चिन्त्यं, द्वितीयार्द्धस्यापि रुष्टवक्तृकत्वेन तत्स्थानत्वात्,(ख) अन्यथा गुणत्वासम्भवात्· भास्करस्तु "शृङ्गारे समासस्यानौचित्यादस्थानस्थत्व''मित्याह ॥

गर्भितमपि क्वचिद्गुणो, दृढप्रत्ययादिहेतुत्वात्· नच दोषः, प्रतीतेरव्यवधानात्·

भमम्मि अवहत्थिअरेहो णिरंकुसो अह विवेअरहिओवि ।
सिविणेवि तुमम्मि पुणो पत्तिहि भत्तिं ण पसुमरिस्सामि(ग) ॥

अत्र प्रतीहीति दृढप्रत्ययोत्पादकम्· एवमन्यदपि लक्ष्य दृष्टाहनीयम् ॥ ५९ ॥

अथ साक्षाद्रसविरोधिनो दोषानाह—

व्यभिचारि,रस,स्थायिभावानां शब्दवाच्यता, ।
कष्टकल्पनया व्यक्तिरनुभाव,विभावयोः, ॥ ६० ॥
प्रतिकूलविभावादिग्रहो, दीप्तिः पुनः पुनः, ।
अकाण्डे प्रथन,च्छेदा,वङ्गस्याप्यतिविस्तृतिः, ॥ ६१ ॥
अङ्गिनोऽननुसन्धानं, प्रकृतीनां विपर्य्ययः, ।
अनङ्गस्याभिधानं च, रसे दोषाः स्युरीदृशाः-॥ ६२ ॥

शब्दवाच्यता, सामान्यतो विशेषतो वा स्वशब्देनोपादानम्· सा व्यभिचारिणां यथा—

सव्रीडा दयितानने, सकरुणा मातङ्गचर्माम्बरे,
सत्रासा भुजगे, सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि, ।

(क) त्यादीति पु· ।
(ख) द्वितीयार्द्धस्यापि तत्स्थानत्वा,त्तस्यापि रुष्टवक्तृकत्वादिति पु० ।
(ग) श्लोकादौ 'होमी'ति, अन्ते च 'पसुमरामी'ति पु० ।

Dr. Urmila Sharma Collection, Varanasi

सेर्ष्या जह्नुसुतावलोकनविधौ, दीना कपालोदरे,
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायाऽस्तु वः ॥

अत्र व्रीडादयो व्यभिचारिभावाःस्वशब्देनोपात्ताः· न च स्वशब्देनोपात्तेषु व्यभिचार्य्यादिष्वास्वादोऽनुभूयते,(क) किंत्वनुभावादिमुखेनै व्यक्तेषु· तस्मादास्वादानुत्पत्तिर्दोषत्वबीजमिति सम्प्रदायः· तत्रेदमालोचनीयम्—एतावता शब्दवाच्यताया दोषत्वमेव तावद्दुर्लभं, दूरे पार्थक्येन, दूरतरे साक्षात्· तथाहि, अनुभावादीनामुपस्थितावियं रसप्रतिबन्धिका ऽभिमता, तदनुपस्थितौ वा· अन्त्ये, कारणाभावादेवास्वादाभावो, न तु वाच्यत्वकृतः, सत्येव कारणचक्रे कार्य्यानुत्पादस्य प्रतिबन्धकताव्यवस्थापकत्वात्· तथाच न्यूनपदत्वमनभिहितवाच्यता वा दोषो, नत्वियम्· आद्ये, अनुभावादित एव रसव्यक्तिरिति किं तच्छब्देनेति वैयर्थ्यमात्रं दोषः· वयं त्वालोचयामः—अनुभावादीनामुपस्थितावेव भावादीनां शब्दवाच्यतयाऽऽस्वादोपाघातः प्रतीयत इति तस्याः पृथग्दोषत्वम्· अत एवौत्सुक्यादीनां शब्दवाच्यतां न दोष,स्तत्रास्वादविघाताप्रतीतेः ·न च वाच्यमेवानु(ख)भावोपादाने ऽपि किमिति नोदाहृतमिति, तदुपादानस्यै भावादिशब्दानां वैयर्थ्यमपीत्यसङ्कराभिप्रायेण तथोदाहरणात्· उदाहृते त्वनुभावाक्षेपकतया वैयर्थ्याभावात्· नचैवमुक्तोदाहरणविरोध,स्तत्रानुभावाद्यनुपादानादिति वाच्यम्, "दैवादहमत्र तये"त्यादाविवाक्षेपेण तेषां प्रतीतेः· नहि व्रीडादिशब्दैः प्रतिपादिता व्रीडादय आस्वाद्यतामिव स्वानुभावाद्याक्षेपकतामप्यासादयितुमक्षमाः, बीजाभावात्· एवमग्रिमोदाहरणेष्वप्यूह्यमिति· एवं च स्थिते 'व्यानम्रा दयितानने, मुकुलिता मातङ्गचर्माम्बरे, सोत्कम्पा भुजगे, निमेषरहिता चन्द्रेऽमृतस्यन्दिनि, मीलद्भ्रूः सुरसिन्धुदर्शनविधौ, म्लाना कपालोदरे'—इतिपादत्रयपाठो युक्तः एवं भावादिशब्देनाप्युपादाने द्रष्टव्यम् । रसस्य सामान्यतो रसशब्देन यथा—

(क) ०स्वादसंभवोऽनुभूयते—इत्येकपुस्तकस्थपाठस्त्वाविस्पष्टार्थः ।
(ख) वाच्यमेवमनु—इति पु० ।

CC0. In Public Domain, Digitizagtion by eGangotri

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम् ।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ॥

विशेषतः शृङ्गारपदेन यथा—

आलोक्य कोमलकपोलतलाभिषिक्त-
व्यक्तानुरागसुभगामभिराममूर्त्तिम् ।
पश्यैष बाल्यमतिवृत्त्य (क)विवर्त्तमानः
शृङ्गारसीमनि तरङ्गितमातनोति ॥

स्थायिनो विशेषत उत्साहपदेन यथा—

सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
ठणत्कारैः (ख)श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ॥

अत्रैव 'स्थायिभावोऽस्य कोप्यभू'दिति चतुर्थपादपाठे सामान्यतः-शब्दवाच्यतोदाहरणं द्रष्टव्यम् ॥ (१)

कष्टकल्पनया पृथक्श्लोकाद्यनुसन्धेयप्रकरणादिपर्य्यालोचनया विलम्बेन व्यक्ति,र्न तु "देवादहमत्र तये'त्यादाविव झटित्याक्षेपमहिम्ना सा । अनुभावस्य यथा—

कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः ।
लीलाशिरोऽंशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा ॥

अत्र चन्द्रादय उद्दीपनालम्बनविभावाः शृङ्गारयोग्या अनुभावा-प्रतीत्या आस्वादापर्य्यवसायिनः स्थिताः यद्यप्यंशुकनिवेशोऽनुभावत्व-योग्य,स्तथापि तस्य स्तनव्यक्तिप्रयोजकत्वेनोपात्तस्य नानुभावत्वपर्य्यव-सानमिति प्राञ्चः वस्तुतस्तु, पुंसि न कश्चिदनुभाव उपात्तः नच विभावैरप्याक्षेपार्ह इति कष्टेन कल्पनीयः । विभावस्य यथा—

परिहरति रतिं, मतिं लुनीते, स्खलतितरां, परिवर्त्तते च भूयः, ।
इति बत (ग)विषमा दशाऽस्य देहं परिभवति प्रसभं, किमत्र कुर्मः ॥

(क) ०मतिवृत्यैति पाठस्त्वनर्हः ।
(ख) ठनत्कारैरिति पु० ।
(ग) वर्तते पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र कामिनीरूपशृङ्गारविभावोऽभिमतो, न पुनरूपात्तः। न च रतिपरिहारादिभिरनुभावैराक्षेप्तुमपि शक्यते, तेषां करुणादावपि सम्भवा-दिति कष्टेन कल्पनीयः ॥ (२)

प्रतिकूलविभावादिग्रहः, प्रकृतरसादेः प्रतिकूलो यो रसादिस्तद्वि-भावानुभावव्यभिचारिणां ग्रहः। तत्र तादृशविभावव्यभिचारिणोर्ग्रहो यथा-

प्रसादे वर्तस्व, प्रकटय मुदं, सन्त्यज रुषं,
प्रिये! शुष्यन्त्यङ्गान्य ऽमृतमिव ते सिञ्चतु वचः, ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं,
न मुग्धे! प्रत्येतुं प्रभवति गतः कालहरिणः ॥

अत्र प्रकृते शृङ्गारे प्रतिकूलस्य शान्तस्य प्रकाश्यमान(क)कालाऽनि-त्यतारूपो विभावः। एतत्प्रकाशितो निर्वेदरूपो व्यभिचारी च स्फुटमेव गृह्यते। तादृशानुभावग्रहो यथा—

णिहुअरमणम्मि लोअणपहम्मि पडिए गुरुअणमज्झम्मि ।
सअलपरिहारहिअआ वणगमणं एव्व महइ वहू ॥

अत्र व्याजादिकं विना वनगमनं सकलपरिहारश्च शान्तानु-भावः। नच व्याजः प्रतिप्रतिपादित इति शृङ्गारस्य प्रकृतस्य विच्छित्तिः। इन्धनाद्यानयनव्याजेन सम्भोगार्थं वनगमनं यद्युच्यते, तदा न शान्तानु-भावग्रहः ॥ (३)

पुनःपुनर्दीप्तिरङ्गरसादिविषया दोषः। अङ्गिनस्तु सा महाभार-तादौ शान्तादेरिव न वैरस्यमावहति। उदा०—कुमारसम्भवे "अथ मोह-परायणे"त्यादिना दीप्तिमानीतोऽपि करुणो "ऽथ सा पुनरेवे"त्यादिना पुनःपुनर्दीप्तिं नीतः। उपभुक्तो हि पुनरुपभुज्यमानः परिम्लानस्तवकवद्वैर-स्याय कल्पते ॥ (४)

अकाण्डे अनवसरे प्रथनम्। यथा वेणीसंहारे द्वितीयेऽङ्के (ख)ऽनेक-वीरसङ्क्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम् ॥ (५)

(क) प्रकाश्यमानानित्यतेत्यादिः पुस्तकान्तरे भवति ।
(ख) द्वितीयाङ्के-इति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकाण्डच्छेदो यथा वीरचरिते राघवभार्गवयोरविच्छिन्नप्रसरतया प्रवृत्ते वीररसे कङ्कणमोचनाय यामी"ति राघवस्योक्तौ· अकाण्डे हि तथा-वचनं व्याजेन निर्गमं प्रतिपादयद्वीरत्वाभावे पर्य्यवस्यति ॥ (६)

अङ्गस्यातिविस्तृतिः, अप्रधानस्यातिविस्तृति,रप्रधानस्यातिविस्तरेण वर्णनम्· यथा हयग्रीववधे हयग्रीवस्य· यद्यपि प्रतिनायकवर्णनं नायक-स्यैवोत्कर्षे पर्य्यवस्यति, तथाप्यतिशयितं प्रधानतिरोधायकतया दोषप-दवीमवतरति ॥ (७)

अङ्गिनः प्रधानस्याननुसन्धानं यथा रत्नावल्यां चतुर्थेऽङ्के बाभ्र-व्यागमने सागरिकाया विस्मृतिः ॥ (८)

प्रकृतीनां विपर्य्ययः, यत्प्रकृतौ यद्वर्णनमनुचितं तत्र तद्वर्णनम्· प्रकृतयस्तावद्दिव्या, अदिव्या, दिव्यादिव्याश्च· अत्र दिव्यत्वम् ऽमर्त्यैकरूप-त्व,मतो न पातालीयाद्यसंग्रहः· उदाहरणं श्रीमन्महेश्वरादिः· अदिव्यत्वं मर्त्यैकरूपता, यथा माधवादेः· दिव्यादिव्यत्वमुभयरूपता· यथा श्रीकृ-ष्णादेः· त्रिविधा अप्येते चतुर्धा भवन्ति धीरोदात्तधीरोद्धतधीरललितधीर-शान्तभेदात्· क्रमेण वीररौद्रशृङ्गारशान्तप्रधानत्वान्येषां लक्षणानि·(क)श्रीरा-मभार्गवकृष्णजीमूतवाहना उदाहरणानि· एते च प्रत्येकमुत्तमाधममध्य-मभेदाः, अनुकूलादिभेदास्त्वस्थिराः, अनुकूलादिर्हि कदाचिद्दक्षिणादिः सम्पद्यत इति·(ख)एवं भिन्नासु प्रकृतिषु, रतिहासशोकाद्भुतान्यऽदिव्योत्तमप्र-कृतिवद्दिव्येष्वपि वर्णनीयानि, किन्तु रतिः सम्भोगशृङ्गाररूपा उत्तमदिव्य-विषया न वर्णनीया· तद्वर्णनं पित्रोः सम्भोगवर्णनमिवाऽत्यन्तमनुचितम्·

क्रोधं विभो!(ग)संहर संहरेति यावद्गिरः खे मरुतां चरन्ति, ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥

इत्याद्युक्तवद् भ्रुकुट्यादिवर्जितः सद्यःफलदः क्रोधो नाकपातालग-मनसमुद्रोल्लङ्घनाद्यावुत्साहश्च(घ)द्दिव्येष्वेव वर्णनीयः· अदिव्येषु तु याव-

(क) "क्रमेण वीररौद्रशृङ्गारशान्तप्रधानत्वमेषां लक्षणानी"ति सर्वेष्वेव पुस्तकेषु प्राप्यते, ऽथापि न्याय्यत्वात् ०प्रधानत्वान्येषामिति स्थापितम् ।

(ख) "प्रकृतिभेदे न गणनीयाः"—इत्येतावन्मात्रमत्राधिकमेकत्र ।

(ग) प्रभो !—इति क्वचित् ।

(घ) ०द्युत्साहश्चेति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देव महत्कर्म लोकप्रसिद्धमुचितं वा, तावदेवेह निबन्धनीयम्. अधिकं हि निबध्यमानमसत्यप्रतिभासनया (क) रामादिवद्वर्तितव्यमित्याद्युपदेशे न पर्य्यवस्येत्. दिव्यादिव्येषु पुनरुभयोरप्युचितं वर्णनीयम् ।—एवमुक्तस्यौचित्यस्य दिव्यादीनामिवोधमादीनामप्यन्यथावर्णनं प्रकृतिविपर्य्ययः आमन्त्रणौचित्यलङ्घनेप्येवम्. तद्यथा, 'तत्र भवन्, भगव'न्नित्युत्तमेनैव प्रयोक्तव्यं, नाऽधमेन. उत्तमेनापि मुनिप्रभृतावेव, नतु राजादौ. भट्टारकेति न राजादावुत्तमेन, किंतु देवादावेव. अन्यथा, प्रकृतिविपर्य्ययापत्तेः. एवं यत्र देशे काले वयसि जातौ वा यद्वेषव्यवहरादि समुचितं, तदेव तत्रोपनिबन्द्धव्यम्,(ख) अन्यथा निबन्धने तु प्रकृतेर्विपर्य्ययः. यथा स्वर्गाङ्गनासु मानुषीवेशादिः, रसातलादौ मेघादिरिति ॥ (९)

अनङ्गस्याभिधानम्, रसानुपकारकस्य वर्णनम्. यथा कर्पूरमञ्जर्य्यां नायिकया स्वात्मना च यद्वसन्तवर्णनं तदनादृत्य वन्दि(ग)वर्णनस्य राज्ञा प्रशंसनम् ॥ (१०)

'ईदृशा'' इत्यनेनैतदुक्तं, यदेवंविधा अन्येप्यनौचित्यहेतवो भवेयुः यथा नायिकापादप्रहारादिना नायककोपादि. वर्णनमित्यादिरनौचित्यं तु रसविच्छेदहेतुः. यदुक्तं ध्वनिकृता—

"अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्, ।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥

इति (११) ॥ ६० ॥ ६१ ॥ ६२ ॥

इदानीमेषां केषांचित् क्वचिददोषत्वमपीत्याह—

न दोषः स्वपदेनोक्तावपि संचारिणः क्वचित् ।

संचारिणो, नतु रसस्थायिनोरपि. क्वचिदिति, यत्र विलक्षणो नानुभावः. यथा—

(क) ०मसत्यप्रतिभासतयेति पु० ।
(ख) निबद्धव्यमिति प्रायः प्रामत्वेऽपि योग्यत्वादिदं न्यस्तम् ।
(ग) बन्दीति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

औत्सुक्येन कृतत्वरा, सहभुवा व्यावर्त्तमाना ह्रिया,
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीता ऽऽभिमुख्यं पुनः, ।(क)
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता ऽऽश्लिष्टा शिवायाऽस्तु वः ॥

अत्रौत्सुक्यशब्दवत् सहसाप्रसरणादिरूपो ऽनुभावो नौत्सुक्यमसन्दिग्धं प्रतिपादयितुमीष्टे, भयादिसाधारणत्वात्। अत एव

दूरादुत्सुक,मागते विवलितं, सम्भाषिणि स्फारितं,
संश्लिष्यत्त्य,रुणं, गृहीतवसने कोपाञ्चितभ्रूलतम् ।(ख)
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं,(ग)
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥—

इत्यत्र व्रीडादीनि विवलितत्वादिभिरनुभावैरुपनिबध्नन्नेव रसिकशिरोमणिरमरुककविरौत्सुक्यं स्वशब्देनैवोपात्तवान्। दोषत्वाभावबीजमुक्तं प्राक्। इदन्त्ववधेयम्—त्वरादीनां भयादिसाधारण्येऽप्यौत्सुक्यादिना स्वकारणेन विशिष्यमाणास्ता एवासाधारण्यमासाद्यौत्सुक्यादि व्यञ्जयन्तीत्यास्वादोदयो,नतु शब्दादेव तत्प्रतिपत्त्या, व्यभिचार्य्यादीनां वाच्यत्वासहत्वव्युत्पादनात्। अत एवात्र न वैयर्थ्यमपि, विशेषणत्वेनोपयोगात्। "दूरादुत्सुक"मित्यादौ तु शब्दमहिम्ना विशिष्टस्यैवानुभावस्य कल्पनमिति ततोभिव्यक्तिरिति। एवं च व्यवस्थिते, शब्देन तदुपस्थितिं विना न तदनुभावस्यासाधारण्यं, नच तेन विनाऽभिव्यक्ति,र्नचाभिव्यक्तिं विनास्वादसम्भवो, नच तेन विना भावमध्यप्रवेशो, नच तमन्तरेण तथाकीर्त्तनं युक्तमिति भावस्योत्कीर्त्तनमप्येतादृशस्य व्यभिचारिणः शब्दवाच्यताया दोषत्वाभावं साधयतीति युक्तमुत्पश्यामः ॥ ऽ ॥

संचार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा ॥ ६२ ॥

(क) तयेति, तत इति च क्वचित्क्वचित्।
(ख) किञ्चाऽञ्चितेति पाठस्त्वचरमेऽन्त्रोभाग्भवन्नपि न सुश्लिष्टार्थः।
(ग) बाष्पाम्बुपूरेक्षणमिति पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकृतविरुद्धं व्यभिचार्यादि यदि बाध्यत्वेनोच्यते, तदा दूरे दोषत्वम्, प्रत्युत प्रकृतरसपरिपोषकतया गुणत्वम्॰ तत्र व्यभिचारिणो यथा—"क्वाऽकार्यं शशलक्ष्मणः क्व च कुल"मित्यादौ॰ अत्र चतुर्षु पादेषु पूर्वभागप्रतिपाद्यानां शमाङ्गानां वितर्कमतिशङ्काधृतीनामुत्तरभागप्रतिपाद्याभिलाषाङ्गभूताभिरौत्सुक्यस्मृतिदैन्यचिन्ताभिस्तिरस्कारपुरस्सरं चिन्तायामेव पर्यवसानमिति भावशबलतापरिपोषकत्वाद्गुणत्वम् ।

पाण्डु क्षामं वदनं हृदयं सरसं, तवाऽलसं च वपुः, ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि! हृदन्तः ॥

इत्यत्र पाण्डुत्वादीनां रोगानुभावतया विरुद्धत्वेऽपि विप्रलम्भशृङ्गारसमारोपादङ्गभावप्राप्त्या दोषत्वाभाव इति ध्वनिकारः॰ तदयुक्तं,तेषामुभयसाधारण्याद्विरोधस्यैवासिद्धेः । विभावस्य बाध्यत्वं यथा—

सत्यं मनोरमा रामाः, सत्यं रम्या विभूतयः, ।
किंतु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् ॥

अत्र पूर्वार्द्धे शृङ्गारस्य, परार्द्धे शान्तस्य विभावः॰ अनयोर्विरोधेऽपि पूर्वार्द्धस्य बाध्यत्वेनैवोक्तत्वाच्च दोषत्वं, प्रत्युत शान्तपरिपोषा(क)द्गुणत्वम्॰ एवं ह्यत्र प्रतीयते, सर्वा रामादयः सन्त्येव जीविते तत्सौकर्यार्थमुपादेयाः, जीवितं चातिभङ्गुरमिति किंकृतमुपादेयत्व,मतो रम्यत्वेऽपि निष्फला एत इति॰ नन्वेवं पूर्वार्द्धप्रतिपाद्यस्य बाध्यत्वेऽपि मत्ताङ्गनापाङ्गभङ्गेत्यनेन विरोधो न परिहृतः॰ न च तत्र न शृङ्गारप्रतीतिरिति वक्तुं शक्यं, तदुपादानवैयर्थ्यप्रसङ्गादितिचे,न्न तत्र रसप्रतीति,स्तद्व्यञ्जकानुभावाद्यप्रत्ययात्॰ किमर्थं तर्हि तदुपदानमिति चेत्, शान्तस्य परिपोषणार्थमेवेति ब्रूमः॰ स एव कथमिति चेत्, जीवितस्यातिभङ्गुरत्वप्रतीतेः॰ सापि कुत इति चेत्, जीवितादप्यधिकमपाङ्गभङ्गस्यास्थैर्यं सकलजनप्रसिद्धम्॰ अतस्तथाविधभङ्गुरस्यापाङ्गभङ्गस्योपमानत्वेनोपादानात्॰ तदेतदुक्तं "जीवितादप्यधिकमपाङ्गभङ्गस्यास्थिरत्वमिति प्रसिद्धभङ्गुरोपमानतयोपात्तं शान्तमेव

(क) परिपोषकत्वादिति पा॰ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुष्णाती"ति· केचित्तु प्रसिद्धभङ्गुरस्य साधर्म्येण जीवितोपमानतयोपात्तमिति तद्व्याचक्षते· ध्वनिकारस्तु—भवत्येवात्र शृङ्गारप्रतीतिः, परन्तु तया गुड़जिह्विकान्यायेनोन्मुखीकृत्य विनेयाः शान्तरसे निवेश्यन्त इत्यदोषता· यद्वा, काव्यशोभानिमित्तमेव तदुपादानाद्दोषत्वाभावः· नहि विना शृङ्गारेण काव्यशोभेति समादधे· तच्चातिमनोरम्, शृङ्गारशान्तयोर्नैरन्तर्य्याभावेन प्रथमसमाधेरसम्भवात्· द्वितीयसमाधिरपि तदा स्या,द्यदि रसान्तरयोगेन चारुत्वं नानुभूयेत· नत्वेवम्· किञ्च, रसमात्रेण चारुत्वमित्यपि न शक्यते वक्तुं, प्रागेव तु शृङ्गारमात्रेणेति, यत,श्चित्रकाव्येऽलङ्कारादेव चारुत्वप्रत्ययः· तस्मादत्र शान्तरसादनुप्रासमात्रेण वा चारुत्वसम्भवाचोत्तरोपि समाधिरिति ॥ ६३ ॥

अविरोधोपायान्तरमाह—

आश्रयैक्ये विरुद्धो यः, स कार्य्यो भिन्नसंश्रयः ।
रसान्तरेणाऽन्तरितो नैरन्तय्य तु[(क)] यो रसः ॥ ६४ ॥

यो रसं इत्यत्र विरुद्ध इत्यनुषज्यते· रसानां विरोधो द्विधा समानाधिकरणतया नैरन्तर्य्येण वेति· तत्र वीरभयानकयोरैकाधिकरण्ये विरोध इति प्रतिपक्षगतत्वेन भयानको वर्णनीय,स्तथा सति दूरे तस्य दोषत्वम्, प्रत्युत वीरपरिपोषः· यथा मम—

आहूतापि पदं ददाति न पुरो, न प्रार्थितापीक्षते,
साकूतं परिभाषितापि बहुशः किञ्चिन्नचाऽऽभाषते, ।
आश्लिष्टापि न संमुखानि रचयत्यङ्गानि मूढाशया,
कोपोद्रेकवशंवदेव तरुणी श्रेणी यदीयद्विषाम् ॥

नचात्र शृङ्गारभयानकयोरपि विरोधः· वक्ष्यमाणक्रमेण द्वयोरप्यन्याङ्गत्वाद् व्यधिकरणत्वाच्च· यद्यप्यालम्बनभेदेनैकाश्रयावपि वीरभयानको क्वचिदनुभूयेते, तथापि न तथा वर्ण्येते इति भिन्नाश्रयतयैव निवेशनीयौ· एवमन्येषामप्यूह्यम्· यस्य तु येन रसेन नैरन्तर्य्येण विरोधः, सोऽविरोधिना

(क) नैरन्तर्य्येणेति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसान्तरेणान्तरितो निबन्धव्यः[क] यथा नागानन्दे शान्तस्य[ख] जीमूतवाहनस्य "अहो गीतमहो गीत,महो वादित्र" मित्यनेनाद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो निबद्धः न केवलं प्रबन्ध एव रसान्तरव्यवधिना विरोधनिवृत्तिः, किन्त्वेकस्मिन्नपि वाक्ये यथा—

भूरेणुदिग्धानथ पारिजातमालारजोरञ्जितबाहुमध्याः, ।
गाढं शिवाभिः परिरभ्यमाणान् सुराङ्गनाश्लिष्टभुजान्तरालाः, ॥
सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान् ।
संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः कल्पलतादुकूलैः, ॥
विमानपर्य्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीम् ।
निर्दिश्यमानाँल्ललना[ग]ङ्गुलीभिर्वीराः स्वदेहान् पतितानऽपश्यन् ।

अत्र विशिष्टस्य वीरस्य कर्त्तुः सर्वत्राक्यान्वयित्वेन विमानाधिरोहणादिना मध्य उत्साहप्रतीतेर्बीभत्सशृङ्गारयोरविरोधः यद्यप्यत्र वीर एव प्रधान,मन्यौ च तद्व्यभिचारिणाविति न विरोध,स्तथाप्येवमप्यविरोधः सम्भवतीत्युदाहृतम् ॥ ६४ ॥

अविरोधे हेत्वन्तरमाह—

स्मर्य्यमाणो विरुद्धोऽपि साम्येनाऽथ विवक्षितः ।
अङ्गिन्यऽङ्गत्वमाप्तौ यौ, तौ न दुष्टौ परस्परम् ॥ ६५ ॥

तत्र स्मर्य्यमाणत्वेनाविरोधो यथा—

अयं स रशनो[घ]त्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥

समरभुवि निपतितं भूरिश्रवसो हस्तं समालोक्य तद्वधूनामिदं वचनम् तथाच शृङ्गाराङ्गमपि पूर्वावस्था स्मर्य्यमाणतयोद्दीपनविभावत्वेन करुणपरिपोषिकेत्यदोषः ॥

(क) निबद्धव्य इति प्रायः सत्त्वे ऽपि निबन्धव्य इति स्थापितम् ।
(ख) शान्तजीमूतवाहनस्येति पु० ।
(ग) ०मानाल्ललनेत्यस्य सर्वत्रसत्त्वे ऽपीत्थं न्यास्यम् ।
(घ) रसनेति क्वचित् परम्, काञ्चीवचनः 'श'मध्यः प्रयुक्तो नतु समध्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साम्यविवक्षया यथा—

दन्तक्षतानि करजैश्च विपाटितानि
प्रोद्भिन्नसान्द्रपुलके भवतः शरीरे ।
दत्तानि रक्तमनसा मृगराजवध्वा
जातस्पृहैर्मुनिभिरप्यवलोकितानि ॥

एकत्राङ्गिनि विरुद्धयोरङ्गत्वं द्विधा, तुल्यकक्षतया ऽङ्गाङ्गिभावेन वा साक्षात्परस्याङ्गभावमापद्य वा। तत्राद्येनाविरोधो यथा—

क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव, गलद्बाष्पाम्बुधौताननाः, ।
भीत्या भर्तृकरावलम्बितकरा,स्त्वद्वैरिनार्य्यो[क], ऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव ॥

अत्र चाटुके या राजविषया रति,स्तत्र करुणश्रृङ्गारावुभावपि साक्षादङ्गमिति तन्निर्वाहयैककार्य्याकुलयोस्तयोरेकराजकार्य्योद्यतयोरिव भृत्ययोः सहजतो विरोधोपि न दोषाय।[ख] यथा—

एहि, गच्छ, पतो,त्तिष्ठ, वद, मौनं समाचर, ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनो ऽर्थिभिः ॥

इत्यत्र प्रधानक्रीडायामङ्गभावेन भावाभावयोरपि न विरोधः। एहीति क्रीड़तीतिप्रकारेण द्वयोरप्यङ्गत्वात्। तस्माद्विधेययोरेव विरोधो दोषाय,नत्वनूद्यमानयोरपीति परमार्थः। प्रकृतोदाहरणे च पुनरप्युद्यद्विवाहा इवेत्युत्प्रेक्षा। तेन "एहि गच्छे"तिवत् प्रतापे द्वयोरपि साक्षादेवाङ्गत्वम्, तादृशोयं प्रभावो, येनाऽऽसां पुनर्विवाह उत्प्रेक्ष्यत इति प्रतीतिपर्य्यवसानात् । अङ्गाङ्गिभावेन पराङ्गतयाऽविरोधो यथा—

क्षिप्तो हस्तावलग्नः, प्रसभमभिहतो ऽप्याददानोंऽशुकान्तं,
गृह्णन्केशेष्वपास्त,श्चरणनिपतितो नेक्षितः संभ्रमेण, ।
आलिङ्गन् यो ऽवधूतस्त्रिपुरयुवतिभिः साश्र[ग]नेत्रोत्पलाभिः,

(क) त्वच्छत्रु—इति, तद्वैरि—इति च क्वचित्पाठः ।
(ख) दोष इति पा० ।
(ग) साश्रु—इति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कामीवाऽऽर्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥

अत्र त्रिपुररिपुप्रभावातिशयस्य करुणोऽङ्गं, तस्य तु शृङ्गारः। नन्वेवं करुणस्य प्राधान्ये तत्रैव विश्रान्तेरुभयोरङ्गत्वासम्भवे कथमुदाहरणत्वमिति न वाच्यं, शृङ्गारापेक्षया हि तस्य प्राधान्येऽपि न तत्रैव विश्रान्तिरपि तु तस्यापि प्रभावं प्रत्यङ्गतैव. यतः, यथा पूर्वं कामुकः करावलम्बादिकमकार्षीत्, तथा सम्प्रति शराग्निरित्युपमानतया शृङ्गारपरिपोषितेन करुणेन प्रभावातिशय एव प्रकर्षमानीयते। नचाङ्गाङ्गस्य कथमङ्गत्वमिति वाच्यम्, तदुपकृतस्याङ्गस्योपकारविशेषाधायकतया तस्याप्युपकारकत्वात्। यदुक्तं

"गुणकृतात्मसंस्कारं प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि तथा भूयसि वर्तते" ॥

इति। ननु प्राक्प्रतिपादितरूपवेद्यान्तरसंपर्कशून्यरसस्य न रसान्तरेण विरोधो, नाप्यङ्गाङ्गिभाव इत्यसम्बद्धमेवैतत्सर्वमिति चेच, रसशब्देनात्र प्रकरणे भावस्याभिधानाद्, रस्यत इतिव्युत्पत्तेः ॥ ६५ ॥

इति महामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपे सप्तम उल्लासः[क]।

॥ अथाऽष्टम उल्लासः ॥

एवं दोषे निरूपिते गुणालङ्कारौ प्राप्तावसरौ। तयोर्गुणस्यान्तरङ्गतया प्राथम्यम्। विप्रतिपद्यन्ते तु केचिद्गुणालङ्कारयोर्भेदे। किञ्च, सामान्यतोऽलक्षिते विशेषलक्षण[ख]मुचितमिति कारिकाद्वयेन तयोः स्वरूपप्रदर्शन[ग]मुखेन भेदकं लक्षणमाह–

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतव,स्ते स्युरचलस्थितयो गुणाः ॥ ६६ ॥

(क) सप्तमोल्लासइति पु० ।
(ख) विशेषतोलक्षणमिति पा० ।
(ग) स्वरूपदर्शनेति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गिनः शरीरिष्वात्मवत् काव्ये प्राधान्येन स्थितस्य रसस्य धर्माः साक्षात्तदाश्रिता इत्यर्थः· अचलस्थितय इत्यऽपृथक्स्थितयः, अव्यभिचारिस्थितय इति यावत्· अव्यभिचारश्च रसेन तदुपकारेण च· तेन रसं विना ये नावतिष्ठन्ते, ऽवतिष्ठमानाश्चाऽवश्यं रसमुपकुर्वन्तीत्यर्थः· अत एवानयोर्व्यतिरेकमलङ्कारे वक्ष्यति· एवं च रसस्योत्कर्षहेतुत्वे सति रसधर्मत्वं, तथात्वे सति रसाव्यभिचारिस्थितित्वम्, अयोगव्यवच्छेदेन रसोपकारकत्वं चेति लक्षणत्रयं गुणानां द्रष्टव्यम्· अलङ्कारमात्रभेदकं तु सत्यन्तभागविमुक्तमिदमेव ग्राह्यम्, अन्यथा विशेषणवैयर्थ्यात्· चण्डीदासस्तु—रसधर्मत्वमात्रं लक्षणम्· उत्कर्षहेतुत्वं तु गुणशब्दप्रवृत्तिबीजमित्याह· तदयुक्तम्, शृङ्गारत्वादौ धर्मेऽतिव्याप्तेः· ननु रसधर्मत्वमेषामसिद्धम्· कथमन्यथा नीरसेपि सुकुमारादिवर्णशालिनि मधुरादिव्यवहारो, रसवत्यपि ईदृग्वर्णाभावेऽमधुरादिव्यवहार इति· उच्यते,—शौर्यादयस्तावदात्मन एव धर्मा इत्यविवादम्· दृश्यते तु क्वचिदशूरेप्याकारमहत्त्वादियोगिनि शूरव्यवहारः, शूरेप्याकारलाघवादियोगिन्यऽशूरव्यवहारश्च· तत्कस्य हेतोः? अथ क्वचिच्छूरव्यवहारविषये विततात्कृतिदर्शना,'दाकार एवास्य शूर' इत्यौपचारिकव्यवहाराच्चाऽभियुक्ताना'माकार एवैतादृशः शूरपदवाच्य' इति विपर्य्यासादऽदूरदर्शिनस्तथा व्यवहरन्ति· तत्त्वज्ञास्तु क्वचिदुपचारात इति वक्तव्यम्· हन्तैवं,(क)मधुरादिरसयोगिनि सुकुमाराद्विवर्णयुक्ते मधुरादिव्यवहारा'द्वर्ण एवायं मधुरादि'रित्यौपचारिकव्यपदेशाच्चाभियुक्तानां 'वर्ण एवैतादृशो माधुर्य्यभा'गिति विपर्य्ययाद्रसपर्य्यन्तावगाहिबुद्धिविधुरा व्यवहरन्ति· तत्त्वालोचिनस्तु क्वचिदुपचारादिति तुल्यमेतत्· ननु शौर्य्यादेरात्मवृत्तित्ववत् मधुरत्वादीनां रसवृत्तित्वव्यवस्थितावेवं स्यात्· सैव त्वऽसिद्धा, विनिगमकाभावादिति चेन्, मैवं, भवत्येव विनिगमकाभावो, यदि त्वया वर्णमात्राश्रया गुणाः स्वीकर्त्तुं शक्यन्ते, नत्वेवम्, अविशेषेण रचनायामपि तदभ्युपगमात्· तथाच रसमात्रवृत्तित्वे लाघवं, वर्णरचनोभयवृत्तित्वे तु गौरवम्· यतश्चैवम्, अत एव माधुर्य्यादयो रसधर्माः समुचितैर्वर्णादिभि-

(क) हन्तैवमित्येकत्र नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यंज्यन्त इत्येव सम्यक्· व्यञ्जकत्वं चैषां यथा, तथोदाहरिष्यत इति नातिप्रसङ्गशङ्का[(घ)] ॥ ६६ ॥

उपकुर्वन्ति तं सन्तं ये ऽङ्गद्वारेण जातुचित् ।
हारादिव,दऽलङ्कारास्ते ऽनुप्रासोपमादयः ॥ ६७ ॥

अङ्गिनो रसस्याङ्गभूतौ शब्दार्थौ तद्वारेण तदतिशयाधानमुखेन ये धर्मा रसमुपकुर्वन्ति तेऽलङ्काराः· तत्र शब्दद्वारेणानुप्रासादादयः, अर्थद्वारेणोपमादयः· यथा कण्ठाद्यङ्गोत्कर्षद्वारेण शरीरिणोऽप्युपकारका हारादयः· सन्तमिति, यत्र रसस्य सम्भव,स्तत्र तमुपकुर्वन्ति· यत्र तस्याऽसम्भव,स्तत्रोक्तिवैचित्र्यमात्रपर्य्यवसिता इति भावः· जातुचित्, नतु नियमेन· तथाच सन्तमपि रसं क्वचिन्नोपकुर्वन्तीत्यर्थः· एतावता रसावृत्तित्वं चलस्थितित्वं च दर्शितम्· तथाच रसोपकारकत्वे सति तदवृत्तित्वं, तथात्वे सति रसव्यभिचारित्वम्, अनियमेन रसोपकारकत्वं चेति सामान्यलक्षणत्रयमलङ्काराणाम्· गुणमात्रभेदकं तु सत्यन्तभागरहितं तद्वेदितव्यम्, अन्यथा व्यर्थविशेषणत्वात्· तत्र शब्दद्वारेण रसोपकारकत्वं यथा–

अपसारय घनसारं, कुरु हारं दूर एव, किं कमलैः, ।
अलमलमालि! मृणालैरिति वदति दिवानिशं बाला ॥

अत्र रेफानुप्रासः शब्दमलङ्कुर्वन् विप्रलम्भशृङ्गारमुपकरोति,रेफस्य शृङ्गारव्यञ्जकत्वात् । अर्थद्वारेण यथा–

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं,
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव, ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति, नचाम्बा, न भवती ॥

अत्र विषमिवेत्यादिरुपमा· साचार्थमलङ्कुर्वाणा रसमुत्कर्षयति· विषमिवेत्युपमावशेन विसर्पणादेरतिशयप्राप्त्या विप्रलम्भोत्कर्षात्· एव·

(घ) "यद्यपि दोषालङ्कारे तच्याय, स्तथापि असाधुत्वादीनां रसवृत्तित्वमसम्भावितमिति"–एतावन्मात्रमत्रस्थाने पुस्तकेष्वधिकं वर्त्तते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनुप्रासेपि· रसं विनाप्यलङ्कारसम्भवो यथा—"स्वच्छन्दोच्छलदच्छे"त्यादौ चित्रभेदे । सत्यपि रसे तदनुपकारकत्वं शब्दालङ्कारस्य यथा—

चित्ते विहुट्टदि ण खिट्टदि(क) सा गुणेसु
सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसु ।
बोल्लम्मि वट्टदि पवट्टदि कब्बबन्धे
धाणे ण तुट्टदि चिरं तरुणी तरट्टी ॥

अत्रानुप्रासेन शब्दमात्रमलङ्क्रियते, नतु सन्नपि विप्रलम्भशृङ्गारः, टवर्गस्य तत्प्रतिकूलत्वात्· अत्र च प्रतिकूलवर्णत्वं न दोषः, प्रकृतस्य गुणप्रधानत्वात्· अस्य च तदनभिव्यञ्जकत्वादिति कश्चित्· वस्तुतस्तु, सत्यपि प्रतिकूलवर्णत्वे रसस्य नानुत्पत्तिरेव, अनुभवविरोधात्, किन्त्वपकर्षमात्रम्· नचापकृष्टेपि विद्यमाने तस्मिंष्टवर्गानुप्रासस्योपकारकतेति सारम् । सत्यपि रसे तदनुपकारकत्वमर्थालङ्कारस्य यथा—

मित्रे क्वापि गते, सरोरुहवने बद्धानने ताम्यति,
क्रन्दत्सु भ्रमरेषु, वीक्ष्य दयितासक्तं(ख) पुरः सारसम् ।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता,
कण्ठे केवलमर्गलेव निहिता(ग) जीवस्य निर्गच्छतः ॥

अत्रोपमार्थालङ्कारः· नचासौ प्रकृतस्य शृङ्गारस्योपकारिका विप्रलम्भे हि जीवनिर्गमोपि वर्ण्यते, तदुत्कर्षाधायकत्वादिति तन्निरोधे हेतूपादानमनुचितं, प्रत्युत स्नेहभावे पर्य्यवस्येत्· तदेतदुक्तम्—'अत्र बिसलता जीवं निरोद्धुमशक्तेति प्रकृताननुगुणोपमे'ति· अशक्तत्वं चानुचितत्वमिति प्राञ्चः· वस्तुतस्तु, तदन्यथा व्याख्येयम्— बिसलता जीवं रोद्धुमशक्तेत्युपमा प्रकृताननुगुणा· प्रकृते विषये अनुगुणरहिता उपमाया अनुगुणं यत्सादृश्यं तच्छून्या· तस्मादत्रोपमा नालङ्कारः, किंतूत्प्रेक्षा· नच तस्यामपि

(क) चित्ते विचट्टदि ण टुट्टदि इति पुस्तकान्तरम् ।
(ख) दयिताऽऽसचमिति पा· ।
(ग) विहितेति क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्वैषतादवस्थ्यम्, सम्भावितेनापि सादृश्येन तत्प्रवृत्तेः, नतूपमावद्वस्तुत एव· नीवरोधकत्वरूपं सादृश्यमपि विषये उत्प्रेक्षणीयकोटावेवान्तर्भूयथोच्यते "बोधकर्मिव निहित"मिति, तर्हि कथमिदं प्रकृतोदाहरणमिति चेत्, उत्प्रेक्षातो रसातिशयाप्रतीतेः, प्रत्युत तादृशोत्प्रेक्षाया उपमोत्कर्षापकर्षपर्य्यवसानादिति· एष एव गुणालङ्कारविभागो विचारसहो नान्यः तदेवं गुणालङ्कारयोर्भेदे व्यवस्थिते यत्कैश्चिदुक्तं—लौकिकयोर्गुणालङ्कारयोः शौर्य्यादिहाराद्योः समवेतत्वसंयोगित्वाभ्यां भेदः सम्भवति· अलौकिकयोर्माधुर्याद्यनुप्रासोपमाद्योरुभयोरपि समवेतत्वादनुपपन्नो भेद,स्तस्मात्तयोर्भेदाभिधानं गड्डलिकाप्रवाहन्यायेन· तथाहि, गड्डलिका मेषी काचिदेका केनचिद्धेतुना पुरो गच्छति, इतरास्तु विनैव निमित्तविचारं तामनु गच्छन्ति, तथा केनाप्यालङ्कारिकेण गुणालङ्कारौ केनचिदभिप्रायेण भिन्नयोक्तौ, इतरे तु हेतुविचारं विनैव तदनुसारेण तद्भेदं वदन्तीति· तत् सम्यग्वेदितव्यम्· यदप्युक्तं वामनेन—काव्यशोभा काव्यव्यवहारनिमित्तं कश्चिदतिशयः, तद्धेतवो गुणा,स्तदतिशयहेतवस्त्वलङ्कारा इति तयोर्भेद इति· तदप्ययुक्तम्, यतः शोभाहेतवो गुणा· इत्युक्तम्, तत्र समस्तैर्गुणैः काव्ये शोभोत्पत्ति,रुत येन केनापि· आद्ये, पाञ्चाली गौडीया च रीतिः कथं काव्यस्यात्मा, माधुर्य्याद्यभावेन समस्तगुणाभावाच्छोभानुत्पत्तेः· अन्त्ये "अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूम" इत्यादावोजःप्रसादगुणसत्त्वात् काव्यव्यवहारप्रसङ्गः· नहि मन्मत इव तन्मतेपि तद्व्यवहारोलङ्कारापेक्षः· तेन गुणमात्रेणैव काव्यव्यवहारस्वीकारात्· यदपि शोभातिशयहेतवोलङ्कारा इति· तदप्ययुक्तम्,

"स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनि! ।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ॥—

इत्यत्र पूर्वार्द्धे विशेषोक्तिः, 'एकगुणहानिकल्पनया शेषगुणदार्ढ्यकल्पना विशेषोक्ति'रिति वामनलक्षणात्· उत्तरार्द्धे व्यतिरेकः, 'उपमेयस्य गुणातिरेकित्वं व्यतिरेक' इति तल्लक्षणात्· एतौ च गुण(क)मनपेक्ष्यैव का-

(क) गुणलक्षणमिति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यव्यवहारहेतुशोभाजनकौ· एवमन्यत्राऽप्यूह्यम्· नन्वत्रापि प्रसादादेर्वर्तमानत्वात् कथं गुणानपेक्षत्वमलङ्कारयोः· किंच, निर्गुणत्वे कथं त्वन्ययेऽपि काव्यव्यवहारः, सगुणत्व(क)विशेषणाभावादिति चेत्, अस्त्येवात्र गुणास्तथांज्ञानं च· परंतु, किंचिद्गुणवत्त्वस्य शोभाहेतुत्वे ऽतिप्रसङ्गात् समस्तगुणवत्त्वं तथा वक्तव्यम्· नचात्र तत्सामस्त्यम्· तथाच गुणजन्यां शोभामनपेक्ष्यैवालङ्काराभ्यां शोभासम्पत्तिरिति तात्पर्य्यम्· ॥ ६७ ॥

इदानीं (ख) गुणानामलङ्कारभेदे सिद्धे दशविधत्वव्युदासाय तद्भेदमाह—

माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते, न पुनर्दश ।

विभागक्रमेणैषां लक्षणमाह—

आह्लादकत्वं माधुर्य्यं, शृङ्गारे द्रुतिकारणम् ॥ ६८ ॥

आह्लादकत्वं यद्यानन्दहेतुत्वं, तर्हि न शृङ्गारस्यापि, तस्यैव सुखात्मत्वेनाऽतज्जनकत्वात्· आनन्दस्वरूपत्वं चे,तर्हि सर्वेषामेव रसानामित्यत आह—द्रुतिकारणमिति· द्रुतिश्चेतसो गलितत्वमिव(ग) द्वेषादिजन्यकाठिन्याभावः· तथाच यद्वशेन श्रोतुर्निर्मनस्कतेव सम्पद्यते, तदाह्लादकत्वस्वरूपं माधुर्य्यमित्यर्थः· यदुक्तं—

"गलितत्वमिवाह्लादपदव्या हृदये ददत् ।
माधुर्य्यं नाम शृङ्गारे प्ररोहं गाहते गुणः ॥"

इति· क्वासावित्यत आह—शृङ्गारइति· शृङ्गारपदं संभोगपरं, विप्रलम्भेऽतिशयस्य वक्ष्यत्वात्· भास्करस्तु—श्रव्यत्वं माधुर्य्यस्य लक्षणमाह स्म· तदयुक्तम्, ओजःप्रसादयोरपि तत्सत्त्वेनातिव्याप्तेः, शब्दनिष्ठत्वाच्च ॥ ६८ ॥

तत् किं संभोग एव माधुर्य्यम्· नेत्याह—

करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।

(क) सगुणेति पु· ।
(ख) 'इदानी'मिति पुस्तकान्तरे नास्ति ।
(ग) ०"मिति· चेतसो गलितत्वमिव· गलितत्वमपी"ति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्भोगात् करुणे, तस्माद् विप्रलम्भे, ततोऽपि शान्तेऽतिशयितं माधुर्यम्, हास्यादेरप्यपगमेनातिद्रुतिहेतुत्वात्। इयांस्तु विशेषः—सम्भोगविप्रलम्भयोस्तन्निःसपत्नं, शान्ते तु जुगुप्साद्यन्वयादोजोलेशानुविद्धमिति ॥ ऽ ॥

दीप्त्यात्मविस्तृतेर्हेतुरोजो, वीररसस्थिति ॥ ६९ ॥

दीप्तिस्वरूपस्यात्मनो मनसो विस्तृतिर्ज्वलितत्वमिव। तथाच यद्वशान् ज्वलितमिव मनो जायते, तदोज इत्यर्थः। क्वेदमित्यत आह–वीररसस्थिति ॥ ६९ ॥

अस्याधिकरणान्तरमाह–

बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण तु[क] ।

वीराद्बीभत्से, ततोऽपि रौद्रे चित्तदीप्तेः कार्य्यायास्सातिशयतया कारणमोजः क्रमेणोत्कर्षवत्। तदेतद् वीररौद्रयोर्निष्प्रतिपक्षं, बीभत्से तु माधुर्यलवानुविद्धमिति विशेषः। प्राधान्येन माधुर्य्यौजसोरेकैकविधानमत्र प्रक्रान्तम्, अतो हास्याद्भुतभयानकेषु न किञ्चिद्विहितं, तेषूभयगुणप्राधान्यात् ॥ ऽ ॥

शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः ॥ ७० ॥

व्याप्नोत्यन्यत् प्रसादोऽसौ, सर्वत्र विहितस्थितिः ।

ओजसि वीररौद्रादिरसे शुष्केन्धनाग्निवद्, माधुर्य्ये शृङ्गारकरुणादिरसे[ख] स्वच्छशर्करावस्त्रादिसम्बन्धि[ग] जलवद्यो गुणोऽन्यद्व्याप्यञ्चित्तं झटित्येव रसेन व्याप्नोति, स प्रसादः। करुणस्यापि स्वातन्त्र्यविवक्षया य इतिनिर्देशः। अयं च सर्वेषु रसेष्वाधेयतया, सर्वासु रचनासु व्यञ्जकतया स्थित इति तन्त्रेणाह–सर्वत्र विहितस्थितिरिति ॥ ऽ ॥

कथं तर्हि तत्त्ववेदिनामपि शब्दार्थयोर्मधुरादिव्यवहार इत्यत आह–

गुणवृत्त्या पुनस्तेषां वृत्तिः[घ] शब्दार्थयोर्मता ॥ ७१ ॥

(क) तोः स्थाने चः क्वचिल्लभ्यते।
(ख) ओजसि शुष्केन्धनाग्निवन्माधुर्ये–इति पु०।
(ग) 'सम्बन्धि' पदमन्यत्र नास्ति।
(घ) वृत्तिरित्यस्य स्थाने स्थितिरिति क्वचित्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुणवृत्तिः, उपचारः· आकारे शौर्य्यस्येव व्यञ्जके सुकुमारवर्णादि तदुपचार इत्यर्थः· तेषाम्, गुणानाम् ॥ ७१ ॥

ननूक्तलक्षणाः श्लेषादयोऽपि दश दुरपह्नवा,स्तत् कुतस्त्रय एव, न पुनर्मदुक्ता अपि दशेत्यत आह—

केचिदन्तर्भवन्त्येषु, दोषत्यागात् परे श्रिताः, ।
अन्ये भजन्ति दोषत्वं कुत्रचि,न्न ततो दश ॥ ७२ ॥

एषु,मदुक्तलक्षणेषु माधुर्य्यादिषु· इदं चोपलक्षणम्, अलङ्कारध्वन्यो-रप्यन्तर्भावस्य दर्शयिष्यमाणत्वात्· उक्तान्तर्भावादिहेतुत्रयोपादानमप्युप-लक्षणम्, वैचित्र्यमात्रपर्य्यवसानस्यापि दर्शयिष्यमाणत्वात्· दोषत्यागा-दिति· दोषाभावस्वरूपत्वात्तद्व्यापकतया वा· दोषत्वं कुत्रचिदिति· दोष-स्वभावस्य गुणस्वभावत्वानौचित्यात्, स्वभावभङ्गप्रसङ्गात्· तथाहि, श्लेषस्तन्मते बहूनामपि पदानामेकवद्भासनम्· समाधिस्त्वारोहावरोहयोः क्रमः· स चोत्कर्षापकर्षयोर्वैरस्यानाधायको विन्यासः· उदारत्वं विकटा-क्षरत्वम्· तच्च नृत्यद्भिरिव पदैर्या घटना· तत्त्वं प्रसाद ओजोमिश्रितं शैथि-ल्यम्, सर्वशैथिल्यस्य दोषत्वात्· तदेतच्चतुष्टयमोजस्यन्तर्भूतम्· यद्यपि दीप्तिजनकत्वरूपे रसनिष्ठ ओजसि नैषामन्तर्भावसम्भव,स्तथापि तत्स्वी-कारेण स्वीकृते तद्व्यञ्जके गाढबन्धलक्षणे तदन्तर्भाव इत्यर्थः· एवमग्रेऽपि· पृथक्पदत्वरूपं तु माधुर्य्यं भङ्ग्यासाक्षादेवोपात्तम्, यथोक्तमाधुर्य्यव्यञ्ज-कत्वेनासमासस्य विधानात्· अर्थव्यक्तिस्तु झटित्यर्थसमर्पकता या· सा च प्रसादपदेनैवोपात्ता, यथोक्तप्रसादस्य तद्व्यङ्ग्यत्वात्· समता त्वारब्धवैदर्भ्या-दिमार्गापरित्यागः· सा च क्वचिद्दोष एव, यथा "मातङ्गाः किमु वल्गितै"-रित्यादौ· प्रारब्धस्य मसृणवर्णत्वस्य सिंहाभिधाने ऽप्यत्यागो दोषाय· तत्परित्यागस्तु,प्रत्युत गुण इत्युक्तम्· नच दोषस्वभावस्य गुणत्वम्, स्वभाव-भङ्गप्रसङ्गात्· सुकुमारत्वं त्वनिष्ठुराक्षरप्रायत्वम्· तच्च कष्टत्वरूपदोषाभा-वपर्य्यवसन्नम्· कान्तिस्तूज्ज्वलता· उज्ज्वलत्वन्तु ग्राम्यपदाघटितत्वमिति·

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सापि ग्राम्यत्वरूपदोषाभावपर्य्यवसन्नैव· [संयोगपरह्रस्वप्राचुर्य्यरूपं गाढत्वमोजः·](क)

एवं दश शब्दगुणा न पृथग्वक्तव्याः॥ अर्थगुणा अप्येवम्· तथाहि, अर्थस्यौजः प्रौढिः· सा च

पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा ।
प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च ॥

इतिप्रतिपादितपञ्चप्रभेदा· तेष्वाद्यभेदचतुष्टयमुक्तिवैचित्र्यमात्रं, न गुण,स्तैर्विनापि काव्यव्यवहारा,न्माधुर्य्यादिनिरपेक्षेण च तेन तद्व्यवहाराप्रवर्तनात्· अन्त्यस्तद्भेदो ऽपुष्टार्थत्वरूपदोषाभावपर्य्यवसन्नः, एवं प्रसादोऽर्थनैर्मल्यम्, प्रयोजकमात्रार्थपरिग्रह इति यावत्· सोप्यधिकपदरूपदोषपरित्यागादेवान्यथासिद्धः· सन्निधिमाधुर्य्यन्तूक्तिवैचित्र्यं नवीकृतत्वरूपम्· तच्चानवीकृतत्वरूपदोषाभावरूपम्· सौकुमार्य्यं पुनरपारुष्यम्, परुषेप्यर्थे ऽपरुषशब्दाभिधानमिति यावत्· तच्चाऽमाङ्गल्यरूपाश्लीलत्वपरित्यागेनैव सिध्यति· उदारता त्वर्थस्याग्राम्यत्वम्· तच्च ग्राम्यत्वरूपदोषाभाव एवेति· अर्थव्यक्तिस्तु वस्तुस्वभावस्य स्फुटता, सा च स्वभावोक्त्यन्तर्भूता· कान्तिस्तु दीप्तरसत्वम्, सा च रसध्वनौ रसवदलङ्कारे गुणीभूतव्यङ्ग्ये चान्तर्भूता· श्लेषस्तु क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटना· अस्यार्थः, क्रमकौटिल्यमतिक्रम,स्तस्यानुल्बणत्वमस्फुटता, तत्रोपपत्तिर्युक्ति,स्तस्य योग इति· यथा "दृष्ट्वैकासने"त्यादि· अत्र पिहितनयनामतिक्रम्याऽन्याचुम्बनादतिक्रम,स्तस्यास्फुटत्व,मनया तदज्ञानात्· तत्रोपपत्ति'रेवं कृते अनया न ज्ञातव्य'मिति· केचित्तु क्रमकौटिल्यं क्रमस्यातिक्रम,स्स चात्र व्यक्त एव, एकद्वेोभयानुरञ्जनात्· स एष श्लेष उक्तिवैचित्र्यमात्रं, न गुणः· अनन्यसाधारणरसोपकारित्वातिशयविरहात्· समता तु वैषम्याभावो ऽर्थस्य· स च क्रमाभेदरूप इति क्रमभेदरूपदोषाभाव एव· दोषत्वं तद्व्यतिरेकस्य कथमिति चेद्, यतो न खल्वनुन्मत्तो ऽन्यप्रस्तावे ऽन्यदभिधत्त इति· समाधिः पुनरर्थदर्शनम्· नचासौ गुणः, काव्यशरीरत्वात्· स्वयं

(क) एतत्कोष्ठान्तर्गतपाठ...

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टस्यान्यच्छायासिद्धस्य वा ऽर्थस्य यदि न दर्शनं,(क) कथं तर्हि काव्यशरीरनिर्व्वृत्तिः असाधारणशोभाधायकं हि गुणं ब्रुवन्ति, नच काव्यशरीरनिर्वर्त्तकमिति (ख) ॥ ७२ ॥

उक्तयुक्तीर्बुद्धिस्थीकृत्याह—

तेन नार्थगुणा वाच्याः—

परैरङ्गीकृता अर्थगुणास्तेन उक्तयुक्त्या, न पृथग्वक्तुमर्हाः(ग) ॥

—प्रोक्ताः शब्दगुणास्तु(घ) ये, ।

वर्णाः समासो रचनास्तेषां(ङ) व्यञ्जकतामिताः ॥ ७३ ॥

ये तु त्रय उपचारेणाऽन्यैः शब्दगुणाः प्रोक्ता वस्तुतो रसगुणा एव; वर्णादयस्तेषां व्यञ्जकत्वं गताः ॥ ७३ ॥

के कस्य व्यञ्जका इत्याकाङ्क्षायामाह—

मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा, रणौ लघू, ।
अवृत्तिर्मध्यवृत्तिर्वा, माधुर्य्ये, घटना तथा ॥ ७४ ॥

माधुर्य्ये व्यङ्ग्ये टवर्गवर्जिताः कादिमान्ता रेफणकारौ चेति वर्णाः तत्र कादयो मूर्ध्नि स्वस्ववर्गान्त्यवर्णगताः, यथा 'कुञ्ज' इत्यादि रेफणकारौ तु ह्रस्वस्वरान्तरितौ वृत्तिः समास,स्तस्य चाभाव एव, मध्यमता वेति समासः घटना तथेति सौकुमार्य्यवती पदान्तरयोगेन रचना चेति वर्णसौकुमार्य्यवती रचना वर्णसौकुमार्य्यादेव लब्धेति पदान्तरयोगे सौकुमार्य्यलाभाय 'घटना तथे'त्युक्तमिति उदा०—

अनङ्गरङ्गप्रतिमन्तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः, ।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तितानि ॥ ७४ ॥

(क) स्वयंदृष्टस्यान्यच्छायासिद्धस्यार्थस्य यदि न दर्शनमिति पु० ।
(ख) निवर्त्तकमिति पुस्तकान्तरन्तु न युक्तम् ।
(ग) परैरङ्गीकृता अर्थास्तेनोक्तयुक्त्या न पृथग्वक्तुमर्हन्तीति पुस्तकान्तरम् ।
(घ) शब्दगुणाश्च ये—इति क्वचित् ।
(ङ) रचना तेषामिति क्वचित्क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योग आद्यतृतीयाभ्यामन्त्ययो, रेण, तुल्ययोः, ।
टादिः, शषौ,(क) वृत्तिदैर्घ्यं, गुम्फ उद्धत, ओजसि ॥ ७५ ॥

ओजसि व्यङ्ग्ये वर्गप्रथमतृतीयाभ्यां सह तदन्त्ययोर्द्वितीयचतुर्थयो-र्योगः, यथा 'कच्छपुच्छे'त्यादि· तथा रेफेणाध, उपरि, उभयत्र वा यस्य कस्यापि योगः, यथा'वक्रार्कनिर्ह्रादा'दयः· तथा, तुल्ययोः कयोश्चिद्द्योगः, यथा'चित्तवित्ता'दौ· तथा टादिचतुष्टयं, शषौचेति वर्णाः· समासस्तु दीर्घः· गुम्फो रचना, सा चोद्धता विकटेति· उदा०—"मूर्द्ध्वामुद्वृत्तकृत्ते"त्यादि ॥ ७५ ॥

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्, ।
साधारणः समग्राणां, स प्रसादो गुणो मतः ॥ ७६ ॥

येन शब्देन, समासेन वा, यया रचनया वा, श्रुतिमात्रेण शब्दादर्थप्रत्ययः, स प्रसादव्यञ्जक इत्यर्थः· उदा०—

परिम्लानं पीनस्तनजघनसङ्गादुभयत,-
स्तनोर्मध्यस्यान्तःपरिमिलनमप्राप्य हरितम्, ।
इदं व्यस्तन्यासं श्लथभुजलता(ख)क्षेपवलनैः,
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्त्रशयनम् ॥

अन्येषां तु वर्णानामुदासीनत्वमिति तदुपादाने तु पुराणच्छायेत्युच्यते ॥ ७६ ॥

नचैवं माधुर्य्यादावुद्धतादयो रचनाद्याः सर्वत्र विरुद्धाः स्युरिति वाच्यम्, यतो, यद्यपि गुणपरतन्त्रा रचनादय,स्तथापि

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् ।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥ ७७ ॥

अन्यथात्वम्, गुणपारतन्त्र्याभावः, वक्तृवाच्यप्रबन्धौचित्यविरहे एव

(क) टादिः शेष इति पाठस्तु दुर्बोधनिबन्धनः ।
(ख) प्रशिथिलभुजेति पाठान्तरं तु नातियुक्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुणपारतन्त्र्यस्वीकारात्, तत्रापि वक्तृक्रोधाभिव्यक्तावुपयोगात्· तत्र क्वचिद्वाच्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः· यथा—

मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः,
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः, ।
कृष्णाक्रोधाग्रदूतः, कुरुकुलनिधनोत्पातनिर्घातवातः,
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽसौ(क) ॥

अत्र न वाच्यं क्रोधादिदीप्तरसव्यञ्जकम्, प्रश्नरूपत्वात्· प्रबन्धश्च नाटकात्मा ऽभिनेय इति दीर्घसमासत्वं प्रतिकूलं यद्यपि, तथापि वक्ता भीमसेन इति तदौचित्यादुद्धता रचनात्र· अतस्तदुद्धतत्वादिव्यक्तावेवोपयुज्यते· क्वचित्तु वक्तृप्रबन्धौचित्यानपेक्षया वाच्यौचित्यादेव रचनादयः· यथा—

प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात-
त्रासाकृष्टाश्वतिर्य्यग्वलितरविरथेनारुणेनेक्ष्यमाणम् ।
कुर्वत्काकुत्स्थवीर्य्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजां
भाङ्कारैर्भीममेतन्निपतति वियतः कौम्भकर्णोत्तमाङ्गम् ॥

अत्र वक्ता वैतालिकः, प्रबन्धश्चाभिनेयात्मेतिदीर्घसमासानौचित्येपि वाच्यस्य कुम्भकर्णोत्तमाङ्गस्य भीमत्वेनौजस्वित्वादुद्धता रचनादयः· क्वचिद्वक्तृवाच्यानपेक्षाः प्रबन्धोचिता एव रचनादयः· तथाहि, आख्यायिकायां हि शृङ्गारेपि व्यङ्ग्येऽनुद्धतेपि वक्तरि नातिमसृणा वर्णादयः, प्रत्युत विकटबन्धत्वेनैवच्छायावत्त्वात्· विप्रलम्भकरुणयोस्तु तस्यामपि दीर्घसमासपरिहारः, तयोरतिसौकुमार्य्यात्· कथायां तु रौद्रेपि नात्यन्तमुद्धटा वर्णादयः, वर्णनीयमहापुरुषसुखसमर्पणस्योद्दिश्यत्वात्· नाटकादावभिनेये तु रौद्रेपि न दीर्घसमासदयो, विच्छेदेनाभिनयसौकर्यात्· एवं मुक्तकाद्यौचित्यमनुसरणीयम्, तथाहि, एकैकच्छन्दसि वाच्यसमाप्तिर्मुक्तकम्, द्वयोः सन्दानितकम्, त्रिषु विशेषकम्, चतुर्षु कलापकम्, पञ्चादिचतुर्दशान्तेषु कुलकम्·

(क) समो दुन्दुभिस्ताड्यते ऽस्मावेति पा· ताड्यते ऽयं, ताडितो ऽयमिति च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र मुक्तकेषु कवेरसम्बन्धाभिनिवेशितत्वे रसाश्रयमौचित्यम्, यथा "शून्यं वासगृह"मित्यादौ· रसनिवेशाभावे तु कामचारः· सन्दानितकादिषु काव्यपरिसमाप्तेर्वैकल्यान्दीर्घमध्यसमासता च· प्रबन्धगतेषु पुनस्तेषु प्रबन्धोचिता एव रचनादय इत्यादि ज्ञेयम् ॥ ७७ ॥

इति महामहोपाध्यायगोविन्दप्रणीते काव्यप्रदीपे ऽष्टमोल्लासः ॥ * ॥

॥ अथ नवमोल्लासः ॥

एवं गुणे निरूपिते ऽलङ्कारा विवेचनीयाः· तत्र सामान्यलक्षणं गुणविवेचन एवोक्तम्· शब्दालङ्कारार्थालङ्कारोभयालङ्काररूपविशेषलक्षणत्रयं चार्थलभ्यमिति तेषां विशेषलक्षणेषु वक्तव्येषु काव्यलक्षणे शब्दस्य प्राथम्यात्तदलङ्कारविशेषलक्षणे वक्तव्ये प्रथमं वक्रोक्तिं लक्षयति—

यदुक्तमन्यथा वाक्य,मन्यथा ऽन्येन योज्यते ।
श्लेषेण काक्वा वा, ज्ञेया सा वक्रोक्ति,स्तथा द्विधा ॥ ७८ ॥

वक्त्रा ऽन्याभिप्रायेणोक्तमन्येनान्यार्थकतया योज्यते सङ्गम्यते, सा वक्रोक्तिरित्यर्थः· 'श्लेषेण काक्वा वे'ति योजनाहेतुमुखेन विशेषलक्षणद्वयम्· 'तथा द्विधे'ति विभागः· श्लेषवक्रोक्तिः काकुवक्रोक्तिश्चेति द्विधेत्यर्थः· श्लेषश्च द्विधा सभङ्गपदो ऽभङ्गपदश्च· तत्र सभङ्गश्लेषेण यथा—

नारीणामनुकूलमाचरसि चे,ज्जानासि, कश्चेतनो
वामानां हितमातनोति·(क) हितञ्चैवाबलानां भवान्· ।
युक्तं किं हितकर्त्तनं ननु बलाभावप्रसिद्धात्मनः·
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः ॥

अत्र नारीणामिति पदं स्त्रीणामित्यभिप्रायेणोक्तं, श्रोता तद्भङ्क्त्वा न शत्रूणामित्यर्थतया योजयित्वाऽऽह—'कश्चेतन'इत्यादि· अत्र वामानामिति शत्रूणामित्यर्थोऽभिप्रेतः, स्त्रीणामित्यर्थतया योजयित्वा ऽन्य आह—'हितञ्च'दित्यादि· अथान्यो ऽबलानामिति दुर्बलार्थतया हितञ्चदिति

(क) हितमादधातीति प्रियमादधातीति च पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हितकर्त्तनार्थतया योजयित्वाह– 'युक्तं कि'मित्यादि· अथान्यो बलाभावप्रसिद्धात्मपदमिन्द्रार्थतया योजयित्वाह–'सामर्थ्य'मित्यादि· अत्र नारीणामबलानामिति पदे सभङ्गे । अभङ्गमात्रपदेन श्लेषेण यथा–

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता· ।
त्रिगुणा श्रूयते बुद्धि,र्न तु दारुमयी क्वचित् ॥

अत्र दारुणेति क्रूरेत्यर्थकत्वेन वक्तुरभिप्रेतम्, काष्ठेनेत्यर्थेनान्यो योजितवान् । काकुवक्रोक्तिर्यथा–

गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते सखि! नैष्यति सुरभिसमये ऽसौ ॥

अत्र नैष्यतीति नायिकया निषेधाभिप्रायेणोक्तम्, सख्या तु नैष्यन्य, ऽपित्वेष्यत्येवेत्यर्थकतया काक्वा योज्यते· इयं च न वाकोवाक्यमात्रे, किन्तु स्वतो ऽप्यन्येनोक्तस्यान्यथायोजनमात्रे, न्यायसाम्यात् यथा मम–

कृष्णो वैरिविमर्द्दने, हरिपदप्रीत्यऽर्जने त्वर्जुनः,
पीतः पङ्कजलोचनाभिरभितो नेत्राञ्चलैश्चञ्चलैः, ।
रक्तः सज्जनसङ्गमेषु करुणाश्रेणीमणे श्रीधर!
स्थाने वर्णचतुष्टयस्य भुवने भर्त्ता भवान् गीयते ॥

अत्र 'वर्णचतुष्टयस्य भर्त्ता श्रीधर' इति सार्वलौकिकं वाक्यमन्यथा श्लेषादिना ऽस्माभिः समर्थितम्· एवमन्यदप्यूह्यम् ॥ ७८ ॥

अथावृत्तिनिबन्धनेष्वलङ्कारेषु रसानुगुणतया ऽनुप्रासः प्रथमं लक्षणीयः· स द्विधा, वर्णानुप्रासः पदानुप्रासश्च· तत्राद्यो ऽवाचकवर्णमात्रावृत्तौ· द्वितीयस्तु वाचकपदावृत्ताविति वस्तुगतिः· तत्राद्यं लक्षयति–

वर्णसाम्यमनुप्रासः–

अव्यवधानेन वर्णमात्रविन्यासो वर्णानुप्रास इत्यर्थः· शब्दसाम्यं त्वनुप्राससामान्यलक्षणमित्यर्थाल्लभ्यते· वर्णपदं व्यञ्जनपरम्· अतो व्यञ्जनवैसादृश्ये विरिञ्चिपदादौ ना ऽव्याप्तिः· नचेष्टैव सा, तत्रानुप्रासशब्दार्थस्याभावात्· रसादिभिरनुगतःप्रकृष्ट आसो न्यासो ह्यनुप्रासशब्दार्थः· नच स्वरमात्रसादृश्ये रसानुगमो, नवा सहृदयहृदयार्जकत्वलक्षणः प्रकर्षः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तं विभजते—

—छेकवृत्तिगतो द्विधा।

छेकगतो विदग्धाश्रितः, तैश्च प्रचुरमेतत्प्रयोगात्· वृत्तिगतो वृत्त्याश्रितः, तदुपोद्बलकत्वात्· वृत्तिश्च मधुरादिरसानुगुणो नियतमसृणादिवर्णगतो रसविषयो व्यापारो व्यञ्जनाख्यः ॥ ऽ ॥

तयोर्लक्षणमाह—

सोऽनेकस्य सकृत् पूर्वः—

अनेकस्य व्यञ्जनस्य, सकृदेकवारं साम्यं, पूर्वश्छेकानुप्रासः· उदा०-

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी ।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥

अत्र 'न्द, ण्ड'योः ॥

द्वितीयं लक्षयति—

—एकस्याप्यसकृत्परः ॥ ७९ ॥

अपिशब्दादनेकस्यापि· असकृद्द्विर्बहुकृत्वो वा· वस्तुतस्तु,छेकानुप्रासभिन्नं लक्ष्यम्,[(क)] अन्यथैकस्य सकृदावृत्तेरसंग्रहापत्तेः· एवं चैकस्य वर्णस्य सकृदसकृद्वा, ऽनेकस्य त्वसकृत् सादृश्यं वृत्त्यनुप्रास इति पर्यवसन्नम् ॥७९॥

तत्र—

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।

यथा—"अनङ्गरङ्गप्रतिम"मित्यादि ॥

ओजःप्रकाशकैस्तैश्च परुषा—

यथा"मूर्द्ध्नामुद्वृत्ते"ति ॥

—कोमला ऽपरैः ॥ ८० ॥

ओजोमाधुर्यव्यञ्जकातिरिक्तैः प्रसादवद्भिरक्षरैः· एनामेव केचिदतिशयितकान्तिराहित्येन ग्राम्यस्त्रीसाम्याद् ग्राम्येति वदन्ति· उदा०-"अपसारये"त्यादि ॥ ८० ॥

केषांचिदेता वैदर्भीप्रमुखा रीतयो मताः ।

(क) लक्षणमिति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वामनादीनां मत एता एव यथाक्रमं वेदर्भीगौड़ीपाञ्चाल्यो रीतय उच्यन्ते ॥ ८ ॥

शब्दानुप्रासमाह—

शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः ॥ ८१ ॥

शब्दनारूपव्यापारवाञ्छ शब्दः प्रतिपादिकादि,स्तद्गतः शाब्दः· भेद इति· तात्पर्य्यमन्वयभेद,स्तन्मात्राद्भेदे, न तु स्वरादर्थाद्वा· तथाच भिन्नतात्पर्यतुल्यार्थशब्दसादृश्यं शब्दानुप्रासः, स तु लाटानुप्रास उच्यत इत्यर्थः· 'तु'शब्दो वर्णानुप्रासस्य लाटीयत्वव्यवच्छेदकः· यत्तु पुनरुक्तत्वव्यवच्छेदाय भेदे तात्पर्यमात्रत इत्युक्तमिति व्याख्यानम्, तदसत्, मात्रशब्दस्याप्रयोजकतापत्तेः· एष एव कैश्चित्पदानुप्रास उच्यते ॥ ८१ ॥

सोयं पदस्य नाम्नो वेति द्विविधः· तत्र सविभक्तिकस्य यत्रावृत्तिः, स आद्यः· अन्यादृशस्तु द्वितीयः· तयोराद्यो ऽनेकस्य पदस्यैकस्यैव वा पदस्येति द्विविधः· अन्त्यश्च त्रिविध आवृत्तेरभिन्नसमासस्थतया, भिन्नसमासस्थतया, एकस्याः समासस्थत्वे सत्य ऽपरस्या असमासस्थतया च, समासं विनास्यासम्भवादिति पञ्च भेदा इति कारिकया प्रतिपादितम्· तत्राद्यमाह—

पदानां सः—

पदनामिति बहुवचनमनेकोपलक्षणम्, अन्यथा द्वयोः पदयोरावृत्तौ पष्ठभेदापत्तेः· उदा०—

यस्य न सविधे दयिता, दवदहनस्तुहिनदीधितिस्तस्य, ।
यस्य च सविधे दयिता, दवदहनस्तुहिनदीधितिस्तस्य ॥

अत्र यद्यपि पूर्वार्द्धे दवदहनशब्दस्य परार्द्धे तुहिनदीधितिशब्दस्यार्थान्तरसङ्क्रमितवाच्यत्वात्तार्थभेद,स्तथापि शक्यार्थमात्रेणोदाहरणम्· यद्वा, अवशिष्टपदावृत्तेरेवोदाहरणं द्रष्टव्यम् ॥

द्वितीयभेदमाह—

—पदस्यापि—

अपिशब्देन 'स'इति समुच्चीयते· यथा—

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः, ।
सुधाकरः क्व नु पुनः कलङ्करहितो भवेत् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाम्नः प्रकारत्रयमाह—

—वृत्तावन्यत्र तत्र वा ।

नाम्नः स वृत्त्यवृत्त्योश्च—

वृत्तिनिरूपितप्रकारत्रये नाम्न एव लाटानुप्रास इत्यर्थः। उदा०—

सितकरकररुचिरविभा विभाकराकार धरणिधर! कीर्त्तिः ।
पौरुषकमला कमला सापि तवैवास्ति नान्यस्य ॥

पौरुषकमला पौरुषलक्ष्मीर्लक्ष्मीश्च तवैवेत्यर्थः। यत्तु पौरुषं कमलमाश्रयो यस्याः, सा पौरुषकमलेतिव्याख्यानम्, तदयुक्तम्, अर्थभेदेनानुदाहरणत्वापत्तेः। अत्र करकरेत्येकस्समासो, विभा विभेति भिन्नौ समासौ, कमला कमलेति पूर्वस्य समास उत्तरस्यासमास इति त्रयाणामुदाहरणम् ॥

—तदेवं पञ्चधा मतः ॥ ८२ ।

व्याख्यातम् ॥ ८२ ॥

अर्थे सत्य ऽर्थभिन्नानां वर्णानां सा पुनःश्रुतिः ।

यमकम्—

अर्थभिन्नानां भिन्नार्थानामित्यर्थः। एतच्च लाटानुप्रासे ऽतिव्याप्तिवारणाय। एतन्मात्रे च कृते 'समरसमरसोय'मित्यादौ द्वितीयाद्यावृत्तेरर्थाभावादव्याप्तिः स्यादत उक्तमर्थे सतीति। यद्यर्थस्तदा भिन्न इत्यर्थः। वर्णानामिति बहुवचनमविवक्षितं, द्वयोरपि यमकव्यवहारात्। सेति पूर्वेणैव क्रमेण स्थितेत्यर्थः। अतः 'सरो रस' इत्यादौ नातिप्रसङ्गः। एवं च, समानार्थत्वाभाववत्समानानुपूर्वीकानेकवर्णावृत्तिर्यमकमिति लक्षणं द्रष्टव्यम् ।

तदेतद्विभजते—

—पादतद्भागवृत्ति तद्यात्यनेकताम् ॥ ८३ ।

प्रथमपादो यदि द्वितीयपादे यम्यते, तदा मुखं नाम यमकम्। तृतीये चे,त्तदा सन्दंशः। चतुर्थे चे,त्तदा ऽऽवृत्तिः। एवं, द्वितीयपादश्चेत्तृतीये, तदा गर्भः। चतुर्थे चे,त्तदासन्दष्टकम्।(क) तृतीयश्चेच्चतुर्थे, तदा पुच्छम्। प्रथमस्तु

(क) संदष्टमित्यन्यत्र ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चे,त्तदा पङ्क्तिः, महायमकमिति केचित्· पादत्रययमकं तु न चमत्कार्यं,(क)त्तो न प्रयुक्तमित्येकैकपादावृत्तौ सप्तभेदाः· प्रथमो द्वितीये, तृतीयश्चतुर्थे चे,त्तदा युग्मकम्· प्रथमश्चतुर्थे, द्वितीयस्तृतीये चे,त्तदा परिवृत्तिरित्यर्द्धाभ्यासमृते पादद्वयावृत्तौ द्वयमिति नव भेदाः· अर्द्धावृत्तिस्तु समुद्गः· श्लोकावृत्तिर्महायमकम्· तदुभयमपि पादावृत्तिविशेष एवेत्येकादश पादयमकभेदाः· पादभागवृत्ति बहुभेदम्· तथाहि, द्विधाविभक्तेषु पादेषु प्रथमादिपादानामाद्यभागाः पूर्ववद्द्वितीयादिपादेष्वाद्यभागेष्वेव यदि यम्यन्ते, तदा पूर्ववन्मुखादयो दश भेदाः· श्लोकान्तरे भागावृत्तिर्न स्वदत इति श्लोकावृत्तिस्थानीय एकादशो भेदो भागावृत्तौ नास्ति· एवं, प्रथमादिपादानामन्त्यभागस्य द्वितीयादिपादान्त्य(ख)भागेष्वेव यमने पूर्ववद्दश भेदाः· एवं, द्विखण्डीकृतेषु पादेषु विंशति, स्त्रिखण्डीकृतेषु त्रिंश,च्चतुःखण्डीकृतेषु चत्वारिंशद्भेदाः स्थानापरिवर्तिनो भवन्ति· अथ स्थानपरिवर्त्तनभेदाः—प्रथमादिपादानामन्त्यादिभागा द्वितीयादिपादानामाद्यादिभागेषु यम्यन्त इत्याद्यन्वर्थतानुसारेणान्ताद्यादियमकादयः प्रभेदा भवन्ति· तथाहि, द्विखण्डे(ग) प्रथमपादस्यान्त्यमर्धं द्वितीयपादस्याद्यार्द्धं चेद्यम्यते, तदाऽन्तादियमकम्·(घ) प्रथमभाग एव चेदन्त्यभागे, तदाद्यन्तयमकम्· एवं, प्रथमपादस्याद्यान्त्यभागौ द्वितीयस्यान्तादिभागयोर्यदि यम्येते, तदाद्यन्तान्तादियमकयोः समुच्चयः· अत्र त्रिखण्डचतुःखण्डयोः पूर्वपादमध्यभाग उत्तरपादस्यादिभागे यदि यम्यते, तदा मध्यादियमकम्· पूर्वस्यादिभागश्चेत्तदुत्तरपादस्य मध्यभागे, तदादिमध्ययमकम्· पूर्वस्य मध्यादिभागौ चेत्तदुत्तरस्याद्यमध्ययो,स्तदा मध्याद्यादिमध्ययोः समुच्चयः· एवं, प्रथमस्यान्त्यभागो द्वितीयस्य मध्यभागे चे,त्तदान्त्यमध्यम्· पूर्वस्य मध्यभागश्चेद्द्वितीयस्यान्तभागे, तदा मध्यान्तकम्·(ङ) पूर्वस्यान्त्यमध्यभागौ चेद् द्वितीयस्य

(क) चमत्कारकारीति पु· ।
(ख) अत्र यमकप्रकरणे अन्तान्त्यशब्दयोः पुस्तकेष्वव्यवस्थितः प्रयोगः ।
(ग) द्विखण्डे यथेति पु· ।
(घ) तदा अन्तादिः यमकमिति पु· ।
(ङ) मध्यान्तिकमिति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मध्यान्तभागयो,स्तदाऽन्त्यमध्यमध्यान्तयोः समुच्चयः· यद्यपि पूर्वस्यादि-भाग उत्तरस्यान्त्यभागे चे,त्तदाद्यन्तकम्,(क) अन्त्यभागस्त्वाद्यभागे, तदा-न्तादिकमित्यादि प्रकारद्वयं सम्भवति, तथापि द्विखण्डान्तर्गतमेव तदिति पृथङ्न गण्यते· सर्वेषां चैषामपरः समुच्चय इति भिन्नपादे यमके प्रभेदाः· एवं तस्मिन्नेव पाद आद्यादिभागानां मध्यादिभागेष्वावृत्तौ भेदा द्रष्ट व्याः· सर्वे चैते नियतस्थानविवक्षया स्थानयमकभेदाः, नियतेषु स्थानेष्वा-ऽऽवृत्तेरिति, अस्थानयमकभेदा अपि बहवो भवन्तीति प्रभूततमभेदं यम-कम्· तदेतत्काव्ये गडु(ख)भूतमिति नास्य लक्षणं कृतम्· दिङ्मात्रं तूदा ह्रियते· तत्रैकपादाभ्यासेषु सन्दंशो यथा—

सञ्चारीभरणोमायमाराध्य विधुशेखरम् ।
सञ्चारीभरणोऽमायस्ततस्त्वं पृथिवीं जय ॥ [पा· आ·]

द्विपादाभ्यासे यमकं यथा—

विना ऽयमेनो नयताऽसुखादिना
विना यमेनोनयता सुखादिना ।
महाजनो ऽदीयत मानसादरम्
महाजनोदी यतमानसादरम् ॥ [अ· आ·]

श्लोकाभ्यासे महायमकं यथा—

सत्त्वारम्भरतो ऽवश्यमवलम्बिततारवम् ।
सर्वदारणमानैषीदवानलसमस्थितः ॥ [श्लो· आ·]

पुनः श्लोकः·(ग)द्विखण्डेषु भिन्नपादपादभागाभ्यासेषु द्वितीयपा-दान्तभागस्य चतुर्थपादान्तभागे यमके सन्दष्टकं यथा—

अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम् ।
या च मातेव भजते प्रणते मानवे दयाम् ॥

अस्मिन्नेवान्द्यन्तकमेकपादे यथा—

(क) तदाद्यन्त्यकमिति पा· ।
(ख) ग्रन्थेति, ग्रन्थीति च पा· ।
(ग) अपरत्र तु पुनर्न्यस्त एवास्ते श्लोकः· ०"मवलं विततारव"मिति त्वेकत्र विज्ञेयम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यद्वानतोऽयदानतो नयात्ययं न यात्ययम् ।
शिवे हितां शिवेहितां स्मरामितां स्मरामि ताम् ॥

प्रथमपादाद्यभागस्य द्वितीयादिपादानामन्ताद्यभागेषु यमने पूर्वार्द्धेऽऽद्यन्तकम्, उत्तरार्द्धे आद्यन्तान्ताद्ययोः समुच्चयो यथा—

सर स्वतिप्रसादं मे स्थितिं चित्तसरस्वति ।
सरस्वति कुरु क्षेत्र कुरुक्षेत्र सरस्वति ॥

द्वयोराद्यन्तिकयोः समुच्चयो यथा—

ससार साकन्दर्पेण कन्दर्पेण ससारसा ।
शरन्नवाना विभ्राणा नाविभ्राणा शरन्नवा ॥

चतुःखण्डे पादे द्वितीयभागस्य तृतीयभागे यमनं यथा—

मधुपराजिपराजितमानिनीजनमनस्सुमनस्सुरभि श्रियम् ।
अभृत वारितवारिजविप्लवं स्फुटितताम्रतताम्रवणं जगत् ॥

एवं वैचित्र्यसहस्रैः स्थितमन्यदप्यूह्यम् ॥ ८३ ॥

वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः ।
श्लिष्यन्ति शब्दाः, श्लेषोऽसावक्षरादिभिरष्टधा ॥ ८४ ॥

'अर्थभेदेन शब्दभेद' इतिनयेन भिन्नाः शब्दाः, 'काव्यमार्गे स्वरो न गण्यत' इति नयेन युगपदुच्चारणविषयतया यच्छिलष्यन्ति भिन्नं स्वरूपमपह्नुवते· एकवृन्तगतफलद्वयन्यायेन यत्रार्थद्वयप्रतीतिः स श्लेष इत्यर्थः· अक्षरादिभिरिति वर्ण,पद,लिङ्ग,भाषा,प्रकृति,प्रत्यय,विभक्ति,वचनभेदादष्टधा श्लेष इत्यर्थः· अत्र वर्णश्लेषो यथा—

अलङ्कारः शङ्काकरनरकपालं, परिजनो
विशीर्णाङ्गो भृङ्गी,वसु च वृष एको बहुवयाः, ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति,वयं के पुनरमी ॥

अत्र 'विधा' वित्यत्र विधिविधुशब्दयोरिकारोकारयोर्भेदाद्वर्णश्लेषः ।
पदश्लेषो यथा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव !।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥

अत्र पृथुकानां बालाना[क]मार्त्तस्वरस्य पात्रं, पक्षे, पृथु बहुलं कार्त्तस्वरस्य पात्रं यत्रेत्यादिक्रमेण पदभेदात्पदश्लेषोयम् । लिङ्गवचनयोः श्लेषो यथा—

भक्तिप्रह्वविलोकनप्रणयिनी, नीलोत्पलस्पर्द्धिनी,
ध्यानालम्बनतां[ख] समाधिनिरतैर्नीतेहितप्राप्तये, ।
लावण्यस्य महानिधी,[ग] रसिकतां लक्ष्मीदृशोस्तन्वती,
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥

अत्र 'प्रणयिनी'—इति स्त्रियां प्रथमैकवचनं, नपुंसके तद्विवचनं चेति लिङ्गवचनयोः श्लेषः· एवमग्रेपूह्यम् । भाषाश्लेषो यथा—

महदेसुरसंधम्मे तमवसमासङ्गमागमाहरणे ।
हरबहुसरणं त्वं चित्तमोहमवसरउमे सहसा ॥

अत्र प्राकृते 'मम देहि रसं धर्म्मे, तमोवशामाशाङ्गमागमाद्- हर नः, हरवधूः शरणं त्वं, चित्तमोहो ऽपसरतु मे सहसा'—इत्यर्थकानि पदानि· संस्कृतपक्षे तु 'महदे उत्सवदे, सुरेण सन्धा सन्धानं यस्मात्तम्, आगमाहरणे समासङ्गमव, बहुसरणं संसारस्वरूपं यस्मात्तं, चित्तमोहमवसरे उमे हर सहसा'—इत्यर्थकानि पदानि । प्रकृतिश्लेषो यथा—

अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥

अत्र वक्ष्यतीति वहिवच्योर्लृटि, कृदिति कृन्ततिकरोत्योः क्विपि तुल्यं रूपमिति प्रकृतिश्लेषो । विभक्तेर्वैचित्र्यविशेषहेतुविशेषतया पृथगुपादानात्प्रत्ययपदं तदतिरिक्तपरम्· तच्छ्लेषो यथा—

(क) एकत्र 'बालाना' मिति नास्ति ।
(ख) ध्यानालोकनतामिति पु· ।
(ग) लावण्यैकमहानिधी—इति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रजनिरमणमौलेः पादपद्मावलोक-
क्षणसमयपराप्तापूर्वसंपत्सहस्रम् ।
प्रमथ(क)निवहमध्ये जातुचित्तत्प्रसादा(ख)-
दहमुचितरुचिः स्यान्नन्दिता सा तथा मे ॥

अत्र नन्दितेति तृचि तलि च रूपम्· तेना'हं नन्दिता नन्दकः स्याम्· तथा सा नन्दिता नन्दिनो भावे मे स्या'दित्यर्थः । विभक्तिश्लेषो यथा—

सर्वस्वं हर सर्वस्य त्वं भव च्छेदतत्परः ।
नयोपकारसांमुख्यमायासि तनुवर्त्तनम् ॥

अत्र हरभवेत्यनयोः संबोधनत्वक्रियापदत्वाभ्यां सुप्तिङ्विभक्त्यन्तत्वम्· एवमायासीत्यादिक्रियापदत्वे च विभक्तिश्लेषः· एवमन्यत्राप्यूह्यम् ॥ ८४ ॥

भेदाभावात्प्रकृत्यादेर्भेदोऽपि नवमो भवेत् ।

नवमोपीत्यपिर्भिन्नक्रमः· उदा०—

योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः ।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते ॥

अत्रैकार्थमात्रनियतप्रकरणाद्यभावाद्द्वावप्यर्थौ वाच्यावेवेति "भद्रात्मनो दुरधिरोहतनो"रित्यादिवच्च ध्वनित्वम्· ननु श्लेषस्तावद्द्विधा, सभङ्गपदोऽभङ्गपदश्च· तत्राद्यः शब्दश्लेषः, स्वरितादिगुणभेदाद्भिन्नप्रयत्नोच्चार्यतया भिन्नानां शब्दानां बन्धे जतुकाष्ठन्यायाच्छब्दयोरेव श्लिष्टत्वात्· द्वितीयस्त्वर्थश्लेषः, स्वरितादिगुणाऽभेदादेकप्रयत्नोच्चार्यतया शब्दभेदाभावादेकवृन्तगतफलद्वयन्यायेनार्थयोरेव श्लिष्टत्वात्· यद्यप्य'र्थभेदेन शब्दभेद' इतिनयेन(ग) द्वितीयेपि शब्दस्य भेद,स्तथाप्युपपत्त्या शब्दभेदप्रतीतावप्येकताध्यवसायान्नास्ति शब्दभेदः· स एष निरवकाशतया

(क) प्रथमेति पाठस्त्वबोधविजृम्भितम् ।
(ख) ०त्त्वत्प्रसादादिति पु० ।
(ग) नये–इति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वालङ्कारबाधक इत्यलङ्कारान्तराणां प्रतिभामात्रमुत्पादयति, न तु तत्पर्याप्तिम्। यथा—

स्वयं च पल्लवाताम्रभास्वत्करविराजिनी ।(क)
प्रभातसंध्येवास्वापफललुब्धेहितप्रदा ॥

अत्र पूर्वार्द्धे ऽभङ्गपदो, द्वितीयार्द्धे सभङ्गपदः श्लेषः। द्वयमप्युपमाप्रतिभोत्पत्तिहेतुः, साधर्म्याभावेन तस्याः प्ररोहाभावात्। यदुक्तम्—

'एकप्रयत्नोच्चार्याणां तच्छायां चैव बिभ्रताम् ।
स्वरितादिगुणैर्भिन्नैर्बन्धः श्लिष्ट इहोच्यते ॥
अलङ्कारान्तरगतां प्रतिभां जनयत्पदैः ।
द्विविधैरर्थशब्दोक्तिविशिष्टं तत्प्रतीयताम्'' ॥

इति। द्विविधोऽप्यलङ्कारसर्वस्वकारादिभिरर्थाश्रितत्वेनार्थालङ्कारमध्ये पठित,स्तत्कथं शब्दालङ्कारमध्ये पठ्यत इति। उच्यते—दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो विभागः, सोऽन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते। यत्र हि पर्यायान्तरपरिवृत्तिसहत्वं नास्ति, तस्य शब्दगतत्वम्। यत्र तु तत्सहत्वं, तत्रार्थगतत्वम्। यथा कष्टत्वादयो दोषा, गाढत्वादयो गुणा, अनुप्रासादयो ऽलङ्काराः शब्दगताः, पर्यायान्तरेण(ख) तदर्थोपस्थापने तेषामसम्भवात्। व्यर्थत्वादयो दोषाः, प्रौढत्वादयो गुणा, उपमादयो ऽलङ्काराश्चार्थगताः, पर्यायान्तरेणापि तदर्थोपस्थापने तेषां सम्भवात्। उदाहृते च "स्वयं च पल्लवे"त्यादौ द्वयोरप्यर्द्धयोः शब्दपरिवृत्त्यसहतया द्वयोरपि शब्दालङ्कारत्वमेवोचितं, न त्वाद्यस्या(ग)र्थालङ्कारत्वम्। नन्वेवमर्थश्लेषः किं नास्त्येव। क एव माह। कस्तर्हि तस्य विषयः। यत्र परिवर्त्तनेपि न श्लेषभङ्गः। यथा—

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्, ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥

(क) विराजितेति पा० ।
(ख) पर्यायान्तरेणापीति पुस्तकान्तरं तु नानुरूपम् ।
(ग) आद्यस्यापीति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र स्तोकेनेत्यादिपदस्थाने ऽल्पादिपदप्रक्षेपेपि(क) न श्लेषभङ्गः· यच्चोक्तं "स्वयं चे"त्यादावुदाहृते उपमाप्रतिभोत्पत्तिहेतुः श्लेष इति, तदप्ययुक्तम्, प्रत्युतोपमैवात्र श्लेषप्रतिभोत्पत्तिहेतुः, तद्बाधकत्वात्· तथाहि, साधर्म्याभावेनोपमायाः प्ररोहाभावादेव तावच्चोपमा बाध्या, यतः, "कमलमिव मुखं मनोज्ञमेतत्कचतितरा"मित्यादौ मनोज्ञत्वस्य गुणस्य दीप्तिरूपायाः क्रियाया वा उभयोर्वा साम्ये यथोपमा निर्वहति, तथा "सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिवे"त्यादावपि शब्दमात्रसाम्येनापि सा युक्तैव· साधर्म्यमात्रस्योपमाप्रयोजकत्वात्, तस्य चार्थरूपस्येव शब्दरूपस्याप्यविशेषेण सम्भवात्· तथाह्युक्तं रुद्रटेन—

"स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ, किंतु ।
आश्रित्य शब्दमात्रं साधर्म्यमिहापि संभवतः" ॥

इति· अथात्र साधर्म्यसंभवेपि नोपमा· साधारणधर्मप्रयोगशून्यो हि "कमलमिव मुख"मित्येतावन्मात्रादिरुपमाविषयः, अत्र तु शब्दरूपसाधारणधर्मप्रयोग एवेति वैयात्या(ख)द्दुरुक्तम्· तदपि न युक्तम्, पूर्णोपमाया निर्विषयत्वापत्तेः· साधारणधर्मप्रयोग उपमात्वाभावा, त्तदप्रयोगे त्वपूर्णत्वात्· तदेतदुक्तम् "न च कमलमिव मुखमित्यादिसाधारणधर्मप्रयोगशून्य उपमाविषय इति वक्तुं युक्तम्, पूर्णोपमाया निर्विषयत्वापत्ते"रिति· केचित् पुनस्तदन्यथा व्याचक्षते· तथाहि, यत्र साधारणधर्मोद्धारेण्युपमा संभवति प्रसिद्धत्वा, त्स उपमाविषयो, नचात्र तथेत्याक्षेपार्थः· अयं पूर्णोपमाविषयो न स्यादिति· यद्वा, श्लेषस्योपमाबाधकत्वायैतदङ्गीक्रियते· तथा श्लेषस्योपमाबाधकत्वे पूर्णोपमा निर्विषयैव स्यात्· "कमलमिव मुखं मनोज्ञमेत"दित्यत्र मनोज्ञत्वस्य सम्बन्धिभेदान्नानात्वेनार्थश्लेषस्वीकारादित्यर्थः· नन्वेवं श्लेषस्य निर्विषयत्व, मसङ्कीर्णस्थलाभावादिति चेन्न,

त्वमेव देव ! पाताल, माशानां त्वं निबन्धनम्, ।
त्वं चामरमरुद्भूमि, रेको लोकत्रयात्मकः ॥—

(क) प्रश्लेषेऽपीत्येकस्यस्त्वसमञ्जसः ।
(ख) वैजात्यादिति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यादावलङ्कारान्तराभावात्· तथाहि, न तावदत्रोपमा, इवाद्यप्रयोगात्· नापि तुल्ययोगितादीपके·(क) नापि पातालादिना रूपकं वाच्यम्· व्यङ्ग्यस्य तस्य संभवेपि वाच्यापेक्षयैवासङ्करगवेषणमिति·(ख) किंच "येन ध्वस्तमनोभवेने"त्यादौ नास्त्येव किंचिदलङ्कारान्तरमित्युपमाश्लेषयोर्विभक्तोदाहरणसम्भवात्· बाध्यबाधकभावानुपगमे द्वयोर्योगे सङ्कर एवेति वरमभ्यु(ग)पगन्तव्यम्· उपपत्तिपर्यालोचने तूपमाया एवायं विषयो न श्लेषस्येत्युक्तमेव· उपपत्तिश्चेयम्–'व्यपदेशाः प्राधान्येन सम्भवन्ती'ति(घ) वस्तुस्थितिः· प्रधानं चात्रोपमा, श्लेषस्य तन्निर्वाहकस्य तदङ्गत्वात्· नहि श्लेषं विना समानशब्दवाच्यत्वलक्षणं साधर्म्यमुपमानिर्वाहकं निर्वहति· उपमा तु न श्लेषाङ्गम्, श्लेषप्रतीतिं विना तत्प्रतीत्यभावेन तदनुपकारकत्वादिति· यदि चोपमाव्यवहारवारणाया ऽसाधारणधर्मप्रयोगशून्य उपमाविषय इति स्वीकर्त्तव्यं, तदा पूर्णोपमाया निर्विषयत्वमेव स्यादिति· तदेतदुक्तम्–"अन्यथा पूर्णोपमाया निर्विषयत्त्वापत्ते"रिति· न केवलमुपमाया एव श्लेषबाधकत्वं, किंत्वलङ्कारान्तरस्यापि· यथा–"अबिन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुके"त्यत्र विरोधालङ्कारस्य· नह्यत्रार्थद्वयप्रतिपादकस्य शब्दस्य श्लेषः, बिन्दुराहित्यरूपस्य द्वितीयार्थस्य प्रतिभामात्रविषयस्य प्ररोहाभावात्· नचाऽप्ररूढोपि श्लेषालङ्कार आस्तां, विरोधाभासवदिति चेद्, भवेदेवं, यदि विरोधाभासस्य विरोधत्वमिव श्लेषाभासस्य श्लेषत्वमनुमतं कस्यापि भवेत्· तस्मादेवंविधे विषये श्लेषप्रतिभोत्पत्तिहेतुरलङ्कारान्तरं प्राधान्यात्· तथा च "सद्वंशमुक्तामणि"रित्यत्र परम्परितश्लिष्टरूपकं प्रधानं,(ङ) वंशशब्दे श्लेषस्तु वेणुकुलयोरूपकोपयोगितया तदङ्गमिति श्लेषप्रतिभोत्पत्तिहेतू रूपकमेव व्यपदेश्यम्· "नाल्पः कविरिव

(क) "नापि तुल्ययोगितादीपके" इत्येकत्र नास्ति ।
(ख) ०गवेषणादितीति पु० ।
(ग) वरमुपेति, वरमप्युपेति च पा० ।
(घ) प्राधान्ये भवन्तीतीति पा० ।
(ङ) इत्यत्र परम्परितश्लिष्टरूपके रूपकमिति पुस्तकान्तरमनर्हम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वल्पश्लोको देव! महान् भवा''(क)नित्यत्र श्लेषव्यतिरेक एव प्रधानं, श्लेषस्तु तन्निर्वाहक इति तत्प्रतिभोत्पत्तिहेतुर्व्यतिरेकः·

अनुरागवती सन्ध्या, दिवसस्तत्पुरःसरः, ।
अहो दैवगतिश्चित्रा, (ख)तथापि न संगमः ॥–

इत्यत्र समासोक्तिरलङ्कारः, अभिधाया नियमने श्लेषस्याऽसम्भवात्।

आदाय चापमचलं, कृत्वाहीनं गुणं, विषमदृष्टिः ।
यश्चित्रमच्युतशरो लक्ष्य(ग)मभाङ्क्षी, नमस्तस्मै ॥–

इत्यत्र विरोध एवालङ्कारः, श्लेषस्तु तदङ्गमात्र,मप्ररोहात्·

कवीनां सन्तापो, भ्रमणमभितो, दुर्गतिरिति
त्रयाणां पञ्चत्वं रचयसि, न तच्चित्रमधिकम्· ।
चतुर्णां वेदानां व्यरचि नवता वीर! भवता(घ)
द्विषत्सेनालीनामयुतमपि लक्षं (ङ)त्वमकृथाः ॥

अत्र मदीये पद्ये काव्यलिङ्गस्य श्लेषोऽङ्गमिति श्लेषप्रतिभोत्पत्तिहेतुः काव्यलिङ्गम्· तस्मादलङ्कारान्तरप्रतिभोत्पत्तिहेतुः श्लेष इति रिक्तं वचः· किंच, "प्रभातसन्ध्येवे"त्यादौ शब्दश्लेषस्यार्थालङ्कारत्वमिति वचनं भवतां विरुद्धम्, शब्दानाश्रितत्वे तेन(च) व्यपदेशस्याऽन्याय्यत्वात्· अपि च, यस्य वैचित्र्यं कविप्रतिभासंरम्भगोचरः(छ) स एवालङ्कारस्थानम्· "स्वयञ्च पल्लवाताम्रे"त्यादौ शब्दवैचित्र्यमेव तादृक्, तस्यैव कविप्रतिभया मुख्यतयोट्टङ्कनादिति शब्दालङ्कारत्वमेवोचितम्· ननु श्लेषोऽर्थमुखप्रेक्षकः· नह्यर्थप्रतीतिं विना श्लेषस्य चमत्कारित्वं(ज) सम्भवो वेत्यर्थालङ्कारत्वं

(क) देव भवान् महानिति पु·
(ख) चित्रमित्येकोपच युक्तम् ।
(ग) लक्ष्यमिति पु· ।
(घ) रभसादिति पा· ।
(ङ) लक्ष्यमिति पुस्तकान्तरन्त्वाऽहृदयम् ।
(च) शब्दानाश्रितत्वेनेति पु० ।
(छ) ०संरम्भगोचरमिति त्वपपाठः ।
(ज) चमत्कारकारित्वमिति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्लेषस्येति चेन्न, एवं ह्यनुप्रासस्याप्यर्थालङ्कारत्वं स्यात्· रसादिव्यञ्जक-स्वरूपवाच्यसव्यपेक्षत्वेन ह्यनुप्रासस्यालङ्कारता, अन्यथा वृत्तिविरोधादि-दोषस्य वक्ष्यमाणत्वात्· किञ्चैवं शब्दयोर्गुणदोषयोरप्यार्थत्वं स्या,त्तयो रप्यर्थापेक्षयैव तथाभावात्· शृङ्गारादौ हि[क] माधुर्यादिर्गुणः कष्टत्वादि-दोषो वा· यच्चोक्तमेकप्रयत्नोच्चार्यशब्दवत्त्वे ऽर्थश्लेषत्वमिति, तदप्ययुक्तं, "विधौ वक्र" इत्यादौ वर्णादिशब्दभेदेऽप्य[ख]र्थश्लेषत्वापत्तेरित्यादि स्वय-मपि विचार्यम् ॥ ऽ ॥

चित्रं लक्षयति—

तच्चित्रं, यत्र वर्णानां खङ्गाद्याकृतिहेतुता ॥ ८५ ॥

यद्यपि वर्णानामाकाशगुणानां खङ्गाद्याकृतिहेतुत्वमसम्भवि, त-थापि न्यस्तवर्णानुमापकलिपयः सचित्रेशविशेषवत्त्वेन यत्र खङ्गाद्याकार मुल्लासयन्ति, तच्चित्रमिति विवक्षितम्· तर्हि लिपिनिष्ठत्वाच्छब्दाल ङ्कारत्वं न स्यादिति चेन्न, तादृशवर्णविन्यासं विना तादृशलिपिविन्यासा-भावाच्छब्दान्वयव्यतिरेकयोरभग्नत्वात्· लिपेर्वर्णाभेदस्य लोकप्रसिद्धिमा-श्रित्य शब्दालङ्कारत्वमिति कश्चित्· तथापि शृङ्गारादिरसानुपकारकस्य कथमलङ्कारत्वमिति चेत्, कविनैपुण्य[ग]वशेन विस्मयोपकारकत्वादिति गृहाण· क्लेशनिर्वाह्यं चेत,न्न च तादृशरसोपकारकमिति दिङ्मात्रमुदा-ह्रियते· तत्र खङ्ग. बन्धो यथा—

मारारिशक्ररामेभमुखैरासाररंहसा ।
सारारब्धस्तवा नित्यं तदार्ति[घ]हरणक्षमा ॥
माता नतानां संघट्टः श्रियां बाधितसम्भ्रमा ।
मान्या ऽथ सीमा रामाणां शं मे दिश्यादुमा ऽऽदिजा[ङ] ॥

(क) शृङ्गारादौ माधुर्यादिगुणः कष्टत्वादिदोषो वेति पु० ।
(ख) विधौ वक्रेत्यादिवर्णादिश्लेषे शब्दभेदेऽपीति पु० ।
(ग) कविनैर्मल्येति पाठस्त्वनर्हः· कविनैपुण्येति च पा० ।
(घ) तदर्त्तीति पु० ।
(ङ) ०दुमा ऽद्रिजेति, ०दुमाऽऽद्रिजेति च पा०· एतस्य चाकरे काव्यालङ्कारे वक्र-बन्धोद्धृतपद्यस्य "सामाज्ञा" पदानुरोधेन जान्तएव पाठः साधुः· परम्, प्रायः पुस्त-केष्वाऽऽदिमेति प्राप्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्यासो यथा—ताड़िकायां प्रथमं 'मा'शब्दं विन्यस्य, तदूर्ध्वमारोहक्रमेणैकस्यां धारायां चतुर्दशवर्णा,नऽग्रे श्लिष्टं 'से'तिवर्णं, ततोऽपरधारायामवरोहक्रमेण चतुर्दश, 'मे'ति प्रथमेन माशब्देन श्लिष्टं, तद्दक्षिणपार्श्वे निष्क्रमणक्रमेण सप्त, वामपार्श्वे प्रवेशक्रमेण सप्त, ततो माशब्दो श्लिष्टो, एषा ऽद्रिका माशब्दादधः क्रमेण वर्णत्रयम्, एषा गण्डिका, तदधो मेति, तद्दक्षिणपार्श्वे निष्क्रमणक्रमेण चतुष्टयं, वामपार्श्वे प्रवेशक्रमेण चतुष्टयं, ततो माशब्दः श्लिष्टः, एतद्दृञ्जनकं, ततो माकारादधः शेषवर्णद्वयं न्यस्ये[क]देतन्मस्तकमिति ॥

मुरजबन्धो यथा—

सरला[ख] बहुला[ग]रम्भतरलालिबलारवा ।
वारलाबहुला ऽमन्दकरला ऽबहुलामला[घ] ॥

अथ न्यासः—प्रथमपादस्य वर्णाष्टकं पङ्क्तिक्रमेणाभिलिख्य तेषामधोधो ऽपरपादत्रयवर्णान्पङ्क्तिक्रमेण विलिखेत्· तत्र चैतच्छ्लोकोत्थापनमार्गरेखायां दत्तायां मुरजाकारता भवति ॥

पद्मबन्धो यथा—

भासते प्रतिभासार! रसाभाता हताविभा ।
भावितात्मा शुभा वादे देवाभा बत ते सभा ॥

अस्य न्यासः—कर्णिकायां 'भा'—इति, पूर्वपत्रे निर्गमक्रमेण 'सते', आग्नेयपत्रे प्रवेशक्रमेण 'प्रति', ततो 'भे'ति कर्णिकास्थं श्लिष्टं, ततो दक्षिणपत्रे निष्क्रमणक्रमेण 'सारे'ति वर्णद्वयं, ततस्ताभ्यां कर्णिकास्थेन वर्णेन प्रवेशक्रमेण श्लिष्टं 'रसाभे'ति वर्णत्रयम्· एवमन्येपि दिक्पत्रस्य कर्णिकायाश्च वर्णाः सर्वत्र श्लिष्टा इति ॥

(क) प्रायः पुस्तकेषु न्यसेदिति प्राप्यते ।
(ख) सरला शरकाण्डोद्गमवतीति महेश्वरः ।
(ग) अत्र श्लोके बहुलत्रयस्थाने बहलत्रयं पा० ।
(घ) बहुलामला, बहुले कृष्णपक्षे ऽप्यमलेति च पाठमर्थञ्च महेश्वरः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वतोभद्रं यथा—

रसासार! रसासार सायताक्ष! क्षतायसा ।
सातावात! तवातासा रक्षतस्त्वस्त्वतक्षर! ॥

अस्य पादचतुष्टये पूर्ववत्पङ्क्तिचतुष्टयेन लिखिते प्रतिलोमादिपाठेन स एव श्लोकः ॥ सम्भविनोऽप्यन्ये भेदा न दर्शिताः एते हि शक्तिमात्रप्रकाशका, नतु काव्यरूपतां दधत्य,तिनीरसत्वादिति ॥ ८५ ॥

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा ।
एकार्थतेव(क)

एकार्थतेवेति,(ख) एकार्थतावभासयोग्यशब्दतेत्यर्थः एतच्च यमकलाटानुप्रासयोरतिव्यापक,मतो विशिनष्टि—विभिन्नाकारशब्दगेति ॥

स चायं द्विविधः, शब्दमात्रस्य शब्दार्थयोश्च तयो(ग)राद्यमाह—

—शब्दस्य—

शब्दमात्रस्येत्यर्थः अयमपि द्विधा, सभङ्गशब्दनिष्ठोऽभङ्गशब्दनिष्ठश्च तयोराद्यो यथा—

अरिवधदेहशरीरः सहसारथिसूततुरगपादातः ।
भाति सदानत्यागस्थिरतायामवनितलतिलकः ॥

अत्र देहशरीरशब्दयोः पुनरुक्तत्वधीः सभङ्गौ च तौ, अरिवधदा ईहा यत्र, तादृशात्र शरीरा ईरयतीत्यर्थकत्वात् एवं सारथिसूतशब्दयोः, सहसा हठेन रथिना सुष्ठु उतं तुरगपादातं यस्येत्यर्थकत्वात् दानत्यागयोश्च, सदा नत्या भाति, स्थिरतायामगः पर्वत इवेत्यर्थकत्वात्सभङ्गः पुनरुक्त

(क) "एकार्थतेति"—इत्येकस्यस्तु नार्हः ।
(ख) एकार्थतेवेतीति प्रतीकग्रहणमन्यत्र नास्ते ।
(ग) ययोरिति प्रायः पुस्तकेषु लभ्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दाभासः.[क] शब्दमात्रालङ्कारत्वं चोभयोरपि शब्दयोः पर्यायपरिवृत्त्य-सहत्वात्[ख] । अभङ्गशब्दनिष्ठो यथा—

चकासत्यङ्गनारामाः कौतुकानन्दहेतवः ।
तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्त्तिनः ॥

अत्राङ्गनारामाशब्दयोस्त्र्यर्थकतया पुनरुक्तधीः· वस्तुतस्तु, अङ्गने आरमन्त्यङ्गनारामा इति, अङ्गनानामारामा इति वाऽर्थं इति न पुनरुक्तिः· नचात्र शब्दभङ्गः· शब्दमात्रालङ्कारत्वञ्चैकस्यापि परिवृत्त्यसहत्वात्· एवं कौतुकानन्दशब्दयोः सुमनोविबुधशब्दयोश्च द्रष्टव्यम् ॥–॥

उभयालङ्कारं द्वितीयमाह—

तथा शब्दार्थयोरयम् ॥ ८६ ॥

यथा—

तनुवपुरजघन्यो ऽसौ करिकुञ्जररुधिररक्तखरनखरः ।
तेजोधाममहः पृथुमनसामिन्द्रो हरिर्जिष्णुः ॥

अत्र 'तनुवपुः'शब्दयोः पुनरुक्तधी,स्तद्विरहस्तु,तनुशब्दस्याल्पार्थ-कत्वात्· अयं चोभयालङ्कार,स्तनुशब्दस्य पर्यायपरिवृत्त्यसहत्वात्· एवं करिकुञ्जरयो,स्तेजोधाममहःशब्दाना,मिन्द्रहरिजिष्णुशब्दानां तदाभास-त्वमुभयालङ्कारत्वं च[ग] द्रष्टव्यम्· यद्यप्युभयालङ्कारो ऽत्र न प्रकृत,स्तथापि शब्दमात्रालङ्कारस्यैतद्भेदस्यात्र प्रकरणे ऽवश्यवक्तव्यतया तत्प्रसङ्गादुभया-लङ्कारत्वानपायाच्चोभयालङ्कारभूतोप्ययमत्रोक्तः· उभयालङ्कारान्तराणां तु न कोपि भेदः शब्दमात्रालङ्कार इति न तान्यत्र पठितानीति सर्वं रमणीयम्॥८६॥

इति श्रीमहोपाध्यायगोविन्दप्रणीते काव्यप्रदीपे नवम उल्लासः ॥ * ॥[घ]

(क) "०इवेत्यर्थकत्वात् । अभङ्गः पुनरुक्तवदाभासः"—इति पु० ।
(ख) ०ऽसहत्वमिति पु० ।
(ग) ०शब्दानां तदाभासकत्वं चेति पु· न किंचित् ।
(घ) "इति श्रीगोविन्दठक्कुरकृते काव्यप्रदीपे शब्दालङ्कारनिर्णयो नवमोल्लासः ॥"—इति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अथ दशम उल्लासः ॥

अर्थालङ्कारा लक्षणीयाः ते च

उपमा, ऽनन्वयस्तद्व,दुपमेयोपमा ततः, (१,२,३)
उत्प्रेक्षा, ऽथ ससन्देहो, रूपका,पह्नुती तथा, ॥ (४,५,६,७)
श्लेष,स्तथा समासोक्तिः, प्रोक्ता चैव निदर्शना, । (८,९,१०)
अप्रस्तुतप्रशंसा,ऽतिशयोक्ती परिकीर्त्तिते ॥ (११,१२)
प्रतिवस्तूपमा, तद्वद्दृष्टान्तो, दीपकं तथा, । (१३,१४,१५)
तुल्ययोगितया चैव, व्यतिरेकः प्रकीर्त्तितः, ॥ (१६,१७)
आक्षेपो, विभावना च, विशेषोक्तिस्तथैव च, । (१८,१९,२०)
यथासङ्ख्य,मर्थान्तरन्यासः स्यातां, विरोधवत्, ॥ (२१,२२,२३)
स्वभावोक्ति,स्तथा व्याजस्तुतिः प्रोक्ता, सहोक्तिवत्, । (२४,२५,२६)
विनोक्ति,परिवृत्ती च, भाविकं, काव्यलिङ्गवत्, ॥ (२७,२८,२९,३०)
पर्यायोक्त,मुदात्तं च, समुच्चय उदीरितः, । (३१,३२,३३)
पर्याय,श्चानुमानं च, प्रोक्तः परिकरस्तथा, ॥ ३४,३५,३६)
व्याजोक्ति,परिसङ्ख्ये च विज्ञेये, हेतुमालया, । (३७,३८,३९)
अन्योन्य,मुत्तरं, सूक्ष्मं, सार,(क)स्तद्वदऽसङ्गतिः, ॥ (४०,४१,४२,४३,४४)
समाधिश्च, समेन स्या,द्विषमस्त्वधिकेन च, । (४५,४६,४७,४८)
प्रत्यनीकं, मीलितं च,स्यातामेकावली,स्मृती,(ख) ॥ (४९,५०,५१,५२)
भ्रान्तिमांस्तु, प्रतीपेन, सामान्यं च, विशेषवत्, । (५३,५४,५५,५६)
तद्गुणा,तद्गुणो चैव, व्याघातः परिकीर्तितः, ॥ (५७,५८,५९)
संसृष्टि,सङ्करौ चैवमेकषष्टिरुदीरिताः ॥ (६०, ६१)

तेष्वनेकालङ्कारमूलभूतत्वेन सौकुमार्यातिशयाच्च प्रधानमुपमां प्रथमं लक्षयति–

(क) सूक्ष्मसाराविति पु॰ ।
(ख) एकावलिस्मृतो इति पा॰ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साधर्म्यमुपमा भेदे—

ननु साधर्म्यस्य प्रतियोग्यनुपयोगिनिरूप्यतया तदनभिधाने न्यूनत्वं लक्षणवाक्यस्येति चेत्, आक्षेपादुपमानोपमेयरूपयोस्तयोर्ल्लाभात्· नच प्रतियोग्यनुयोगिमात्राक्षेपे ऽतिप्रसङ्गः, उपमानोपमेये विना ऽन्यस्य कार्यकारणादिमात्रस्य साधर्म्याभावात्· एवं चोपमानोपमेययोः समानेन धर्मेण सम्बन्ध उपमेति लक्षणम्· अत्र चोपमानोपमेययोराक्षेपः साधर्म्यप्रतिपत्तिमात्रफलको, नतु व्यावर्तकः· नन्वेवं भेद इत्यनुपादेयम्, तस्याप्याक्षेपादेव लाभसम्भवात्· नह्यभेदे सादृश्यात्मकं साधर्म्यमिति चेत्, साधर्म्यपदस्यारोपितानारोपितसाधारणसमानधर्मसम्बन्धमात्रपरत्वेनारोपितसाधर्म्यनिबन्धनस्यानन्वयालङ्कारस्य व्यवच्छेद्यत्वात्· अलङ्कारत्वे सतीत्यपि पूरणीयं, साधर्म्यमात्रस्योपमात्वाभावात् ॥—॥

एनां(क) विभजते—

—पूर्णा लुप्ता च—

यत्रोपमानोपमेयसाधारणधर्माणामुपमाप्रतिपादकशब्दस्य चोपादानं, सा पूर्णा· एतच्चतुष्कमध्य एकस्य द्वयोस्त्रयाणां वा ऽनुपादानं यत्र, सा लुप्ता ॥—॥

तयोः पूर्णां विभजते—

—सा ऽग्रिमा ।

श्रौत्या ऽऽर्थी च भवेद्वाक्ये समासे तद्धिते तथा ॥ ८७ ॥

अग्रिमा प्रथमोद्दिष्टा, पूर्णेत्यर्थः· वाक्यं विग्रहः· तेन उपमानादिपदानि चत्वार्यपि यत्रासमस्तानि भिन्नविभक्तिकानि सा वाक्यगा· यत्र तु तेषु कयोरपि समासः, सा समासगा· तद्धितेनोपमाप्रतिपादकेन तु सममुपमानवाचिन्याः प्रकृतेर्न समासो नापि विग्रह इति तत्र तृतीय उपमाभेदः· त्रिविधाप्येषा श्रौत्यार्थीभेदात्प्रत्येकं द्विविधेति षड्विधा पूर्णेत्यर्थः· श्रौतत्वं चोपमानोपमेययोः साधारणधर्मसम्बन्धरूपायास्तस्याः शाब्द-

(क) एतामिति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बोधविषयत्वम्, अर्थापत्तिगम्यत्वं चार्थत्वम्· तत्र यथे,व,वादि[क] शब्दानां "तत्र तस्येवे"त्यनेनेवार्थे विहितस्य वतेश्चोपादाने श्रौती· तुल्यादीनां शब्दानां "तेन तुल्य"मित्यादिना तुल्यार्थे विहितस्य वतेश्च प्रयोग आर्थी· नन्वयं विभागो ऽनुपपन्नः, उभयत्र सादृश्यप्रत्ययाविशेषात्· नच वाच्यं, यथादिशब्दैः साधारणधर्मसम्बन्ध उभयत्र शक्त्यैव बोध्यते, न पुनस्तुल्यादिशब्दै,रयमेव विशेष इति· यतो, यथादिशब्दा यदनन्तरमुपात्तास्तस्यैवोपमानताप्रतीतिरित्युपमानविशेषणानि ते· अत उपमाने तत्सम्बन्धं बोधयन्तु,[ख] न पुनरुपमेये, अन्यविशेषणस्यान्यत्र सम्बन्धबोधकत्वायोगादिति चेन्न, शब्दशक्तिस्वाभाव्यादन्यविशेषणत्वे ऽप्यन्यत्र सम्बन्धबोधकत्वात्·[ग] नचादृष्टचरत्वम्, षष्ठ्यां तथादर्शनात्· षष्ठी हि यदनन्तरमुपात्ता,तस्यैवोपसर्जनत्वप्रतीतिरित्युपसर्जनविशेषणत्वेपि प्रधानेपि सम्बन्धं बोधयति· तस्मात्प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या च सम्बन्धबोधे विशेषाच्छ्रौतार्थविभाग इति मन्तव्यम्· तथाहि, 'पद्ममिव मुख'मित्यादावुपात्तस्याक्षिप्तस्य वा रमणीयत्वादेः सम्बन्धमविषयीकृत्यापर्यवसानम्, यथादिशब्दानां धर्मविशेषसम्बन्ध एव शक्तत्वात्· तुल्यादिशब्दास्तु नैवम्, 'पद्मेन तुल्यम्मुख'मित्यादावुपमेये, 'पद्मं तुल्यं मुखस्ये'त्यादावुपमाने, 'मुखं पद्मं च तुल्य'मित्यादावुभयत्रापि सामान्यतस्तुल्यत्वं बोधयित्वा विश्रान्तेषु तेषु धर्मविशेषं विना कथं तुल्यतेति प्रतीतानुपपत्त्या धर्मविशेषसम्बन्धप्रतीतेरिति· केचित्तु—उपमानोपमेयाभावरूपसम्बन्धस्य श्रौतार्थत्वाभ्यां विशेष इति व्याचक्षुः, तदयुक्तं, "साधर्म्यस्यार्थत्वात् तुल्यादिपदोपादान आर्थी"तिप्रकाशविरोधात्· यस्यैव ह्यार्थतयोपमाया आर्थत्वं, तस्यैव श्रौततया श्रौतत्वौचित्यात्· किञ्च, साधर्म्यमेवोपमेति तस्यैव श्रौतत्वार्थत्वाभ्यामुपमाभेदो युक्तः· अत एव 'यथादिना सादृश्यरूपः सम्बन्ध एव साक्षादभिधीयते षष्ठीवत्· तुल्यादिभिस्तु धर्म्यपी'ति

(क) "यथा इव वादि"—इति, "यथा इव वा इत्यादि०"—इति च पुस्तकान्तरे।
(ख) बोधयितुमिति पुस्तकान्तरपाठे तु समर्था इत्यध्याहार्यम्।
(ग) सम्बन्धकत्वादिति पु०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याख्यानमनुपादेयम्· तथाप्यनुपपन्नो विभागः, पूर्णायां द्योतकोपमानयो-र्न हि समासः सम्भावितः· नच यथादिभिः सममसौ दृश्यते, येन समासे श्रौती स्यादिति चेन्न, "इवेन नित्यसमासो विभक्त्यलोपः पूर्वपद-प्रकृतिस्वरत्वं च"त्यनेन इवशब्देन समं समासविभक्त्यलोपयोः सम्भवात्· विभक्त्यलोपदर्शनाच्च तत्राऽसमासव्यवहारो मूढानाम्· तत्र वाक्ये श्रौती यथा—

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति, ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥ (१)

अत्र विजयश्रीरुपमेया, स्वाधीनपतिकोपमानं, 'न मुञ्चती'ति साधारणो धर्मः, यथेत्युपमाप्रतिपादकं विवक्षितम्· एवमग्रेऽप्यूह्यम्· नचैतेषां कयोरपि समास इति वाक्यगा श्रौती । वाक्यगार्थी यथा—

चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति ।
सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते ॥ (२)

इयं समशब्दप्रयोगादार्थी । समासे श्रौती यथा—

अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार ॥ (३)

अत्रेवेन समासः । समास आर्थी यथा—

अवितथमनोरथपथप्रथनेषु गुणा[क] गरिमगीतश्रीः ।
सुरतरुसदृशः सभवानभिलषणीयः क्षितीश्वर! न कस्य ॥ (४)

अत्र सुरतरुसदृश इत्युपमानद्योतकयोस्समासः । तद्धिते श्रौत्यार्थी यथा—

गम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्, । (५)
दुरालोकश्च समरे निदाघाम्बररत्नवत्, ॥ (६)

अत्र गङ्गाभुजङ्गवदिति श्रौती, "तत्र तस्येवे"त्यनेनेवार्थे वतेर्विधानात्· निदाघाम्बररत्नवदित्यार्थी, तेन तुल्यमित्यर्थे वतेः प्रयोगात्·

(क) प्रथने प्रगुणेति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु चित्रभेदा अलङ्कारनिर्णये निर्णेष्यन्त इति पूर्वमवादीः· इदानीं स्वप्नेपीत्युदाहरसि· नच तच्चित्रं भवितुमर्हति· अत्र हि स्वाधीनपतिका कान्तं भजमाना यथा चमत्कारभू,[क]स्तथा जयश्रीस्त्वदासेवनेनेत्यादि वस्तुरूपं व्यङ्ग्यं विना नोक्तेर्वैचित्र्यम्· वैचित्र्यं चालङ्कारत्वनिष्पत्तय इति व्यङ्ग्यमवश्यापेक्षणीयम्· अतस्तस्य प्राधान्ये ध्वनित्वम्, अप्राधान्ये गुणीभूतव्यङ्ग्यत्वम्· तस्मात्पूर्वापरविरुद्धाभिधानमिति चे,न्मैवं वादीः, न खलु व्यङ्ग्यपरामर्शादेवात्र चारुताप्रतीति,रपि तु वाच्योपमामात्रपरामर्शादेव· चारुत्वहेतुश्चालङ्कारः· अवर्जनीयसन्निधेश्च व्यङ्ग्यस्यास्फुटतरतया[ख] न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारप्रवर्त्तकतेति न कश्चिद्दोषः· नन्वेवमप्युदाहृते रसादिरूपव्यङ्ग्यसद्भावाच्चित्रतानुपपत्तिः· किञ्च, अनुप्रासाद्यलङ्कारान्तरसद्भावात् सङ्करालङ्कारोदाहरणान्येतानि युक्तानि, न तु शुद्धाया उपमाया इति चे,न, रसादिरूपव्यङ्ग्यो ऽलङ्कारान्तरं चैतेष्वऽव्यभिचारीति तत्रोदासीन्यमालम्ब्योपमालङ्कारोयमीदृश इत्यभिप्रायेणालङ्कारमात्रमुदाहृतं, न तु चित्रकाव्यम्· अत्र 'चन्द्रधवलः पट' इत्यादिको रसालङ्काराभ्यामसम्भिन्न एव विषयः किमिति नोदाह्रियत इति चे,त्तद्रहितत्वेनोदाहरणे वैरस्यप्रसङ्गात्· तादृशवाक्यस्याकाव्यत्वेन तस्या अप्यनुपमात्वात् ॥ ८७॥

अथ लुप्ता विभजनीया· सा च सप्तधा· तत्रैकस्य लोपे त्रिधा, उपमानस्य, साधारणधर्मस्य, द्योतकस्य च लोपात्, उपमेयमात्रस्य लोपादर्शनात्· द्विलोपेपि त्रिधा, धर्मवाद्योः, धर्मोपमानयो,र्वाद्युपमेययोश्च लोपात्, अन्यस्य द्विकस्य लोपासम्भवात्· त्रिलोपे त्वियमेका, उपमेयं विना ऽन्येषामेकैकमात्रसत्त्व उपमाया असंभवादिति दर्शयन्नेव यथासंभवं तासां सप्तविधानामपि विभागमाह—

तद्वद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः ।

धर्मस्य, साधारणस्य· तद्वत्, समासे, वाक्ये, तद्धिते च, श्रौती, आर्थी चेत्यर्थः· तत्र विशेषमाह—न श्रौती तद्धित इति· इवार्थे एव हि तद्धिते

(क) भूमिरिति पु· ।
(ख) व्यङ्ग्यस्य स्फुटतरतयेति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा श्रौती भवेत्· इवार्थश्च वतिरेव· स च "तत्र तस्येवे"त्यर्थकतया नित्यं धर्मसाकाङ्क्ष इति धर्मानुपादाने श्रौती तद्धिते न भवत्येव· आर्थी तु यद्यपि वतिरूपे तद्धिते न सम्भवति, तेन तुल्यमित्यर्थे उक्तन्यायेन नित्यं तुल्यक्रियाकाङ्क्षत्वेन धर्मलोपे तदसम्भवात्· तथापि, कल्पब्देश्यदेशीयर्बहुच्रूपे [क] सम्भवत्येवेति पञ्चधा धर्मलोपोपमेत्यर्थः· तत्र वाक्ये श्रौती यथा–

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्याऽमृतं यथा ॥

तत्रामृतवचसोः परिणामसुरसत्वादिसाधर्म्यम्· . तच्च नोपात्तम्· आक्षेपात्तु लब्धस्य[ख] सम्बन्धो यथाशब्देन तद्बोधं[ग] विना ऽपर्याप्तेर्न[घ] श्रुत्यैव बोध्यत इति धर्मलोपे श्रौतीयम्· एवमग्रेप्यूह्यम् । वाक्य आर्थी यथा–

आकृष्टकरवालोऽसौ सम्पराये परिभ्रमन् ।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥

आकृष्टकरवालत्वं च न साधारणो धर्मः, यमस्य दण्डायुधत्वेन प्रसिद्धेः । अन्यत्त्रयं यथा–

करवालइवाचार,स्तस्य वागमृतोपमा, ।
विषकल्पं मनो, वेत्सि, यदि जीवसि, तत्सखे ! ॥

अत्र करवालइवेति समासे श्रौती, अमृतोपमेति समास आर्थी, विषकल्पमिति तद्धित आर्थी ॥ ऽ ॥

उपमानानुपादाने वाक्यगा ऽथ समासगा ॥ ८८ ॥

अत्र तद्धितगा न सम्भवति, उपमाप्रतिपादकस्य तद्धितस्य वति-कल्पबादेरुपमानादेव विधानेन उपमानानुपादानासम्भवात्· न वा श्रौती, इवादीनामुपमानमात्रान्विततया तदनुपादानात्· अतो वाक्यसमासयोरिव तयोरप्यार्थ्येवेति द्विप्रकारा लुप्तोपमानोपमा· तत्र वाक्यगा यथा–

(क) कल्पपदेश्यदेशीयबहुच्रूपे–इति पु० ।
(ख) लभ्यस्येति पु० ।
(ग) यथाशब्देन बोधमिति पु० ।
(घ) अपर्याप्तेर्नेति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सअलकरणपरिवीसामसिरिविअरणं ण सरसकव्वस्स ।
दीसइ अहवा णिसम्मइ सरिसं अंसंसमेत्तेण ॥

अत्र विशेषेण उपमानं नोपात्तं चिन्त्यमेतत् इदमेव 'कव्वस्सेयत्र कव्वसमंसरिस'मित्यत्र गुणणमितिपाठे समासगोदाहरणम् ॥ ८८ ॥

द्योतकलोपे वाक्यगा तावन्न सम्भवति, मुखंचन्द्रो रमणीयमेतावन्मात्रेणोपमाप्रत्ययाभावात्· नापि तद्धितगा, वतेः कल्पबादीनां च द्योतकतया तत्प्रयोगे द्योतकलोपस्यैव सम्भवात्· नवा श्रौतीत्यन्यथा विभजते—

वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि ।
कर्मकर्त्रोर्णमुलि—

वाशब्द उपमाद्योतक इति वादेरुपमाद्योतकस्येत्यर्थः· तस्य लोपे समासे क्यचि क्यङि णमुलि चोपमा· तत्र क्यचि द्विधा कर्मणो ऽधिकरणाच्च विधानेन तस्य द्वैविध्यात्· क्यङि त्वेकैव, कर्त्तुरेव तद्विधानात्· णमुल्यपि द्विधा, कर्मकर्त्रोस्तद्विधानात्· तत्र समासे द्विधा, द्वयोस्त्रयाणामपि वोपमानादिपदानां समासात्· तयोराद्या यथा—

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगऽलङ्कृता ॥

अत्र गण्डपाण्डुनेति द्वयोः समासः । द्वितीया यथा—

असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्णचारः ।
पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ॥

अत्रासितभुजगेत्यादावुपमानधर्मोपमेयशब्दानां त्रयाणामपि समासः· क्यच्क्यङोर्भेदत्रयं यथा—

पौरं सुतीयति जनं, समरान्तरे ऽसा-
वन्तःपुरीयति विचित्रचरित्रचुञ्चुः, ।
नारीयते समरसीम्नि कृपाणपाणे-
रालोक्य तस्य चरितानि सपत्नसेना ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'पौरं सुतीयती'त्यत्रो"पमानादाचार" इति कर्मणः क्यच्, 'समरान्तरेऽन्तःपुरीयती'त्यत्रा"धिकरणाच्चे"त्यनेनाधिकरणात्‚ 'नारीयत' इत्यत्र "कर्त्तुः क्यङ् सलोपश्चे"त्यनेन कर्त्तुः क्यङ्। णमुलि भेदद्वयं यथा–

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे, ।
स पुनः पार्थसंचारं संचरत्यवनीपतिः ॥

अत्र निदाघघर्मांशुदर्शमिति कर्मणि णमुल्, निदाघघर्मांशुमिव पश्यन्तीत्यर्थात्, पार्थसंचारमित्यत्र कर्त्तरि, "उपमाने कर्मणि चे"ति सूत्रे चकरात् ॥–॥

अथ द्विलोपे विभजनीया· तत्र धर्मवाद्योर्लोपे वाक्यगा न संभवति· शिष्टयोर्मुखं चन्द्र इत्येतावन्मात्रयोरुपादान उपमानावगमात्· नापि तद्धितगा, तद्धितस्यापि कल्पबादित्वेन तत्सत्त्वे द्विलोपाभावात्· नापि श्रौती, इवाद्यभावादित्यन्यथा विभजते–

–एतद्द्विलोपे क्विप्समासगा ॥ ८९ ॥

एतद्द्विलोपे, एतयोर्द्वयोर्धर्मवाद्योर्लोपे· क्विपा यथा–

सविता विधवति, विधुरपि सवितरति, दिनन्ति यामिन्यः,
यामिनयन्ति दिनानि च, सुखदुःखवशीकृते मनसि ॥

यद्यप्याचारे क्विब्विधानात् तस्यैव च समानधर्मरूपत्वेन क्विपि धर्मलोपो नास्ति, तथापि क्विप एव लोपाद्धर्मलोपव्यवहारः· अत एव च समानार्थकत्वेऽपि क्यङत्र नोपात्तः, तस्यालुप्तत्वेन धर्मलोपाभावात्। समासगा यथा–

परिपन्थिमनोराज्यशतैरपि दुराक्रमः ।
सम्परायप्रवृत्तोऽसौ राजते राजकुञ्जरः ॥

अत्र राजाऽयं कुञ्जर इवेत्युपमा ॥ ८९ ॥

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।

तद्धिते तु नेयम्, उपमानलोपे तद्धितस्यैवाभावात्· नापि श्रौती, उपमानाप्रयोग इवादेरप्रयोगात् । तत्र समासगा यथा–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ढुंढुंल्लंतो मरिहसि[क] कंटअकलिआइं केअइवणाइं ।
मालइकुसुमसरिस्सं भमर! भमंतो ण पाविहिसि ॥

'कुसुमसरिस्स'मित्यत्र 'कुसुमेन सम'मिति पाठ इयमेव वाक्यगा ॥ ऽ ॥

क्वचि वाद्युपमेयासे—

आसे निरासे॰ उदाहरणम्—

अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः सहस्रायुधीयति[ख] ॥

अत्र यद्यपि विशेषणद्वारेणोपात्तः कर्त्रैवोपमेय,स्तथापि न तथात्वेन, किन्तु कर्मत्वेन, अन्यथा क्यचो ऽसङ्गतत्वापत्तेः॰ तथाचात्मानं सहस्रायुधीयतीत्यर्थ इत्युपमेय आत्मा लुप्त इति यथोक्तोदाहरणमेतत्॰ 'हंसायत' इत्यादौ कर्त्रैवोपमेयः॰ तस्य चानुपादाने वाक्यमेव न पर्याप्यत इतिविशेषात् क्यङि नेयं सम्भवति॰ यद्यपि द्विलोपे ऽन्यदपि भेदत्रयं सम्भवति, यथोपमानोपमेययो, रुपमानवाच्यो, रुपमानधर्मयोरिति, तथापि लुप्तोपमायाः प्रसङ्ग एव नास्तीति न न्यूनत्वमाशङ्कनीयम् ॥—॥

त्रिलोपे तूपमेयातिरिक्तत्रितयलोप एव सम्भवतीत्युक्तम्॰ सापि समासमात्रे, अन्यत्र बोधकाभावात्॰ तत्राप्यार्थ्येव, इवादेर्लोपादित्येकविधैवेत्याह—

—त्रिलोपे च [ग]समासगा ॥ ९० ॥

यथा—

तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा ।
स्मरशरविसराहतान्तरा मृगनयना नयते[घ] मुनेर्मनः ॥

अत्र यदि मृगशब्देन लक्षणया तल्लोचने विवक्ष्येते, तदा नेदमुदाहरणम्॰ यदा तु मृगलोचने इव नयने यस्या इत्यर्थो विवक्ष्यते, तदा "सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्चे"त्यनेन मृगलोचनेत्युप॰

(क) ढुंढुंल्लन्तमरीहसीति, ढुंढुंणन्तो मरिहसीति च पा॰ ।
(ख) स सहस्र युधीयतीति पाठान्तरम्॰ विवृतावपि तदनुसारि ।
(ग) त्रिलोपे त्विति पा॰ ।
(घ) ॰'विलब्धविग्रहा। स्मरशरविशराचितान्तरा मृगनयना हरते"—इति पा॰।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मानपूर्वपदस्य नयनशब्देन बहुव्रीहावुपमानवाचिनि मृगलोचनेतिपूर्वपद उत्तरपदभूतस्य लोचनशब्दस्य लोप उपमेयभूतस्य नयनमात्रस्योपादानादिदमुदाहरणम्· केचित्तु, उपमानमात्रोपादानेपि त्रिलोपा सम्भवति, यथा,'ऽयमाऽऽयःशूलिकं' इति· अत्रायःशूलेन क्रूर आचार उपमेय,स्तीक्ष्णत्वादिश्च[क] साधारणधर्मः· नच तयोरेकमप्युपात्तं, नापीवादिरिति मन्यन्ते, तच्च युक्तम्· यतः, क्रूरस्याचारस्यायःशूलतया ऽध्यवसायादतिशयोक्तिरियं, नतूपमा, अन्यथाध्यवसानमूलातिशयोक्तेर्निर्विषयत्वापत्तेः· तदेवं धर्मलोपे पञ्च, उपमानलोपे द्वौ, द्योतकलोपे षट्,धर्मवाद्योर्लोपे द्वौ, धर्मोपमानयोर्लोपे द्वौ, तद्[ख]द्योतकोपमेयलोपे चैकः, त्रिलोपेत्वेक इत्यूनविंशतिर्लुप्ताभेदाः, पूर्णाभेदाः षडित्येवमष्टाविंशतिः· नन्वन्येप्युपमाभेदाः सम्भवन्ति· तथाहि, एकस्यैवोपमेयस्य बहूपमानसम्बन्धो मालोपमा· सा च द्विधा, साधर्म्यस्याभेदाद्भेदाच्च· तत्राद्या यथा–

अनयेनेव राज्यश्री,र्दैन्येनेव मनस्विता, ।
म्लौ सा च[ग] विषादेन, नलिनीव[घ] हिमाम्भसा, ॥

अत्र म्लानिरेव सर्वोपमानसाधर्म्यम् । अन्त्या यथा–

ज्योत्स्नेव नयनानन्दः, सुरेव मदकारणम्, ।
प्रभुतेव समाकृष्टसर्वलोका, नितम्बिनी ॥

अत्र ज्योत्स्नादीनां नयनानन्दहेतुत्वादयः साधारणधर्मा भिन्नाः ॥

पूर्वपूर्वोपमेयस्योत्तरोत्तरमुपमानत्वे रशनोपमा· [ङ]सापि द्विधा, साधर्म्याभेदात्तद्भेदाच्च· तत्राद्या यथा–

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततेः ।
भणितिरिव मति,र्मतिरिव चेष्टा,चेष्टेव कीर्त्तिरतिविमला ॥

अत्रामलत्वमेव सर्वासूपमासु साधारणो धर्मः । अन्त्या यथा–

(क) तीक्ष्णत्वादि चेति पु· ।
(ख) तदित्येकत्र नास्ति ।
(ग) सा ऽथेति क्वचित् ।
(घ) पद्मिनीवेति पा० ।
(ङ) रसनोपमेति नातियुक्तः पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मतिरिव मूर्त्तिर्मधुरा, मूर्त्तिरिव सभा प्रभावचिता, ।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् ॥

अत्र मूर्त्यादीनां मधुरत्वादयो धर्मा भेदवन्तः· त एते भेदाः किमिति नोक्ता इति चेत्, उक्ता एव, उक्तभेदान्तर्भावात्· तथापि तेन रूपेण किमिति नोक्ता इति चेत्, एवं विधवैचित्र्यसहस्रसम्भवात्, सर्वेषामाख्यातुमशक्यत्वात् ॥ ९० ॥ (इत्युपमा १)

उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।

अनन्वयः—

उपमानान्तरव्यवच्छेदाय यदेकस्यैवोपमानोपमेयत्वे भेदोपचारेणोवोपनिबध्येते, सो ऽनन्वयः· तदेतदुक्तम्—"उपमानान्तरसम्बन्धाभावो ऽनन्वय" इति, बहुव्रीहिसमासात्· यद्वा, संज्ञायोगनिर्वचनं तत्, अनन्वयः सम्बन्धाभावः, स चार्थादुपमानादितरेण उपमेयभिन्नेनेति· एवकारो वैचित्र्यविशेषस्फोरणार्थः· 'एकवाक्यगे' इति विपर्यासोपमाव्यावर्त्तनाय· तत्र हि वाक्यद्वये तथाभावः· उदाहरणम्—

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव, ।
यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः ॥

अत्र दशाविशेषाद्विभेदाद्भेदोपचारः ॥–॥ (इत्यऽनन्वयः २)

—विपर्यास उपमेयोपमा तयोः ॥ ९१ ॥

तयोः उपमानोपमेययोर्विपर्यास उपमेयोपमानभावः, अर्थाद्वाक्यद्वये,एकवाक्ये तथाऽसम्भवात्, 'मुखमिव चन्द्र' इत्यस्य निन्दाभिव्यक्तौ प्रतीपरूपत्वात्, उपमेयोपमेति यौगिकी संज्ञा· विपर्यासश्चायमुपमानान्तरव्यवच्छेदार्थः· उदाहरणम्—

कमलेव मति,र्मतिरिव कमला, तनुरिव विभा, विभेव तनुः, ।
धरणीव धृति,र्धृतिरिव धरणी, सततं विभाति बत यस्य ॥ ९१ ॥ (३)

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समेनेत्यत्र 'सहैकरूपतये'ति शेषः· तेन प्रकृतस्य सम्भविनो ऽर्थस्य समेनासम्भविना सहैकरूपतया यत्सम्भावनं, तदुत्प्रेक्षालङ्कार इत्यर्थः· सा चेयं हेत्वादिसम्भावनाभेदाद्बहुप्रकारा· तत्र हेतूत्प्रेक्षा यथा–

उन्मेषं यो मम न सहते जातिवैरी निशाया,-
मिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्ये,ति हर्षा-
ल्लग्ना,मन्ये,ललिततनु ! ते पादयोः पद्मलक्ष्मीः(क) ॥

अत्र पद्मलक्ष्म्याः कामिनीचरणयोः स्वभावलग्नत्वं यथोक्तहर्षहेतुकलग्नत्वतादात्म्येन सम्भावितम् । स्वरूपसम्भावनं यथा–

लिम्पतीव तमोङ्गानि, वर्षतीवाञ्जनं नभः, ।
असत्पुरुषसेवेव दृष्टिर्विफलतां(ख)गता ॥

अत्र गम्यमानं तमसो व्यापनादि लेपनादिरूपतया सम्भावितमिति स्वरूपोत्प्रेक्षेयम्·अत एव 'तमसो लेपनकर्तृत्वमत्रोत्प्रेक्ष्य'मित्यलङ्कारसर्वस्वकारमतप्यपास्तं, विवक्षितविवेकेन लेपनमात्रस्योत्प्रेक्षणात्· एवं फलाद्युत्प्रेक्षाप्यूहनीया ॥ ८ ॥ (इत्युत्प्रेक्षा ४)

ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥ ९२ ॥

भेदो वैधर्म्यम्· संशयस्तु कविप्रतिभानिर्मित एवालङ्कारो, नतु स्वारसिकः स्थाणुपुरुषादिविषयोऽपि, वैचित्र्याभावात्· अत्र 'संशयः ससन्देह' इति लक्षणम्· 'भेदोक्तौ तदनुक्तौ चे'ति विभागः· तत्र भेदोक्तौ यथा–

अयं मार्तण्डः किं, न खलु(ग) तुरगैः सप्तभिरितः,
कृशानुः किं, सर्वाः प्रसरति दिशो नैव नियतम्, ।

(क) ०"ल्लग्नां मन्ये ललिततनु ते पादयोः पद्मलक्ष्मी"मिति केचित् पठन्ति ।
(ख) निष्फलतामिति पा· ।
(ग) स खल्विति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतान्तः किं साक्षा,न्महिषवहनो ऽसा,विति चिरं[(क)]
समालोक्याऽऽजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥

अत्र मार्तण्डत्वादीनां सन्देहे सप्ततुरगत्वादीनि वैधर्म्याणि तदा-श्रयेषूक्तानि· नचायं व्यतिरेकालङ्कारः, तस्य सन्देहानुयायितया तेनैव व्यप-देशौचित्यात्· ननु भट्टोद्भटेन भेदोक्तौ निश्चयगर्भ एवायं स्वीकृतो, नतु निश्चयान्तोपि· तत्किमस्यापि स एव पन्थाः· नेत्युच्यते· कुत एतत्· भेदोक्ताविति विभजनाद् निश्चयान्तस्यापि तत्सम्भवाद्, वैचित्र्यानुभ-वाच्च· यथा–

इन्दुः किं, क्व कलङ्कः, सरसिजमेतत् किं,मम्बु कुत्र गतम्, ।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि! निश्चितं परतः ॥

तत्किं भट्टोद्भटेनायमुपेक्षितः· प्रतीयमानवद्वाच्ये तादृशवैचित्र्या-भावादिति गृहाण । भेदानुक्तौ यथा–

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः,
शृङ्गारैकरसः स्वयं नु मदनो, मासो नु पुष्पाकरः, ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥

अत्र च शङ्क्यमानस्य प्रजापत्यादेः कस्यापि न वैधर्म्यमुक्तम् ॥ ९२ ॥ (५)

तद्रूपकमभेदो य उप[(ख)]मानोपमेययोः ।

अभेदः, अभेदारोपः· बीजं तु तत्रातिसाम्यम्· अभेदश्चात्रानप-ह्नुतभेदयोर्विवक्षित इति नापह्नुतावतिव्याप्तिः ॥ ऽ ॥

तदेतद् द्विविधं, सावयवं निरवयवं च· तत्राद्यं समस्तवस्तुविषय-मेकदेशविवर्त्ति च· द्वितीयं तु शुद्धमात्रमित्याशयेन विभागे लक्षणमाह–

समस्तवस्तुविषयं, श्रौता आरोपिता यदा ॥ ९३ ॥

आरोपिता आरोप्यमाणाः· ते सर्वेपि यद्यारोपविषयवच्छब्दा

(क) चिरादिति पा· ।
(ख) तद्रूपकमभेदोऽयमुपेति पु· नार्हम्· तद्रूपकमभेदो यदुपेति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं भवन्ति, तदा समस्तवस्तुविषयं नाम रूपकं, समस्तं वस्तु आरोप्यमाणं विषयः शब्दप्रतिपाद्योऽत्रेतिव्युत्पत्तेः· 'आरोपिता' इति बहुवचनमविवक्षितमित्यारोप्यद्वयस्थले नाव्याप्तिः· उदाहरणम्—

ज्योत्स्नाभस्मच्छुरणधवला, बिभ्रती तारकास्थी,-
न्यन्तर्द्धानव्यसनरसिका, रात्रिकापालिकीयम् ।
द्वीपाद्द्वीपं भ्रमति, दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्यच्छलेन ॥

अत्र पादत्रये ज्योत्स्नादिषु भस्मत्वादिकमारोप्यमाणं सर्वं शाब्दम्· नन्विदं रूपकोदाहरणं न युज्यते, साधकबाधकाभावेन रूपकोपमयोः सन्देहात्सन्देहलक्षणसङ्करौचित्यादिति चे,द्नवेदेवं, यद्यन्तर्धानव्यसनरसिकत्वं विशेषणं न स्यात्· तद्धि रूपकपरिग्रहे साधकं, कापालिक्यान्तःसम्भवा,द्रात्रावसम्भवाच्च· उपमापरिग्रहे तु रात्रेरेव प्राधान्यात्तस्यानन्वय एव स्यात् ॥ ९३ ॥

श्रौता आर्थाश्च ते यस्मि,न्नेकदेशविवर्त्ति तत् ।

'त' इत्यारोपिताः· तथाच, यत्र केचिदारोप्यमाणाः शब्दोपात्ताः, केचिदर्थसामर्थ्यादवसेया,स्तदेकदेशविवर्त्ति, एकदेशे विशेषेण वर्त्तत इति व्युत्पत्तेः· उदाहरणम्—

तस्स रणंतेउरए करे कुणंतस्स मंडलग्गलअं ।
रससंमुहीवि सहसा परंमुही होइ रिउसेणा ॥

अत्र रणे अन्तःपुरत्वमारोप्यं शाब्दं, मण्डलाग्रलताया नायिकात्वं रिपुसेनायाः प्रतिनायिकात्वं चारोप्यं न शाब्दं, किंत्वन्तःपुरत्वारोपसामर्थ्यादेवावसीयते, अन्यथा तस्यापर्यवसानात्· अत एकदेशे विशेषेण वर्त्तनादेकदेशविवर्त्ति ॥ ८ ॥

साङ्गमेतत्—

साङ्गं, सावयवम्, एतत्, उक्तप्रकारवदित्यर्थः· साङ्गत्वमनेकरूपकसमुदायः· एकस्मिन् रूपके द्वितीयस्याङ्गत्वेनावस्थानात्, अङ्गशब्दस्य हेत्वर्थकत्वात् ॥–॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

—निरङ्गं तु शुद्धं—

निरङ्गम्, अद्वितीयं, तच्छुद्धमेवेत्यर्थः· यथा—

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्,
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत्, ।
अनिद्रं यच्चान्तः स्वपिति, तदहो वेद्म्य,ऽभिनवां
प्रवृत्तो ऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥

अत्र प्रेममात्रे लतिकात्वारोपः ॥–॥

अथ साङ्गस्यैव वैचित्र्यान्तरमाह—

—माला तु पूर्ववत् ॥ ९४ ॥

यथैकत्र बहूपमानयोगे मालोपमा, तथैकत्रानेकधर्मारोपे मालारूपकमित्यर्थः· यथा—

सौन्दर्यस्य तरङ्गिणी, तरुणिमोत्कर्षस्य हर्षोद्गमः,
कान्तेः कार्मणकर्म, नर्मवचसामुल्लासनावासभूः, ।
विद्या वक्रगिरां, विधेरनवधिप्रावीण्यसाक्षात्क्रिया,
बाणाः पञ्च शिलीमुखस्य; ललनाचूडामणिः, सा प्रिया ॥ ९४ ॥

नियतारोपणोपायः स्यादारोपः परस्य यत् ।
तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥ ९५ ॥

'नियतस्य मुख्यस्या,रोपो वस्त्वन्तरतादात्म्यप्रतीति,स्तस्योपायः कारणं यः, परस्यामुख्यस्या,रोप,स्तत्परम्परितम्, रूपणानां कार्यकारणभावरूपा परम्परा संजातात्रेति योगा'दिति केचित्· वस्तुतस्तु, नियतमारोपणं उपायो यत्र, आरोपणं विना यदारोपणं न सम्भवत्येवेति यावत्· एवंभूतोऽन्यस्य यत्राऽऽरोपः, स तथा· एवं च, एकरूपणानन्तरं परम्परितं, कार्यकारणभावपरम्परा संजाता अत्रेतिव्युत्पत्तेः· श्लिष्टइत्यादि· तदेतद्विविधम्, उपायभूते रूपक आरोप्यारोपविषययोर्वाचकस्य श्लिष्टत्वाद्, भिन्नरूपत्वाच्चेत्यर्थः· तत्राद्यं यथा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्वन्मानसहंस ! वैरिकमलासंकोचदीप्तद्युते !
दुर्गामार्गणनीललोहित ! समित्स्वीकारवैश्वानर ! ।
सत्यप्रीतिविधानदक्ष ! विजयप्राग्भावभीम ! प्रभो !
साम्राज्यं वरवीर ! वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥

अत्र विदुषां मानसं मानसं सरोविशेष इत्यारोपहेतुकं राज्ञि हंसत्वारोपणम्· तत्र चारोपविषयारोपणीययोर्हृदयसरोविशेषयोः श्लेषवता मानसशब्देनैवाभिधानम्· एवमग्रेऽपि· तत्र, वैरिकमलायाः सङ्कोच एव कमलानामसङ्कोचः, दुर्गाणाममार्गणमेव दुर्गाया मार्गणम्; समितां स्वीकारः एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः, विजयः परपराभव एव विजयोऽर्जुनः, एवमारोपहेतुकं सूर्याद्यारोपणमिति· ननु श्लेषस्य शब्दपरिवृत्त्यसहतया शब्दालङ्कारत्वमित्युक्तं, वक्ष्यते च· तथाच, श्लेषपरम्परितमुभयालङ्कारो युज्यत इति तदवसर एव वक्तुमुचितत्वात् किमित्यर्थालङ्कारमध्ये पठित इति चेत्, सत्यमेतत्, तथापि श्लेषापवादकं (क) रूपकमित्यलङ्कारसर्वस्वकारादिप्रसिद्ध्यनुरोधेनोक्तम्· तथाप्रसिद्धौ किं बीजमिति चेत्, मानसत्वादीनामार्थत्वम्· इदं हि तैरेकदेशविवर्तीत्युच्यते ।

द्वितीयं यथा—

आलानं जयकुञ्जरस्य, दृषदां सेतुर्विपद्वारिधेः,
पूर्वाद्रिः करवालचण्डमहसो, लीलोपधानं श्रियः, ।
संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो,
राजन् ! राजति वीरवैरिवनितावैधव्यदस्ते भुजः ॥

अत्र जयादेर्भिन्नशब्दवाच्यकुञ्जरत्वारोपे सति भुज आलानत्वाद्यारोपो युज्यते· इदमुदाहृतभेदद्वयं परम्परितं मालारूपम्· अमालारूपमपि तद् द्रष्टव्यम्· तत्र श्लिष्टे वाचके यथा—

अलौकिकमहालोकप्रकाशितजगत्त्रयः (ख) ।
स्तूयते देव ! सद्वंशमुक्तारत्नं न कैर्भवान् ॥

(क) श्लेषापवादकरूपकमिति पु० ।
(ख) ०त्रय !—इति सम्बुद्धिः क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र वंशोऽन्ववाय एव वंशो वेणुरिति। भेदभाजि यथा—

निरवधि च निराश्रयं च यस्य स्थितमनिवर्त्तितकौतुकप्रपञ्चम् ।
प्रथम इह भवान्स कूर्ममूर्त्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥

अत्र लोकशब्दाद्भिन्नेन वल्लिपदेनारोप्यमाणमुक्तम्· परम्परिते चारोप्यारोपविषयानेकत्वेपि नालङ्कारानेकत्वम्, सम्भूयैव वैचित्र्यप्रकर्षाधायकत्वात्· एवं मालारशनयोरपि द्रष्टव्यम्· यद्यपि रशना[क]रूपमपि रूपकं सम्भवति, यथा—

किसलयकरैर्लतानां, करकमलैः, कामिनां मनो जयति, ।
नलिनीनां कमलमुखै,र्मुखेन्दुभिर्योषितां, मदनः ॥

इत्यादि· तथापि, न तादृशं वैचित्र्यवदिति न पृथग्लक्षितम् ॥ ९५ ॥

(इति रूपकम् ६)

प्रकृतं यन्निषिध्यान्यत्साध्यते, सा त्वपह्नुतिः ।

प्रकृतमुपमेय,न्निषिध्या ऽसत्यतया व्यवस्थाप्या,न्यदप्रकृतमुपमानं, यत्साध्यते सत्यतया व्यवस्थाप्यते, सा ऽपह्नुतिः· सा च शाब्दी चार्थी चेति द्विधा· तत्राद्या यथा—

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये!
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं, मन्ये, विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥

अत्र 'कलङ्को नैवाय'मिति शाब्दो ऽपह्नवः । आर्थस्तु बह्वीभिर्भङ्गिभिरालोक्यते· तत्क्वचित्कपटार्थशब्दोपादानात्· यथा—

बत सखि! कियदेतत्पश्य वैरं स्मरस्य
प्रियविरहकृशेस्मिन् रागिलोके, तथा हि,[ख] ।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ॥

(क) रसनेति पु० ।
(ख) तथापीति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र च्छलशब्दबला'च सभृङ्गानि सहकाराण्य,पि तु सकालकूटाः शरा' इति प्रतीयते । क्वचित्परिणामादिशब्दवशात्· यथा–

अमुष्मिल्लँ(क)लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः, ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥

अत्र 'धूमशिखा रोमावलिवपुः परिणमतो'ति परिणामशब्दार्थ-वशा'न्नेयं रोमावलिः, किन्तु धूमशिखे'ति प्रतीयते· एवं भङ्ग्यन्तरैरप्यूह्यम्, यथा "इदं ते केनोक्त'मित्यादौ ॥ ऽ ॥ (इत्यपह्नुतिः ७)

श्लेषः स, वाक्य एकस्मिन्यत्रानेकार्थता भवेत् ॥ ९६ ॥

परिवृत्तिसहानामेव पदानामेकवृन्तगतफलद्वयन्यायेन यत्रानेकार्थ-प्रतिपादकता, सोऽर्थश्लेषः· यथा–

उदयमयते, दिङ्मालिन्यं (ख)निराकुरुतेतरा,-
न्नयति निधनं निद्रामुद्रां, प्रवर्त्तयति क्रियाः, ।
रचयतितरां स्वैराचारप्रवर्तनकर्त्तनं,(ग)
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥

अत्र विभाकरनामा राजविशेषो मार्तण्डश्चेत्युभयार्थे'न्युदयमयत' इत्यादीनि वाक्यानि· नचायं द्वितीयार्थस्य ध्वनिरेवेति शङ्कनीयं, संयोगादीनामभावेनाभिधाया अनियन्त्रणाद्द्वयोरपि वाच्यत्वात् ॥ ९६ ॥ (८)

परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः–

परम् अप्रकृतम्· भेदकानि, विशेषणानि· श्लिष्टान्यनेकार्थानि· तेन, प्रकृतार्थविशेषणवाचिमात्रशब्दस्य श्लेषमहिम्ना यत्र प्रकृतार्थकेन वाक्येनाऽप्रकृतार्थनिर्वचनं, सा समासोक्तिः, संक्षेपेणाऽर्थद्वयोक्तिः· 'मात्र'ग्रहणात्र विशेष्यपदस्यापि श्लिष्टत्वं तद्व्युदास,स्तस्य श्लेषत्वात्· उदा०–

(क) अमुष्मिल्लावण्येति सर्वत्रास्ते ।
(ख) दिग्मालिन्यमिति पु० ।
(ग) खण्डनमिति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लहिऊण तुम्म बाहुप्फंसं जीए स कोवि उल्लासो ।
जअलच्छी तुह विरहे णहुज्जुला दुब्बलाणं सा ॥

अत्र विशेष्यवाचिनो जयलक्ष्मीशब्दस्य परमऽप्रकृतार्थत्वं नास्ति· श्लिष्टत्वं चोपलक्षणम्, औपम्यगर्भादीनामपि सम्भवात्· यथा "विलिख-ति कुचा"वित्यादावित्ति प्राचीनः पन्थाः· अत्र नव्याः—परोक्तिरिति परश-ब्देन सामान्यतः प्रकृतमप्रकृतं वा विवक्षितम्· तेन यत्राप्राकरणिकविशेषण-सामर्थ्यात् प्राकरणिकमुच्यते, तदपि संगृह्यते, तत्रापि वैचित्र्याविशेषा,द-न्यत्रानन्तर्भावाच्च, यथा "संप्राप्ते सकलाङ्गे"त्यादि· अत्र ह्यप्रकृतस्य भृङ्गस्य विशेषणसामर्थ्यात्प्रकृतस्यासत्पुरुषस्य प्रतीतिरित्याहुः· तच्च युक्तम्, अप्रस्तुतप्रशंसयैव तत्संग्रहात्, "येनास्यभ्युदितेने"तिवत्· वृत्तौ चाप्रस्तु-तप्रशंसाप्रकरणे तत्र समासोक्तिपदं श्लिष्टविशेषणत्वमात्रपरम् ॥—॥ (९)

—निदर्शना

अभवद्वस्तुसम्बन्ध उपमापरिकल्पितः ॥ ९७ ॥

यथाश्रुतमात्रेणाऽसम्भवी वस्तुसम्बन्धो यत्रोपमां कल्पयित्वा पर्य-वस्यति, सैका निदर्शना, दृष्टान्तकरणात्मकनिदर्शनरूपत्वात्· सा च द्विधा, अवान्तरवाक्यभेदे तदभेदे च· तयोराद्या (क)यथा—

क्व सूर्यप्रभवो वंशः, क्व चाल्पविषया मतिः, ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

अत्र'ऽहं सागरन्तितीर्षुरस्मी'त्यस्यासम्बद्धार्थकतया 'उडुपेन साग-रतरणवद् मदीयमत्या सूर्यवंशवर्णनमसम्भावित'मित्युपमायाः कल्पनम् । अन्त्या यथा—

उदयति विततो(ख)र्ध्वरश्मिरज्जावऽहिमरुचौ, हिमधाम्नि याति चास्तम्, । वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्र-लीलाम् ॥

(क) अनयोराद्येति पु· ।
(ख) विहितेति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रान्यलीलोद्वहनस्यान्येनासम्भवाद्वारणेन्द्रलीलासदृशीं लीलामित्युपमायां पर्यवसानम्· एवं च 'पूर्वोदाहरणे वाक्यार्थे उपमाक्षेपक, इह तु पदार्थमात्र'मिति व्याख्यानमनादेयम्, अत्रापि लीलापदार्थमात्रस्यानाक्षेपकत्वात् । एषा मालारूपापि दृश्यते, यथा–

दोर्भ्यां तितीर्षति तरङ्गवतीभुजङ्ग-,
मादातुमिच्छति (क) करेण शशाङ्कबिम्बम्,
मेरुं लिलङ्घयिषति ध्रुव,मत्र देव!
यस्ते गुणान् गदितुमुद्यममादधाति ॥ ९७ ॥ (१०)

स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा ।

यत् क्रिययैव स्वस्य स्वहेतोश्चान्वयो हेतुहेतुमद्भावरूपः ख्याप्यते, सा ऽपरा निदर्शना· यथा–

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् (ख) ।
शैलशेखरगतः पृषत्कणश्चारुमारुतधुतः पतत्यधः ॥

अत्र 'पते'त्पदप्रतिपाद्यस्य पातरूपस्य कार्यस्य लाघवे सत्युन्नतपदप्राप्तिरूपस्य कारणस्य च तथासम्बन्धः 'पतति'पदप्रतिपाद्यया पातक्रियया प्रतिपाद्यते· तथा च लाघवे सत्युन्नतपदप्राप्तिः पाते हेतु,र्यथा पृषत्कणस्येतिदृष्टान्तपर्यवसानान्निदर्शनात्वमिति ॥ ऽ ॥ (इति निदर्शना ११)

अप्रस्तुतप्रशंसा या, सा सैव(ग) प्रस्तुताश्रया ॥ ९८ ॥

प्रशंसा, वर्णना· सैव, अप्रस्तुतप्रशंसैवेत्यर्थः· प्रस्तुताश्रया, प्रकृतप्रतिपत्तिहेतुः· एतच्चालङ्कारत्वबीजमतिप्रसक्तमिति निवारयति–अप्राकरणिकेन प्राकरणिकाक्षेपो ऽप्रस्तुतप्रशंसा· प्राकरणिकेनाप्राकरणिकाक्षेपः समासोक्तिरिति विवेकः ॥ ९८ ॥

तां विभजते–

(क) इच्छत्यिति पु· तु न युक्तम् ।
(ख) ध्रुवम्· शैलशेखरगतो दृषत्कणइति पु·
(ग) सा या सैवेति प्रायः प्रक्रान्तेपूपलभ्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कार्ये, निमित्ते, सामान्ये, विशेषे, प्रस्तुते सति ।

तदन्यस्य वच,स्तुल्ये तुल्यस्यैवे,ति (क) पञ्चधा ॥ ९९ ॥

'से'त्यनुवर्त्तते· कार्यादिपञ्चके प्रस्तुते तदन्यस्य कारणादिपञ्चकस्याप्रस्तुतस्य वर्णनमिति सा पञ्चधेत्यर्थः· तत्र कार्ये प्रस्तुते कारणस्य वर्णनं यथा–

याताः किंच मिलन्ति सुन्दरि! पुन,श्चिन्ता त्वया मत्कृते
नो कार्या, नितरां कृशासि, कथयत्येवं सबाष्पे मयि, ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥

अत्र 'प्रस्थानात्किं निवृत्तोसी'ति कार्ये पृष्टे कारणस्य प्रियाया भाविमरणोत्साहस्य वचनम्· 'किं'शब्दः प्रश्नार्थ इति न कारणप्रस्तावः । कारणप्रस्तावे कार्यवचनं यथा–

राजन्! राजसुता न पाठयति मां, देव्योपि तूष्णीं स्थिताः,
कुब्जे! भोजय मां, कुमारसचिवैर्नाद्यापि किं भुज्यते, ।
इत्थं राजशुक(ख)स्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानऽवलोक्य शून्यवलभावेकैकमाभाषते ॥

अत्र 'प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गता' इति शत्रुपलायने कारणे प्रस्तुते तस्याभावणविशेषरूपं कार्यमुक्तम् । सामान्ये प्रस्तुते विशेषवचनं यथा–

एतत्तस्य मुखात् कियत्, कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जड़ः, शृणवऽन्यदस्मादपि, ।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा (ग) ॥

(क) तुल्यस्येति चेति पाठः प्रकाशेपूपलभ्यते ।
(ख) नाथ! शुक इति प्रायः प्रकाशः ।
(ग) नाऽन्तः शुचेति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'जड़ानामस्थल एव ममत्वसम्भावना भवती'ति सामान्ये प्रस्तुते पुरुषविशेषस्य ममत्वविशेषो ऽभिहितः । विशेषे प्रस्तुते सामान्यवचनं यथा—

सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन[क] यः, ।
स एव पूज्यः, स पुमान्, स नीतिमान्, सुजीवितं तस्य, स भाजनं श्रियः ॥

अत्र 'श्रीकृष्णं निहत्य नरकासुरवधूनां दुःखं यदि शमयसि, तदा त्वमेव श्लाघ्य' इति विशेषे प्रस्तुते सामान्यमुक्तम् । तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः, विशेषणविशेष्यवाचिनां सर्वेषामपि श्लिष्टत्वस्य, विशेषणमात्रवाचिनां वा श्लिष्टत्वस्य, श्लेषाभावेपि सादृश्यमात्रस्यैव वा प्रकृताक्षेपहेतुत्वात् आद्यो यथा—

पुंस्त्वादपि प्रविचलेद्यदि, यद्यधोपि
यायाद्, यदि प्रणयने नमहानपि स्यात्, ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन ॥

अत्र पुंस्त्वादित्यादिविशेषणानां पुरुषोत्तमेनेति विशेष्यस्य च श्लेषात् सत्पुरुषप्रतिपत्तिः[ख] नच श्लेष एवायम्, 'अवयवशक्तेः समुदायशक्तिर्बलीयसी'तिन्यायात् प्राग्विष्णूपस्थितौ सत्पुरुषस्याक्षेपेणैवोपस्थितेः श्लेषसत्त्वेप्यप्रस्तुतस्य प्रथमोपस्थित्यैवाऽप्रस्तुतप्रशंसात्वात्। द्वितीया यथा—

येनास्यऽभ्युदितेन चन्द्र ! गमितः क्लान्तिं, रवौ तत्र ते
युज्येत प्रतिकर्त्तुमेव, न पुनस्तस्यैव पादग्रहः, ।
क्षीणेनैतदनुष्ठितं यदि, ततः किं लज्जसे नो मना,-
गस्त्वेवं, जड़धामता तु भवतो, यद्व्योम्नि विस्फूर्जसे ॥

अत्र विशेष्यवाचि चन्द्रपदं न श्लिष्टम् । तृतीया यथा—

(क) पातनेनेति पु० ।
(ख) प्रतीतिरिति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आदाय वारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन दुरर्णवेन, ।
क्षारीकृतं च, वड़वादहने(क) हुतं च,
पातालकुक्षिकुहरे विनिवेशितं च ॥

अत्र श्लेषाभावेपि सादृश्यमात्रेणासत्पुरुषाक्षेपः यथा वा मम—

कौटिल्यं नयने निवारयतरां, शीघ्रां गतिं शीलय,
व्यक्तार्थां कुरु भारतीं, विहसिते ऽप्यौद्धत्यमायोजय, ।
कुग्रामप्रमदाविलासरसिकः कान्तस्त्वया ऽऽसादितो,
नायं नन्दिनि! नागरीजनसमाचारैः समाकृष्यते ॥

इयं च त्रिधा क्वचि(ख)द्वाच्यार्थे प्रतीयमानार्थानध्यारोपमात्रेण, क्वचित्प्रतीयमानार्थाध्यारोपेण, क्वचित्त्वंशभेदेन तदध्यारोपानारोपाभ्याम्। तत्राद्या यथा—

अब्धेरम्भःस्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इह हि बहवो लङ्घनेपि क्षमन्ते,(ग) ।
आहो रिक्तः कथमपि भवेदेष दैवात्तदानीं
को नाम स्यादवटकुहरालोकनेप्यत्र कल्पः ॥

अत्र पुरुषेष्वेतेऽर्थो अबाधिता एवेति न प्रतीयमानार्थाध्यारोपः।
द्वितीया यथा—

कस्त्वं भोः, कथयामि दैवहतकं मां विद्धि शाखोटकं,(घ)
वैराग्यादिव वक्षि, साधु विदितं, कस्मादिदं कथ्यते, ।
वामेनात्र वट,स्तमध्वगजनः सर्वात्मना सेवते,
न च्छायापि परोपकारकरणे(ङ) मार्गस्थितस्यापि मे ॥

अत्र शाखोटके सम्बोध्यत्वोच्चारयितृत्वादिकमनुपपन्नमिति प्रतीयमानाध्यारोपः। तृतीया यथा—

(क) वड़वावपने—इति तु प्रायः।
(ख) क्षमन्ते—इति प्रकाशः।
(ग) शाकोटकमिति क्वचित्।
(घ) क्वचित्त्रयस्थाने क्वचिद्वयं पु०।
(ङ) करिणी, करणी इति तु नास्तियुक्ते स्तः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोऽपूर्वा रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं,
दृष्टिः सा मदविस्मृतस्वपरदिक्किं भूयसोक्तेन वा, ।
सर्वं विस्मृतवानसि भ्रमर हे! यद्वारणोऽद्याप्यसा-
वन्तःशून्यकरो निषेव्यत इति, भ्रातः! क एष ग्रहः ॥

अत्र हस्तिनो रसनाविपर्यासः, शून्यकरत्वं, मदश्च, वाच्यस्य भ्रमरस्य सेवनाभावहेतुत्वेन वाच्यानि, न च तद्धेतवः, मदस्तु प्रत्युत सेवने हेतुरिति तदंशे प्रतीयमानपुरुषाध्यारोपापेक्षा· कर्णचापलं तु भ्रमरस्यासेवने हेतुरेवेति तदंशे नाध्यारोप इति ॥ ९९ ॥ (इत्यऽप्रस्तुतप्रशंसा ११)

निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्, ।
प्रस्तुतस्य यदन्यत्वं, यद्यर्थोक्तौ च कल्पनम्, ॥ १०० ॥
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः, ।
विज्ञेया ऽतिशयोक्तिः सा—

प्रकृतस्योपमेयस्य, परेणोपमानेन, निगीर्याध्यवसानं द्रढीयसी बुद्धि,-रेकातिशयोक्तिः· यच्च तदेव वस्त्वन्यत्वेन विविक्ताकारवस्त्वन्तरत्वेनाध्यवसीयते, सा द्वितीया· यच्च 'चे'च्छब्देन 'यदि'शब्देन वा यद्यर्थोक्तौ कल्पनमर्थादसम्भविनो ऽर्थस्य, सा तृतीया· यश्च कार्यकारणयोः प्रसिद्धस्य पौर्वापर्यस्य विपर्ययो वैपरीत्यं, कारणस्य शीघ्रकारिताप्रतीतये,(क) सा चतुर्थीति चतस्रो ऽतिशयोक्तयः· तत्राद्या यथा—

कमलमनम्भसि, कमले च कुवलये, तानि(ख) कनकलतिकायाम्, ।
सा च सुकुमारसुभगे,त्युत्पातपरम्परा केयम् ॥

अत्र मुखादि कमलादित्वेनाध्यवसितम्· यथा वा मम—

कलसे(ग) परममहत्त्वं, तिमिरस्तोमस्य सोमसहवासः, ।
वियति च शैवलवल्ली, शिव शिव कुसुमेषुसर्गसौभाग्यम् ॥

(क) प्रतीयत इति तु पु· न युक्तम् ।
(ख) कमले कुवलयमेतानीति पा· ।
(ग) कलश इति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0, In Public Domain, Digitizagtion by eGangotri

द्वितीया यथा—

अण्णं लडहत्तणअं, अण्णं बिअ कावि वत्तणच्छाआ, ।
सामा सामण्णपआवइणो रेहव्विअ ण होइ ।

स्पष्टम् ।

तृतीया यथा—

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः, ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥

चतुर्थी यथा—

हृदयमधिष्ठितमादौ मालत्याः(क) कुसुमचापबाणेन, ।
चरमं रमणीवल्लभ! लोचनविषयं त्वया भजता ॥

॥ १०० ॥-॥ (इत्यतिशयोक्तिः १२)

—प्रतिवस्तूपमा तु सा, ॥ १०१ ॥
सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।

एकस्य सामान्यस्य सामान्यधर्मस्य वाक्यद्वये उपमानोपमेयवाक्ययोर्यत्र द्विरवस्थिति,र्यांच्छब्दभेदेन, अभिन्नस्य शब्दस्य दुष्टत्वात्, सा प्रतिवस्तूपमा, वस्तुनो वाक्यार्थस्योपमानत्वात्· अत्र 'द्वि,द्वये' इत्यनेकोपलक्षके, मालानुरोधात्· सा च द्विधा, अमालारूपा मालारूपा च· तत्राद्या यथा—

देवीभावं गमिता परिवारपदं कथं भजन्त्येषा, ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥

अत्र परिवारपदत्वपरिभोगयोग्यत्वयोरनर्थान्तरत्वादुदाहरणत्वमित्येके · 'कथं भजति' 'न खल्वि'त्यनयोरेकार्थतया तथात्वमित्यपरे ।

अन्त्या यथा—

(क) मालव्या इति पा· तु न युक्तम्· कुट्टनीमताख्यनिबन्धस्यमिदं पद्यं हि मालतीनामवेश्याविषयकं तद्दूतीवाचोयुक्तितया कल्पितापदेशरूपम्· मालविकाग्निमित्रस्य मालविकादूत्या राजानं प्रति तदवस्थावेदनरूपमिति तु महेश्वरादीनां कल्पनामात्रम्, मालविकाग्निमित्रे सर्वथैवास्या अभावादिति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदि दहत्यनलो, ऽत्र किमद्भुतं. यदि च गौरवमद्रिषु, किं ततः.
लवणमम्बु सदैव महोदधेः. प्रकृतिरेव सतामविषादिता ॥

अत्र 'किमद्भुत'मित्यादिभिरद्भुताभावस्य वाक्यचतुष्टयेऽप्युपादाना-न्मालात्वम्· चतुर्थवाक्यं चोपमेयवाचि ॥ १०१ ॥ ऽ ॥ (इति प्रतिवस्तूपमा १३)

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ॥ १०२ ॥

एतेषामुपमानोपमेयसाधारणधर्माणां सर्वेषां प्रतिबिम्बनं दृष्टान्तः, दृष्टोऽन्तो निश्चय उपमानिर्वाहको ऽत्रालङ्कार इतिव्युत्पत्तेः· स च द्विधा साधर्म्यवैधर्म्याभ्याम्· तत्र साधर्म्येण यथा—

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम्, ।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः ॥

अत्र साधर्म्यस्यापि प्रतिबिम्ब एवेति प्रतिवस्तूपमाभेदः । वैधर्म्येण यथा—

नवाहवे साहसकर्मशर्मणः पाणिं[क] कृपाणान्तिकमानिनीपतः ।
भटाः परेषां विशरारुतामगु[ख],र्दधत्यवाते स्थिरतां हि पांसवः[ग]॥

वैधर्म्यविपर्यये साधर्म्यपर्यवसानमिति दृष्टान्तालङ्कारत्वम् ॥१०२॥ (दृष्टा १४)

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्, ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥ १०३ ॥

प्रकृताप्रकृतात्मनामर्थादुपमानोपमेयभूतानां धर्मिणां साधर्म्यस्य क्रियादेः सकृद्वृत्तिरेकवारमेवोपादानं य,त्तदेक,मेकस्यस्यैव वाक्यदीपकत्वेन प्रदीपसाम्यात्· कारकस्य च बह्वीषु क्रियासु सैव सकृद्वृत्तिरेव, द्वितीय-दीपकम्· 'इति'शब्दः प्रकारे· तेनोक्तप्रकारद्वयवद्दीपकमित्यर्थः· आद्यं यथा·

किवणाणं धणं, णाआणं फणमणी, केसराइं सीहाणं, ।
कुलबालियाणं थणआ, कुतो छिप्पंति अमुआणं ॥

(क) करमिति पा· ।
(ख) ०मयुरिति पा· ।
(ग) पांशव इति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र 'क्षिपन्ती'ति सकृदुपात्तम्· कुलपालिकानां स्तना उपमेयाः ।
अन्त्यं यथा—

स्विद्यति, कूणति, वेल्लति, विवलति, निमिषति, विलोकयति तिर्यक्, ।
अन्तर्नन्दति, चुम्बितुमिच्छति, नवपरिणया वधूः शयने ॥

अत्र 'वधू'रिति कारकस्य सकृद्वृत्तिः ॥ १०३ ॥

मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ।

गुणावहमुपकारकम्· यथा—

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवा! ऽऽकर्णय येन येन सहसा यद्यत्समासादितम्, ।
कोदण्डेन शराः, शरैरशिर,स्तेनापि भूमण्डलं,
तेन त्वं, भवता च कीर्तिरतुला,कीर्त्या च लोकत्रयम् ॥

स्पष्टम्· मालोपमादीनां बहूपमानसम्बन्धात्रापरो विशेष इति न ते लक्षिताः· इदं तु पृथग्लक्षितम्, उत्तरोत्तरमुपकार्योपकारकतया परस्परसंसर्गेण मालाभावमापन्नानां सकृद्धर्मनिर्देशरूपत्वेनाधिकविशेषानुप्रवेशादिति ॥ ऽ ॥ (इति दीपकम् १५)

नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥ १०४ ॥

नियतानां प्राकरणिकानामेवाऽप्राकरणिकानामेव वा·(क) 'धर्म' इत्यनन्तरं यदुपादीयत इति शेषः· सकृत्पदोपादानाद् यत्र प्रतिस्वं भिन्ना धर्मा, एकस्यैव वा सर्वत्रोपादानं, तत्र नातिप्रसङ्गः· तत्र प्राकरणिकानामेव यथा—

पाण्डु क्षामं वदनं, सरसं हृदयं, तवालसं च वपुः, ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि! हृदन्तः ॥

अत्र प्रकृतानां विरहिणीवदनादीनामेव धर्मत्वेनावेदनाख्यो धर्म उपात्तो, न तूपमानरोगधर्मतया । अप्राकरणिकानामेव यथा—

(क) प्राकरणिकानामप्राकरणिकानामेव वेति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का[क]।
अमृत,ममृतरश्मि,रम्बुजन्म प्रतिहतमेकपदे तवाननस्य॥

अत्र कामिन्या वर्णनीयत्वादप्राकरणिकानां कुमुदादीनामेव धर्मतया पूर्वार्द्धे 'का'पदव्यङ्ग्यो ऽधिक्षेप, उत्तरार्द्धे प्रतिहतत्वं चोपात्तम्॥ १०४॥

(इति तुल्ययोगिता १६)

उपमानाद्यदन्यस्य व्यतिरेकः, स एव सः।

अन्यस्य उपमेयस्य· व्यतिरेको विशेषणातिरेक आधिक्यम्· स एव, व्यतिरेकः· कश्चित्तु—[ख]यत्रोपमेयादुपमानस्य उपमानादुपमेयस्य वा आधिक्यं स व्यतिरेक इति लक्षणम्· कथमन्यथा

क्षीणः क्षीणोपि शशी भूयो भूयो विवर्द्धते,सत्यम्, [ग]।
विरम, प्रसीद सुन्दरि!, यौवनमनिवर्ति यातं तु॥—

इत्यादिसंग्रहः· अत्र ह्युपमानभूतस्य शशिन उत्कर्षः, क्षयेपि पुनर्वृद्धिरित्याह· तच्च युक्तम्, अस्थैर्ये हि तस्योपमानता, तदाधिक्यं चोपमेये यौवन एवात्र विवक्षितम्· तस्मा.दुपमानस्योत्कर्षे व्यतिरेक इति रिक्तं वचः॥ ऽ॥

एनं विभजते—

हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते॥ १०५॥
शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रिरष्टधा[घ]।

व्यतिरेकस्य द्वौ हेतू, उपमेयगतमुत्कर्षनिमित्त,मुपमानगतमपकर्षनिमित्तं च· तयोर्द्वयोरप्युपादानमित्येकः प्रकारः· अनुपादाने तु त्रयो भेदाः, प्रथमस्यैव, द्वितीयस्यैव, उभयोरपि वा हेत्वोरनुपादानात्· तदेवं चत्वारो भेदाः· ते च प्रत्येकं त्रिधा, साधर्म्यस्य क्वचिदिवादिना शब्दशक्तेः

(क) पुरस्तादिति पाठस्त्वपर्यायार्थविवृतिविरुद्धश्च।
(ख) 'केचित्त्वि'ति पा·। एवमुत्तरत्रा'ऽऽहु'रिति च।
(ग) ०ऽभिवर्द्धते ऽतितरामिति, सुतरामिति नितरामिति च पा·।
(घ) तद्वत्त्रिरष्ट स इति पा·।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिपादानात्· क्वचित्तुल्यादिशब्देनार्थशक्त्या, क्वचिदुभयाभावेप्याक्षेपेणेति द्वादश भेदाः· ते च प्रत्येकमश्लिष्टश्लिष्टशब्दा इति चतुर्विंशतिभेदः स इत्यर्थः· तत्राश्लिष्टभेदेषु हेत्वोरुक्तौ शाब्दे साम्ये यथा–

असिमात्रसहायस्य प्रभूतारिपराभवे ।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥

अत्रोपमाने तुच्छत्व,मुपमेये महाधृतित्वं च हेतू· इवशब्द-सत्त्वाच्च शाब्दमौपम्यम्· अत्रैव तुच्छत्वमात्रस्य महाधृतिमात्रस्य वा द्वयोरपि वा क्रमेणानुपादाने हेत्वनुपादानभेदत्रयेऽपि शाब्दौपम्यभेदत्रयं द्रष्टव्यम् । हेतुद्वयोपादाने एवार्थसाम्ये यथा–

असिमात्रसहायोऽपि प्रभूतारिपराभवे ।
नैवान्यतुच्छजनवत्सगर्वोऽयं महाधृतिः ॥

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम्· अत्र पूर्ववदनुपादानभेदत्रयं द्रष्टव्यम् । हेत्वोरुक्तावेवाक्षिप्ते साम्ये यथा–

इयं सुनयना दासीकृततामरसश्रिया ।
आननेनाकलङ्केन निन्दती(क)न्दुं कलङ्किनम् ॥

अत्राकलङ्कित्वकलङ्कित्वे हेतू समुपात्तौ· इवादीनां तुल्यादीनां चाऽभावादक्षिप्तमौपम्यम्· अत्रैव हेत्वनुपादाने भेदत्रयं पूर्ववद् द्रष्ट-व्यम्· नचाक्षिप्तभेद उपमायां शङ्कनीयः, जयत्यादिशब्दस्यावश्यकतया व्यतिरेकेण विषयापहारात् । अथ श्लिष्टभेदेषु हेत्वोरुक्तौ शाब्दमौपम्यं यथा–

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः ।
अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः ॥

अत्र श्लिष्टो गुणशब्दः· तदर्थस्यातिगाढत्वभङ्गुरत्वे च हेतू समुपात्तेः इवार्थे वतिरिति शाब्दमौपम्यम्· अत्रैव पूर्ववदनुपादाने भेद-त्रयं द्रष्टव्यम् । तत्रैवार्थसाम्ये यथा–

अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।
न निशाकरवज्जातु कलावैकल्यमागतः ॥

(क) जयतीति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र कलाशब्दः श्लिष्टः· कलावैकल्यतदभावौ हेतू शब्दोपात्तौ· तुल्यार्थे वतिरित्यार्थमौपम्यम्· अत्रानुपादानत्रयं चिन्त्यम् । अयमेव माला-रूपो यथा–

हरवच्च विषमदृष्टि हरिवन्न विभो! विधूतविततवृषः, ॥
रविवच्च चापि दुःसहकरतापितभूः कदाचिदसि ॥

पूर्ववत् । तत्रैवाक्षिप्ते साम्ये यथा–

नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वता ऽनेन भूपेन भास्वानेष विनिर्जितः ॥

अत्र 'भास्वते'ति 'प्रतापे'ति च श्लिष्टम्· पूर्वोर्द्धोपात्तं हेतुद्वयम्· इवादे स्तुल्यादिशब्दानां चाभावादाक्षिप्तैवोपमा· अत्रैव पूर्ववदनुपादाने भेदत्रयं द्रष्टव्यम् । निर्जितजयत्यादिशब्दाभावेपि श्लिष्टविशेषणैरौपम्या-क्षेपादप्ययं भेदः सम्भवति· यथा–

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं,
बिम्बप्रभाधर,मकृत्रिमहृद्यगन्धम्, ।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु, नाऽऽननमङ्गनानाम् ॥

स्पष्टम् । श्लिष्टोक्तियोग्यपदस्य पृथगुपादानेऽप्येवंजातीयका भेदाः सम्भवन्ति, ते ऽनयैव दिशा द्रष्टव्याः ॥ १०५ ॥ ऽ ॥ (इति व्यतिरेकः १७)

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥ १०६ ॥
वक्ष्यमाणोक्तविषयः, स आक्षेपो द्विधा मतः ।

वक्तुमिष्टस्य प्राकरणिकत्वादऽवचनानर्हस्य, यो निषेध आक्षेपः· निषेधो निषेध इवेत्यर्थः· शब्दगत्या निषेधेप्यर्थगत्या विधेरेव प्रतिपत्तिः· तत्प्रयोजनमाह'विशेषाभिधित्सये'ति· वक्ष्यमाणविषये ऽशक्य(क)वक्तव्यत्व,-मुक्तविषये ऽतिप्रसिद्धं चेति विशेषः· विभजते 'वक्ष्यमाणे'ति· तत्र वक्ष्यमा-णविषयो यथा–

(क) सक्तेति, शक्तेति च पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ए एहि किंवि कीएवि कए णं णिक्किव! भणामि, अलमहवा, ।
अविआरिअकज्जारंभआरिणी मरउ, ण भणिस्सं ॥

अत्र विरहजनितदुर्दशातिशयो वक्ष्यमाणो निषिद्धः । उक्तविषयो यथा—

ज्योत्स्ना, मौक्तिकदाम, चन्दनरसः, शीतांशुकान्तद्रवः,
कर्पूरं, कदली, मृणालवलयान्य,ऽम्भोजिनीपल्लवाः, ।
अन्तर्मानसमाऽऽस्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति, हन्त किमनेनोक्तेन, न ब्रूमहे ॥
॥ १०६ ॥ (इत्याक्षेपः १८)

क्रियायाः प्रतिषेधेपि फलव्यक्ति,र्विभावना ॥ १०७ ॥

वैयाकरणमते क्रियैव हेतुरिति क्रियेत्युक्तम्· वस्तुतस्तु, कारणप्रतिषेधे कार्यवचनं विभाना· नच विरोधः, स्वाभाविकत्वस्य कारणान्तरस्य वा विभावनात्· उदाहरणम्—

कुसुमितलताभिरहताऽप्यधत्त रुज,मलिकुलैरदष्टापि ।
परिवर्त्तते स्म, नलिनी·लहरीभिरलोलिताप्यघूर्णत, सा ॥
॥ १०७ ॥ (इति विभावना १९)

विशेषोक्ति,रखण्डेषु कारणेषु फलावचः ।

अखण्डेषु मिलितेषु प्रसिद्धकारणेषूक्तेषु कार्याभाववचनं विशेषोक्तिः· अत्राप्यप्रसिद्धे कार्याभावहेतौ पर्यवसानाद् विरोधाभावः· सा च त्रिधा, अनुक्तनिमित्ता, उक्तनिमित्ता, अचिन्त्यनिमित्ता च· तत्राद्या यथा—

निद्रानिवृत्ता,वुदिते द्युरत्ने, सखीजने द्वारपदं पराप्ते, ।
श्लथीकृताश्लेषरसे भुजङ्गे, चचाल नालिङ्गनतो ऽङ्गना सा ॥

अत्र रागातिशयो निमित्तं चलनाभावे· सच विशिष्य वक्तुं शक्यत्वेपि नोक्त इत्यनुक्तनिमित्तेयम् । उक्तनिमित्ता यथा—

कर्पूर इव दग्धो ऽपि शक्तिमान् यो जने जने, ।
नमोऽस्त्वऽवार्यवीर्याय तस्मै मकरकेतवे ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र कर्पूरो[क] दाहमात्र उपमानं, नतु शक्तिमत्त्वेपीति भास्करः· शक्तिमत्त्व इति तु परमार्थं, ईषद्दग्धस्य तस्य सौरभाद्यतिशयित्वात्[ख] ।

भ्रूभ्यां प्रियाया भवता मनोभूचापेन चा ऽऽपे घनसारभावः, ।
त्रिज्ञां यदाऽऽप्लोषदशामपेत्य सम्प्रत्यनेनाऽधिकवीर्यता ऽऽर्जि ॥–

इत्यादिनैषधदर्शनात्· अत्रावार्यवीर्यत्वं शक्तिमत्त्वं कार्याभावरूपे हेतुरुक्तः । अचिन्त्यनिमित्ता यथा–

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः, ।
हरतापि तनुं यस्य शम्भुना न हृतं बलम् ॥

अत्र तनुहरणेपि बलाहरणस्य हेतुर्विशिष्य वक्तुं न शक्यत इत्य-ऽचिन्त्यनिमित्तेयम् ॥ ऽ ॥ (इति विशेषोक्तिः २०)

यथासङ्ख्यं, क्रमेणैव क्रमिकाणां समन्वयः ॥ १०८ ॥

यथा–

एकस्त्रिधा वससि चेतसि चित्रमत्र
देव! द्विषां च, विदुषां च, मृगीदृशां च, ।
तापं च, संमदरसं[ग] च, रतिं च, पुष्णन्[घ]
शौर्योष्मणा च, विनयेन च, लीलया च, ॥

॥ १०८ ॥ (इति यथासङ्ख्यम् २१)

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्त, सो ऽर्थान्तरन्यासः, साधर्म्येणेतरेण वा ॥ १०९ ॥

सामान्यं यद्विशेषेण समर्थ्यते, विशेषो वा सामान्येन, सोऽर्थान्तरन्यासः द्वयोरपि प्रत्येकं समर्थनहेतू साधर्म्यवैधर्म्ये चेति चतुःप्रकारो ऽय-मित्यर्थः· तत्र विशेषेण सामान्यसमर्थनं साधर्म्येण यथा–

(क) कर्पूरमिति पु· ।
(ख) ०द्यतिशयितत्वादिति पु· ।
(ग) संमदभरमिति पा· ।
(घ) पुष्णन्शौर्येत्येव सर्वत्र पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम्, ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥

सामान्येन विशेषसमर्थनं साधर्म्येण यथा—"सुश्लिष्टवसने"त्यादि । विशेषेण सामान्यसमर्थनं वैधर्म्येण यथा—

गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते, ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गडिः(क) ॥

अत्र 'धुर्य' इत्यादिसाधारण्यात्सामान्यं 'गौर्गडि'रिति विशेषः· वैधर्म्यं च स्फुटम् । वैधर्म्येण विशेषस्य सामान्येन समर्थनं यथा—

अहो हि मे बह्वऽपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम्, ।
त एव धन्याः सुहृदां(ख)पराभवं जगत्य ऽदृष्ट्वैव हि ये क्षयं गताः ॥

सामान्यविशेषभाव उपपादनीयः ॥ १०९ ॥ (इत्यर्थान्तरन्यासः २२)

विरोधः सो, ऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।

वस्तुगत्या विरोधाभावेऽपि यद् द्वयोर्विरुद्धयोरिवाभिधानं, स विरोधः ॥ ऽ ॥

एनं विभजते—

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्या, द्गुणस्त्रिभिः, ॥ ११० ॥
क्रिया द्वाभ्या,मथ द्रव्यं द्रव्येणैवेति ते दश ।

जात्याद्यैरिति, जातिगुणक्रियाद्रव्यैः· त्रिभिरिति, गुणक्रियाद्रव्यैः· द्वाभ्यामिति, क्रियाद्रव्याभ्याम्· यद्यपि, गुणानामपि जात्या विरोधः सम्भवत्येव, तथापि, जातेर्गुणविरोध एव प्रविष्टत्वा'द्गुणास्त्रिभि'रित्युक्तम्· एवं 'क्रिया द्वाभ्या'मित्यपि द्रष्टव्यम्· तदयमर्थः—जातिनिरूपितो भेदश्चतुर्द्धा, गुणनिरूपितस्तु पूर्वभेदभिन्नस्त्रिधा· एवमग्रेऽपि· तत्र जात्या जातेर्विरोधो यथा—(ग)

(क) गलिरिति पा० एवं व्याख्याने ऽपि द्रष्टव्यम् ।
(ख) सुहृद इति पा· ।
(ग) तत्र जात्या जातेर्यथेति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिनवनलिनीकिसलय(क)मृणालवलयादिदवदहनराशिः ।
सुभग! कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोग-पवि-पाते ॥

अत्र नलिनीत्वकिसलयत्वादिजातीनां दहनत्वजात्या विरोधः वियोगातिशयेन गौणत्वात्तदाभासता एवमग्रेऽप्यूह्यम् । जातेर्गुणेन यथा–

गिरयोऽप्यनुन्नतियुजो, मरुदप्यचलो, ऽब्धयो ऽप्यगम्भीराः, ।
विश्वम्भराप्यतिलघु,र्नरनाथ! तवान्तिके नियतम् ॥

अत्र गिरित्वादिजातीनामनुन्नतत्वादिगुणैर्विरोधः वर्णनीयातिशयविवक्षया तु परिहारः (ख) विश्वम्भरेति तु न जात्युदाहरणम् । जातेः क्रियया यथा–

येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च, ।
तेषां सङ्गरसङ्गसक्तमनसां(ग) राज्ञां त्वया भूपते!
पांसूनां (घ) पटलैः प्रसाधनविधिर्निर्वर्त्यते, (ङ) कौतुकम् ॥

अत्र धाराधरत्वजातेरनुरागस्नेहपराप्तिक्रियाभ्यां (च) विरोधः लौहित्यचैक्कण्यार्थकत्वादविरोधः एवमग्रेऽप्यविरोध ऊह्यः तीक्ष्णत्वस्यानुरागेण विरोध इत्यपव्याख्यानम्, अनुदाहरणत्वप्रसङ्गात् । जातेर्द्रव्येण यथा–

सृजति च जगदिद,मवति च, संहरति च हेलयैव यो नियतम्, ।
अवसरवशतः शफरो जनार्द्दनः सोऽपि, चित्रमिदम् ॥

अत्र शफरत्वजातेर्जनार्दनेन द्रव्येण विरोधः । गुणस्य गुणेन यथा–

सततं मुसलासक्ता(छ) बहुतरगृहकर्मघटनया नृपते! ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥

(क) किशलयेति पु० ।
(ख) परीहार इति पु० ।
(ग) सङ्गरसङ्गसक्तेति प्रायिकः पाठः ।
(घ) पांशूनामिति पु० ।
(ङ) निवर्त्तत इति पु० ।
(च) स्नेहपरिक्रियाभ्यामित्येकस्यस्त्वनर्हः पाठः ।
(छ) मुशलासक्ता इति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कठिनत्वसुकुमारत्वयोर्विरोधः। गुणस्य क्रियया यथा—

पेलवमपि खलवचनं दहतितरां मानसं सतत्त्व(क)विदाम्,।
परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति॥

अत्र पेलवपरुषत्वयोर्गुणयोर्दाहप्रमोदक्रियाभ्यां विरोधः। यथा वा मद्भ्रातुः श्रीहर्षस्य—

सर्वतः पुरत एव दृश्यते, पात्रतां न पुनरेति चक्षुषोः,।
हृद्गतो ऽपि भुजयोर्न भाजनं, को ऽयमालि! वनमालिनः क्रमः॥

अत्र दर्शनगमनक्रिययोर्गमनाभावभुजभाजनत्वाभावाभ्याम्· उक्तत्रयातिरिक्तस्यैव गुणशब्देन विवक्षणात्· गिरय इत्यादि तथैवोदाहृतम्। गुणस्य द्रव्येण यथा—

क्रौञ्चाद्रिरुद्दामदृषद्दृढो ऽसौ यन्मार्गणानर्गलशातपाते।
अभूत्नवाम्भोजदलाभिजातः, स भार्गवः सत्यमपूर्वसर्गः॥

अत्राम्भोजदलाभिजातत्वस्य गुणस्य क्रौञ्चादिना द्रव्येण विरोधः। क्रियायाः क्रियया यथा—

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं (ख) यो न गतवान्।
विवेकप्रध्वंसादुपचितमहामोहगहनो (ग)
विकारः कोऽप्यन्तर्जड़यति च तापं च तनुते (घ)॥

अत्र जड़यति च तापञ्च तनुत इतिक्रिययोर्विरोधः। क्रियाया द्रव्येण यथा—

अयं वारामेको निलय इति रत्नाकर इति
श्रितो ऽस्माभिस्तृष्णाकवलितमनोभिर्जलनिधिः,।
इदं को जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः॥

(क) सुतत्त्वेति पु०।
(ख) पदमिति केचित्।
(ग) महामोहंमहिमेति क्वचित्।
(घ) कुरुत इति पु०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र पानक्रियाया कर्मभूतेनजलनिधिना विरोधः· यद्यपि जलनिधीनां बहुत्वेन न विरोधोदाहरणत्वमुचितं, तथाप्येकलवणाम्बुधिपरतया समर्थनीयम् । द्रव्यस्य द्रव्येण यथा–

समदमतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक! त्वयि तटजुषि शङ्करचूडापगाऽपि कालिन्दी ॥

अत्र गङ्गायमुनयोर्विरोधः ॥ ११० ॥ ऽ ॥ (इति विरोधः २३)

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥ १११ ॥

स्वत्वं च स्वमात्राश्रितत्वं, नतु स्वाश्रितत्वामात्रम्· अतो न साधारणधर्मवर्णने ऽतिव्याप्तिः· रूपशब्देन वर्णः संस्थानं चोच्यते· उदाहरणं–

पश्चादङ्घ्री प्रसार्य, त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै,-
रासज्याभुग्नकण्ठो मुखमुरसि, सटां धूलिधूम्रां विधूय, ।
घासग्रासाभिलाषादनवरनचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥

अत्राश्वमात्रगतयोः क्रियासंस्थानयोर्वर्णनम् ॥ (इति स्वभावोक्तिः २४)

व्याजस्तुति,र्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।

मुखे निन्दावगतौ यत् स्तुतौ पर्यवसान, स्तुतेर्वा मुखे ऽवगमो निन्दायां पर्यवसानं, तद्व्याजस्तुतिवाच्यमित्यर्थः·(क) कथमुभयोरनेनाभिधानमिति चेत्, आद्यस्य व्याजेन स्तुतिरिति ग्रहाण,(ख) अन्त्यस्य तु व्याजरूपा स्तुतिरिति· तत्राद्या यथा–

हित्वा त्वामुपरोधबन्ध्य(ग)मनसां मन्ये न मौलिः परो,
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते, ।
यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः,
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥

(क) ०'व्याजस्तुतिवाच्यमित्यर्थ" इत्येव सर्वत्र पठ्यते ।
(ख) ०रितिग्रहणादिति पु· ।
(ग) ०ग्रून्यंति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्पष्टम् । अन्त्या यथा—

हे हेलाजितबोधिसत्त्व! वचसां किं विस्तरै,स्तोयधे!
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः, ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धाऽयशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥

अत्रोपकारवैमुख्ये पर्यवसानम् ॥ ऽ ॥ (इति व्याजस्तुतिः २५)

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥ ११२ ॥

शब्दशक्त्यैकार्थाभिधायकं पदं यत्सहार्थान्वयबलादनेकार्थाभिधायकं, सा सहोक्तिः· चैत्रमैत्रौ गच्छत इत्यादौ तु शब्दशक्त्यैवोभयाभिधानाम् यथा—

सह दिअहणिसाहिं दीहरा सासदंडा,
सह मणिवलएहिं बाहधारा गलंति, ।
तुअ सुहअ! विओए तीअ उव्वेअणीए
सह अ तणुलदाए दुब्बला जीविदासा ॥

अत्र दीर्घत्वादीनां श्वासादिभिरन्वयः साक्षादेव शाब्दः, दिवसादिभिस्तु सहान्वयात् ॥ ११२ ॥ (इति सहोक्तिः २६)

विनोक्तिः सा, विना येन यत्रान्यः सन्न नेतरः ।

सन् शोभनोन, नेतरो नाशोभन इत्यर्थः तेन, यत्(क) केनचिद्विना कस्यचिदशोभनत्वं शोभनत्वं वा प्रतिपाद्यते, सा विनोक्तिः· तत्राशोभनत्वं यथा—

अर्शार्चर्निशया विना शशी, शशिना सापि विना महत्तमः, ।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः ॥

शोभनत्वं यथा—

मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः ।
अमृतद्युतिसुन्दराशयो ऽयं सुहृदानेन(ख) विना नरेन्द्रसूनुः ॥

(क) यदित्यन्यत्र न ।
(ख) सुहृदा तेनेति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र मृगलोचनया दुष्टसुहृद्विशेषं च विना नरेन्द्रसूनोर्विचित्रव्यवहारप्रगल्भत्वचन्द्रसुन्दराशयत्वरूपं शोभनत्वमुक्तम् ॥ ५ ॥

(इति विनोक्तिः २७)

परिवृत्ति,र्विनिमयो यो ऽर्थानां स्यात्समासमैः ॥ ११३ ॥

परिवृत्तिरिति लक्ष्यालङ्कारनिर्देशः, पूर्वाचार्याणां तथैवोद्देशदर्शनात्· अतो न लक्ष्यलक्षणसन्देहः· समासमैरिति विभागः· विनिमयो हि केन चिद्वस्तुना दत्तेन केनचिदादानम्· तच्च क्वचित्समेन समस्य, क्वचिदसमेनासमस्य· अन्त्यमपि द्विधा,क्वचिच्चूनेनोत्तमस्य, क्वचिदुत्तमेन न्यूनस्येति त्रिविधोऽयमित्यर्थः· समासमत्वं चोपादेयत्वानुपादेयत्वाभ्याम्· तत्राऽऽद्यद्वयं यथा–

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्त्वा श्रयति भृशमामोदमऽसमम्, ।
लता[क]स्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥

अत्र प्रथमार्द्धे लास्येनोपादेयतया समस्यामोदस्य, द्वितीयार्द्धे उपादेयतयोत्तमया दृशा ऽऽधिव्याधीना[ख]मतादृशतया न्यूनानां विनिमयः ।

अन्त्या यथा–

नानाविधप्रहरणैर्नृप ! संप्रहारे स्वीकृत्य दारुणनिनादवतः प्रहारान् ।
दृप्तारिवीरविसरेण वसुन्धरेयं निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ॥
अत्रोत्तमया वसुन्धरया न्यूनानां प्रहाराणां विनिमयः ॥ ११३ ॥

(इति परिवृत्तिः २८)

प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।
तद्भाविकम्–

भूतभाविन इति द्वन्द्वो, न कर्मधारय इत्यविरोधः· भूता भाविनो भावा यत्प्रत्यक्षा इव क्रियन्ते प्रत्यक्षतया ऽभिधीयन्ते, तद्भाविकम्, भावः

(क) इमा इति पा· ।
(ख) दृशा व्याधीनामिति पु·, नतु क्वाप्या'ऽऽधिव्याध्यादीना'मित्यास्ते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कवेरभिप्रायो निश्चयादिप्रतीतिविषयको ऽत्रास्तीतिव्युत्पत्तेरित्यर्थः. उदाहरणम्—

आसीदञ्जनमत्रेति पश्यामि तव लोचने,
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥

अत्र पूर्वार्द्धे भूतस्याञ्जनस्यो,त्तरार्द्धे भाविनो भूषणसम्भारस्य प्रत्यक्षतयाभिधानम् ॥ ऽ ॥—॥ (इति भाविकम् २९)

—काव्यलिङ्गं, हेतोर्वाक्यपदार्थता ॥ ११४ ॥

अत्र विवक्षितविवेकेन हेतुवचनं काव्यलिङ्गमिति लक्षणं, वाक्यपदार्थतेति विभागः. वाक्यार्थता पदार्थता वेत्यर्थः. तत्र वाक्यार्थता यथा—

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे! न प्रायः क्वचिदपि भवन्तं प्रणतवान्, ।
नमन्मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिभाङ्,[क]
महेश! क्षन्तव्यं तदिदमपराधद्वयमपि[ख] ॥

अत्र 'पुरा क्वचिदपि नाहं प्रणतवान्, अग्रेप्यहमनतिभा'गित्यवान्तरवाक्ययोरर्थो ऽनमनमपराधे हेतुः । अनेकपदार्थता यथा—

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्, ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्य ऽकाण्डयमदण्ड इवैष भुजः ॥

अत्र शस्त्रोपक्षेपो भुजपाते हेतुः. नचायं वाक्यार्थः, 'शस्त्रमुपक्षिपत' एतावन्मात्रस्यावाक्यत्वात्.[ग] 'तत्र वपुषि वधाय शस्त्रमुपक्षिपत' इत्यस्यापि न वाक्यत्वं, विशेषणत्वादिति तदर्थस्यापि हेतुत्वे न वाक्यार्थस्य हेतुत्वमिति । एकपदार्थता यथा—

(क) ०प्यनतिमानिति पा. ।
(ख) ०द्वयमिहेति पा.
(ग) एतावन्मात्रस्याऽवाक्यार्थत्वादिति पुस्तकद्वये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भस्मोद्धूलन! भद्रमस्तु भवते, रुद्राक्षमाले! शुभं,
हा सोपानपरम्परे! गिरिसुताकान्तालयालंकृते[क] ।
अद्याराधन[ख]तोषितेन विभुना युष्मत्सपर्यासुखा-
ऽऽलोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे [ग] ॥

अत्र महामोहत्वे सुखालोकोच्छेदिता हेतुः· तच्च समासादेक-पदार्थ एव· अर्थान्तरन्यासे तटस्थतयोपनिबद्धस्य हेतुत्वे पर्यवसानम्· इह तु साक्षादेव हेतुविभक्त्यादिना हेतुतयोपनिबद्ध इति ततो भेदः ॥ ११४ ॥
(इति काव्यलिङ्गम् ३०)

पर्यायोक्तं, विना वाच्यवाचकत्वेन यद्वचः ।

वाच्यवाचकभावव्यतिरेकेणावगमनव्यापारेणार्थाद्वाच्यस्यैव यदभिधानं, तत्पर्यायोक्तम्, पर्यायेण भङ्ग्यन्तरेणाभिधानात्· ध्वनेस्तु न वाच्य एवार्थो विषय इति ततो भेदः· उदाहरणम्—

यं प्रेक्ष्य चिररूढाऽपि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे, मानेन हृदये हरेः ॥

अत्रैक एवार्थ 'ऐरावतशक्रौ मदमानविमुक्तौ जातावि'ति व्यञ्जनया, 'मदमानाभ्यां तयोरधिकरणयोर्निवासप्रीतिरुज्झिते'त्यभिधया च प्रतिपाद्यते, तेन च यदेवोच्यते तदेव व्यङ्ग्यम्· नच प्रतिपन्नस्यैव प्रतिपत्तिरफलेति किं व्यापारद्वयेनेति वाच्यम्, यतो, यथा व्यङ्ग्यं, तथा नोच्यते, प्रकारयोर्भेदात्· एकरूप एव वस्तुनि प्रकारभेद एव कथं स्यादिति चेत्, यथा, शुक्ले गवि चलति निर्विकल्पकसविकल्पकयोः· एक एव ह्यर्थस्ताभ्यां विषयीक्रियते, न पुनर्यथा निर्विकल्पकविषय,स्तथैव सविकल्पकेनापि विषयीक्रियते, भिन्नत्वसंसृष्टत्वाविषयकं निर्विकल्पकं, भिन्नत्वसंसृष्टत्वप्रकारकं तु सविकल्पकमिति ॥ ऽ ॥ (इति पर्यायोक्तम् ३१)

उदात्तं वस्तुनः संपत्—

(क) हा सोपानपरम्परां गिरिसुताकान्तालयालङ्कृतिमिति पा· ।
(ख) अद्याराधनेति पा· ।
(ग) निलीयामह इति क्वाचित्कस्तु नार्हः पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संपत् समृद्धियोगो, न तु तस्यैवातिशयः· उदाहरणम्–

मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः ।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुका
यद्विद्वद्भवनेषु, भोजनृपतेस्तत्त्याग(क)लीलायितम् ॥

अत्र विद्वद्भवनस्य मुक्तादिधनसमृद्धियोगः ॥–॥

–महतां चोपलक्षणम् ॥ ११५ ॥

महतां यदुपलक्षणमङ्गभावो ऽर्थाद्वर्णनीये, तदप्युदात्तमित्यर्थः· उदाहरणम्–

तदिदमरण्यं, यस्मिन् दशरथवचनानुपालनव्यसनी ।
निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः ॥

अत्रैतादृशो महान् रामो दण्डकाया वर्णनीयाया अङ्गम्· नन्वत्र(ख) रामगत उत्साहातिशय एव चमत्कारनिदानम्, तस्य प्रधानत्वाद्विच्छित्त्यन्तराभावाच्च किंविषयोयमलङ्कारव्यपदेश इति वाच्यं, नह्यत्र वीरो रसः प्रधानं, तस्येहाङ्गत्वात् ॥ ११५ ॥ (इत्युदात्तम् ३२)

तत्सिद्धिहेतावेकस्मिन्यत्रान्यत्तत्करं भवेत्, ।
समुच्चयो ऽसौ–

तत्सिद्धिहेतौ तस्य प्रस्तुतस्य कार्यस्य साधके· समाधाव ऽतुल्यकक्षयोः कारणयोरुपादान,मत्र तुल्यकक्षयोरिति विशेषः· उदाहरणम्–

दुर्वाराः स्मरमार्गणाः, प्रियतमो दूरे, मनोऽप्युत्सुकं,
गाढं प्रेम, नवं वयो, ऽतिकठिनाः प्राणाः, कुलं निर्मलम्, ।
स्त्रीत्वं धैर्यविरोधि, मन्मथसुहृत्कालः, कृतान्तोऽक्षमी,(ग)
नो सख्यश्चतुराः, कथं नु विरहः सोढव्य इत्थं शठः ॥

(क) ०स्तद्दानेति पा· ।
(ख) नन्वत्रेति पु· ।
(ग) ०"ऽक्षमो"–इति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र स्मरमार्गणा एव विरहासहत्वं कुर्वन्ति, ततोऽधिकं प्रियजन-दूरस्थित्याद्युपात्तम्· एवं एवोक्तलक्षणः समुच्चयः सद्योगे, ऽसद्योगे, सद-सद्योगे च पर्यवस्यतीति यत् केनचित्ते पृथगुल्लक्षिता, स्तदयुक्तम्· तथाहि,

कुलममलिनं, भद्रा मूर्त्ति,र्मतिः श्रुत[क]शालिनी,
भुजबलमऽलं, स्फीता लक्ष्मीः, प्रभुत्वमखण्डितम्, ।
प्रकृतिसुभगा ह्येते भावा, अमीभिरयं जनो
व्रजति सुतरां दर्पं, राजँस्त एव तवाङ्कुशाः ॥

अत्र कुलादीनां समीचीनानामेव योगः· 'दुर्वारा'' इत्याद्युक्तोदा-हरणे स्मरमार्गणादीनामसमीचीनानाम्·

शशी दिवसधूसरो, गलितयौवना कामिनी,
सरो विगतवारिजं, मुखमनक्षरं स्वाकृतेः, ।
प्रभुर्धनपरायणः, सततदुर्गतः सज्जनो,
नृपाङ्गणगतः खलो, मनसि सप्त शल्यानि मे ॥

अत्र सदसतोर्योगः, दुर्जनस्याऽसत्त्वा, च्छश्यादीनां सत्त्वात्· एतच्चि-न्त्यम्· पूर्वं दूरस्थित्यादिविशेषणेन, धूसरत्वादिनात्राप्यसम्यत्त्वमिति ॥ ऽ–॥

समुच्चयान्तरमाह–

–स त्व ऽन्यो युगपद्या गुणक्रियाः ॥ ११६ ॥

अत्र गुणाः क्रियाश्चेतिविग्रहे संख्याविशेषस्याविवक्षणाद्, विशेषविवक्षाविरहेण च सजातीयवद्विजातीयस्यापि यौगपद्यस्य लाभाद् गुणौ च क्रिये च गुणक्रिये च[ख]युगपद्भवतः, स त्रिरूपः समुच्चयः· तत्र गुणयोर्यौगपद्यं यथा–

विदलितसकलारिकुलं[ग] तव बलमिदमभवदाशु विमलं च, ।
प्रखलमुखानि नराधिप! मलिनानि च तानि जातानि ॥

(क) श्रुतीति पा· ।
(ख) गुणक्रिये चेत्येकत्र नास्ति, तदयुक्तम्, उदाहरणविरोधात् ।
(ग) विदलितसकलारिकुलमित्यत्र यदेकत्र पुस्तके शोधयित्रा त्रुटिपूरणमुद्रया 'विदलितहृदयं सकलारिकुल'मित्यकल्पि, तत्किमितीति न तस्य प्रयोजनं जानीमः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र विमलत्वमलिनत्वयोः । क्रिययोर्यथा—

अयमेकपदे तया वियोगः प्रियया चोपनतः[क] सुदुःसहो मे, ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥

अत्रो'पनतो'[ख] 'भवितव्यं चे'ति क्रिययोः । गुणक्रिययोर्यथा—

कलुषं च तवाहितेष्वऽकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः, ।
पतितं च महीपतीन्द्र! तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥

अत्र कलुषत्वपतनयोर्गुणक्रिययोः॰ अत्र कश्चित्, वैयधिकरण्ये एव समुच्चय इत्याह, तन्न युक्तं, "धुनोति चासिं तनुते च कीर्त्ति"मित्यादौ सामानाधिकरण्येपि दर्शनात्॰[ग] केचित्तु—सामानाधिकरण्य एवायमित्याहुः॰ तदपि न सम्यक् "कृपाणपाणिश्च भवान्रणक्षितौ, ससाधुवादाश्च सुराः सुरालय" इत्यादौ वैयधिकरण्येपि तद्दर्शनात्॰ ॥ ११६ ॥

(इति समुच्चयः ३३)

एकं क्रमेणा ऽनेकस्मिन्पर्यायः—

एकत्वेन विवक्षितं वस्तु यत्र क्रमेणानेकस्मिन् भवति क्रियते वा, स एकपर्यायः॰ अत्र क्रमेणेति समुच्चयव्यावर्त्तनाय॰ प्रयोजकानिर्द्दिशतन्निर्देशौ भवतिकरोत्यर्थौ नतु स्वाभाविकत्वास्वाभाविकत्वे,वृषलक्ष्मणः कण्ठकालकूटवासस्यास्वाभाविकत्वेन भवतीत्यत्रानुदाहरणत्त्वापत्तेः॰ तत्राद्यो यथा—

नन्वाश्रयस्थितिरियं तव कालकूट!
केनोत्तरोत्तरविशिष्टपदोपदिष्टा, ।
प्रागर्णवस्य हृदये, वृषलक्ष्मणो ऽथ कण्ठे
ऽधुना वससि वाचि पुनः खलानाम् ॥

अत्र कालकूटस्य वस्तुन एकस्या ऽनेकत्रवास[घ]प्रयोजकं किञ्चिदपि नोक्तम्॰ न केवलमयं वास्तविक एकत्वे, किन्त्वारोपितेऽपि, यथा—

(क) चोपगत इति पु॰ ।
(ख) पूर्ववदुपगत इत्येकत्रात्रापि ।
(ग) ०ण्ये च तद्दर्शनादिति, ०ण्ये तद्दर्शनादिति च पा॰ ।
(घ) वासे—इति व्यासः क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बिम्बोष्ठ एव रागस्ते तन्वि! पूर्वमदृश्यत,(क) ।
अधुना हृदयेप्येष मृगशावाक्षि! लक्ष्यते(ख) ॥

अत्र प्रयोजकानिर्देशः स्फुट एव· रागपदार्थस्य त्वोष्ठे लौहित्यात्मकतया, हृदये तु स्नेहाद्यात्मकत्वेन भेदेप्येकत्वस्याध्यवसानान्नैकत्वविवक्षाविरोधः ।

श्रोणीबन्धस्त्यजति तनुतां, सवते मध्यभागः.
पद्भ्यां मुक्तास्तरलगतयः, संश्रिता लोचनाभ्याम्. ।
धत्ते वक्षः कुचसचिवता.मद्वितीयन्त्वमास्यं.
त(ग)द्गात्राणां गुणविनिमयः कल्पितो यौवनेन ॥

द्वितीयो यथा—

तत्ताणं सिरिसहोअररअणाहरणम्मि हिअअमेक्करसं ।
बिंबाहरे पिआए णिवेसिअं कुसुमबाणेण ॥

अत्र 'कुसुमबाणेणे'ति प्रयोजकनिर्देशः ॥–॥

—अन्यस्ततोऽन्यथा ।

अनेकमेकस्मिन् क्रमेण यद्भवति क्रियते वा, सो ऽन्यपर्याय इत्यर्थः ॥ पूर्ववद्व्याख्येयम्· तत्र भवत्यर्थे यथा—

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति, ।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं· विषं तदेव ॥

अत्रैकस्मिन् खलवचसि क्रमेणामृतव्यञ्जने विषकथने च न प्रयोजकनिर्देशः । करोत्यर्थे यथा—

तद्गेहं नतभत्ति, मन्दिरमिदं· लब्धावकाशं दिवः,
सा धेनुर्जरती, नदन्ति करिणामेता घनाभा घटाः, ।
स क्षुद्रो मुसल(घ)ध्वनिः, कलमिदं सङ्गीतकं योषिता,-
माश्चर्य्यं दिवसैर्द्विजो ऽयमियतीं भूमिं(ङ) समारोपितः ॥

(क) ०मलक्ष्यतेति पा· ।
(ख) दृश्यत इति पा· ।
(ग) त्वदिति क्वचित् ।
(घ) मुशलेति पा· ।
(ङ) भूतिमिति तु क्वाचित्को नातिहृद्यः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रैकस्मिन्द्विजे तद्गेहतन्मन्दिराद्यैरनेकैः 'दिवसै'रिति प्रयोजकनिर्देशः· नचेयं परिवृत्तिः, हानोपादानयोरनिर्वाचितत्वात्·
॥ ११६ ऽ ॥ (इति पर्यायः ३४)

अनुमानं, तदुक्तं यत् साध्यसाधनयोर्वचः ॥ ११७ ॥

पक्षे सम्बन्धः, सपक्षवृत्तित्वं, विपक्षावृत्तित्वं चेति रूपत्रयवान् हेतुः साधनं व्यापकत्वाभिमतस्याऽयोगव्यवच्छेदो व्यापकसम्बन्धपर्यवसन्नः साध्यम्· तदुभयवचनमनुमानालङ्कारः· यथा—

यत्रैता लहरी लोचलदृशो व्यापारयन्ति भ्रुवं,(क)
यत्तत्रैव पतन्ति सन्ततममी मर्मस्पृशो मार्गणाः, ।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदा ऽऽसां स्मरः ॥

अत्र पूर्वार्द्धं साधनस्यो,त्तरार्द्धं साध्यस्य वचनम्· प्रयोगश्चैवम्, एताश्चक्रीकृतचापसदापुरोधावदञ्चितशरत्वादिविशिष्टमनोभवाः, सन्ततनिपतन्मर्मभेदिबाणक-लसद्भ्रूव्यापारकस्थानत्वादिति· नन्वत्र पूर्वं साधनात्साध्यस्यापि वचनं सम्भवति, यथा "मधु तिष्ठति वाचि योषिता"· मित्यादि· तत्कथं सामान्यतस्तदुक्तं, नतु विशेषत इति चेत्, साध्यस्य पूर्वभागे तादृशवैचित्र्याभावादिति ॥ ११७ ॥ (इत्य ऽनुमानम् ३५)

विशेषणैर्यत्साकूतैरुक्तिः, परिकरस्तु सः ।

साकूतैः, साभिप्रायैः· उक्ति,रर्थाद् विशेष्यस्य· उदाहरणम्—

महौजसो, मानधना, धनार्चिता, धनुर्भृतः, संयति लब्धकीर्त्तयः, ।
नसंहता,स्तस्य, नभेदवृत्तयः,(ख)प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥

अत्र महौजस्त्वादिविशेषणानि परानभिभवनीयत्वाद्यभिप्रायकाणि· नच वाच्य,मऽपुष्टार्थत्वस्य दोषत्वाभिधानादर्थसिद्धं पुष्टार्थत्वमिति दोषाभावमात्रतया कुतो ऽलङ्कारमध्ये पठितोऽयमिति, एकनिष्ठत्वेन बहूनां

(क) भुवाविति क्वचित् ।
(ख) नभिन्नवृत्तय इति पा· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेषणानामुक्तोदाहरणवदुपादाने वैचित्र्यमपि ह्यनुभवसिद्धं, न तु दोषाभाववत्त्व(क)मात्रमिति सम्प्रदायः· वयं त्वालोचयामः, तादृशैकविशेषणोपन्यासे ऽप्यलङ्कारत्वमुचितम्, अपुष्टार्थत्वविरहस्य निर्विशेषणतया ऽप्युपपत्तेरनुभवसिद्धत्वा(ख)द्वैचित्र्यस्य चानुभवसिद्धत्वात्· यथा "शुद्धे सद्मनि पल्लवित्युपवन" इत्यादौ ॥ ऽ ॥ (इति परिकरः ३६)

व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ॥ ११८ ॥

उद्भिन्नत्वमस्फुटस्य प्रकाशः· तथाच,ऽस्फुटमपि वस्तुस्वरूपं कथंचिल्लक्ष्यमथ केनापि यदपह्नूयते, सा व्याजोक्तिः· नचेयमपह्नुतिः, प्रकृताप्रकृतयोः साम्ये तत्स्वीकारात्, अत्र तु तदभावात्· नच प्रथमं गूढस्यानन्तरं प्रकाशस्यापह्नव इति सामग्रीभेदादेवापह्नवभेद इति वाच्यम्, एवंविधेपि विषये साम्यसम्भवो ऽपह्नुतेरेवो ऽपगमात्· ननु यत्रापह्नवार्थं सादृश्योपक्षेपः, सा व्याजोक्तिः, सादृश्यार्थमेव तु यत्रापह्नवोपक्षेपः, सापह्नुतिरिति चेत्, न, तत्रोभयत्राप्यपह्नुतेरेवोपगमात्· यदाहुः —

'साम्यायापह्नवो यत्र सा विज्ञेया त्वपह्नुतिः, ।
अपह्नवाय सादृश्यं यस्मिन्नेषाऽप्यपह्नुतिः ॥"

इति· उदाहरणम्—

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुला(ग)खिलविधिव्यासङ्गभङ्गाकुलः ।
आः शैत्यं (घ) तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टो ऽवतादुः शिवः ॥

अत्र पुलकवेपथू सात्त्विकैकरूपतया प्रवृत्तौ शैत्यकारणकतया प्रकाशनादपलपितस्वरूपाविति व्याजोक्तिं प्रकाशयतः· वयं तु— पुलकवेप-

---

(क) दोषाभावत्वेति पाठे बहुव्रीह्युत्तरं त्वप्रत्ययः ।
(ख) ०रनुभवसिद्धत्वाभावादित्येकस्तु विपरीतत्वाद्धेयः ।
(ग) विसंस्थुलेति तु क्वाचित्कः ।
(घ) हा शैत्यमित्येकस्यस्तु रसप्रतिकूलः सर्वथैव हेयः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुभ्यां सात्त्विकाभ्यां प्रकाशिता गूढ़ावगतिस्तयोः शैत्यकारणकताप्रकाशने-नापह्नुतेति व्याजोक्तिरियम् ॥ ११८ ॥ (इति व्याजोक्तिः ३७)

किंचित्पृष्टमपृष्टं च कथितं यत्प्रकल्पते[क] ।
तादृगन्यव्यपोहाय, परिसङ्ख्या तु सा मता[ख] ॥ ११९ ॥

तादृक्, तुल्यम्. व्यपोहाय, व्यवच्छेदाय. किंचित्कथितं सत् स्वतुल्यस्यान्यस्य व्यवच्छेदाय यत्कल्पते, सा परिसङ्ख्या मतेति लक्षणम्. अन्यस्य कथनमन्यव्यपोहाय कथं कल्पत इति चेत्, प्रमाणान्तरावगतस्यैव[ग] वस्तुनः पुनश्शब्देन प्रतिपादनस्य प्रयोजनान्तराभावात्. 'पृष्टमपृष्टं चे'ति विभागः. कथनं हि किञ्चित्प्रश्नपूर्वकं, किञ्चिच्चाऽतत्पूर्वकमिति द्वैविध्यमित्यर्थः. ते च द्वे अपि विधे व्यवच्छेद्यस्य प्रतीयमानत्ववाच्यत्वाभ्यां प्रत्येकं द्विविधे. तत्र प्रश्नपू[घ]र्वके कथने व्यवच्छेद्यस्य प्रतीयमानता यथा—

किमासेव्यं पुंसां, सविधमनवद्यं द्युसरितः.
किमेकान्ते ध्येयं, चरणयुगलं कौस्तुभभृतः. ।
किमाराध्यं, पुण्यं. किमभिलषणीयं च, करुणा.
यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति ॥

अत्रान्यनदीसविधादि व्यवच्छेद्यं प्रतीयमानम् । तत्रैव वाच्यं व्यवच्छेद्यं यथा—

किं भूषणं सुदृढमत्र, यशो, न रत्नं.
किं कार्यमार्यचरितं सुकृतं, न दोषः. ।
किं चक्षुरप्रतिहतं, धिषणा, न नेत्रं.
जानाति कस्त्वदितरः[ङ] सदसद्विवेकम् ॥

स्पष्टम् । अप्रश्नपूर्वके कथने व्यवच्छेद्यं प्रतीयमानं यथा—

कौटिल्यं कचनिचये, करचरणाधरदलेषु रागस्ते, ।
काठिन्यं कुचयुगले, तरलत्वं नयनयोर्वसति ॥

(क) प्रकल्प्यते इति पु. ।
(ख) स्मृतेति पा. ।
(ग) प्रमाणान्तरगतस्यैवेति पु. ।
(घ) प्रष्णेति पु. ।
(ङ) कस्तदितर इति पु. ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अप्रश्नपूर्वक एव कथने व्यवच्छेद्यं वाच्यं यथा—

भक्तिर्भवे,न विभवे, व्यसनं शास्त्रे, न युवतिकामास्त्रे, ।
चिन्ता यशसि, न वपुषि, प्रायः परिदृश्यते महताम् ॥

श्लेषेणाप्येष सम्भवति, यथा, "चित्रेषु वर्णसङ्कराः, खलसंयोगः शालिष्वि"त्यादि ॥ ११९ ॥ (इति परिसंख्या ३८)

यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता ।

तदा कारणमाला स्यात्—

यथोत्तरमिति वीप्सायां 'यथा'शब्दः· तेनोत्तरोत्तरं प्रतीत्यर्थः· उदाहरणम्—

जितेन्द्रियत्वं विनयस्य कारणं, गुणप्रकर्षो विनयादवाप्यते, ।
गुणप्रकर्षेण जनो ऽनुरज्यते, जनानुरागप्रभवा हि संपदः ॥

नन्वत्र कार्यकारणभावालङ्कृतिप्रपञ्चप्रसङ्गेन हेत्वलङ्कारो ऽपि लक्षणार्हः· उक्तश्चायं भटोद्भटेन "हेतुमता सह हेतोरभिधानमभेदेन हेतु''रिति· तत्किं न लक्षित इति चेत्, "आयुर्घृत"मित्यादिरूपस्यास्य वैचित्र्याभावेनालङ्कारत्वस्याभावात्· नन्वेवम्

अविरलनलिनविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्यो ऽयमेति संप्रति लोकोत्कण्ठाकरः कालः ॥—

इत्यादौ प्राचां काव्यरूपताभिधानं विरुध्यते, अलङ्काराभावादिति चेन्न, कोमलानुप्रासेनैव तत्सम्भवात्· तत् किं हेत्वलङ्कारो नास्त्येव· क एवमाह· कीदृशस्तर्ह्यसाविति चेत्, पूर्वोक्तं काव्यलिङ्गमेवेति ॥ ऽ– ॥ (इति कारणमाला ३९)

—क्रियया तु परस्परम् ॥ १२० ॥

वस्तुनोर्जनने ऽन्योन्यम्—

वस्तुनोः परस्परं जन्यजनकभावो ऽसम्भवी, तस्य तं प्रत्येव पौर्वापर्ययोर्द्वयोरसम्भवादित्यत उक्तं 'क्रियये'ति· एकक्रियाजननद्वारेणेत्यर्थः· अविशिष्टं वस्तु तावदज्ञातकल्पम्· तेन वैशिष्ट्यप्रयोजकक्रियाजनके जनक-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वोपचारः तथाच, मिथस्तादृशैकक्रियाजनकत्वमन्योन्यालङ्कार इति सारम्।

उदाहरणम्—

हंसाणं सरेहिं सिरी सारिज्जइ अह सराणं हंसेहिं, ।
अण्णोण्णं विअ एए अप्पाणं णवर गरुअन्ति ॥

अत्र शोभासारणेन सरोहंसयोर्मिथोजनकता ॥ १२०—॥

(इत्यऽन्योन्यम् ४०)

—उत्तरश्रुतिमात्रतः ।

प्रश्नस्योन्नयनं यत्र क्रियते, तत्र वा सति ॥ १२१ ॥

असकृद्यदसम्भाव्यमुत्तरं, स्यात्तदुत्तरम् ।

यत्रोत्तरश्रवणमात्रेणानुपात्तमपि प्रश्नवाक्यं परिकल्प्यते, तदेकमुत्तरम्। प्रश्ने सति लोकातिक्रान्तगोचरतया ऽसम्भाव्यं यदसकृत्प्रतिवचनं, तत्पुनरपरम्। अत्र प्रश्नोत्तरयोः सकृदुपादानं न चमत्करोतीत्यसकृदित्युक्तम्। असम्भाव्यत्वं तु चमत्कारित्वमिति मान्याः अप्रसिद्धत्वमिति वयम्। तच्च प्रमाणान्तरागोचरविषयत्वात्। अत एव प्रश्नपरिसंख्यातो भेदः। तत्र हि लोकसिद्धविषयस्योत्तरस्य प्रयोजनान्तराभावेना ऽन्यव्यपोहे तात्पर्यम्। अत्र तु निगूढविषयतया वाच्य एव तात्पर्यविश्रामः। तत्राद्यं यथा—

वाणिअअ! हत्थिदन्ता कुतो अम्हाणं वग्घकित्तीओ, ।
जाव लुलिआलअमुही घरम्मि परिसक्कए सोण्हा ॥

'हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, मूल्येन ताः प्रयच्छे'ति क्रेतृवचनमनेनोत्तरवाक्येना ऽनुमीयते। सूत्रे च प्रश्नपदं पूर्ववाक्यमात्रपरमिति प्रश्नाभावेऽप्यदोषः। यद्वा, 'हस्तिदन्तव्याघ्रकृत्तयस्तव सन्ती'ति प्रश्नवाक्यमिहोन्नेयम्। [नच वाच्य, मिदं काव्यलिङ्गमेव, उत्तरस्य प्रश्नहेतुत्वा(क)-दिति, उत्तरस्य तदनुत्पादकत्वात्।(ख) तर्हि ज्ञापकतया ऽनुमानमेवेति चेत्,

(क) प्रश्नहेतुत्वाभावादितीति पुस्तकान्तरस्थस्तु नार्हः पाठः ।
(ख) काव्यलिङ्गस्य तदात्मकत्वादित्येकत्र त्रुटिमुद्रयाऽधिकं लिखितमास्ते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एक धर्मिगतत्वेन साध्यसाधननिर्देशे हि तत्, नचात्र तथा।][क] तस्माद-लङ्कारान्तरमेवोत्तरम् । द्वितीयं यथा—

का विसमा, देव्वगई, किं दुल्लहं, जं जणो गुणग्गाही ।
किं सोक्खं, सुकलत्तं, किं दुःखं, जं खलो लोओ ॥

अत्र दैवगत्यादेर्वैषम्यादि लोकाप्रसिद्धमेव[ख] प्रकाश्यते, "किमासेव्यं पुंसां, सविधमनवद्यं द्युसरित" इत्यादिप्रश्नपरिसङ्ख्यायामन्यव्यवच्छेदे तात्पर्यं,मत्र तु वाच्य एवेति ततो भेदः ॥—१२१ ऽ ॥ (इत्युत्तरम् ४१)

कुतोऽपि लक्षितः सूक्ष्मो ऽप्यर्थो ऽन्यस्मै प्रकाश्यते ॥१२२॥
धर्मेण केनचिद्यत्र, तत्सूक्ष्मं परिचक्षते ।

कुतोपीति, आकारादिङ्गिताद्वा, सूक्ष्मस्तीक्ष्णमतिसंवेद्यः, तत्र रूपादेरन्यथात्वमाकारः, ततो यथा—

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तस्या[ग] व्यञ्जयन्ती वयस्या पाणौ[घ] स्मित्वा खड्गलेखां लिलेख ॥

अत्र कण्ठकुङ्कुमभेदलक्षणेना ऽऽकारेण लक्षितं पुरुषायितं सख्या सखीहस्ते खड्गलेखालेखनेन[ङ] वैदग्ध्यादभिव्यञ्जितम्, पुंसामेव पाणौ कृपाणस्य योग्यत्वात् । चेष्टाविशेष इङ्गितम्, तेन यथा—

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हस्तं नेत्रा[च]र्पिताकूतं लीलापद्मं निमीलितम् ॥

अत्र नेत्रोत्साहरूपेणेङ्गितेन लक्षितः कामिनः सङ्केतकालाभिलाषः कामिन्या निशासूचकेन पद्मनिमीलनेन[छ] लीलया प्रकाशितः ॥ १२२ ऽ ॥ (इति सूक्ष्मम् ४२)

(क) गौडाचारीयपुस्तके न चेत्यादिस्तथेत्यन्तः सन्दर्भो नास्ति, भाष्यन्तु तेन, "न-तत्काव्यलिङ्ग"मित्यादि प्रकाशस्य प्रतिच्छायाव्याख्यायामवश्यव्याख्येयत्वा,दन्यथा "त-स्मा"दितिनिगमनानुपपत्तेश्च ।

(ख) ०दिलोकप्रसिद्धमेवेतित्वशुद्धः सर्वथा हेयः ।

(ग) तन्व्या इति कुवलयानन्दस्थः पाठः ।

(घ) स्मित्वा पाणाविति प्रायः पठ्यते ।

(ङ) लिखनेनेति प्रायः ।

(च) हस्तनेत्रेति पा० ।

(छ) संमीलनेनेति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः ॥ १२३ ॥

परावधिरिति परः पर्यन्तभागो गद्यस्य पद्यस्य वा ऽवधिरुत्कर्षसीमा यस्य· तेन पर्यन्तभागो यत्र सर्वोत्कृष्ट इत्यर्थः, धाराधिरोहितया तत्रैवोत्कर्षविश्रान्तेः· उदाहरणम्—

राज्ये सारं वसुधा, वसुन्धरायां(क) पुरं, पुरे सौधम्, ।
सौधे तल्पं, तल्पे वराङ्गना ऽनङ्गसर्वस्वम् ॥

॥ १२३ ॥ (इति सारः ४३)

भिन्नदेशतया ऽत्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र ख्यातिः, सा स्याद ऽसङ्गतिः ॥ १२४ ॥

अत्रात्यन्तमिति देशभेदस्यैवोपकारकं, न तु पृथगपि विवक्षितार्थम्· युगपदिति स्वरूपनिर्वचनम्· तेन कार्यकारणभूतयोर्धर्मयोर्यत्र भिन्नदेशतया सम्प्रतिपादनं, सा ऽसङ्गतिः, हेतुफलयोरग्निधूमाद्योरिव प्रसिद्धायाः समानदेशत्वरूपायाः सङ्गतेः परित्यागात्· तयाप्रतिपादनं च कारणान्तरेभ्यो वैलक्षण्यात्· उदाहरणम्—

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअं, ।
दंतक्खअं कवोले वहुए वेअणा सवत्तीणं ॥

स्पष्टम्· नन्वयं विरोधालङ्कार एव· हेतुफलयोर्वैयधिकरण्यस्य विरोधरूपत्वादिति चेन्न, वैयधिकरण्यं ह्यसङ्गतिः· नच सैव विरोधः, किन्तु तद्बाधिका· वैयधिकरण्येन तयोर्विरोधप्रतिभासनात्· नन्वेवमपि प्रतीयमानो विरोध एवालङ्कारो ऽस्तु, नतु तद्बाधिका ऽसङ्गतिरपि साक्षात्· नच वाच्यं, समानाधिकरणविरोधो विरोधालङ्कारनिर्वाहको, नतु व्यधिकरणोपीति, लक्षणे सामान्यत एव विरोधस्योक्तत्वादिति, मैवम्, सामान्येनोक्तस्यापि विशेष एव पर्यवसानात्· अपवादविनिर्मुक्त एव देश उत्सर्गः प्रवर्त्तते· विरोधालङ्कारस्य चासङ्गत्यलङ्कारो ऽपवादक इति व्यधि·

(क) वसुधायामिति क्वचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारणविरोधस्यापवादाक्रान्ततया तद्भिन्नविरोधे विरोधालङ्कार इति· अत एव तथैवोदाहृतम् ॥ १२३ ॥ (इत्यऽलङ्कृतिः ४४)

समाधिः सुकरं कार्यं कारणान्तरयोगतः।

दृष्टात् कारणादऽन्येन कारणेनोपकृतः कर्ता यदऽक्लेशेन कार्यं करोति, स समाधिः, सम्यगाधिरितिव्युत्पत्तेः· उदा०—

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः।
उपकाराय दिष्ट्येद[क]मुदीर्णं घनगर्जितम् ॥

तयोस्तुल्यकक्षताविरहात् न समुच्चयालङ्कारान्तर्भावः ॥ ऽ ॥

(इति समाधिः ४५)

समं, योग्यतया योगो यदि सम्भावितः क्वचित् ॥ १२५ ॥

योऽग्यता, आनुरूप्यम्· सम्भावितः, सर्वसम्मतः, तेन, इद[ख]मनयोः समुचित[ग]मिति योऽग्यतया सम्बन्धस्य नियतविषयमध्यवसानं चे, त्तदा समं नामाऽलङ्कारः· योऽग्यता च प्रकर्षनिकर्षाभ्याम्· तत्र, प्रकर्षेण यथा—

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी,
रूपे देवोऽप्ययमनुपमो दत्तपत्रः[घ] स्मरस्य,।
जातं दैवात्सदृशमनयोः सङ्गतं य, त्तदेत-
च्छृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥

निकर्षेण यथा—

चित्रं चित्रं, बत बत महच्चित्र,मेतद्विचित्रं,
जातो दैवादुचितरचनासंविधाता विधाता,।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया,
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥

॥ १२५ ॥ (इति समम् ४६)

(क) दिष्ट्येतदिति पा०।
(ख) तेनेदमि त संहितमेव सर्वत्रास्ते।
(ग) समुचितमिति पु० न क्वचित्
(घ) दत्तपाद इति पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात्, ।
कर्त्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत्, ॥ ॥ १२६ ॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे य,त्स एष विषमो मतः ॥ १२७ ॥

द्वयोरत्यन्तविलक्षणतया यत् क्वचिद्योगो घटनां नोपैति, किन्त्वनुपपद्यमानतयैव प्रतीयते, स एको विषमः· यच्च क्वचित्कार्यमारभमाणः कर्त्ता बलवत्कारणान्तरेण विष्टभात् क्रियाफलं नाप्नोति, प्रत्युतानिष्टं विषयमासादयेत्, स द्वितीयः· यच्च क्रियोफललाभेपि कार्यकारणयोर्गुणौ क्रिये वा विरुद्धौ भवत,स्तौ तृतीयचतुर्थौ विषमौ, सर्वत्र समताया विपर्ययात्· तत्र प्रथमो यथा—

शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना, ।
अयं क्व च कुकूलाग्निदुःसहो मलयानिलः ॥

द्वितीयो यथा—

सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः, ।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥

अत्र त्राणरूपफलाभावे ऽन्येन ग्रासरूपो ऽनर्थः ।

तृतीयो यथा—

सद्यः करस्पर्शमवाप्य चित्रं रणेरणे यस्य कृपाणलेखा ।
तमाललीला शरदिन्दुपाण्डु यशस्त्रिलोका(क)भरणं प्रसूते ॥

चतुर्थो यथा—

आनन्दममन्दमिमं (ख) कुवलयदललोचने! ददासि त्वम्,
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥

(क) त्रिलोक्याभरणमिति प्रकाशस्थः पाठः ।
(ख) ०मिदमिति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रानन्ददानशरीरतापक्रिये विरुद्धे· सूत्रे विभाग उपलक्षणपरः· तेन, सम्बन्धिनोरानुरूप्याभावात्मकस्य विषमस्यान्येपि भेदास्सम्भवन्ति·(क) तत्रावयवावयविनोर्वैषम्ये यथा–

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये, ।
मदविभ्रमासकलया पपे पुनः स पुर(ख)स्त्रियैकतरयैकया दृशा ॥

एवमन्यत्राप्यूह्यम् ॥ १२६ ॥ १२७ ॥ (इति विषमः ४७)

महतो यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्य.धिकं तु तत् ॥ १२८ ॥

वर्णनीयोत्कर्षापेक्षया यन्महत्याश्रिते विषये तदपेक्षया तनुरप्याश्रयो महीयान् स्यात् महीयस्तया वर्ण्यते, महत्याश्रये विषये आधेय एव तथा वर्ण्यते, तदुभयमधिकालङ्कारः· तत्राद्यं(ग) यथा–

अहो विशालं भूपाल! भुवनत्रितयोदरम्, ।
माति मातुमशक्योपि यशोराशिर्यदत्र ते ॥

अत्राश्रयस्य भुवनत्रयस्य महत्तया वर्णनम् ।

द्वितीयं यथा–

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकास(घ)मासत, ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः ॥

अत्राधेयभूताया मुदो महीयस्त्वं विवक्षितम् ॥ १२८ ॥

(इत्यऽधिकम् ४८)

प्रतिपक्षमशक्तेन प्रतिकर्त्तुं तिरस्क्रिया ।
या तदीयस्य तत्स्तुत्यै, प्रत्यनीकं तदुच्यते ॥ १२९ ॥

अपकारिणमपि विपक्षं साक्षादपकर्त्तुमक्षमेन केनापि तदीयस्य तिरस्करणं तमेवोत्कर्षयितुं. तदुच्यते प्रत्यनीकं, प्रतिनिधितुल्यत्वात्· यथा

(क) भवन्तीति पु· ।
(ख) पुनरिति प्रायः प्राप्यते ।
(ग) तत्राद्यो–इति क्वचित् ।
(घ) सविकाशमिति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऽनीके ऽभियोज्ये ऽशक्तेन तत्प्रतिनिधिभूतः कश्चिद्विगूढमभियुज्यते, तथेहापि प्रतियोगिनि विजेये ऽशक्तेन तदन्यो विजीयत इत्यर्थः· तदीयत्वं च साक्षात्सम्बन्धेन परम्परासम्बन्धेनेति द्विविधमेतत्· तत्राद्यं यथा—

त्वं विनिर्जितमनोभवरूपः सा च सुन्दर! भवत्यऽनुरक्ता, ।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः ॥

अत्र कामिन्याः कामिनश्च साक्षादेव स्वस्वामिभावसम्बन्धः । द्वितीयं यथा—

यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुना ऽपि बाधते ॥

अत्र यत्पदार्थेन मुखस्यावयवावयविभावसम्बन्धः, तेन चन्द्रस्य सादृश्यलक्षणा इति परम्परासम्बन्धः ॥ १२९ ॥ (इति प्रत्यनीकम् ४९)

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वाऽपि, तन्मीलितमिति स्मृतम् ॥ १३० ॥

निजं, स्वाभाविकम्· लक्ष्म, निगूहनीयसाधारणचिह्नं तद्द्वारेण केनचिद्वस्तुना बलवत्तया यत्किञ्चिद्वस्तु वस्तुगत्येव तिरोधीयते, तन्मीलितालङ्कारः· तच्च द्विधा, लक्ष्मणः क्वचित्स्वाभाविकत्वात्क्वचिदागन्तुकत्वाच्चेत्यर्थः· तत्र स्वाभाविकेन लक्ष्मणा मीलितं यथा—

अपाङ्गतरले दृशौ, मधुरवक्त्रवर्णा गिरो,
विलासभरमन्थरा गतिः, रतीव कान्तं मुखम्, ।
इति स्फुरितमङ्गके मृगदृशां स्वतो लीलया,
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥

अत्र दृक्तारलताद्यऽङ्गस्य स्वाभाविकं लिङ्गं, समानं च तिरोधेयेन मदेन, तत्राप्येतदुलम्भात् । आगन्तुकेन लक्ष्मणा यथा—

ये कन्दरासु निवसन्ति सदा हिमाद्रे
स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते ।
अप्यङ्गमुत्पलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधो(क) ऽप्यभिज्ञः ॥

(क) विबुध इति गु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र कम्पपुलके अङ्गस्य लिङ्गे, हिमाद्रिकन्दरानिवाससामर्थ्याधिगतशीतरूपकारणस्यागन्तुकत्वेन तत्कार्यभूतयोस्तयोरप्यागन्तुकत्वमभयोः समानता च, तेष्वपि तयोरुपलम्भात् ॥ १३० ॥ (इति मीलितम् ५०)

स्थाप्यतेऽपोह्यते वापि यथापूर्वं परंपरम् ।

विशेषणतया यत्र वस्तु, सैकावली द्विधा ॥ १३१ ॥

स्थापनं विधि,रपोहो निषेधः· यथापूर्वमिति वीप्सायामव्ययीभावः· तेन पूर्वंपूर्वं वस्तु(क) प्रत्युत्तरस्य वस्तुनो यत्र विशेषणतया बाहुल्येन विधि,र्यत्र वा तथा निषेधः, सा द्विधैकावली· विशेषणतया विधिरित्यस्य विधेर्विशेषणत्व(ख)मित्यर्थः· एवं विशेषणतया निषेधोऽपि· कश्चित्तु 'पूर्वकालविशेषणतया स्थितं वस्तु परं विशेष्यं कृत्वा यत्र स्थाप्यतेऽपोह्यते वा, सैकावलीति सूत्रार्थ' इत्याह· तत्तु "पूर्वं प्रति यथोत्तरस्य वस्तुन" इत्यादिप्रकाशविरुद्धम्· तत्र विधौ यथा–

पुराणि यस्यां सवराङ्गनानि, वराङ्गना रूपपुरस्कृताङ्गः, ।
रूपं समुन्मीलितसद्विलास,मस्त्रं विलासाः कुसुमायुधस्य ॥

अत्र पुराणामङ्गना,स्तासामङ्गविशेषणक्रियामुखेन रूपं, तस्य विलासा,स्तेषामस्त्रत्वमिति क्रमेण विशेषणतया विधिः । निषेधे यथा–

न तज्जलं, यत्र सुचारुपङ्कजं. न पङ्कजं त,द्यदलीनषट्पदम् ।
न षट्पदोऽसौ, न जुगुञ्ज यः कलं. न गुञ्जितं त,न्न जहार यन्मनः ॥

अत्र जले पङ्कजस्य, तत्र षट्पदानां, तत्र गुञ्जितस्य, तत्रापि मनोहारिताया विशेषणतया निषेधः ॥ १३१ ॥ (इति मीलितम् ५१)

यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः, ।

स्मरणम्–

अत्रार्थस्मृतिः स्मरणालङ्कार इति लक्षणम्· यथानुभवमिति स्मृत्याकारप्रदर्शनम्· दृष्टे तत्सदृश इति तद्धेतुसंस्कारोद्बोधनिर्देशोऽदृष्टादेर·

(क) पूर्वपूर्वमिति पु· ।
(ख) विशेषणमिति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्युपलक्षणम्· यद्वा, अन्यादृशस्मृतेर्विच्छित्त्यभावेनालङ्कारत्वाभावव्यवच्छेदकतया लक्षणान्तर्गतमेवैतत्· तदयं वाक्यार्थः—केनचिदाकारेण नियतो यदाकदाचित्प्रमाणेनानुभूतः स कालान्तरे संस्कारोद्बोधहेतौ तत्समानधर्मदर्शने सति यदनुभूतेन प्रकारेण स्मर्यते, तत् स्मरणालङ्कारः· स द्विधा, एतज्जन्मनि जन्मान्तरे वा ऽनुभूतस्य स्मृतेः·[क]क्रमेणोदाहरणम्—

निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः, ।
तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम्[ख] ॥
करजुअगहिअजसोदात्थणमुहविणिवेसिदाहरउडस्स ।
संभरिअ[ग]पंचजण्णस्स णमह कण्हस्स रोमंचं ॥

॥ स्पष्टम् ॥ ऽ—॥ (इति स्मरणम् ५२)

—भ्रान्तिमान, ऽन्यसंवित्तत्तुल्यदर्शने ॥ १३२ ॥

अत्राप्यन्यसंवि[घ]दिति लक्षणम्· तत्तुल्यदर्शनइति हेतुनिर्देशः· अन्येतिपदार्थम्परामृशता तदित्यनेना[ङ]प्राकरणिकं निर्दिश्यते· तथाच, तेन तुल्यमर्थादिह प्राकरणिकं लभ्यते[च]. तेन, प्राकरणिकस्याऽप्राकरणिकतुल्यस्य दर्शने सति यदप्राकरणिकत्वेन ज्ञानं, स भ्रान्तिमानित्यर्थः· नच रूपके निगीर्याध्यवसानरूपायामतिशयोक्तौ वातिव्याप्तिः· तत्र वस्तुतो भ्रमाभावेऽप्यध्यवसानमात्रस्वीकारात्· इह त्वर्थानुगमेन संज्ञानवृत्तेर्भ्रमोपगमस्य स्पष्टमेवोपगमात्· उदा०—

कपाले मार्जारः पय इति करांल्लेढि[छ] शशिन,
स्तरुच्छिद्रप्रोतान् बिसमिति[ज] करी संकलयति, ।

(क) अनुभूतस्मृतेरिति पु· ।
(ख) ०रवाणामिति पा· ।
(ग) समरिअ—इति, सुम्मरिअ—इति च पा· ।
(घ) ०संम्विदिति प्रायः ।
(ङ) तदित्यत्र नेति पु· ।
(च) निर्दिश्यत इति पु· ।
(छ) करान्लेढीति सर्वत्र प्राप्यते ।
(ज) बिसमिति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतान्ते तल्पस्थात् हरति वनिताप्यंशुकम्(क) इति,
प्रभामत्तश्चन्द्रो जगदिदमहो विभ्रमयति(ख) ॥

॥ १३२ ॥ (इति भ्रान्तिमान् ५३)

आक्षेप उपमानस्य, प्रतीप,मुपमेयता ।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धना ॥ १३३ ॥

अस्य प्रयोजनं निर्वाहयितुमुपमेयमेवाऽलमित्य ऽप्रयोजकतयो-पमानतया प्रसिद्धस्योपमेये तस्माद्विशेषविवक्षया ऽनादरार्थमुपमेयभावः कल्प्यते, तदुभयरूपं प्रतीपम्, उपमेयस्योपमाने प्रतिकूलवर्त्तित्वात्· तत्राद्यं· यथा—

लावण्यौकसि, सप्रतापगरिमण्य,ऽग्रेसरे त्यागिनां,
देव ! त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः, किमेष विहितः पूषा, किमुत्पादितं
चिन्तारत्नमऽहो,मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥

अत्र यथासङ्ख्यसत्त्वे ऽप्याक्षेप एव चमत्कारकारीत्याक्षेपोदाहरणमेतत् । द्वितीये तु क्वचिदुपमित्यनिष्पत्त्या तिरस्कारः, क्वचित्तु निष्पन्ना सैव तद्धेतुः· क्रमेणोदाहरणम्—

ए एहि दाव सुंदरि ! कण्णं दाऊण सुणसु वअणिज्जं, ।
तुज्झ मुहेण किसोअरि ! चंदो उअमिज्जइ जणेण ॥

अत्र मुखोपमानस्य शशिनः स्वल्पगुणत्वादुपमित्यनिष्पत्ति 'वअणिज्जं' इतिपदेन द्योत्यते, सैव च तिरस्कारहेतुः ।

गर्वमसंभाव्य(ग) मिमं लोचनयुगलेन वहसि किं मुग्धे !(घ) ।
सन्तीदृशानि दिशि दिशि सरस्सु ननु(ङ) नीलनलिनानि ॥

(क) ०प्यंशुकमिति पु· ।
(ख) विप्लवयतीति केषांचित्पाठे प्रश्नयतीतिवच्चाऽमधातुक्रिया द्रष्टव्या ।
(ग) ०मसंवाह्यमिति कुवलयानन्दस्थः पाठः ।
(घ) किं वहसि भद्रे !—इति कु० ।
(ङ) नवीति केचित्पठन्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र नलिनानां लोचनोपमेयीकरणमेवा ऽनादरहेतु,रुपमेयस्य न्यूनगुणत्वस्थितेः· अनयैव रीत्या तदपि प्रतीपं द्रष्टव्यम्· यत्तु समानगुणयोगाभावेनोपमानत्वाननुभवे ऽप्यर्थस्योपमानत्वकल्पना· कथमिति चेच्च, उपमानतिरस्कारस्यालङ्कारताबीजत्वात्· तच्च द्विधा सम्भवति, उपमानत्वेनैव प्रसिद्धस्योपमेयत्वकल्पनया असदृशत्वेन प्रसिद्धस्योपमानत्वकल्पनया वा· सूत्रं चोपलक्षणतया योज्यम्· उदाहरणम्—

अहमेव गुरुः सुदारुणानामिति हालाहल! मा स्म तात[क]! दृप्यः।
ननु सन्ति भवादृशानि भूयो भुवने ऽस्मिन्वचनानि दुर्जनानाम्॥

अत्र हालाहलस्य खलवचनोपमानत्वमसम्भाव्यमानमेवोपनिबद्धं तिरस्कारहेतुः॥ १३३॥ (इति प्रतीपम् ५४)

प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया।
ऐकात्म्यं बध्यते योगा,त्तत्सामान्यमिति स्मृतम्॥ १३४॥

अतादृशत्वेपि विवक्षितगुणसाम्यस्य प्रस्तुतस्या ऽन्येना ऽप्रस्तुतेन योगाद्यत्तैनैकात्म्यं बध्यते, तत्सामान्यं, समानगुणयोगात्· तत्रापरित्यक्तनिजगुणस्येत्यपि[ख] विशेषणं विवक्षितम्, अन्यथा तद्गुणालङ्कारे ऽतिव्याप्तेः· 'बध्यत' इत्यस्य प्रत्यायनमात्रमर्थो, नतु शाब्दं प्रतिपादनम्· उदाहरणे "अविभाव्यतां गता" इत्यादावैकात्म्यस्या ऽशाब्दत्वात्· उदाहरणम्—

मलयजरसविलिप्ततनवो नवहारलताविभूषणाः[ग]
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः।
शशभृति विततधाम्नि धवलयति धराम ऽविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियो ऽभिसारिकाः॥

अत्राभिसारिकाचन्द्रिकयोरैकात्म्यप्रतीतिः· क्वचित्प्रस्तुताप्रस्तुतयोरुत्तरकालीनविवेकादिना तदुच्चयनम्· यथा—

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि।
भृङ्गाः सहेलं यदि नापतिष्यन् को ऽवेदयिष्यन्नवचम्पकानि॥

(क) तात! मा स्मेति क्वचित्।
(ख) ०गुणस्यापीति पु०।
(ग) विभूषिता इति पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र भृङ्गपातानन्तरं भेदप्रत्ययो, नतु पूर्वमेव प्रतीतिः· ननु भृङ्गपातेन भेदप्रत्ययात् कथमेकात्मत्वप्रतीतिरिति चेत्, अत्र तथात्वेपि प्राथमिकाभेदप्रत्ययस्याऽनिरासात्, तस्य वृत्तत्वात् ॥ १३४ ॥ (इति सामान्यम् ५५)

विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः, ।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा, ॥ १३५ ॥
अन्यत् प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ।
तथैव करणं चे,ति विशेषस्त्रिविधो मतः ॥ १३६ ॥

स एव त्रिधा· तत्र प्रसिद्धमाधारं विनाऽऽधेयस्य विशिष्टावस्थितिर्यदभिधीयते, स एको विशेषः· तत्र प्रसिद्धमित्यनेनेदमुक्तं, यत्, अत्र(क) वास्तवमाधारत्वं न विवक्षितं, किन्तु कविप्रसिद्धिमात्रसिद्धमिति· अत एव तथैवोदाहरणम्—

दिवमप्युपयातानामाऽऽकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः, कथमिह(ख) कवयो न ते वन्द्याः ॥

अत्र कविरूपं प्रसिद्धमाधारं विना गिरां विशिष्टाऽवस्थितिरुक्ता । एकस्य वस्तुनो युगपद्या एकात्मा ऽनेकवृत्तिः, सा द्वितीयो विशेषः· एकात्मेति, एकेन स्वभावेनेत्यर्थः· एतच्च विशेषणं "मेकस्त्रिधा वससी" त्यादियथासङ्ख्यव्यावर्तनाय· अयुगपदिति पर्यायवारणाय· उदाहरणम्—

सा वसइ तुज्झ हिअए साव्व अच्छीसु साअ वअणेसु, ।
अह्मारिसाणं सुंदर! ओआसो कधं(ग) पावाणं ॥

स्पष्टम् । रभसेनान्यत् कार्यं कुर्वतः कर्तुर्यदशक्यस्यान्यस्यापि कार्यस्य तथैव करणं, स तृतीयो विशेषः· अत्र तथैवेति तेनैव प्रकारेणेत्यर्थः· (घ) एतच्च "धुनोति चासिं तनुते च कीर्त्ति" मित्यादिसमुच्चयव्यावर्त्तनाय· उदाहरणम्—

(क) यदत्रेति पु· ।
(ख) कथमिवेति पा· ।
(ग) कत्थमिति पु· ।
(घ) एतच्चेत्येकत्र नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजता ऽनवद्यविद्यम् ।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च (क) ॥

अत्रान्यस्य करणं शाब्दम्· क्वचित्तु व्यङ्ग्यम्· यथा–

गृहिणी, सचिवः, सखी मिथः, प्रियशिष्या ललिते कलाविधौ, ।
करुणाविमुखेन मृत्युना हरता त्वां, वद, किं न मे हृतम् ॥

अत्र 'किंच मे हृत' मिति सचिवादिसर्वहरणरूपकार्यकरणं व्यज्यते· (ख) नन्वाधारं विना वास्तवस्याऽऽधेयस्य व्यवस्थितिरनुपपन्नैव· एवमन्ययोर(ग)प्यनुपपत्तिरिति चेन्न, अतिशयोक्तिमालम्ब्य तथाभिधानात्· सर्वत्रैवंविधे विषये ऽतिशयोक्तिरेव प्राणायिता, तां विना प्रायशोऽलङ्कारत्वाभावात्·(घ) अत एवाहुः–

"सैषा सर्वत्र वक्रोक्ति,रनयार्थो विभाव्यते ।
यत्नो ऽस्यां कविभिः (ङ) कार्यः, कोऽलङ्कारो ऽनया विना" ॥

विभाव्यत इति, विशिष्टो भाव्यते चमत्कारविशेषविषयः क्रियत इत्यर्थः ॥ १३५ ॥ १३६ ॥ (इति विशेषः ५६)

स्वमुत्सृज्यगुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति, भण्यते स तु तद्गुणः ॥ १३७ ॥

अत्युत्कृष्टगुणस्याप्रस्तुतस्य योगात्तद्गुणसम्पदुपरागात्स्वकीयं रूपं तिरस्कृत्य प्रकृतं वस्तु यत्तदनुकारमेवासादयति, स तद्‌गुणो भण्यते, तस्याप्रस्तुतस्य गुणो ऽत्रेतिव्युत्पत्तेः· मीलिते वस्त्वन्तरेणाच्छादितस्य तस्यैव (च) वस्तुनः प्रतीतिः· अत्र त्वनाच्छादितस्वरूपस्यैव वस्त्वन्तरगुणापत्तिरिति ततो भेदः· उदाहरणम्–

(क) बृहस्पतिश्चेति पु· ।
(ख) व्यज्यत इत्येकत्र नास्ति ।
(ग) ०रनुपपन्नैवमेवमन्ययोरिति पु· ।
(घ) प्रायेणालङ्काराभावादिति पा· ।
(ङ) कविनेति पा· ।
(च) ०च्छादितस्यैवेति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥

अत्रातद्गुणद्वयं, रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया हरिन्मणीनां प्रकृष्टगुणत्वात्तद्रूपतया तत्प्रतीतेः · एतेन यत् केनचिद्व्याख्यातं 'स्वगुणत्यागानन्तरं पुनस्तत्प्राप्तिस्तद्गुण' इति· तदनादेयम्, तस्याप्रस्तुतस्य गुणोऽत्रास्तीतिव्युत्पत्तिकथनप्रकाशविरोधात्, तत्र गुणद्वयकथनेन च तद्गुणद्वयव्युत्पादना, "दाक्षे सीमन्तरत्न' इत्यादौ वक्ष्यमाणे सङ्करोदाहरणे तद्गुणत्वाभावप्रसङ्गाच्च· नहि तत्र त्यक्तस्य स्वकीयरूपस्याऽवाप्तिः ॥ १३७ ॥ (इति तद्गुणः ५७)

तद्रूपाननुहारश्चेदस्य स स्यादऽतद्गुणः ।

तदिति, प्रकृतेत्यर्थः· अस्य, अप्रस्तुतस्य· अत्युज्ज्वलगुणयोगेऽपि यदि न्यूनगुणोऽप्रकृतः प्रकृतस्य गुणं नानुहरति, तदाऽतद्गुणः· उदाहरणम्—

धवलोसि जहवि सुंदर! तहवि तुए मज्भ रंजिअं हिअअं, ।
राअभरिएवि हिअऐ सुहअ! णिहितो ण रत्तोसि ॥

अत्रातिरक्ते मनसि धृतस्याप्यरक्तत्ववचनादुत्तरार्द्धमेवोदाहरणम्· तत्र प्रकृतं हृदयं, सम्बोध्यस्त्वऽप्रकृतः, स्वहृदयवृत्तान्तनिवेदनस्यैव विवक्षितत्वात्· एवंचात्र सूत्रे तत्पदेन प्रकृतमिवाप्रकृतमप्युच्यते· तथाऽस्येत्यनेनाप्रकृतमिव प्रकृतमप्युपस्थाप्यते, सामान्यमुखप्रवृत्तत्वात्· तथाचाप्रस्तुतेन प्रस्तुतरूपाननुहरणवत् प्रस्तुतेनाप्रस्तुतरूपाननुहारोऽन्यप्र(क)कारः· यथा—

गाङ्गमम्बु सित,मम्बु यामुनं कज्जलाभ,मुभयत्र मज्जतः ।
राजहंस! तव शुभ्ररूपता चीयते, नचनचाऽपचीयते ॥

अत्रान्यापदेशपक्षे राजहंसस्याप्राकारणिकत्वं प्राकारणिकसत्पुरुषोपमानतयोपपादनीयम्· वाच्यमात्रविश्रान्तौ न काचिदनुपपत्तिः ॥ ऽ ॥
(इत्यऽतद्गुणः ५८)

यद्यथा साधितं केना,प्यपरेण तदन्यथा ॥ १३८ ॥

(क) अन्यः—इति पु० ०हारे ऽन्यः प्रकार इति पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथैव य[क]द्विधीयेत, स व्याघात इति स्मृतः ।

यथा येनोपायेन, तथा तेनोपायेनेत्यर्थः· तथा च,[ख] केनापि कर्त्रा यद्वस्तु येनोपायेन यथा साधितं, तदन्येन कर्त्रा जिगीषुणा तद्वस्तु[ग] तेनैवोपायेन ततोऽन्यथा चेत्साध्यते, स व्याघात इत्यर्थः, प्रथमसाधितवस्तुनो व्याहतिहेतुत्वात्· उदाहरणम्—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः, ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे[घ] वामलोचनाः ॥

अत्र दृशैव दाहो जीवनं च ॥ १३९ ॥ ऽ ॥

(इति व्याघातः ५९)

एवं शुद्धालङ्कारा दर्शिताः· अस्ति पुनः कश्चिद् विषयो, यत्राङ्गदादिसम्बद्धपद्मरागप्रमुखमणिमेलकवत् प्रोक्तानामलङ्काराणां संवलन एव चमत्कारः· तस्मात्सोऽप्यलङ्कारः· तत्र द्वयी गतिः, परस्परमनपेक्ष्य व्यवस्थितेस्तदभावाच्च· तत्र प्रथमा संसृष्टिरुच्यते, द्वितीया तु सङ्करः· सच[ङ]त्रिविध इति प्रकारचतुष्टयं लक्षयति—

सेष्टा[च] संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥ १३९ ॥

भेदः स्वरूपतो विषयतो वा परस्परमनपेक्षत्वम्· यद्वा, विषयभेदे सति परस्परानपेक्षत्वम्· स्थितिः, व्यवस्थितिः· एतेषां समनन्तरमेवोक्तानामलङ्काराणां भेदेन यत् स्थितिः, सा संसृष्टिरिष्टा· सङ्करभेदास्तु नैवम्, अङ्गाङ्गिभावे स्वरूपतः[छ] सापेक्षत्वा,दनिश्चये व्यवस्थितेरेवाभावाद्, व्यवस्थिते विषयतः परापेक्षत्वाद् विषयाभेदाच्च· सेयं शब्दालङ्कारमात्रस्या,ऽर्थालङ्कारमात्रस्य[ज] वा, शब्दार्थालङ्कारयोर्वेति त्रिप्रकारा· तत्राद्या यथा—

(क) तद्विति पु०, न तु युक्तम् ।
(ख) एकत्र "तथेत्येतावन्मात्र,च तु चकारोऽपीति ।
(ग) जिगीषुतया यद्वस्त्विति पु· ।
(घ) स्तुम इति पा· ।
(ङ) चो नास्त्येकत्र ।
(च) सैवेति प्रकाशेषु प्राय उपलभ्यते ।
(छ) स्वरूपसत इति पु· ।
(ज) अन्यत्रात्र वाकारो नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशाऽन्यया ॥

अत्रानुप्रासयमकयोः परस्परमनपेक्ष्य[क] व्यवस्थितिः· द्वितीया यथा—

लिम्पतीव तमोऽङ्गानि, वर्षतीवाञ्जनं नभः, ।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां[ख] गता ॥

अत्रोत्प्रेक्षोपमे परस्परमनपेक्ष्य व्यवस्थिते संसृष्टिं प्रयोजयतः । अन्त्या यथा—

सो णत्थि एत्थ गामे, जो एअं महमहन्तलावण्णं[ग] ।
तरुणाणं हिअअलुडिं परिसक्कंतिं णिवारेइ ॥

अत्रानुप्रासरूपके शब्दालङ्कारौ· नन्वनयोः शब्दार्थरूपाश्रयभेदेन कथमेकार्थसमवायलक्षणा संसृष्टिरिति चेत्, एकवाक्ये छन्दसि वा समवेतत्वात् ॥ १४० ॥

(इति संसृष्टिः ६०)

अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु, सङ्करः ।

तेषामेवालङ्काराणां चारुत्वार्थं स्वरूपनिष्पत्तये वा ऽन्योन्यापेक्षणादात्मन्यनासादितस्वतन्त्रभावानां यत्परस्परमनुग्राह्यानुग्राहकत्वं, स तु सङ्करः, सङ्कीर्यमाणस्वरूपत्वात्· उदा०—

आत्ते सीमन्तरत्ने, मरकतिनि हृते स्वर्णताटङ्कपत्त्रे,
लुप्तायां मेखलायां, झटिति मणितुलाकोटियुग्मे गृहीते, ।
शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन्! गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥

अत्र बिम्बोष्ठकान्त्या शोणमिति तद्गुणमपेक्ष्य गुञ्जाफलानां स्रज इति भ्रान्तिमानाऽऽत्मानं लभते· तद्गुणोऽप्यत्र न स्वातन्त्र्येण चमत्का-

(क) ०मनपेक्ष–इति पु· ।
(ख) ०र्विफलतामिति पा· ।
(ग) ०लाअण्णं इति पु· ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रविशेषं करोति, किन्तु भ्रान्तिमदपेक्षयेति परस्परमनुग्राह्यानुग्राहकभावः। अत्र द्वयोरलङ्कारयोः सङ्करः। बहूनामपि यथा—

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः।
परिप्रेङ्खत्तारापरिकरकपालाङ्किततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥

अत्र जटाभाभिर्भाभिरिति पितृवन इव व्योम्नीति चोपमा, कलङ्काक्षवलयेति[क] तारापरिकरकपालेति च रूपकं, वियोगिव्यापत्तेरिवेत्युत्प्रेक्षा,[ख] वैराग्यविशद इति श्लेषः। चत्वारोऽप्येते परस्परमङ्गाङ्गित्वेन प्रतीयन्ते। तत्रोत्प्रेक्षा श्लेषाङ्गं, तद्वशादेव वैराग्यविशद इत्यत्र द्वितीयार्थानुसन्धानम्। श्लेषश्च रूपकोपमयोरङ्गं, तद्वशावगतनिर्वेदमहिम्नैव जटाया अक्षवलयधारणस्य च सङ्गतेः। तारापरिकरकपाल इति रूपकं पितृवन इवेत्युपमाया अङ्गम्।[ग] तद्बीजं हि सादृश्यम्। न च श्मशाने व्योम्ना सह तत्सांहजिकं, किन्तु रूपितकपालाश्रयत्वेनैवेति सर्वत्र चाङ्गिनां[घ] चारुत्वार्थमङ्गापेक्षा पूर्ववदूहनीया। सर्वेषां चैषां[ङ] पार्यन्तिकचारुत्वहेतुरङ्गिभूता च समासोक्तिः, चन्द्रगतत्वेन महाव्रतिवृत्तान्तप्रतीतेः। सा च व्यक्तैवेति प्रकाशकृता नोक्तेत्यवधेयम्। ननु कलङ्काक्षवलयेति कथमेकान्ततो रूपकमुच्यते, उपमाया अपि सम्भवेन सन्देहसङ्करौचित्यादिति चेत्, रूपकपरिग्रहे करधृतत्वमेव साधकं प्रमाणमतः सन्देहस्याभावात्। कथमस्य साधकत्वमिति चेदित्थम्, करधृतत्वरूपविशेषणस्याक्षवलय एव सार्वत्रिकी प्रसिद्धिर्न तु कलङ्के। अतः प्राधान्येनाक्षवलयप्रतीतिरेवोद्देश्या। सा च रूपकपरिग्रहेणैव सम्भवति। तत्र तिरोहितकलङ्करूपमक्षवलयत्वमेव मुख्यतया ऽवगम्यते। नन्वेवमपि विशेषणमिदं न सम्यगेव,[च] चन्द्रपक्षे किरणेन कलङ्कधारणस्याभावात्.

(क) ०'वलय इतो'ति पु०।
(ख) ०व्यापत्तेरित्युत्प्रेक्षेति पु०।
(ग) ०पमायामङ्गमिति प०।
(घ) सर्वत्रैवाङ्गिनामिति पु०।
(ङ) चैषामित्येकत्र न।
(च) ०मिदमसम्यगेवेति पु०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूर्त्यैव तेन तद्धारणादिति चेन्न, श्लेषच्छायया हि कलङ्कस्याऽप्रधानस्य करधारणमसदेव प्रत्यासन्नतयोपचर्य योज्यते· तथा सत्युपमापरिग्रहे को दोष इतिचेत्, कलङ्कोऽङ्कवलयमिवेत्युपमायां कलङ्कस्य प्रधानत्वेन प्रतीतिः· नचास्य करधृतत्वं मुख्यतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात्· मुख्यविषयोपचारापेक्षया चाऽमुख्यविषयोपचार एव श्रेयानिति रूपकमेवाश्रीयते। शब्दालङ्कारयोरप्येष सङ्करो दृश्यत इति प्राञ्चः· उदाहरन्ति च[(क)]—

राजति तटीयमऽविरत-दानव-रासाऽतिपाति-साराव-नदा,।
गजता च यूथमऽविरत-दान-वरा-साऽतिपाति सारावनदा॥

इति· तत्र यद्यपि यमकानुलोमप्रतिलोम[(ख)]चित्रभेदयोर्न स्फुटं परस्परापेक्षित्वं, तथापि यमकनिर्वाहप्रवृत्तस्य कवेः पृथक्प्रयत्नानिर्वृत्ततयानुलोमविलोमस्योत्पत्तौ यमकापेक्षा· यमकस्य तु चारुतातिशये तदपेक्षता, तदाश्रयेणातिदुष्करतयाऽतिशयेन विदग्धमनोनुरञ्जकत्वादिति तेषामाशयः· वस्तुतस्तु, यमकनिर्वाह एव कविप्रवृत्तिरिति निश्चायकं नास्ति· अस्तु वा तथा,[(ग)]तथापि, यमकं न चित्रहेतुः, किन्तु पृथक्प्रयत्नः·[(घ)] तस्मादेकाश्रयानुप्रवेशेनैवायं सङ्करो, नत्वनुग्राह्यानुग्राहकतयेत्येव युक्तम्॥

एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः॥ १४०॥

न्यायः साधकप्रमाणता-दोषः प्रतिकूलता[(ङ)]ग्रहव्यवस्थितिः· यत्र द्वयोर्बहूनां वाऽलङ्काराणामेकत्र योग्यत्वेपि विरोधान्नैकदा व्यवस्थितिः· नचैकतरपरिग्रहस्य साधकं, तदितरपरिग्रहे बाधकं वास्ति, येन तदेव व्यवतिष्ठेत, सोऽनिश्चयरूपो द्वितीयः सङ्करः· सूत्रस्थचकारेण सङ्करस्यैवोपक्षेपणात्· उदा०

(क) उदाहरणमिति पु०।
(ख) ०विलोमेति पु०।
(ग) तथेत्येकत्र नास्ति।
(घ) किन्तु तत्प्रयत्न इति पु०।
(ङ) प्रतिकूलवार्गिति पु०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जह गंभीरो, जह रअणनिब्भरो, जह अ णिम्मलच्छाओ, ।
ता किं विहिणा एसो सरस(क)वाणिओ जलणिही न किओ ॥

अत्र किं समुद्रे प्रस्तुते श्लिष्टविशेषणमहिम्नाऽप्रस्तुत(ख)पुरुषविशेष-प्रतीतेरियं समासोक्तिः, किं वा उदधे(ग)रप्रस्तुतात् प्रस्तुतस्य पुरुषविशेषस्य तत्समानगुणतया प्रतिपत्तेरप्रस्तुतप्रशंसेति सन्देहः· एकस्यैकदा प्रस्तुताप्रस्तुतोभयरूपत्वाभावादनयो(घ)र्युगपदसम्भवो, न्यायदोषयोरसम्भवाच्च· अयं द्वयोः सङ्करः· बहूनां यथा—

नयनानन्ददायीन्दोर्बिम्बमेतत् प्रसीदति, ।
अधुना विनिरुद्धाशमऽविशीर्णमिदं तमः ॥

अत्र किं कामोद्दीपकः कालो वर्तत इति भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तं, किं वा एतदित्यस्य बिम्बपरामर्शकतया वदनस्येन्दुबिम्बत्वेनाध्यवसानादतिशयोक्तिः, किंवा एतदिति वक्त्रं निर्दिश्य इन्दुबिम्बरूपणा(ङ)द्रूपकम्· अथ प्रसीदत्यस्योभयत्रान्वयविवक्षायामेकतरस्य प्रकृतत्वाद्दीपकं, द्वयोरपि प्रकृतत्वे अप्रकृतत्वे वा(च)तुल्ययोगिता·(छ) किंवा प्रदोषवर्णने चन्द्रबिम्बस्य प्रकृतत्वे विशेषणसाम्यादाननप्रतीतौ समासोक्तिः· आहोस्विन्मुखनैर्मल्यवर्णनप्रस्तावाच्चन्द्रस्याप्रस्तुतत्वेनाऽप्रस्तुतप्रशंसेति सन्देहो, न्यायदोषयोरभावात्· यत्र तु तयोरेकतरस्यावतारस्तत्रैकतरनिश्चयान्न सन्देहः· तत्र "सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युति" रित्यत्र मुख्यत्वेन प्रतीयमाना हासद्युतिर्वक्त्र एवानुकूल्यं भजते, तत्रैव मुख्यतस्तत्सम्भवात् वक्त्रस्य प्राधान्येनावस्थितिरुपमायामित्युपमासाधकं,(ज) शशिनि तु नानुकूला, मुख्यतस्तत्र हासद्युतेरभावात्· नापि प्रतिकूला, गौणत्वेना-

(क) सुरसेति पु० ।
(ख) श्लिष्टविशेषणसामर्थ्यादप्रस्तुतेति पा० ।
(ग) अब्धेरिति पु० ।
(घ) अन्ययोरिति पु० ।
(ङ) रूपणवशादिति पु० ।
(च) वाकारोऽधिको नात्रास्त्येकत्र· ।
(छ) वाकारोऽस्त्येकत्र ।
(ज) साधकानीति. पु० न युक्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्युपपत्तेरिति न रूपकं प्रति साधिका बाधिका वा । "वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यत[क]" इत्यत्राऽपरत्वमिन्दावनुगुणं, मुखरूपेन्दौ सति किमपरोऽयमिन्दुर्नेतिप्रतीतेः· तथाप्रतीतिश्च·रूपकेणेति रूपकं प्रति साधकतां प्रतिपद्यते,—न पुनर्वक्त्रस्य प्रतिकूल,मिन्दुसमानगुणे वक्त्रे सति किमपर इन्दुरिति[ख] प्रतीत्या तत्राऽसङ्गत्यभावात्· अतो नोपमासाधकम्[ग] । "राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भर"मित्यत्रालिङ्गनमुपमायां बाधकं स्वामिसदृशं प्रति प्रेयसीप्रयुक्तस्य लिङ्गनस्यानौचित्यात्·नतु रूपके साधकम् । "पादाम्बुजं भवतु वो विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः"· इत्यत्र मञ्जीरशिञ्जितमम्बुजे प्रतिकूल, तत्राऽसम्भावा,दितो रूपके बाधकम्· नन्वेत[घ] दुपमासाधकमपि भवति,[ङ] पादेऽनुकूलत्वात्· तत्कथं रूपकबाधत्वमात्रमस्योच्यते, नतूपमासाधकत्वमिति· एवमन्यत्रापि यदेकत्रानुकूलं, तद्बाहुल्येन परत्र प्रतिकूलं, यच्चैकत्र प्रतिकूलं तत् तत एवान्यत्रानुकूल,मन्यथा तस्यैवासम्भवादिति चेत्, सत्यं, यस्य यथात्वमुत्कटं प्रतीयते, तत्र तस्य तथात्वव्यपदेशः· अत्र तु विध्युपमर्दिबाधकं साधकापेक्षयोत्कटत्वेन प्रतीयत इति तेनैव व्यपदेशो युक्तः· तदेतदुक्तं "विध्युपमर्दिबाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्त"रिति· अन्ये तु तदन्यथा व्याचक्षते—विधीयतेऽनेनेति विधिः, साधकम्· तदुपमर्दि,तस्माद्बलीयः· एतदुक्तं भवति—मञ्जीरशिञ्जितस्य पादे सम्भवमात्रेण न तावदुपमासाधकत्वं निर्वहति, यावदम्बुजे तद्विरहो न निश्चीयते· तथाच, तद्बाधकस्यैव प्राथमिकत्वात्तन्मुखेनैव व्यपदेशः· एवमन्यत्रापि साधकबाधकत्वं सुधीभिः परिभावनीयम् ॥

स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम् ।

व्यवस्थितं च—

(क) शीतांशुरुज्जृम्भत इति कुवलयानन्दस्थः पाठः ।
(ख) इन्दुरुदितइतीति पु० ।
(ग) नोपमाबाधकमिति पु० ।
(घ) नन्वेवं तदिति पु० ।
(ङ) भवतीत्येकत्र नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयः पदम्. तत्रैकत्र पदे(क) यदुभौ शब्दार्थालङ्कारौ स्फुटं व्यवस्थितौ भवतः, सोऽप्यपरः सङ्करः. उदा०—

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्बं
विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-
बद्धान्धकारमधुपावलि सञ्चुकोच ॥

अत्र पादत्रये प्रत्येकं रूपकानुप्रासौ प्रविष्टौ. शब्दार्थालंकृतीति प्रायोवादः, शब्दालङ्कारयोरप्येतद्दर्शनात्, यथा "कलकलो ऽलकलोलदृशान्त्यऽये"त्यादावनुप्रासयमकयोः ॥–॥

—तेनासौ त्रिरूपः परिकीर्त्तितः ॥ १४१ ॥

तस्मादनुग्राह्यानुग्राहकतया, सन्देहेन, एकपदप्रतिपाद्यतया व्यवस्थितात्वाच्च त्रिप्रकारो ऽयं सङ्करः कथितः. प्रकारान्तरेण न शक्यो व्याकर्त्तुं, भेदानामनन्तत्वात्. इति प्रतिपादिताः शब्दार्थतदुभयगतत्वेन(ख) त्रिविधा अलङ्काराः. ननु त्रिविधानामप्येषां काव्यशोभातिशयहेतुत्वस्य तुल्यत्वेपि कुत एष प्रतिनियमः, यत्(ग) कश्चिच्छब्दस्य, कश्चिदर्थस्य, कश्चिच्छब्दार्थयोरिति चेत्, उक्तमत्र प्रागेव दोषगुणालङ्काराणां शब्दार्थोभयगतत्वव्यवस्थायामन्वयव्यतिरेकावेव प्रभवतो, निमित्तान्तराभावात्. ततश्च यो ऽलङ्कारः शब्दार्थयोर्मध्ये यस्यान्वयव्यतिरेकावनुविधत्ते, स तदलङ्कार इति व्यवस्थाप्यते. शब्दान्वयव्यतिरेकानुविधायित्वं चैतदेव, यत्, शब्दस्य परिवृत्त्यसहत्वम्. नन्वेवं यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयभावाभावानुविधायित्वेनोभयालङ्कार,स्तथार्थशब्दहेतुकार्थान्तरन्यासप्रभृतयोऽप्युभयालङ्कारा भवेयुरिति चेत्,(घ) इष्टापत्तेः. एवं तर्हि कथमुभयालङ्कारप्रस्ता-

(क) पद इत्येकत्र नास्ति ।
(ख) शब्दार्थगततदुभयगतत्वेन ।
(ग) यः–इति पु. ।
(घ) चेन्नेति पु. ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वमुल्लङ्घ्याऽर्थमात्रप्रस्तावे पठिता इति चेत्, तत्रार्थवैचित्र्यस्य प्रकटतया प्रतिभासात्। अथ योऽलङ्कारो यदाश्रितः, स तदीय इत्येवकिञ्च विभाग इति चे,तथाकल्पनायामप्यन्वयव्यतिरेकावेव समाश्रयितव्यौ, तद्व्यतिरेकेणाश्रयाश्रयिभावस्य विशिष्टस्याभावात्। तस्मादलङ्काराणामन्वयव्यतिरेकनिबन्धन एव परस्परभेद इत्येव ज्यायः ॥ १४२ ॥ (इति संकरः ६१)

नन्वलङ्काराणां दोषाः प्राचीनैरभिहिता,स्ते किं न सन्त्येव, आहो स्वित्सम्भविनो ऽप्युपेक्षिताः। आद्ये, ऽनुभवविरोधः। अन्त्ये, न्यूनतेत्यत आह—

एषां दोषा यथायोगं सम्भवन्तो ऽपि केचन ।
उक्तेष्वन्तः पतन्तीति[क] न पृथक् प्रतिपादिताः ॥ १४२ ॥

तथाहि, अनुप्रासस्य तावत् त्रयो दोषाः, प्रसिद्ध्यभावो, वैफल्यं वृत्तिविरोधश्च। ते[ख] यथाक्रमं प्रसिद्धिविरहापुष्टार्थत्वप्रतिकूलवर्णत्वेभ्यो नातिरिच्यन्ते, तत्स्वभावत्वात्।[ग] तत्र प्रसिद्ध्यभावो यथा—

चक्री चक्रारपङ्क्तिं, हरिरपि च हरीन्, धूर्जटिर्धूर्ध्वजान्ता,-
न्ऽक्षं नक्षत्रनाथो, ऽरुणमपि वरुणः, कूबराग्रं कुबेरः, ।
रंहःसङ्घः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति, प्रीतिप्रसन्नोऽन्वहमऽहिमरुचेः सोऽवतात्स्यन्दनो वः ॥

अत्र चक्रिप्रभृतीनां कर्तॄणां चक्रारपङ्क्त्यादीनां कर्मणां प्रतिनियमेन स्तुतिरनुप्रासानुरोधेनैव निबद्धा, न पुनरितिहासादिषु प्रसिद्धेति प्रसिद्ध्यभावः। सोयं प्रसिद्धिविरोध एव । वैफल्यं यथा—

भण तरुणि रमणमन्दिरमानन्दस्यन्दि सुन्दरेन्दुमुखि! ।
यदि सल्लीलोल्लासिनि! गच्छसि, तत्किं त्वदीयं मे ॥

यथा वा—

(क) ०ष्वऽन्तर्भवन्तीतीति पा० ।
(ख) ते चेति पु० ।
(ग) तत्स्वभावादिति पु० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे! रणरणकमकारणं कुरुते ॥

अत्र वाच्यस्यार्थस्य(क)विचिन्त्यमानं न किञ्चिच्चारुत्वं प्रतीयत इत्यपुष्टार्थत्वमेवानुप्रासस्य वैफल्यमुच्यते । वृत्तिविरोधो यथा—"अकुण्ठोत्कण्ठये" त्यादि· अत्र शृङ्गारे पुरुषवर्णताडम्बरो गुणविवेचनप्रस्तावोक्तरीत्या विरुद्ध इति प्रतिकूलवर्णतैव वृत्तिविरोध इत्युच्यते ॥

यमकस्य तु पादत्रयगतत्वेन यमनम(ख)प्रयुक्तत्वमेव, कविभिस्तथाऽप्रयोगात्·

भुजङ्गमस्येव मणिः सदम्भा, ग्राहावकीर्णेव नदी सदम्भाः, ।
दुरन्तता निर्णयतेऽपि जन्तोः कर्षन्ति चेतः प्रसभं स-दम्भाः ॥

उपमायां तु यो न्यूनाधिकोपमानत्वे दोषौ, तत्रोपमाने उपमेयापेक्षया जातिगतं प्रमाणगतं वा यत् न्यूनत्वमधिकत्वं(ग) वा, तदनुचितार्थम्· धर्मगते न्यूनत्वाधिकत्वे यथाक्रमं न्यूनपदत्वाधिकपदत्वे· तत्र जातिगतं न्यूनत्वं यथा—चण्डाले(घ)रिव युष्माभिः साहसं परमं कृतम् । अत्र चण्डालत्वजातेर्न्यूनतया दुष्कर्मकारित्वव्यक्तेरनुचितार्थत्वम् । प्रमाणगतं यथा "वह्निस्फुलिङ्ग इव भानुरयं चकास्ति" । जातिगतमधिकत्वं यथा—

अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् स्रष्टा(ङ)विनिर्मित्सुरिव(च)प्रजाः ॥

ब्रह्मणः कल्पभेदेन भेदाद् ब्रह्मत्वं जातिः । प्रमाणगतमधिकत्वं यथा—

पातालमिव नाभिस्ते, स्तनौ क्षितिधरोपमौ, ।
वेणीदण्डः पुनरयं कालिन्दीपातसन्निभः ॥

(क) काव्यार्थस्येति पु· ।
(ख) यमनस्येति पा· ।
(ग) अधिकतेति पु· ।
(घ) चाण्डाले पु· ।
(ङ) वेधा इति पु· ।
(च) निर्मिमित्सुरिवेति पु· तु सर्वथाऽयुक्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एषु चण्डालादिभिरुपमानैरुपमेयभूता अर्था अत्यन्तमेव कदर्थिता, निन्दोपहासादिप्रतीतेरित्यनुचितार्थता । धर्मगतं न्यूनत्वं यथा—

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥

अत्रोपमेये मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मो न केनापि पदेन प्रतिपादितः· नचाक्षेपादिनापि स्पष्टं प्रतीयते, अविनाभावाद्यभावादिति न्यूनपदत्वमेव तत्(क) । धर्मगतमधिकत्वं यथा—

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवन्निशायां संसृज्यमानः शशिनेव मेघः ॥

अत्रोपमेये शङ्खाद्यनिर्देशादुपमाने तत्तुल्यशशिनो ग्रहणमतिरिच्यत इत्यधिकपदत्वमेवैतत् ॥ भिन्नलिङ्गत्वभिन्नवचनत्वे अप्युपमादोषौ नोक्तदोषातिरेकिणौ· तथाहि, लिङ्गवचनयोर्भेदे यद्युपमानोपमेययोः साधारणधर्मवाचकं पदमन्यतरघटितलिङ्गं कुर्या,त्तदैकतरस्यैव तद्धर्मसमन्वयावगतेः कथमुपमानिर्वाहः· अथ प्रतीयमानं साधर्म्यमाश्रित्येयं स्या,त्तथाप्युपात्तधर्मविशिष्टस्यैवोपमानत्वमुपमेयत्वं वा प्रतीयेत· नच तथा प्रस्तुतम्· अतः प्रक्रान्तत्वाभावात्(ख) भग्नप्रक्रमत्वमेव दोषः· यथा—

चिन्तारत्नमिव च्युतोसि करतो धिङ् मन्दभाग्यस्य मे ।

अत्र च्युत इत्युपमेयमात्रेणान्वीयते, पुँल्लिङ्गत्वात् । वचनभेदेन यथा—सक्तवो भक्षिता देव ! शुद्धाः कुलवधूरिव· अत्र शुद्धा इत्युपमेयमात्रेणाऽन्वीयते· लिङ्गभेदोऽत्र विद्यमानोप्यऽप्रधानम्, उपमानस्य बहुत्वे (ग) लिङ्गभेदेप्युभयान्वयसम्भवात्· यत्र तु लिङ्गवचनयोर्भेदेपि सामान्याभिधायि पदमुपात्तरूपभेदरूपं नापद्यते, किंतूपात्तेनैव रूपेणोभयत्रान्वेति, तत्र दोषत्वमेव नास्ति, उभयत्राप्यास्यानुगमयोग्यस्वभावत्वात्· तत्र लिङ्गभेदे

(क) न्यूनपदत्वमेवैतदिति पु॰ ।
(ख) प्रक्रान्तस्याभावादिति पु॰ ।
(ग) उपमानबहुत्व इति पु॰ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा—"गुणैरनर्घैः प्रथितो रत्नैरिव महार्णवः"। अत्र लिङ्गभेदेऽपि विशेषणान्वयस्याविशेषाद् (क)दोषत्वाभावः। वचनभेदे यथा—

तद्वेषो ऽसदृशो ऽन्याभिः स्त्रीभिर्मधुरताभृतः।
दधतेस्म परां शोभां तदीया विभ्रमा इव॥

अत्र वचनभेदेऽपि मधुरताभृत इत्यस्योभयान्वयाविशेषान्न दोषत्वम्। एवं कालपुरुषविध्यादिभेदेऽपि भग्नप्रक्रम एव दोष,स्तथाप्रतीतेरस्खलितरूपतया विश्रान्त्यभावात्। तत्र कालभेदे यथा—

अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती।
पश्चिमाद्यामिनीयामात् प्रसादमिव चेतना॥

अत्र चेतना प्रसादमाप्नोतीति प्रक्रान्तम्, नतु तमापेति कालभेदे प्रक्रमभेद एव। पुरुषभेदे यथा—

प्रत्यग्रमज्जनविशेषविविक्तमूर्त्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रबालविटपप्रभवा लतेव॥

अत्र लता विभ्राजत इति प्रस्तुतं, नतु विभ्राजस इति। तस्मात्पुरुषभेदः, सम्बोध्यनिष्ठस्य भ्राजनस्या(ख)ऽसम्बोध्यविषयतया ऽप्रतीतेः। विधिभेदे, यथा—"गङ्गेव प्रवहतु ते सदैव कीर्त्ति"रित्यादावप्रवृत्तप्रवर्त्तनात्मनो विधेर्भेदः, यतो गङ्गा प्रवहतीति विवक्षितं, नतु सा प्रवहत्विति। एवंविधस्यान्यस्यार्थस्योपमानगतस्यासम्भवाद्विध्याद्रिभेदो द्रष्टव्यः। ननूदाहृतेषु कथं दुष्टता भिन्नकालसभिन्नाद्धर्मादतिरिक्तमुपात्तं प्रतीतं वा किञ्चित्साधारणधर्ममुपादायोपमापर्यवसाने पश्चाद्भिन्नकालादिसम्भिन्नधर्मान्वयात्। तथाहि, विभ्राजस इत्यत्र विविक्तमूर्त्तेत्यादिना लतानायिकयोरुपमापर्यवसाने पश्चाद्विभ्राजसइत्यस्य नायिकान्वयेपि न दोषः। अथ यत्रोपात्तेनैव धर्मेणोपमानिर्वाहः, सच धर्मः कालभेदादिसम्भिन्न एव, तत्र

(क) ०न्वयस्या ऽपि विशेषादिति पु०।
(ख) भ्राजमानस्येति पुस्तकान्तरे तु भ्राजमानत्वस्येति त्वकारस्त्रुटितो द्रष्टव्यः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

का गतिः, यथा, "युधिष्ठिर इवायं सत्यं वदती"ति· युधिष्ठिरो हि सत्यमवादीत्तु वदतीति चेत्, उच्यते, तत्रापि सत्यवादीति प्रतीतधर्मेणैवोपमित्यव्याघातः नच तथा सति सत्यवाद्ययं सत्यं वदतीति पर्याप्तौ सत्यं वदतीति पुनरुक्तमिति वाच्यं, "रैपोषं पुष्णातीत्याद्यनुप्रयोगवददोषत्वात्· "रैपोष"मित्यत्रार्थव्यापनेन(क) पोषणस्येवात्राप्याजानिकसत्यवादित्वस्य प्रतीतेरिति· सत्यमात्थ, किन्तु स्थितेष्वनुप्रयोगेषु क्वचित्तथा पुनरुक्तिमात्रसमर्थनं, नतु सर्वैरेवस्त्वेवं, प्रस्तुतस्य रसादेः प्रतीतिस्खलनात्· नच तद ऽसिद्धं, सहृदयसंवेद्यत्वात्· किञ्च, उपात्तमनादृत्य प्रतीतेनोपमेति तुच्छम्, उपात्तक्रिययैव तद्विवक्षणात् ॥ असादृश्याऽसम्भवावप्युपमादूषणे अनुचितार्थ(ख)तायामेव पर्यवस्यतः· यथा—"ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम्·" अत्र काव्यस्य शशिना,ऽर्थानां च रश्मिभिः सादृश्यं न क्वापि प्रसिद्धमिति तत्रोपमानिबन्धनमनुचितार्थमिति।

निष्पेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः।
जाज्वल्यमाना इव वारिधारा दिनार्द्धभाजः परिवेषिणोऽर्कात् ॥

अत्रापि ज्वलदम्बुधारायाः सूर्यमण्डलान्निष्पतनमसम्भवीति तन्निबन्धनमनौचित्यं पुष्णाति ॥

उत्प्रेक्षायामपि(ग) ध्रुवेवादय एव शब्दा व्यङ्क्तुमुत्सहन्ते, नतु 'यथा'-शब्दोऽपि, केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं समर्थत्वात्· अत उत्प्रेक्षायां यथाशब्दोपादानोपादादवाचकत्वमेव· यथा—

उद्ययौ दीर्घिकामध्यान्मुकुलं मेचकोत्पलम्।
नारीलोचनचातुर्यशङ्कासङ्कुचितं यथा ॥

निर्विषयत्वमप्युत्प्रेक्षादूषणमनुचितार्थमेव· यत् तात्त्विकरूपाभावानिरुपाख्यप्रख्य,त्तसमर्थनाय यदर्थान्तरन्यासोपादानं तद्रूपं हि तत्· यथा—

(क) ऽर्थव्ययेनेति पु·।
(ख) दूषणेऽनुचितेति पु· तु न युक्तम्।
(ग) उत्प्रेक्षायामपीति पु·।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव(क) ॥

अत्र तमसस्त्रास एवासम्भवी, तमसोऽचेतनत्वात्· तत्कथं तत्प्रयुक्तमद्रिणा तत्परित्राणम्· उत्प्रेक्षितत्रासवत्तया प्रतीतस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनाय यत्नः ॥

यत्तु समासोक्तौ साधारणविशेषणबलादेवोपमानप्रतीतौ प्रयोजनाभावेन तदुपादानवैयर्थ्यं, तदपुष्टार्थत्वं पुनरुक्तता वा दोषः· यथा—

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया ।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरया(ख)ऽपि दिनश्रिया ॥

अत्र सदृशविशेषणबलेन लिङ्गविशेषपरिग्रहाच्च तिग्मरुचेर्नायकतया ककुभां तु नायिकात्वेन व्यक्तिः· तथा ग्रीष्मदिवसश्रियोऽपि तत एव प्रतिनायिकात्वप्रतीतिर्भविष्यतीति दयितयेत्यपुष्टार्थम्· अर्थतः प्रतीतस्य पुनरुपादाने यदि पुनरुक्तिस्तदाऽर्थपुनरुक्तिर्दोषः· नन्वस्यापुष्टत्वे श्लेषोपमा निर्विषया स्यादिति चेत्, सहि तस्य विषयो यत्रोपमानोपादानं विना श्लिष्टेष्वपि विशेषणेषु न स्फुटा प्रतिपत्तिः· यथा—

स्वयं च पल्लवाताम्रभास्वत्करविराजिनी(ग) ।
प्रभातसन्ध्येवाऽस्वापफललुब्धेहितप्रदा ॥

अत्र प्रभातसन्ध्याया अनुपादाने न स्फुटा प्रतीतिः ॥

अप्रस्तुतप्रशंसायामप्युपमेयस्योपादाने वैयर्थ्यं यत्, तदपुष्टार्थत्वमेव दोषः, तत्राप्युपमेयमऽनयैव रीत्याऽवगन्तव्यं, न पुनः शब्दप्रयोगेण दुष्टतान्वेयम्· यथा—

आहूतेषु विहङ्गमेषु मशको नाऽऽयान्पुरो वार्यते,
मध्येवारिधि वा (घ)वसंस्तृणमणिर्धत्ते मणीनां रुचम्, ।

(क) ०शिरसामतीवेति पाठस्तु नानापुस्तकोपलब्धत्वेऽप्यनर्हः ।
(ख) 'चिरया'स्थाने क्वचित्कुत्र पुस्तके 'प्रमुखे'—इत्युपकल्पितमास्ते ।
(ग) विराजितेति पा· ।
(घ) मध्ये वा धुरि वेति पाठान्तरं तु नातियुक्तार्थकम्· "पारेमध्ये षष्ठ्या वा" इति यङ्लुकि रूपम्, निवसन्नित्यर्थः" इत्युदाहरणचन्द्रिका· उत्तरत्रापिकारवदत्र वाकारः समुच्चायको भिन्नं पदमिति तु परे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां,
धिक्सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम् ॥

अत्राचेतसः प्रभोरुपमेयस्याऽप्रस्तुतनिष्ठसामान्यद्वारेण व्यक्तिसम्भवादयुक्तमेव शब्देन कथनमित्यपुष्टार्थत्वं पुनरुक्तता वेति ॥ तदेते ऽलङ्कारदोषा यथासम्भवमन्येष्वेवञ्जातीयकाः प्रोक्तजात्यन्तर्भाविता इति पृथङ्ग् प्रतिपादनमर्हन्तीति कल्याणमास्ताम् ॥ १४२ ॥

॥ सम्पूर्णमिदं काव्यलक्षणम् ॥

ज्येष्ठे सर्वगुणैः, कनीयसि वयोमात्रेण, पात्रे धियां,
गात्रेण स्मरगर्वखर्वनपरे, निष्ठाप्रतिष्ठाश्रये, ।
श्रीहर्षे त्रिदिवं गते, मयि मनोहीने च कः शोधये-
दत्राऽशुद्ध,मऽहो महंस्तु विधिना भारोऽयमारोपितः ॥ १ ॥

परिशीलयन्तु सन्तो मनसा सन्तोषशीलेन ।
इममद्भुतप्रदीपं, प्रकाशमपि यः प्रकाशयति ॥ २ ॥

दीपिकाद्वितयं कन्ये, प्रदीपद्वितयं सुतौ ।
स्वमतौ सम्यगुत्पाद्य गोविन्दः शर्म विन्दति ॥ ३ ॥

इति महामहोपाध्यायश्रीगोविन्दठक्कुरविरचिते(क) काव्यप्रदीपे ऽर्थालङ्कारनिर्णयो नाम दशम उल्लासः समाप्तिमगात् ॥

परिसमाप्तश्चायं
काव्यप्रदीपो नाम निबन्धः ॥

(क) इति श्रीमहोपाध्यायश्रीगोविन्दविरचिते–इति पु० 'विरचिते'स्थाने 'कृते' इति त्वन्यत्र ।

Dr. Urmila Sharma Collection, Varanasi

खड्गबन्धन्यासः । (२१४ पृष्ठे द्रष्टव्यः)



CC0. In Public Domain, Digitizagtion by eGangotri

मुरजबन्धन्यासः । (२१५ पृष्ठे द्रष्टव्यः)



पद्मबन्धन्यासः । (२१५ पृष्ठे द्रष्टव्यः)



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वतोभद्रन्यासः । (२१६ पृष्ठे द्रष्टव्यः)

र	सा	सा	र	र	सा	सा	र
सा	य	ता	त्त	त्त	ता	य	सा
सा	ता	वा	त	त	वा	ता	सा
र	त्त	त	स्त्व	स्त्व	त	त्त	र
र	त्त	त	स्त्व	स्त्व	त	त्त	र
सा	ता	वा	त	त	वा	ता	सा
सा	य	ता	त्त	त्त	ता	य	सा
र	सा	सा	र	र	सा	सा	र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ प्राकृतपद्यानां संस्कृतप्रतिच्छायाः ॥

पृष्ठे

११–मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया, ।
तद्भण किं करणीय,मेवमेव न वासरः स्थायी ॥

"–साधयन्ती सखि! सुभगं क्षणेक्षणे दूनाऽसि मम कृते, ।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया ॥

"–पश्य निश्चलनिस्स्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिष्ठिता शङ्खशुक्तिरिव ॥

उत्र–इति पश्येत्यर्थेऽव्ययम्·

२८–एतावन्मात्रस्तनिकैतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्थैतावन्मात्रैर्दिवसैः ॥

३०–अतिपृथुलं जलकुम्भं गृहीत्वा समागताऽस्मि सखि! त्वरितम्, ।
श्रमस्वेदसलिलनिश्वासनिस्सहा विश्राम्यामि क्षणम् ॥

३०–क्षीणच्छिद्रं दौर्बल्यं चिन्ता ऽलसत्वं सनिश्वसितम् ।
मम मन्दभागिन्याः कृते सखि! त्वामप्यहह परिभवति ॥

३१–तदा मम गण्डस्थलनमितां दृष्टिच नयस्य ऽन्यत्र, ।
इदानीं सैवाहं, तौ च कपोलौ, न सा दृष्टिः ॥

नमितां निहितामित्यर्थः णिमग्गंइतिपाठे निमग्नामिति च्छाया, अर्थः स एव ।

नुदत्य ऽनन्यमनाः श्वश्रूर्मां गृहभारे सकले ।
क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः ॥

३२–श्रूयते समागमिष्यति तव प्रियो ऽद्य प्रहरमात्रेण, ।
एवमेव किमिति तिष्ठसि, तत्सखि! सज्जय करणीयम् ॥

३२–गुरुजनपरवश प्रिय! किं भणामि तव मन्दभागिन्य ऽहम्, ।
अद्य प्रवासं व्रजसि व्रज, स्वयमेव श्रोष्यसि करणीयम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे

३३–श्वश्रूरत्र निमज्जत्य ऽत्राहं, दिवस एव प्रलोकय, ।
मा पथिक रात्र्यन्धक! शय्यायां मम निमङ्क्ष्यसि ॥

अत्ता–शब्दः श्वश्र्वां देशी ।

३५–तदा जायन्ते गुणा, यदा ते सहृदयैर्गृह्यन्ते, ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥

५९–पथिक! नात्र स्रस्तरोऽस्ति मनाक् (अपि) प्रस्तरस्थले ग्रामे ।
उन्नतपयोधरं प्रेक्ष्य यदि पुनर्वसति, तद्वस ॥

६०–अलसशिरोमणिर्धूर्तानामग्रिमः पुत्रि! धनसमृद्धिमयः ।
इतिजल्पितेन नताङ्गी प्रोत्फुल्लविलोचना जाता ॥

६१–केशेषु बलात्कृत्य तेन समरे जयश्रीर्गृहीता ।
यथा कन्दराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिताः ॥

"–गाढालिङ्गनरभसोद्यते दयिते लघु समपरति ।
मनस्विनीनां मानः पीडनभीतैरिव हृदयेभ्यः ॥

"–या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा ।
दर्शयति भुवनमण्डलमन्यदिव, जयति सा वाणी ॥

६३–ये लङ्कागिरिमेखलाभिस्खलिताः सम्भोगखिन्नोरगी-
स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम्, ।
त इदानीं मलयानिला विरहिणीनिश्वाससम्पर्किणो
जाता झटिति शिशुत्वे ऽपि बहलास्तारुण्यपूर्णा इव ॥

"–सखि! विरचय्य मानस्य मम धीरत्वेनाऽऽश्वासम् ।
प्रियदर्शनविशृङ्खलक्षणे सहसैव तेना ऽपसृतम् ॥

"–आर्द्रार्द्रकरजरदनक्षतैस्तव लोचनयोर्मम दत्तम् ।
रक्तांशुकं प्रसादः, कोपेन पुनरिमेनाक्रान्ते ॥

६३–महिलासहस्रभरिते तव हृदये सुभग! सा ऽमान्ती ।
दिवसमनन्यकर्मा ऽङ्गं तनुकमपि तनयति ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे

६५—खलव्यवहारा दृश्यन्ते दारुणा यद्यपि, तथापि धीराणाम्।
हृदयवयस्यबहुमता न खलु व्यवसाया विमुह्यन्ति॥

६८—तव वल्लभस्य प्रभात आसीदधरो म्लानकमलदलम्।
इति नववधूः श्रुत्वा करोति वदनं महीसम्मुखम्॥
गोशे=प्रभाते।

६८—रात्रिषु चन्द्रधवलासु ललितमास्फाल्य यश्चापम्।
एकच्छत्रमिव करोति त्रिभुवनराज्यं विजृम्भमाणः॥

६८—वार्यमाणो ऽपि पुनस्सन्तापकदर्थितेन हृदयेन।
स्तनभरवयस्यत्वेन विशुद्धजातिर्न चलत्यऽस्या हारः॥

६९—स शुद्धश्यामलाङ्गो धम्मिल्लः कलितललितनिजदेहः।
तस्याः स्कन्धाद्बलं गृहीत्वा स्मरः सुरतसङ्गरे जयति॥

"—नवपूर्णिमामृगाङ्कस्य सुभग! कस्त्वमसि, भण मम सत्यम्,।
का सौभाग्यसमग्रा प्रदोषरजनीव तवा ऽद्य॥

"—सखि! नवनिधुवनसमरे ऽङ्कपालीसख्या निबिड़या।
हारो निवारित एवोच्चरंस्ततः कथं रमितम्॥
"अङ्कपाली परीरम्भ" इति मेदनीकारः।

६९—प्रविशन्ती गृहद्वारं विवलितवदना प्रलोक्य पन्थानम्।
स्कन्धे गृहीत्वा घटं हा हा नष्ट इति रोदिषि सखि! किमिति॥

"—विशृङ्खलां त्वां सखि! कुटेन दृष्ट्वा तरलतरदृष्टि।
द्वारस्पर्शमिषेणाऽऽत्मा गुरुक इति पातयित्वा विभिन्नः॥
"घटः कुटनिपावस्त्री"त्यमरः।

७०—ज्योत्स्नया मधुरसेन च वितीर्णतारुण्योत्सुकमनाः सा।
वृद्धा ऽपि नवोढ़ेव परवधूरऽहह हरति तव हृदयम्॥

७१—रतिकेलिहृतनिवसनाकरकिसलयरुद्धनयनयुगलस्य।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितञ्जयति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे

७२–ग्रामीणाऽस्मि, ग्रामे वसामि, नगरस्थितिं न जानामि, ।
नागरिकाणां पतीन्हरामि, या भवामि सा भवामि ॥

७३–तेषां गुणग्रहणानां, तासामुत्कण्ठानां, तस्य प्रेम्णः ।
तेषां भणितानां सुन्दर! ईदृशं जातमवसानम् ॥
नवप्राघुणिका देवर! जायया सुभग! किमपि ते भणिता ।
रोदिति गृहपश्चाद्भागवलभीगृहे, ऽनुनीयतां वराकी ॥
पडोहरशब्दो गृहपश्चाद्भागे देशी· प्रतिवेशिवाचीति तु केचित् ।

८४–वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वत्याः ।
गृहकर्मव्यापृताया वध्वाः सीदन्त्य ऽङ्गानि ॥

८८–कस्य न वा भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्, ।
सभ्रमरपद्मघ्रायिणि! वारितवामे! सहस्वेदानीम् ॥

१०१–विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ॥
हरेर्दक्षिणनयनं रसाकुला झटिति मुद्रयति ॥
मुद्रयतीत्यर्थे ढक्केइ–इति प्राकृतम्· तत एव चाऽऽ-
र्यायां (हिन्दी) साम्प्रतं 'ढांकता है' इति भवति ।

१०२–भ्रम धार्मिक! विश्वस्तः स श्वा ऽद्य मारितस्तेन ।
गोदावरीनदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥

१३६–यः परिहर्तुं तीर्यते मनागपि न सुन्दरत्वगुणेन ।
अथ केवलं यस्य दोषः प्रतिपक्षैरपि प्रतिपन्नः ॥
तीर्यते नाम पार्यते शक्यतइति यावत्· 'पावर'शब्दः केवलार्थको देशी ।

१५७–कारयित्वा चौरं ग्रामवृद्धो स्नात्वा भुक्त्वा च ।
नक्षत्रं तिथिवारं ज्यौतिषिकं प्रष्टुं प्रस्थितः ॥
गामडलो, ग्रामवृद्धः मज्जिऊण, मङ्क्त्वा स्नात्वा, जेमिऊण,
जेमित्वा भुक्त्वा· चलिदो, चलितः प्रस्थितः ।

१७५–पुष्पोत्करं कलमभक्तनिभं वहन्ति
ये सिन्दुवारविटपा, मम वल्लभास्ते, ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे

ये गालितस्य महिषीदध्नः सदृक्षा-
स्ते किञ्च मुग्धविकचिलप्रसूनपुञ्जाः ॥

कूरशब्द ओदनार्थकोदेशी ।

विड्वाशब्दो विटपिप्रकृतिको वृक्षार्थकः प्राकृतः· यस्मादस्मात्सम्प्रति' बेरवा '—इति भवति, शाखार्थक एवेतित्वन्ये ।

१७६१–तदा जायन्ते गुणा, यदा ते सहृदयैर्गृह्यन्ते, ।
रविकिरणानुगृहीतानि भवन्ति कमलानिकमलानि ॥

१७७–भ्रमाम्यपहस्तितरेखो निरङ्कुशो ऽथ विवेकरहितश्च ।
स्वप्नेऽपि त्वयि पुनः, प्रतीहि, भक्तिं न प्रस्मरिष्यामि ॥

प्रोपसृष्टः स्मरतिर्विस्मृतिवचनो भवति· होमीति पाठे भवामीत्यर्थः ।

१८०–निभृतरमणे लोचनपथं पतिते सकलगुरुजनमध्ये ।
सकलपरिहारहृदया वनगमनमेवेच्छति वधूः ॥

महर्द्दीति बहुमन्यते वाञ्छतीत्यर्थः ।

१९१–चित्ते विघटते, न खिद्यते सा गुणेषु,
शय्यायां लुठति, विसर्पति दिङ्मुखेषु, ।
वाक्ये वर्त्तते, प्रवर्त्तते काव्यबन्धे,
ध्याने न त्रुट्यति चणं तरुणी प्रौढ़ा ॥

तरट्टीशब्दः प्रौढ़ावाची देशी· चणमित्यस्य स्थाने चिरमिति क्वचित् ।

२०८–मम देहि रसं धर्मे, तमोवशामाशां गमागमाद्धर नः, ।
हरवधु! शरणं त्वं, चित्तमोहो ऽपसरतु मे सहसा ॥

२२४–सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य ।
दृश्यते ऽथवा निशम्यते सदृशमंशांशमात्रेण ॥

२२६–गवेषयन्भ्रमिष्यसि कण्टककलितानि केतकीवनानि ।
मालतीकुसुमसदृशं भ्रमर! भ्रमन्नपि न प्राप्स्यसि ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे

ढुंढुंलन्तइति गवेषयन्नित्यर्थः· ढुंढुंशब्दं कुर्वाणइतित्वन्ये ।

२३१–तस्य रणान्तःपुरे करे कुर्वाणस्य मण्डलाग्रलताम् ।
रससम्मुख्य ऽपि सहसा पराङ्मुखी भवति रिपुसेना ॥

२३६–लब्ध्वा तव बाहुस्पर्शं यस्याः स को ऽप्युल्लासः, ।
जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बलानां सा ॥

२४२–अन्यत्सौकुमार्यं, मन्यैव कापि वर्त्तनच्छाया, ।
श्यामा सामान्यप्रजापते रेखैव न भवति ॥

लडहत्तणशब्दः सौकुमार्ये देशी· वर्त्तनं शरीरमिति महेश्वरः ।

२४३–कृपणानां धनं, नागानां मणिः, केसराः सिंहानाम्, ।
कुलपालिकानां स्तनाः, कुतः स्पृश्यन्ते ऽमृतानाम् ॥

२४८–ए! एहि किमपि कस्या अपि कृते भणाम्य,ऽलमथ वा, ।
अविचारितकार्यारम्भकारिणी म्रियतां, न भणिष्यामि ॥

२५४–सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः,
सह मणिवलयैर्बाष्पधारा गलन्ति, ।
तव सुभग! वियोगे तस्या उद्वेगिन्याः
सह च तनुलतया दुर्बला जीविताशा ॥

२६१–तन्नेयां श्रीसहोदररत्नाहरणे हृदयमेकरसम् ।
बिम्बाधरे प्रियाया निवेशितं कुसुमबाणेन ॥

२६६–हंसानां सरोभिः श्रीः सार्यते, ऽथ सरसां हंसैः, ।
अन्योन्यमेवाऽऽत्मानं गुरुकाः केवलं गरयन्ति ॥

सार्यते, साररूपा क्रियते· गरयन्ति, गुरुभूतं कुर्वन्ति ।

२६६–वाणिजक! हस्तिदन्ताः कुतो ऽस्माकं व्याघ्रकृत्तयश्च ।
यावल्लुलितालकमुखी गृहे परिसंक्रामति स्नुषा ॥

२६७–का विषमा, दैवगतिः· किं दुर्लभं, यज्जनो गुणग्राही· ।
किं सौख्यं, सुकलत्रं· किं दुःखं, यत्खलो लोकः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे

२६८–यस्यैव व्रणस्तस्यैव वेदना (इति) भणति जनस्तदलीकम्,
दन्तक्षतं कपोले वध्वा, वेदना सपत्नीनाम् ॥

२७४–करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य ।
संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ॥
पाञ्चजन्यस्येति षष्ठी "अधीगर्थे"ति ।

२७५–ए एहि तावत्सुन्दरि! कर्णौ दत्त्वा शृणु वचनीयम्, ।
तव मुखेन कृशोदरि! चन्द्र उपमीयते जनेन ॥

२७७–सा वसति तव हृदये, सैवाऽक्ष्णोः, सैव वचनेषु, ।
अस्मादृशीनां सुन्दर! ऽवकाशः कथं पापानाम् ॥

२७९–धवलोऽसि यद्यपि सुन्दर!,तथापि त्वया मम रञ्जितं हृदयम्,
रागभरिते (पूरिते) ऽपि हृदये सुभग! निहितो न रक्तोऽसि ॥

२८१–स नाऽस्त्यऽत्र ग्रामे, य एतां महमहितलावण्याम् ।
तरुणानां हृदयलुण्टाकीं परिसंक्रामन्तीं निवारयति ॥

२८४–यथा गम्भीरो, यथा रत्ननिर्भरो, यथा च निर्मलच्छायः, ।
तथा किं विधिनैव सरसपानीयो जलनिधिर्न कृतः ॥

॥ इति ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२१४	४	त्तयो	त्तयो-
,,	१०,११	खड्गा	खड्गा
,,	१२	खड्गाद्याकार	खड्गाद्याकार-
,,	१३	च्छब्दाज	च्छब्दाल-
,,	१६	खड्ग बन्धो	खड्गबन्धो
२१५	३	चतुर्दशवर्णा	चतुर्दश वर्णा
२१६	५	लोमा	लोमा-
२१७	२१	सव	सर्वं
२१८	३	अर्था	अथार्था
२१९	३	योग्यनुपयोगि	योग्यनुयोगि
२२०	१	वादि	वादि-
२२१	१०	सा	सा-
,,	२३	गम्भीर्य	गाम्भीर्य
२२२	२	स्वप्ने	स्वप्नेऽ-
,,	३	पतिका का॰	पतिका का-
,,	२१	ऽन्ये	ऽन्ये-
२२३	५	देशी यर्बहु	देशीयर्बहु-
,,	२४	मात्रन्वित	मात्रान्वित
२२४	४,५	'कव्वसेयत्र कव्वसमं सरिस' मित्यत्र गुणाण	'कव्वसे'त्यत्र 'कव्वसमं,' 'सरिस'मित्यत्र 'गुणाण'
,,	१६	चित्ततूर्णचारः	चित्तघूर्णभावः
२२५	६	चकरात्	चकारात्
२२७	६	लंपे	लोपे
२२८	२०	द्वाक्य	द्वाक्य-
२३०	१४	प्रद;	प्रदः,
२३२	२२	एवं	एवं-
,,	२४	तदेतद्धि	तदेतदिद्ध
२३४	२५	सहकरो	सहकारो
२३५	६	वशा चेयं	वशाचेयं
,,	२४	ऽप्रकृता	ऽप्रकृता
,,	,,	द्वयोक्तिः	द्वयोक्तेः
२३८	६	मन्यता	मन्थरता
२४०	२०	करत्वं	कस्त्वं
२४३	१४	नवाह्वे	तवाऽऽह्वे
२४६	१८	दक्षिप्त	दाक्षिप्त
,,	२५	तत्रे	तत्रै
२४७	७	पूर्वन्नत्	पूर्ववत्
,,	११	द्वादे स्तुल्या	द्वादेस्तुल्या
,,	,,	दक्षिप्ते	दाक्षिप्ते
२४८	३	भणिस्सं	भणिस्सं
,,	२७	वीयाय	वीर्याय
२४९	१४	चेनसि	चेतसि
२५१	१५	स्नेत्तं	स्नेह
२५२	१४	क्रौञ्चादिना	क्रौञ्चाद्रिणा
२५३	२	क्रियाया कर्म	क्रियायाः कर्म
२५३	८	डिभादेः	डिम्भादेः
,,	६	श्रितत्वा	श्रितत्व
,,	१८	सान	सानं
२५४	११	धानाम्	धानाम्॰
,,	१८	शाभनोन	शोभनो न
,,	२६	सुन्दरारायो	सुन्दराशयो
२५५	८	कनचि	कस्याच
,,	२३	प्रत्यच	प्रत्यक्षा
२५७	१७	प्रतीति	प्रीति
२६१	६	तीयन्व	तीयत्व
२६२	६	चेति रूप	चेतिरूप
,,	७	साधन	साधनं,
,,	८	मनु ाना ।	मनुमानात
,,	६	लहरी ला	लहरीचला
,,	१०	त ामी	तमसी
२६३	६	हृति	हूति
२६५	१४	भटो	भट्टो
२६६	७	कत्तु	कर्तुं
,,	६	तयोस्तुल्य- कक्षताविर- हात् न	द्वयोस्तुल्यकक्ष- ताविरहाच्च
२७०	७	क्वचि	किञ्चि
,,	८	बलवकारण	बलवत्कारण
,,	६	क्रियोफल	क्रियाफल
,,	१०	विरुद्धो	विरुद्धे
,,	२०	तमाललीला	तमालनीला
२७१	२२	तत्सुत्ये	तत्स्तुत्यै
,,	२३	विपद्य	विपद्यं
२७२	१०	वक्रमदृशा	वक्रसदृशा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२७२	२१	गति, रतीव	गति,रऽतीव
२७३	४	तय	तयो
,,	१२	पूर्वं	पूर्वंपूर्वं
२७४	११	॥ स्पष्टम्	स्पष्टम्
,,	२०	अग्निन,	अग्निन,-
२७८	२	स्फर	स्फुर
२७६	३	रुवा	रुचा
,,	८	दात्ते	दाऽऽत्ते
२८०	८	त्वम्य	त्वस्य
२८३	११	चोम	लोम
२८४	२०	एव । ल्यं	एवानुकूल्यं
,,	२१	रुपमा त्यु विम्बं	रुपमानुकूलेत्यु विम्ब-
२८६	४,५	विस्तीर्ण क- र्णिक	विस्तीर्णक- र्णिक
,,	६	मुखावतार-	सुखावतार-
,,	७	सचुकोच	संचुकोच
२८८	१७	रय चक्रस्ति"	रयं चकास्ति"

॥ इति ॥

(मात्रानुस्वारविसर्गाद्यस्पष्टमुद्रणकृताश्च काश्चनाऽशुद्धयः सुबोधा इति न न्यस्ताः) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi